

OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
Library Reg. No
INDIA.

A TRIENNIAL CATALOGUE OF MANUSCRIPTS

COLLECTED DURING THE TRIENNIUM

1916-17 TO 1918-19

FOR THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY

S. KUPPUSWAMI SASTRI, M.A.

CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, MADRAS

Prepared under the orders of the Government of Madras

Volume III.—Part 1—Sanskrit A

MADRAS
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS

1922

ADDENDA AND CORRIGENDA.

Page	Line	*For*	*Read*
2766	6	कूठस्थां	कूटस्थां
	12	श्रा.	श्री.
2795	5	कादम्बर्यादै	कादम्बर्यादौ
2804	27	मूर्त्युपास्सौ	मूर्त्युपास्तौ
2811	16	सूयशतर्कम्	सूर्यशतकम्
2813	6	Vaiṣṇavaite	Vaiṣṇava.
2828	31	nodu	upon
2846	13	श्रत्वा	श्रुत्वा
	32	Add "By Kēśava" after the word "end."	
2857	last	two	the first two.
2874	22	कङ्कणबन्धरामायणम्	कङ्कणबन्धरामायणम्, सव्याख्यानम्.
	23	Kaṅkaṇabandharāmāyaṇam	Kaṅkaṇabandharāmāyaṇam with Commentary.
2878	25	five	the first five.
2884	6	Add "By Vēdāntācārya of Mantsālgaṭṭai" after the word "Brāhmans."	
2895	24	Sōḍamāṁbā	Sōdamāṁbā.
2917	29	Vādikēśarin	Vādikēsarin.
2948	30	रामचन्द्रस्वामि	रामचन्द्राश्रम
2951	last	Vol. III	Vol. VIII.
2953	9	Aruāṇcala	Aruṇācala.
3003	3	Āśvinas	Aśvins.
	6	reviving	regaining.
3010	18	Foll.	Fol.
3013	21	223*b*	Fol. 223*b*
3014	22	Foll.	Fol.
3043	4	Foll.	Fol.
3053	1	5033	3053
3058	15	Foll.	Fol.
3065	26	Foll. 1*a*—20*a*.	Foll. 6*a*—26*b*. Foll. 1*a*—6*a* contain a portion of the Gōpālaratnākara.

Page	Line	*For*	*Read*
3066	22	काशे	कोणे
3075	20	Add "By Harirāmatarkālaṅkāra" after the word "ante."	
3077	28	बाधविषय:	बाधविचार:
3101	30	to be	to have been.
3130	21	ruler of Manna (Manva)	also called Ammanna.
3130	22	others	other works.
3132	4 & 5	कामान्तरालस्य	नामान्तरस्य.
3142	16	of Māgha	of the Māgha.
3164	19	found scattered.	dealt with here and there.
3175	14	Yajisarma	Yājulugāru.
3186	6	Registrar	Magistrate.
3236	22	पउञ्जिद्व्वो	पउज्जिदव्वो
3238	26	स्तम्भ.	स्तम्ब
3246	22	1217	1917
3247	2	शक्र	शुक्र.
	19	प्रकीतिता:	प्रकीर्तिता:
3256	10	लोकाक्षि	लौगाक्षि.
3278	15	सम्यक्	सम्यग्
3299	28	quotes	who herein proposes to renovate the work of Peddibhaṭṭa.
3306	12	Add at the end of the line the sentence "The Āśaucanirṇaya of Bhaṭṭōji and the Sapiṇḍīkaraṇanirṇaya of Lakṣmaṇa are incorporated herein."	
3397	16	Fol. 1*a*—57*a*. Foll. 57*b*.	Foll. 1*a*—57*a*. Fol. 57*b*.
3450	18	Pāṇḍava's	Pāṇḍavas.
3507	2	R. No 24 .	R. No. 2493.
	32	वन्द्यान	वन्द्यान्
	32	वीरष्ठान्	वरिष्ठान्
3508	3	सास्संग्रह	सारसंग्रह.
3579	2	Lificincidents	Life incidents.
3592	25	नधा	बौधा.
	27	कथ	कथं
3595	12	Sushucayarāya	Suṣucayarāya.
3642	5	the Goddess	Goddess.

Page	Line	For	Read
3686	8	*Insert* this between the lines 8 and 9 :— Beginning : श्रीशिव उवाच— राजचोरादिमृत्यूनां नाशनं जयवर्धनम् । ज्वररोगघ्नमापद्घ्नं मनुं वक्ष्यामि तत्त्वतः ॥	
3731	1	22603	2603
3806	31	rat	rats
3815	17	Udyōta	Uddyōta
3826	10	सम्पदम	सम्पदम्
3843	9	omit the word "the".	
3846	8	Siddhāntibhāṣya of Dēvasvāmin and the Commentary of Nārāyaṇa.	Commentaries of Dēvasvāmin Siddhānti Nārāyaṇa, etc.
3900	27	thi thard	the third
3924	21	Vidagdhamādhava	Vidyāmādhava.
3961	1	2965	2765.
3995	24	वीणावासवदनम्	वीणावासवदत्तम्
4009	5	Jñānapūrṇamuni	Lakṣmīdhara, son of Nṛhari.
4029	19	तन्तरे	तदन्तरे
4032	last	ख्यापयते	ख्यापयेत्
4038	10	खकु	खलु
4052	31	हरीशः	हरीशयोः
4054	9	क्रियत	क्रियते
	20	विष्वक्सेन	विष्वक्सेनं
	21	कारित्व	कारित्वं
4056	25	कतौ	कृतौ
4058	3	नो धात्वो	नोङ् धात्वो
4060	14	वक्तं	वक्तुं
4062	12	यद्रुक्तं	यदुरुक्तं
4063	3	(: क्लृप्ता)	(क्लृप्ता)
4064	29	Prince Gōdavarman	king Basavarāja.
4065	9	श्रत्वा	श्रुत्वा

Page	Line	For	Read
4081	12	भूतिक	भौतिक
	14	do.	do.
4086	17	Jaharasiṁha	Juhārasiṁha.
4088	27	शौर्योदार्य	शौर्यौदार्य
4095	29	पैत्र	पौत्र
4127	6	hief	chief.
4144	16	मृतहः त्	मृताहः स्यात्
	28	तन्न्यूनमाधकं	तन्न्यूनमाधिकं
4151	18	संस्करिष्य	संस्करिष्ये
4158	27	he	the
4161	20	*Add* the word "Dhātu" after the word "year"	
4163	3	Dātu	Dhātu.
	30	Śaṅkarācrāya	Śaṅkarācārya.

TABLE OF TRANSLITERATION.

—		Consonants	Semi-vowels, sibilants and aspirate.	Vowels.	Diph-thongs.
Gutturals	...	k kh g gh ṅ	h h	a ā	e ē ai
Palatals	...	c ch j jh ñ	y ś	i ī	
Linguals	...	ṭ ṭh ḍ ḍh n	r r̤ l̤ s	ṛ ṛī	
Dentals	...	t th d dh n	l ḻ s	ḷī	
Labials	...	p ph b bh m	v	u ū	o ō au

INTRODUCTION.

THE first part of the third volume of the Triennial Catalogue of Manuscripts is prepared on the same plan as that of the first two volumes, and as described in the introduction thereto. It similarly consists of three books, each dealing mostly with a year's collection. The number of the manuscripts and the pages of this part of the volume are in continuation of the similar part of the *second* volume. Attention is drawn below to a few of the important works described in this part of the catalogue.

Śuklayajussaṁhitābhāṣya.—The commentary on the first twenty Adhyāyas of the Kāṇva recension of the Śuklayajussaṁhitā with the commentary of Sāyaṇācārya has been published by the Chowkhamba Sanskrit Book Depot, Benares. But the manuscript described under No. 2396 (*a*) and (*c*) contains very many variations in readings and will be very useful in correcting the North Indian readings. The manuscript described under R. No. 2452 contains the commentary of Anantācārya for the Adhyāyas 21 to 30. The commentator makes an express statement that Mādhavācārya did not comment on the Adhyāyas 21 to 40, and that for this reason he wrote the commentary. It is for the same reason that he commented also on the Kāṇva recension of the Śatapatha Brāhmaṇa; and the manuscript described under R. No. 2396 (*b*) contains the commentary on the 13th Kāṇḍa called the Aṣṭādhyāyīkāṇḍa. It may be noted here that the Bibliotheca Indica published the Mādhyandina text of the Śatapatha Brāhmaṇa with the commentary of Sāyaṇācārya.

Namakārthaprakāśa Saṅgraha, 2163, and *Rudrasārasaṅgraha-vyākhyā* : *Rūdramīmāṁsā*, 2070, are commentaries on the fifth Praśna of the fourth kāṇḍa Taittirīyasaṁhitā of the Yajurvēda. They were written, unlike the commentaries of Bhaṭṭabhāskara and Sāyaṇācārya, from the Purāṇic and the later Vēdāntic standpoint. Abhinava Nṛsiṁhā rama, the author of the former work, refers to 17 Śākhas of the Vājasanēyasaṁhitā although the number usually given is fifteen; but unfortunately owing to a lacuna in the original manuscript the names of all the 17 Śākhas are not given. Nīlakaṇṭha, the

author of the latter commentary, interprets the hymns in reference to the Kāśikṣētra and the manifestation of God Śiva therein.

Similar sectarian commentaries on the *Puruṣasūkta* and the *Śrīsūkta* are described under No. 2299. The author of the latter commentary, Gōvindarājā, is no other than the celebrated commentator of the Rāmāyaṇa.

Under the Upaniṣads also, similar treatises of a sectarian character are described under *Atharvaśikhāvilāsa*, 2225, *Rājaśyāmalārahasyōpaniṣad*, 2245 (*b*), and *Saṅkarṣaṇōpaniṣad*, 2299 (*b*). The first declares the superiority of God Viṣṇu, the next deifies the Goddess Rājaśyāmalā and the last is evidently written in glorification of Rāmānuja.

Bṛhadāraṇyavṛttisaṁbandhōkti, 2755, by Viśvānubhava is a learned commentary worthy of notice.

Vēdatattvanirūpaṇa, 2359, is an interesting work relating to the controversy between the followers of the Taittirīyaśākhā and the Vājasanēyaśākhā of the Yajurvēda as to the genuineness and purity of the two recensions.

Kātyāyanaśulbasūtra with commentary, 2467.—The date of the commentary as given in the manuscript, viz., 1646 Vikrama agrees with the dates given in the Catalogus Catalogorum for the commentator's other works Mantramahōdadhi, 1589 A.D., and Viṣṇubhaktikalpalatāprakāśa, 1597 A.D. There is, however, some difference in the names of his parents and teacher between what is found in the work under notice and in the Catalogus Catalogorum.

Kāśikāvyākhyā : Prakriyāmañjarī, 2493.—This commentary follows, as stated by the commentator, the well-known Nyāsa of Jinēndrabuddhi so closely that in many places phrases and sentences of the latter are incorporated.

Sabdasāmrājya, 2445, is a treatise written, apparently on the lines of the Siddhāntakaumudī, for explaining the formation of words according to the Sūtras of the *Bhōjīyavyākaraṇa* entitled Sarasvatīkaṇṭhābharaṇa.

Nipātāvyayōpasargavṛtti, 2731, by Kṣīrasvāmin is a noteworthy treatise on indeclinable particles.

Six commentaries on the Bhāgavata which are not hitherto found in the Library are described. Of these *Amṛtataraṅgiṇī*, 2795, *Kṛṣṇapadī*, 2769, *Sajjanahitā*, 2164, and *Bhāgavatārthasāra*, 2149, are noteworthy.

Two new commentaries on the Adhyātmarāmāyaṇa, viz., *Bālabōdhinī*, 2794, and *Pratipadārthaprakāśikā*, 2381, herein described were written in comparatively recent times. Gōpālasūri, the author of the former, is said to have belonged to the Vandighaṭi family; another celebrated commentator of the same family being Sarvānanda who wrote the Ṭīkāsarvasva in the 15th century.

Bhaṭṭa'ivasvāmin's commentary on the Arthaśāstra of Kauṭilya has hitherto been the only commentary that was available for the elucidation of this ancient text and its unfamiliar technical expressions; and the Library copy of this commentary relates only to the Adhyakṣādhikaraṇa. The commentary Nayacandrikā described under No. 2403 is therefore very valuable, and it is unfortunate that the MS. secured covers only the Adhikaraṇas 7 to 12. The commentator is Mādhavayajvamiśra. It is noteworthy that Mādhavayajvamiśra is the name of a commentator on the Sētubandha described under No. 2772 and that the titles of the author, viz., वादिकविचूडामणि-महोपाध्याय occurring in the colophon are the same in both the works.

A number of treatises on Kāmaśāstra are described, and of them the following may be mentioned: *Kāmaprābhṛta*, 2727 (*a*) by Kēśava; *Kāmānanda*, 2727 (*b*) by Varadārya; *Raticandrikā*, 2727 (*c*); *Ratidarpaṇa*, 2889 by Harihara. Although this last is named Ratidarpaṇa, the colophon in this MS. according to the work is mainly the same as the Ratirahasya of Harihara which is described under No. 3899 of the Des. Cat. of San. MSS., Vol. VIII. From a comparison of the colophon found in the two works, it may be noted that the colophon given in the *Ratidarpaṇa* appears defective.

A number of important commentaries in the Mīmāṁsāśāstra is described in this Catalogue.

Dharmamīmāṁsāsūtrabhāṣyavyākhyā, 2767, is a commentary on the Śābarabhāṣya, by Gōvindāmṛtamuni.

Bālabhāskara, 2179, is a metrical summary of the Sūtras of Jaimini following the Bhāṭṭamata. *Ślōkavārtikavyākhyā*: *Ajitā*, 2818, by Ācāryasucaritamiśra; *Tantravārtikaṭīkā, Subōdhinī*, 2328 and 2847, by Annaṁbhaṭṭa; and *Tantraratna*, a commentary on the Ṭupṭīkā by Pārthasārathimi ra—these three commentaries on Kumārila Bhaṭṭa's works are valuable additions to the Mīmāṁsā section. In the Prābhākaramata, a commentary on the *Bṛhatī* of Prabhākara is described under No. 2682. It is called *Ṛjuvimalā* and was written by Sālikanātha, a well-known exponent of Prābhākara doctrines.

Vēdāntadēśika's *Sēśvaramīmāṁsā*, 2347 and 2776, interpret the Sūtras of Jaimini from the Vēdāntic (Viśiṣṭādvaita) standpoint.

In the *Mīmāṁsāsūtrabhāṣya*, 2695, Dēvasvāmin comments on the Sūtras of the Saṅkarṣaṇakāṇḍa.

Sāṅkhyasaptatiṭīkā : Jayamaṅgalā, 2423, a commentary on the Sāṅkhyakārikā of Īśvarakṛṣṇa by Śaṅkarācārya; and *Pātañjalayōgasūtrabhāṣyavivarṇa*, a commentary by Saṅkarācārya on the Bhāṣya of Vyāsa on the Yōgasūtras, are two noteworthy and interesting works.

Of the two series of commentaries on the Brahmasūtrabhāṣya of Śaṅkarācārya, the later series is represented by Bhāmatī, Kalpataru and Parimalā, the last of the series being written by Appayadīkṣita. *Parimalasaṅgraha*, 2811, by Tārakabrahmāśrama, is a summary of the extensive work Parimalā. *Bhēdadhikkāravivṛti*, 2187, by Kālahastiyajvan, a commentary on the Bhēdadhikkāra, by Nṛsiṁhāśrama. It is not known whether he is the same as the teacher saluted by Agnihōtrabhaṭṭa, the author of Tattvacintāmaṇyālōkasphūrti (R No. 1677 ante).

Bṛhaddharivaṁśa, 2424, *Bṛhatpāṇḍavapurāṇa*, 2727, *Āptaparīkṣā* and *Patraparīkṣā*, 2747, are some of the important Jaina works described herein.

The undermentioned Saṁhitas of the Vaikhānasa and Pāñcarātra Āgamas are interesting additions to the already known Saṁhitas relating to Śrī Vaiṣṇavism: *Bhṛgusaṁhitā*, 2692, *Hiraṇyagarbhasaṁhitā*, 2614, *Jayākhyasaṁhitā*, 2195, *Nāradīyasaṁhitā*, 2503. *Aṇavōpāyasūtrāṇi*, 2351 (c), is an important work throwing light on the principles of certain forms of Śaivism.

Siṁhasiddhāntasindhu, 2530, is an encyclopædic work on the Śākta religion and philosophy. In this connexion *Āmnāyavyākhyāna*, 2254, a commentary on the Śrīvidyāratnasūtra, and *Paraśurāmasūtravyākhyā*, 2689, by Rāmēśvara deserve special mention.

Arjunābhyudayavyākhyā, 2419.—The text Arjunābhyudaya is one of the few Mahākāvyas written on the Arjuna episodes of the Mahābhārata.

Sētubandhavyākhyā, 2772.—The commentator, Mādhavayajvan, has been already stated to be perhaps identical with the commentator on the Arthaśāstra. The 16th Āśvāsa herein given is found to be the same as the 15th in the printed text (in Kāvyamālā).

Subhadrāharaṇa by Nārāyaṇa is written after the model of the Bhaṭṭikāvya to illustrate the rules of Pāṇini's grammar. Gururāmakavi of the Mullandram family of poets and the author of the

Subhadrādhanañjaya and the *Ratnēśvaraprasādana* also wrote the *Hariścandracaritacampu*, 2083 (*a*).

Kalyāṇasaugandhikā, 2693.—Both in thought and in expression this work bears a striking resemblance to the Bhārata-plays alleged to have been written by Bhāsa.

Pādatāḍitaka, 2725 (*b*), dwells on the dark side of city life and the drawbacks of civilization. The author of the drama, Śyāmilaka, refers to Dattaka who is the author of the Vaiśikasūtras, and to Vararuci who is said to be a writer on rhetoric. The drama is quoted by Abhinavagupta, Kṣēmēndra, Vallabhadēva and Kuntala, the author of the *Vakrōktijīvita*. It is quite likely that Śyāmilaka is the same as Śyāmala, the teacher of Mahimabhaṭṭa (author of the Vyktivivēka).

Padmaprābhṛta, 2725 (*c*).—The author Śūdraka refers to Dattaka mentioned above, who is stated to have begun his work with the syllable Ōm. Dattakalaśī, one of the characters introduced in the drama, condemns the Kātantra school of grammarians as against the followers of Pāṇini. Another of the characters is Saṅghilaka, a Parivrājaka lover and she appears in the story of Śūdraka, narrated in the Avantisundarīkathā, as plotting to kill him. Vāmana refers to this author as a great poet.

Satyabhāmāpariṇaya, 2168.—Sphuliṅgakavi is the author whose father-in-law Aruṇagirinātha, is probably the same as the author of Acyutarāyābyudaya.

Vīṇāvāsavadattā, 2784, is a drama similar in plot, thought and expression to the *Pratijñāyaugandharāyaṇa* already published in the Trivandrum Sanskrit Series under the authorship of Bhāsa.

Kaumudīmahōtsava, 2766.—The author seems to have flourished in the court of Kalyāṇavarman, a king of Magadha. The restoration of this king to his kingdom which had been usurped by his father's general forms the main incident of the plot. This drama resembles the Mālavikāgnimitra, the Ratnāvalī, etc., in diction and thought. In the body of the work there are references to the mutual love between Avimāraka and Kuraṅgī (the hero and the heroine in the drama named Avimāraka) and to the fall of Sundarapāṭala and Kātyāyana the horses of Udayana and his knight, both of which names occur in the Vīṇāvāsavadattā. The Sūtras of Dattaka and of Ghōṇikāputra are also alluded to in the work.

Kādambarīnāṭaka, 2484, by Narasiṁha, brother of Viśvanātha, and son of Gaṅgādhara. The work is quoted in the Sāhityacintāmaṇi

which was written at the instance of Kōmaṭi Vēmabhūpāla of Koṇḍavīḍu. Probably Viśvanātha, the brother of the author, is the same as Viśvanātha, the author of the *Saugandhikāharaṇa* and the nephew of Agastyapaṇḍita (the author of the Bālabhārata). Agastya, Viśvanātha and Gaṅgādhara are, it may be noted, mentioned with respect by Gaṅgādēvī, the wife of Kaṁpa of Vijayanagar, in her Madhurāvijaya.

Sēvantikāpariṇaya, 2830.—Prince Mitravarman having been defeated by Gōdavarman, seeks refuge with Basavarāja who marries Sēvantikā, the daughter of Mitravarman. Cokkanātha, the author, went to the court of Basava, who was a ruler of the country, now known as South Kanara, and received presents from him. The author is spoken of highly by Nīlakaṇṭhadīkṣita and is also mentioned as a teacher by Rāmabhadradīkṣita, the author of the Jānakīpariṇaya.

Camatkāracandrikā, 2679.—King Śiṅgabhūpāla, for whose glorification the work was written, is said to have married a princess of the Kaliṅga country. Rasārṇavasudhākara is largely quoted in this work.

Kāvyādarśavyākhyā—Srutānupālinī, 2746.—As Kāvyādarśa is among the older works in Sanskrit poetics, this commentary is useful in elucidating the difficult portions of the text.

Alaṅkāramakaranda, 2285.—Kollūri Rājaśēkhara, the author of this work, appears to be identical with Sōmaśēkhara, the author of Sāhityakalpadruma, 2126 (a), who is also called Rājaśēkhara.

The commentaries on the *Daśarūpaka*, 2421, and on the *Sarasvatīkaṇṭhābharaṇa*, 2499, are useful works, both having been written by Bhaṭṭa Nṛsiṁha.

Commentaries on the Dhvanyālōkalōcana and on the Kāvyaprākāśa are also noteworthy and are very useful.

Abhinavabhāratī, 2478.—This commentary on the Nāṭyaśāstra of Bharata was written by the famous Abhinavaguptācāryā of Kashmir. It is a very important and valuable storehouse of information and quotes and criticises a host of previous commentators and authors.

Aumāpata, 2498, appears to be one of the oldest Sanskrit works in music.

Silpiratna, 2742, is an important work in architecture dealing with the construction and consecration of temples and the making of images. It is said to have been compiled from many authoritative works on the subject. The author whose name is not given is a disciple of Ṣadānanayati of Sētūrdhvakānana (Cirakkāḍu of Cochin

State) and refers to King Dēvanārāyaṇa as his patron. It is noteworthy that a grammatical work under the name of *Dēvanārāyaṇīya*, 2824, was written under the orders of the same king.

Uparāgadarpaṇa, 2136 (*a*), is a remarkable work and it gives the time of occurrence of all the solar and lunar eclipses during a period of 1020 years from 1507 A.D. which date is probably the time of the author Tippa.

Laghumānasa with commentary, 2741.—The commentator Sūryadēva gives elaborate and valuable information about the astronomical topics dealt with in the text. He also gives the names of his other works.

ALPHABETICAL SYNOPSIS OF SUBJECT HEADINGS.

[*Note.*—Reference is given to the pages of the subject index.]

SUBJECT INDEX

OF THE

WORKS DESCRIBED IN THE SANSKRIT PART OF THE TRIENNIAL CATALOGUE OF MANUSCRIPTS.

[*Note.*—The letters in column 2 are used with the following significance : C.C. means that no copy of the work is noticed in Aufrecht's Catalogues Catalogorum ; D.C. implies that the work has not appeared in any Descriptive Catalogue ; C.T implies that there are not more than three copies in the Catalogues Catalogorum ; L means that there were no copies in the Library ; P. means that the MS. contains a portion which was not in the Library ; T. means that there were not more than three copies in the Library.]

Saṁhitā and Brāhmaṇa.

The Black Yajurvēda.

The White Yajurvēda.

Vedic Literature—Miscellaneous ; Sūktas and Mantras,

Śrautasūtra.

Śrautakalpa.

Gṛhyastra.

R. NUMBER

8. *Prāyaścitta.*

9. *Prayōga.*

Arthaśāstra.

Kāmaśāstra.

Systems of Indian Philosophy.

Nyāya—A. Comprehensive Treatises.

Dvaita Philosophy.

Viśiṣṭādvaita Philosophy.

Vallabha Philosophy.

Devotional works.

Jaina Philosophy and Religion.

Religion—Śrīvaiṣṇavism.

			R. NUMBER
	Śaiva Philosophy.		
Āṇavōpāyasūtrāṇi	...	T.	2356 (*c*)
Brahmasūtra with Bhāṣya	...		2515
Brahamasūtravivaraṇa : Śivadarpaṇa	...	L.	2545
Caturvēdatātparyasaṅgraha with commentary	...	T.	2200
Īśvarapratyabhijñāsūtravimarśinī : Laghuvṛtti	...	L.	2696
Praṇavasāra with Telugu meaning	...	C.C. L.	509 (*a*) (of the Tel. Part) and 2645 (*a*)
Ratnatrayaparīkṣā with commentary	...	T.	2138 (*b*)
Śivādvaitanirṇaya	...	L.	2130 (*a*)
	Religion—Śaivism.		
Bāṇaliṅgalakṣaṇa	...	C.C. L.	2097 (*b*)
Caraliṅgapratiṣṭhā	...	C.C. L.	2739 (*a*)
Kāraṇāgama (Pratiṣṭhātantra)	...	T.L.	2097 (*a*)
Krīyākramadyōtikā	...		2104
Līlāvatī (Śaivāgama)	...	C.C. L.	2252
Mūlastambapurāṇa	...	C.C. L.	2791
Mūlastambapurāṇa with Telugu meaning	...	C.C. L.	512 (*a*) (of the Tel. Part)
Śaivōtsavavidhi	...	...	2102 (*a*), 2474
Siddhāntasārāvalī with commentary	...	T.	2085
Śivadharma	...	...	2442 (*a*), 2822 (*b*)
Śivadharmōttarakhaṇḍa	...	T.	2442 (*b*)
Śivālayanirmāṇasthāpanadīpikā	...	T.	2102 (*b*)
Śivaliṅgapratiṣṭhāvidhi	...	T.	2112 (*b*)
Śivaliṅgapūjāmahiman	...	C.C. L.	2574 (*b*)
Śivaliṅgārcana	...	C.C. L.	2458
Śivaliṅgasūryōdaya	...	C.C. L.	2282
Vaidikācāranirṇaya	...	C.C. T.	2220
	Śāktism.		
Brahmayā[illegible]ala	...	L.	2483
Cinmantramālinī	...	C.C. L.	2572 (*c*)
Kālaśaktivilāsa	...	C.C. L.	2112 (*a*)
Kāmakalā with commentary	...	...	2267 (*d*)
Kātyāyanītantra	...	...	2093 (*b*)
Laghupaddhati	...	D.C. L.	2573
Nityāṣōḍaśikārṇava with commentary	...	L.	2846
Nityōtsava	...	D.C. L.	2611
Nityōtsava with the commentary Rāmānandīya	...	C.C. L.	2243
Nityōtsavagrantha	...	T.	2462
Paramānandatantra	...		2257 (*d*), 2572 (*a*)
Prapañcadarpana	...	C.C. L.	2838
Rahasyāmnāya	...	C.C. L.	2109 (*j*)
Saṁvinmāhātmya	...	T.	2576
Saparyākalpavallī	...	T.	2103
Sarvāgamaratnākara	...	L.	1982, 2157
Siṁhasiddhāntasindhu	...	C.C. L.	2580

Mantrakalpa.

Praśaṁsāstōtra.

Śṛṅgārakāvya.

Anthology.

Biography.

History.

Kathā.

Mathematics and Astronomy.

Divination.

AUTHOR INDEX

OF THE

SANSKRIT PART OF THE TRIENNIAL CATALOGUE OF MANUSCRIPTS.

R. NUMBER

R. NUMBER

A TRIENNIAL CATALOGUE OF MANUSCRIPTS.

1916-17 TO 1918-19.

VOLUME III.

PART I—SANSKRIT—A.

R. No. **1943.**

Palm-leaf. $18\frac{1}{4} \times 1\frac{3}{8}$ inches. Foll. 110. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R.Ry. Bulusu Subrahmaṇyamgāru, Koṭivāriagrahāram, Amalāpuram taluk, Godavari district.

Foll. 60 and 110*b* are left blank.

ब्रह्मसूत्रभाष्यव्याख्यानम्—ब्रह्मविद्याभरणम्.

BRAHMASŪTRABHĀṢYAVYĀKHYĀNAM: BRAHMAVIDYĀBHARAṆAM.

By Advaitānanda. Same work as that described under R. No. 893 ante.

Almost complete in the Īkṣatyadhikaraṇa.

R. No. **1944.**

Palm-leaf. $15\frac{5}{8} \times 1\frac{1}{2}$ inches. Foll. 175. Lines, 7 in a page. Telugu. Fair.

Presented in 1916–17 by M.R.Ry. Bulusu Subrahmaṇyamgāru, Koṭivāriagrahāram, Amalāpuram taluk, Godavari district.

पञ्चपादिकाविवरणम्.

PAÑCAPĀDIKĀVIVARAṆAM.

By Prakāśātman. Same work as that described under No. 4667 of the D.C.S. MSS., Vol. IX.

Complete.

R. No. **1945.**

Palm-leaf. $14\frac{3}{4} \times 1\frac{3}{8}$ inches. Foll. 140. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R.Ry. Bulusu Subrahmaṇyamgāru, Koṭivāriagrahāram, Amalāpuram taluk, Godavari district.

अद्वैतदीपिका.

ADVAITADĪPIKĀ.

By Nṛsiṁhāśrama. Same work as that described under No. 4514 of the D.C.S. MSS., Vol. IX.

Contains the first two Paricchēdas only.

R. No. **1946**.

Palm-leaf. 16¾ × 1⅜ inches. Foll. 100. Lines, 8 in a page. Telugu. Fair.

Presented in 1916–17 by M.R.Ry. Bulusu Subrahmaṇyamgāru, Koṭivāriagrahāram, Amalāpuram taluk, Godavari district.

अद्वैतदीपिका.

ADVAITADĪPIKĀ.

By Nṛsiṁhāśrama. Same work as the above.

Contains the first Paricchēda complete and the second incomplete.

Name of the scribe: Bulusu Kṛṣṇa Śāstri. Date of copying: 5th day of the dark fortnight of the Adhikajyēṣṭha month in the year Kālayukti.

R. No. **1947**.

Palm-leaf. 17¼ × 1⅜ inches. Foll. 170. Lines, 7 in a page. Telugu. Fair.

Presented in 1916–17 by M.R.Ry. Bulusu Subrahmaṇyamgāru, Koṭivāriagrahāram, Amalāpuram taluk, Godavari district.

वैयाकरणसिद्धान्तमञ्जूषा.

VAIYĀKARAṆASIDDHĀNTAMAÑJŪṢĀ.

By Nāgēśabhaṭṭa. Same work as that described under No. 1489 of the D.C.S. MSS., Vol. III.

Contains from the Vidhyarthanirūpaṇa to the end.

The scribe adds—

श्रीमल्लेश्वरपण्डितेन्द्रचरणान्नत्वा पितृव्यान् गुरून्
पिन्नित्य्यन्वयवारिधौ समुदितः श्रीब्रह्मदेवाभिधः ।
मञ्जूषामलिखत्फणीन्द्रमतसंसिद्धार्थगर्भामिमां
श्रीमान्पर्वतपुत्रिकाप्रियसखः प्रीणातु तस्माच्छिवः ॥
विश्वावस्वभिधे वर्षे आषाढ्यां पूर्णतामगात् ।
लेखनं तु महाराष्ट्रलिपिमन्मातृतस्त्विदम् ॥

R. No. 1948.

Palm-leaf. $15\frac{7}{8} \times 1\frac{3}{8}$ inches. Foll. 49. Lines, 7 in a page. Telugu Fair.

Presented in 1916–17 by M.R.Ry. Bulusu Subrahmaṇyamgāru, Koṭivāriagrahāram, Amalāpuram taluk, Godavari district.

न्यायसिद्धान्तमञ्जरीव्याख्या—भावदीपिका.

NYĀYASIDDHĀNTAMAÑJARĪVYĀKHYĀ : BHĀVADĪPIKĀ.

By Kṛṣṇanyāyavāgīśa. Same work as that described under R. No. 1464 aute.

Breaks off in the Upamānakhaṇḍa.

R. No. 1949.

Palm-leaf. $17\frac{1}{4} \times 1\frac{3}{4}$ inches. Foll. 13. Lines, 7 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. Bulusu Subrahmaṇyamgāru, Koṭivāriagrahāram, Amalāpuram taluk, Godavari district.

तर्कसङ्ग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ.

By Annambhaṭṭa whose father's name is here given as Mēligiri instead of Tirumalārya. Same work as that described under No. 4154 of the D.C.S. MSS., Vol. VIII.

Complete with the following colophon :—

श्रीमहोपाध्यायश्रीम(द)द्वैतविद्याचार्यश्रीमद्राघवसोमयाजिकुलावतंसश्रीमन्मेलिगिरि आचार्यवर्यस्य सूनुना अन्नंभट्टेन कृता स्वकृततर्कसंग्रहस्य दीपिका सम्पूर्णा ॥

Name of the scribe : Ayyagāri Kāmanna.

R. No. 1950.

Palm-leaf. $17\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 22. Lines, 8 in a page. Telugu. Fair.

Presented in 1916–17 by M.R.Ry. Bulusu Subrahmaṇyamgāru, Koṭivāriagrahāram, Amalāpuram taluk, Godavari district.

भर्तृहरिसुभाषितम्.

BHARTṚHARISUBHĀṢITAM.

By Bhartṛhari. Same work as that described under No. 12080 of the D.C.S. MSS., Vol. XX.

Complete.

The colophon relating to the commentary is found given at the end apparently by mistake.

Colophon :

इति श्रीमत्परमयोगीन्द्रबृन्दमानसेन्दि(न्दि)रसन्दोहामन्दानन्दलाभाभिनन्दितरघुनन्दनचरणारविन्दमकरन्दास्वादकन्दलितसारस्वतेन अख(ण्डतपःप्र)चण्डमुनिप्रकाण्डमण्डलेश्वरशाण्डिल्यमहामुनिगोत्रपवित्रस्यावश्चान्ववायसुधापारावारपारिजातस्य धन्वन्तर्यवतारान्तरस्यायुर्वेदप्रमुखनिखिलदिव्या(विद्या)सारसर्वज्ञसार्वभौमस्य कोण्डोपण्डितवर्यस्य(तनू)जेन गङ्गाम्बिकागर्भरत्नाकरसुधाकरेण रामचन्द्रबुधेन्द्रेण विरचितायां सुभाषितत्रिशतीव्याख्यायां सहृदयानन्दिन्याख्यायां वैराग्यशतकवर्णनं संपूर्णम् ॥

R. No. **1951.**

Palm-leaf. $15\frac{1}{4} \times 1\frac{1}{8}$ inches. Foll. 24. Lines, 8 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. Bulusu Subrahmaṇyamgāru, Koṭivāriagrahāram, Amalāpuram taluk, Godavari district.

(*a*) तत्त्वचिन्तामणिः.

TATTVACINTĀMAṆIḤ.

Foll. 1*a*—10*b*. Foll. 11 and 12 are left blank.

By Gaṅgēśōpādhyāya. Same work as that described under No. 3984 of the D.C.S. MSS., Vol. VIII.

Contains the Śabdakhaṇḍa up to the Yōgyatāvāda.

(*b*) अमरुशतकम्, सव्याख्यानम्.

AMARUŚATAKAM WITH COMMENTARY.

Foll. 13*a*—24*b*.

Slightly different from the work described under No. 11921 of the D.C.S. MSS., Vol. XX. The commentator is Vēmabhūpāla.

Incomplete.

Beginning :

ज्याकृष्टिबद्धकटकामुखपाणिपृष्ठप्रेङ्खन्नखांशुचयसंवलितो मृडान्याः ।
त्वां पातु मञ्जरितपल्लवकर्णपूरलोभभ्रमद्भ्रमरविभ्रमभृत् कटाक्षः ॥

ज्याकृष्टेति—मृडान्याः भवान्याः कटाक्षः च(क्षु)षोरपाङ्गदर्शनम्, त्वां पातु रक्षत्वित्याशीर्वादः । कीदृक्कटाक्षः ? ज्याकृष्टिबद्धकटकामुखपाणिपृष्ठप्रेङ्खन्नखांशुचयसंवलितः ज्याकृष्टावबद्धः कटकामुखपाणिः कटकामुखो नाम धनुरा-

कर्पणहस्तविशेषः (तर्जनीमध्यमामध्ये पुङ्खोऽङ्गुष्ठेन पीड्यते । यस्मिन्ननामिका-योगात् स हस्तः कटकामुखः) । तस्य पृष्ठः पश्चाद्भागः तस्मिन् प्रेङ्खन्तश्चलन्तः नखानामंशवः तेषां चयः समूहः तेन संवलितः मिश्रितः ।

End:

मनोपरोध(रथोप)रचितप्रासादवापीतटक्रीडाकाननकेलिकौतुकजुषां मनो-रथेन अभिलाषेण उपरचिता निर्मिताः प्रासादाः तेषु च वाप्यः तासां तटे समीपे क्रीडार्थानि विहारार्थानि काननानि उद्यानवनानि तेषु केल्या क्रीडया यत्कौतुकं कु.

R. No. 1952.

Palm-leaf. 18 × 1½ inches. Foll. 100. Lines, 8 in a page. Telugu. Fair.

Presented in 1916-17 by M.R.Ry. Bulusu Subrahmaṇyamgāru, Koṭi-vāriagrahāram, Amalāpuram taluk, Godavari district.

(*a*) तर्कभाषाव्याख्या—चेन्नुभट्टीया.

TARKABHĀṢĀVYĀKHYĀ: CENNUBHAṬṬĪYĀ.

Foll. 1*a*—77*b*.

By Cennubhaṭṭa, son of Sarvajña Viṣṇudēvārādhya and brother of Sarvajña and patronized by Hariharamahārāja. Same work as that described under No. 4126 of the D.C.S. MSS., Vol. VIII.

Complete.

Colophon:

इति श्रीहरिहरमहाराजपरिपालितेन सहजसर्वज्ञविष्णुदेवाराध्यतनूजेन सर्व-ज्ञानुजेन चेन्नुभट्टेन विरचितायां तर्कभाषाप्रकाशिकायां प्रमेयादिपरिच्छेदः समाप्तः॥

(*b*) तर्कभाषाव्याख्या—भावार्थदीपिका.

TARKABHĀṢĀVYĀKHYĀ: BHĀVĀRTHADĪPIKĀ.

Foll. 78*a*—100*a*. Fol. 100*b* is left blank.

By Gaurīkānta. Same work as that described under No. 4134 of the D.C.S. MSS., Vol. VIII.

Incomplete.

R. No. 1953.

Palm-leaf. 15¾ × 1⅜ inches. Foll. 50. Lines, 5 in a page. Telugu. Fair.

Presented in 1916-17 by M.R.Ry. Bulusu Subrahmaṇyamgāru, Koṭivāriagrahāram, Amalāpuram taluk, Godavari district.

शास्त्रदीपिकाव्याख्या— मयूखमालिका.

ŚĀSTRADĪPIKĀVYĀKHYĀ : MAYŪKHAMĀLIKĀ.

By Sōmanātha. Same work as that described under No. 4501 of the D.C.S. MSS., Vol. IX.

Contains the 4th Pāda of the 1st Adhyāya only.

R. No. 1954.

Palm-leaf. $17\frac{7}{8} \times 1\frac{1}{2}$ inches. Foll. 295. Lines, 9 in a page. Telugu. Injured.

Presented in 1916–17 by M.R.Ry. Pappu Subbārāyaḍugāru, Pērama Agrahāram, Amalāpuram taluk, Godavari district

शास्त्रदीपिकाव्याख्या— मयूखमालिका.

ŚĀSTRADĪPIKĀVYĀKHYĀ: MAYŪKHAMĀLIKĀ.

Same work as the above and R. No. 1780(*c*) ante.

Contains the Adhyāyas 6 to 12 complete ; but wants in the beginning the first three Sūtras of the first Pāda in the 6th Adhyāya.

R. No. 1955.

Palm-leaf. $18 \times 1\frac{5}{8}$ inches. Foll. 69. Lines, 9 in a page. Telugu. Injured.

Presented in 1916–17 by M.R.Ry. Pappu Subbārāyaḍugāru, Pērama Agrahāram, Amalāpuram taluk, Godavari district.

शास्त्रदीपिकाव्याख्या—न्यायकर्पूरवार्तिका.

ŚĀSTRADĪPIKĀVYĀKHYĀ ; NYĀYAKARPŪRAVARTIKĀ.

By Rājacūḍāmaṇidīkṣita. Same work as that described under No. 4497 of the D.C.S. MSS., Vol. IX.

Contains the 9th Adhyāya complete, and 11th Adhyāya breaking off in the 2nd Pāda.

Beginning :

यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तः तदर्थत्वात्॥

वृत्तवार्तिष्यमाणलक्षणयोः हेतुहेतुमद्भावलक्षणां सङ्गतिं दर्शयन् लक्षणार्थविचारं प्रतिजानीते—सिद्ध इति ।

ऊहस्य अतिदिष्टप्रयाजादिविषयताभ्रमं वारयितुमूहादिविषयान् परिगणय्य दर्शयति—मन्त्रेति । यद्यपि साम्नामृक्संस्कारतया संस्कारग्रहणेनैवग्रहणं संभवति, तथापि वक्ष्यमाणस्य सामोहस्य अवघाताद्यूहविलक्षणत्वात् पृथगुपादानमिति ध्येयम् ॥

*　　*　　*　　*

ननु एवमपि तृतीयायाः का गतिरित्यत आह—तृतीयेति । साप्यर्थप्राप्तिकरणत्वसम्बन्धानुवादिनीत्यर्थः । शिष्यबुद्धिसौकर्यार्थमेतस्मिन्नध्याये प्रतिपादितमुत्तरास्मिन्नध्याये प्रतिपादयिष्यमाणश्चार्थं श्लोकेन सङ्गृह्णाति—प्रकृतार्थेति ॥

Colophon:

इतिश्रीचूडामणिदीक्षितकृतौ नवमस्याध्यायस्य चतुर्थः पादोऽध्यायश्च समाप्तः॥

प्रयोजनाभिसम्बन्धात्पृथक्सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात् ॥

वृत्तानुकीर्तनपूर्वकं दशमैकादशलक्षणयोस्सङ्गतिं दर्शयति—दशम इति, 'शरमयं बर्हिस्तृणाति' इत्यादिवैकृतविधिविहितैः ।

End:

सूत्रार्थस्तु तुल्यकालानामेकफलतया - सहक्रियमाणानां कर्मणामगृह्यमाणविशेषत्वात् द्रव्यदेवताभेदाभावेन विशेषाग्रहाद्यौगपद्यं व्याख्यातमिति ॥

Colophon:

इति श्रीचूडामणिदीक्षितीये ११. प्रथमः पादः ॥

एकदेशकालकर्तृत्वं मुख्यानामेकशब्दोपदेशात्स्यात् ॥

पूर्वस्मिन्पादे फलकरणयुक्तया भावनया संबध्यमानानामङ्गानां तन्त्रता चिन्तिता। अत्र अस्मिन् पादे तु फलकरणेतिकर्तव्यतायुक्तया भावनया संबध्यमानानामङ्गानां चातन्त्रता प्राधान्येन चिन्त्यते ।

*　　*　　*　　*

स्पष्टः । तथा स्यादध्वरकल्पायां (ल्पाष्टौ)विशेषस्य एककालत्वात् ।

R. No. 1956.

Palm-leaf. 17⅛ × 1⅜ inches. Foll. 168. Lines, 7 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. Pappu Subbārāyaḍugāru, Pērama Agrahāram, Amalāpuram taluk, Godavari district.

ब्रह्मसूत्रभाष्यव्याख्या--श्रुतप्रकाशिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ: ŚRUTAPRAKĀŚIKĀ.

By Sudarśanasūri. Same work as that described under No. 4963 of the D.C.S. MSS., Vol. X.

Breaks off in the Ānandamayādhikaraṇa but wants the beginning in the Jijñāsādhikaraṇa.

R. No. **1957.**

Palm-leaf. 17 × 1⅛ inches. Foll 46. Lines 7 in a page. Telugu. Good

Presented in 1916–17 by M.R.Ry. Pappu Subbārāyaḍugāru, Pērama Agrahāram, Amalāpuram taluk, Godavari district.

तत्त्वचिन्तामणिव्याख्या—फक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ: PHAKKIKĀ.

By Madhurānāthatarkavāgīśa. Same work as that described under No. 4022 of the D.C.S. MSS., Vol. VIII.

Wants the beginning and the end in the Anumānakhaṇḍa.

R. No. **1958.**

Palm-leaf. 15⅞ × 1⅛ inches. Foll. 22. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R.Ry. Pappu Subbārāyaḍugāru, Pērama Agrahāram, Amalāpuram taluk, Godavari district.

ललितासहस्रनामभाष्यम्—सौभाग्यभास्करः.

LALITĀSAHASRANĀMABHĀṢYAM: SAUBHĀGYA-BHĀSKARAḤ.

By Bhāsurānanda alias Bhāskararāya. Same work as that described under R. No. 332 ante

Incomplete.

R. No. **1959.**

Palm-leaf. 15⅝ × 1⅛ inches. Foll. 78. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R.Ry. Pappu Subbārāyaḍugāru, Pērama Agrahāram, Amalāpuram taluk, Gōdāvari district.

Foll. 42*a* and 52*a* are left blank.

उपदेशसाहस्री, सव्याख्या.

UPADĒŚASĀHASRĪ WITH COMMENTARY.

The commentary is by Bōdhanidhi. Same work as that described under No 4565 of the D.C.S. MSS., Vol. IX.

Wants some portion of the prose in the beginning and the end, but the metrical p tion is complete.

R. No. **1960.**

Palm-leaf. 16½ × 1¼ inches. Foll. 50. Lines, 6 in a page. Telugu. Fair.

Presented in 1916–17 by M. R. Ry. Pappu Subbārāyaḍugāru, Pērama Agrahāram, Amalāpuram taluk, Godavari district.

काव्यप्रकाशः.

KĀVYAPRAKĀŚAḤ.

By Mammaṭa. Same work as that described under No. 12816 of the D.C.S. MSS., Vol. XXII.

Breaks off in the 10th Ullāsa.

R. No. **1961.**

Palm-leaf. 16⅛ × 1⅜ inches. Foll. 110. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R.Ry. Chāvala Mahādēva Śāstrigāru, Billakuṟṟu, Amalāpuram taluk, Godavari district.

अग्निष्टोमप्रयोगः.

AGNIṢṬŌMAPRAYŌGAḤ.

Fol. 35*b* is left blank.

Same work as that described under Nos. 1121 and 1122 of the D.C.S. MSS., Vol. II.

Contains the ritualistic procedure of the Agniṣṭōma-sacrifice as dealt with in Praśnas 10 to 14 of the Āpastambaśrautasūtra.

R. No. **1962.**

Palm-leaf. 18¾ × 1½ inches. Foll. 100. Lines, 7 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. Peddinṭi Śivaprasāda Śāstrigāru of Sākuṟṟu, Godavari district.

(*a*) न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKAPRAKĀŚIKĀ.

Foll. 1*a*—95*a*. Fol. 95*b* is left blank.

By Śrīkanṭha. Same work as that described under Nos. 4223 and 4224 of the D.C.S. MSS., Vol. VIII.

Contains the Śabdakhaṇḍa only without the beginning.

(b) सङ्गीतमातङ्गीमहामन्त्रः.

SAṄGĪTAMĀTAṄGĪMAHĀMANTRAḤ.

$16\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 96.

Same work as that described under No. 7469 of the D.C.S. MSS., Vol. XIV.

Complete.

Foll. 97a—100b contain a few passages of Tarkaviṣaya.

R. No. **1963.**

Palm-leaf. $15\frac{3}{4} \times 1\frac{1}{8}$ inches. Foll. 58. Lines, 6 in a page. Grantha. Good.

Presented in 1916-17 by M.R.Ry. Vaḍlamāni Gōpālakrishnamagāru, Indupalli, Godavari district.

दर्शपूर्णमासप्रयोगः.

DARŚAPŪRṆAMĀSAPRAYŌGAḤ.

Same work as that described under No. 1088 of the D.C.S. MSS., Vol. II.

The Prayōga herein closely follows the Śrautasūtra of Āpastamba Praśnas 1 to 4.

Name of the scribe : Kṛṣṇasvāmi.

Date of transcription : Friday, the 3rd of the month of Tulā in the year Viśvāvasu. Place of transcription : Gaurī Māyūram.

R. No. **1964.**

Palm-leaf. $16\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 118. Lines, 5 in a page. Telugu. Slightly injured.

Presented in 1916-17 by M.R.Ry. Rāyaprōlu Rāmabrahmangāru of Guruza, Guḍivāḍa taluk, Kistna district.

(a) अनिङ्ग्यपदानि.

ANIṄGYAPADĀNI.

Foll. 1a—3b.

Similar to the work described under No. 873 of the D.C.S. MSS., Vol. II.

Incomplete.

Beginning :

अवत्याय, अवत्याभ्यः, अवार्याय, अवार्येभ्यः, अवष्र्याय, अदन्तकाय, अदन्तकः, अप्राय. अलोमकाय, अमेध्याय, अनस्थिकाय,

End:

हविष्मन्तः, हन्तवै, हारुकाः, हिरण्मयम्.

(*b*) अनिङ्ग्यम्, सव्याख्यानम्.

ANIṄGYAM WITH COMMENTARY.

Foll. 4*a*—20*b*.

Slightly different from the work described under No. 855 of the D.C.S. MSS., Vol. II.

Complete.

Name of the scribe :—Rāyaprōlu Vēṅkaṭaśivasōmayājulu.

(*c*) अनिङ्ग्यम्.

ANIṄGYAM.

Foll. 20*b*—26*b*.

By Śrīvatsāṅka. Same work as that described under No. 853 of the D.C.S. MSS., Vol. II.

Complete.

Name of the scribe : Rāyaprōlu Vēṅkaṭaśivayajvan.

Date of transcription : Sunday, the 10th day of the bright fortnight of the Māgha month in the year Hēvilambi.

(*d*) शमानम्, पदद्र्पणव्याख्यासहितम्.

ŚAMĀNAM WITH THE COMMENTARY PADADARPAṆA.

Foll. 27*a*—45*a*.

The commentary is by Mallayācārya. Same work as that described under No. 981 of the D.C.S. MSS., Vol. II.

Complete.

(*e*) विलङ्घ्यव्याख्यानम्—पदद्र्पणम्.

VILAṄGHYAVYĀKHYĀNAM : PADADARPAṆAM.

Foll. 45*a*—58*a*.

The commentary is by Mallayārya. Similar to the work described under No. 960 of the D.C.S. MSS., Vol. II.

Complete.

Beginning:

अथ यजुस्संहितायामकाराकारपूर्वस्व(र)परो यकारो येषु पदेषु लुप्यते तेष्वेकारैकारान्तानि पदानि प्रवक्ष्यन्ते । अत्रायमथशब्द आनन्तर्ये । आनन्तर्यं च लुप्तविसर्गपदलक्षणापेक्षया ।

End:

उद्धारमुद्धरा इति मुखतः परिहरन्त आश्विनाग्रान्, हस्त आधाय सविता । अनिङ्ग्यान्तः । सान्निध्याद्धस्त इति लभ्यते । हस्त इति शब्दः अनिङ्ग्यान्तः एकारान्तो न भवति । उक्तमेवोदाहरणम् । अनिङ्ग्यान्त इति किम्? विश्वतो हस्त उत, इङ्ग्यान्तो न भवतीति अनिङ्ग्यान्तः ॥

Colophon:

श्रीमन्मल्लयाचार्ययज्वकृतौ पददर्पणे व्यक्तिवेलुकं (विलङ्घ्य)नामकाध्यायः समाप्तः ॥

व्याख्यानं रचितं व्यक्तिवेलुको लक्षणस्य च ।
बुधश्लाघ्यं बुधश्लाघ्यं मल्लेनाचार्ययज्वना ॥

(*f*) नपरतपरम्, सव्याख्यानम्.

NAPARATAPARAM WITH COMMENTARY.

Foll. 58*a*—67*b*.

Similar to the work described under No. 918 of the D.C.S. MSS., Vol. II.

Complete.

Beginning:

अथ यजुस्संहितायां च-छ-ज-त-थ-द-ध-न-म-लपराः तत्तत्सानुनासिकाः पदान्ताः पदकाले नकारा दृश्यन्ते । सूत्रयोरनयोरयमर्थः—अत्रायमथशब्दोऽधिकारार्थः । यजुस्संहितायां चकारछकारजकारतकारथकारदकारधकारनकारमकारलकारेभ्यः पूर्वे पदान्ते वर्तमानश्च

* * * *

नकारा भवन्तीत्यर्थः । तानि पदान्युच्यन्त इत्येतदधिकृतं वेदितव्यम् ।

* * * *

सत्रायणे नैव नो नौ नवनीतं न प्रवस्तव्यं निर्बाधानां नाकसदां परं तत् ॥

Colophon:

इति श्रीमत्पुरातनमहानुभावऋषिकृतपददर्पणे नपराख्याध्यायस्समाप्तः ॥

अथ यजुस्संहितायां नकारपरास्सानुनासिकाः पदान्ताः पदकाले तकारा दृश्यन्ते । अद्यात् अतृणात् अश्नीयात्

End:

मा मा हिꣳसीन्निषसाद, प्रहिणुयान्निरृतिम्, न निहन्यान्न लोहितं, परꣳ हन्नामा, हविष्मन्निधनं पूर्वम्, हविष्कृन्निधनमुत्तरम् ॥

Colophon:

उदिग्भाष्यं समाप्तम् ॥

(*g*) अवर्णि, सव्याख्यानम्.

AVARṆI WITH COMMENTARY.

Foll. 67*b*—76*b*.

Slightly different from the work described under No. 860 of the D.C.S. MSS., Vol. II.

Complete.

Beginning:

अवर्णिन्यनुक्तं समाख्यातिरिक्तं परित्यज्य दुष्कीर्तितश्चाभिवीक्ष्य ।
ककारादिवर्णक्रमेणाहमेतं सद्वृत्तिं करिष्यामि विस्पष्टवाच्यम् ॥

लक्षणारम्भवैयर्थ्यमाशङ्क्य परिहरति, पूर्वलक्षणे पुनरुक्तीः अधिकोक्तीः उक्तेः दुर्बोधनाश्च हेयत्वात् परित्यज्य निर्दोषं लक्षणान्तरं प्रणीयत इत्यर्थः । वक्ष्यमाणार्थप्रयोजनं च आह—

ओदेद्वर्णसञ्छन्नं संहितायां पदादिगम् ।
अवर्णं ज्ञातुमस्माभिरिदं शास्त्रं प्रणीयते ॥

अस्यार्थः ओदित्योकारस्य ग्रहणम् । स च द्विविधः सांहितोऽसांहितश्च । एदित्येकारस्य ग्रहणम् । स चैकविधः । अवर्णमित्यकाराकारयोर्ग्रहणम्; ह्रस्वो वर्णोत्तरस्त्रयाणामिति वचनात् ।

End:

सप्तरात्रमाहरत्तेन, अग्निस्तत्पुनराहाः, आ त्वाहाषम्, एकोऽहुतादेकः, पत्याहं गच्छे, तथाहास्थाः इति तमाहरताम् इत्यनेन प्रकारेण ह्रस्वस्य सङ्ग्रहः ॥

(*h*) आवर्णि, सव्याख्यानम्.

ĀVARṆI WITH COMMENTARY.

Foll. 76*b*—81*a*.

Similar to the work described under No. 870 of the D.C.S. MSS., Vol. II.

Complete.

Name of the scribe: Rāyaprōlu Vēṅkaṭaśivayajvan.

Date of transcription: Monday, the 10th day of the bright fortnight of the Phālguṇa month in the year Hēvilambi.

Beginning:

अथाकारादीनि सर्वविभक्त्यन्तान्याह —

आग्नीध्राग्रयणाज्योपावर्ताप्नोत्यायुधश्रुतिः ।
आशीराहवनीयाग्नेयाग्नामुष्यायणश्रुतिः ॥

आग्नीध्र, आग्रयण, आज्य, उपावर्त, आप्नोति, आयुध, आशीः, आहवनीय, आग्नेय, आग्ना, आमुष्यायण एतानि पदानि सर्वविभक्त्यन्तानि आकारादीनि भवन्ति ।

End:

आत्मानं पराह, आश्राव्याह देवान्, पुरोनुवाक्ययाह । एतेभ्यः पर इति (किम्) ? एतावताहैनसा । आहुराकारपूर्वश्चेत्येषावर्णासुनिर्मितः ॥

Fol. 81 contains Gaṅgāṣṭaka and fol. 82 contains a few lines relating to Āvarṇibhāṣya. Foll. 83 and 84 contain the 3rd and the 4th Adhyāyas of the Taittirīyaprātiśākhya.

(*i*) प्रातिशाख्यम्, त्रिभाष्यरत्नव्याख्यासहितम्.

PRĀTIŚĀKHYAM WITH THE COMMENTARY TRIBHĀṢYARATNA.

Foll. 85*a*—97*b*.

Same work as that described under Nos. 928 and 931 of the D.C.S. MSS., Vol. II.

Contains the Adhyāyas 3 and 4 complete.

Fol. 98 contains the Aṣṭāvadhānaprakaraṇa.

(*j*) षड्विंशतिसूत्रम्.

ṢAḌVIṂŚATISŪTRAM.

Foll. 99*a*—104*b*.

Same work as that described under No. 991 of the D.C.S. MSS., Vol. II, wherein see for the beginning.

Complete.

End:

प्रजननं ज्योतिः। सहस्रतमी पयस्वतीति यणा दीर्घाः । यणा दीर्घनिषेधः— देव्यदिते सरस्वत्याग्नेयं यान्येव पृथिव्योरवा आजन्त्यर्च्येयो वदन्त्यकूटयोपस्थे नैति षोडश्युत्तरे मन्थ्यग्रान् । सरस्वत्यभिवदन्तीति निषेधाः ।

(*k*) पूर्वोत्तरोभयदीर्घी.

PŪRVŌTTARŌBHAYADĪRGHĪ.

Foll. 104*b* and 105*a*.

Same work as that described under No. 926 of the D.C.S. MSS., Vol. II.

Complete.

(*l*) योहिलक्षणम्.

YŌHILAKṢAṆAM.

Foll. 105*a*—106*a*.

Same work as that described under No. 950 of the D.C.S. MSS., Vol. II, wherein see for the beginning.

Complete.

End:

मैत्रावरुणी घृतवतीयमित्री वक्ष्यत्यौदुम्बरी प्ररोहन्ती दशम्युभयतश्शीर्ष्णी सोमक्रयणी सौरी । एतानि इकारपर ईकारान्तानि ॥

(*m*) उच्चोदर्कि, लघुवृत्तिटीकासहितम्.

UCCŌDARKI WITH A COMMENTARY CALLED LAGHU-VṚTTI.

Foll. 106*a*—109*a*.

Similar to the work described under No. 878 of the D.C.S. MSS., Vol. II.

Complete.

Beginning:

सर्वान् देवान् गुरून्नत्वा लघुवृत्तिः प्रवक्ष्यते ।
उच्चोदर्किदशश्लोक्या बालव्युत्पत्तिसिद्धये ॥
नित्याभिनिहतक्षैप्रपूर्वोदात्तस्य संग्रहः ।
क्रियते हस्तविन्यासभेदोच्चारणसिद्धये ॥

नित्याभिनिहतक्षैप्रविशेषाः यस्मादुदात्तात्पूर्वभूताः तस्य नित्याभिनिहतक्षाप्रपूर्वोदात्तस्य सङ्ग्रहः निश्चयः क्रियते । किमर्थं हस्तविन्यासिद्धये भेदोच्चारणसिद्धये ।

End:

स्वातन्त्वपदान्येव भवन्ति । एतेषु पदवर्णेषु इतेष्वपि यो वर्णः स्वरितात्परः स एव उदात्तः स्वरितस्योपरि उदात्तोच्चारार्थः स्वारात्परस्य उदात्तस्य सङ्ग्रहोऽयमुदीरितः ॥

(n) उच्चोदर्कि.

UCCŌDARKI.

Fol. 109.

Same work as that described under No. 875 of the D.C.S. MSS., Vol. II.

Complete.

Fol. 110 contains Rāvaṇabhēṭ. Foll. 111*a*—113*a* contain the Vēdalakṣaṇa. Fol. 113*b* is left blank.

(o) विलङ्घ्यम्.

VILAṄGHYAM.

Foll. 114*a*—117*b*

Same work as that described under No. 960 of the D.C.S. MSS., Vol. II.

Complete.

(p) नपरतपरम्.

NAPARATAPARAM.

Fol. 118.

Same work as that described under No. 914 of the D.C.S. MSS., Vol. II.

Complete.

R. No. **1965.**

Palm-leaf. 16 × 1¼ inches. Foll. 101. Lines, 6 in a page. Telugu. Fair.

Presented in 1916-17 by M.R.Ry. Rāyaprōlu Rāmabrahmangāru of Guruza, Guḍivāda taluk, Kistna district.

(a) अमरुकम्, शृङ्गारदीपिकाव्याख्यासहितम्.

AMARUKAM WITH THE COMMENTARY ŚṚṄGĀRA-DĪPIKĀ.

Foll. 1*a*—6*a*.

Same work as that described under No. 11927 of the D.C.S. MSS., Vol. XX. The text is by Amaruka and the commentary by Vēmabhūpāla.

Complete.

(b) पुष्पबाणविलासः, शृङ्गारचन्द्रिकाव्याख्यासहितः.

PUṢPABĀṆAVILĀSAḤ WITH THE COMMENTARY ŚṚṄGĀRACANDRIKĀ.

Foll. 67a—101a. Fol. 101b is left blank.

Same work as that described under No. 11971 of the D.C.S. MSS., Vol. XX, with additional stanzas in the beginning as given below by Vēṅkaṭapaṇḍitarāya.

Incomplete.

Beginning:

श्रीमद्गोपवधू . . जाराग्रणीः पातु वः ॥
अङ्गप्रभाभिः . . गोपालबालकः ॥
भुवनविदितमासीद्यच्चरित्रं पवित्रं
सहयुवतिसहस्रैः क्रीडतो नन्दसूनोः ।
तदखिलमवलम्ब्य स्वादु शृङ्गारकाव्यं
रचयितुमनसो मे शारदास्तु प्रसन्ना ॥
पुष्पबाणविला(स)स्य काव्यस्य रसशालिनः ।
शृङ्गारचन्द्रिकाभिख्यां व्याख्यां विरचयाम्यहम् ॥

R. No. **1966.**

Palm-leaf. 16¾ × 1½ inches. Foll. 60. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R Ry. Rāyaprōlu Rāmabrahmamgāru of Guruza, Guḍivāda taluk, Kistna district.

(a) दर्शपूर्णमासमन्त्रभाष्यम्.

DARŚAPŪRṆAMĀSAMANTRABHĀṢYAM.

Foll. 1a—58a.

By Tirumalayajvan. Same work as that described under R. No. 1664(a) of the Triennial Catalogue of MSS., Vol. II, Part I-C.

Complete.

(b) अनाज्ञातमन्त्रभाष्यम्.

ANĀJÑĀTAMANTRABHĀṢYAM.

Foll. 58a—60a. Fol. 60b is left blank

Same work as that described under R. No. 1664(*b*) ante of the Triennial Catalogue of MSS., Vol. II, Part I-C.

Incomplete.

R. No. **1967**.

Palm-leaf. 17¼ × 1⅜ inches. Foll. 63. Lines, 6 in a page. Telugu. Injured.

Presented in 1916–17 by M.R.Ry. Rāyaprōlu Rāmabrahmamgāru of Guruza, Guḍivāḍa taluk, Kistna district.

रामायणव्याख्या (चतुरर्थी).

RĀMĀYAṆAVYĀKHYĀ (CATURARTHĪ).

Fol. 50*b* is left blank.

Same work as that described under No. 1902 of the D.C.S. MSS., Vol. IV, Part I.

Contains the portion from the Bāla-kāṇḍa to the Kiṣkindhā-kāṇḍa.

R. No. **1968**.

Palm-leaf. 17¼ × 1¼ inches. Foll. 30. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R.Ry. Rāyaprōlu Rāmabrahmamgāru of Guruza, Guḍivāḍa taluk, Kistna district.

तैत्तिरीयोपनिषद्व्याख्या—लघुदीपिका.

TAITTIRĪYŌPANIṢADVYĀKHYĀ : LAGHUDĪPIKĀ.

Same work as that described under No. 515 of the D.C.S. MSS., Vol. I, Part III, with an additional initial stanza and colophon as given below.

Contains the Brahmavallī and the Bhṛguvallī.

रविवंशार्णवोद्भूतः श्रीरामाभिधसन्मणिः ।
कृत्यानया प्रसन्नस्सन् हार्दं हरतु मे तमः ॥

Colophon:

इति वारुण्युपनिषदि लघुदीपिकायां भृगुवल्ल्याख्यः तृतीयोऽनुवाकः। वारुण्युपनिषत्समाप्ता ॥

R. No. **1969**.

Palm-leaf. 14⅞ × 1⅜ inches. Foll. 36. Lines, 6 in a page. Telugu. Injured.

Presented in 1916–17 by M.R.Ry. Rāyaprōlu Rāmabrahmamgāru of Guruza, Guḍivāḍa taluk, Kistna district.

(*a*) इन्द्राक्षीस्तोत्रम्.

INDRĀKṢĪSTŌTRAM.

Fol. 1.

Same work as that described under No. 10713 of the D.C.S. MSS., Vol. XIX.

Incomplete.

(*b*) पञ्चाक्षरस्तोत्रम्.

PAÑCĀKṢARASTŌTRAM.

Fol. 2*a*. Fol. 2*b* is left blank.

Similar to the work described under No. 11051 of the D.C.S. MSS., Vol. XIX.

Complete.

(*c*) श्राद्धविषयकस्मृतिवचनानि.

ŚRĀDDAVIṢAYAKASMṚTIVACANĀNI.

Foll. 3*a*—10*b*.

Similar to the work described under No. 3086 of the D.C.S. MSS., Vol. VI.

Beginning:

मण्डलात्पूर्वतो देवाः पितरश्चोत्तरे तथा ।
कर्ता कुर्वीत ईशान्ये श्राद्धेष्वाचमनं क्रमात् ॥
कर्तुराचमनात्पूर्वं भोक्तुश्चाचमनं यदि ।
श्वानमूत्रसमं तोयमित्येवं मनुरब्रवीत् ॥

End:

अनग्निर्दूरभार्यो च पार्वणे समुपस्थिते ।
सन्धा(या)ग्निं ततो हुत्वा श्राद्धान्ते विसृजेत्पुनः ॥
पित्रुद्देशकृतं पाकं यो देवेभ्यः प्रयच्छति ।
पित्रुच्छिष्टाशना देवाः पितर.

Foll. 11*a*—12*b* contain Hōmakuṇḍādinirṇaya.

(*d*) रामायणम्.

RĀMĀYAṆAM.

Foll. 13*a*—14*b*.

Same work as that described under No. 1806 of the D.C.S. MSS., Vol. IV, Part I. By Vālmīki.

Contains the 73rd Sarga of the Bāla-kāṇḍa.

(e) रामायणव्याख्यानम्—गुरुबालचित्तरञ्जनम्.

RĀMĀYAṆAVYĀKHYĀNAM : GURUBĀLACITTA-RAÑJANAM.

Foll. 15a—26b.

A commentary called Gurubālacittarañjana on the Rāmāyaṇa of Vālmīki.

Contains the 73rd Sarga of the Bālakāṇḍa.

Beginning:

यस्मिन्निति—राजा दशरथः यस्मिन् दिवसे उत्तमं गोदानं विवाहाङ्गभूतं गोदानव्रतं चक्रे चकार; पुत्रैरिति शेषः; कारयिष्यतीति भावः। तस्मिन् दिवसे शूरो युधाजित् केकयीभ्राता अभ्युपेयिवान् उपागतः; केकयराजस्य पुत्रः साक्षात् कैकेयीसहोदरत्वात् भरतस्य मातुलः युधाजित्।

End:

राजापि दशरथोऽपि ऋषिभिस्सह बान्धवैस्सह अनुययौ गतवान्।
सर्गफलम्—प्रणामध्येत्युपक्रम्य जानकीमङ्गलोत्सवान्।
श्रुत्वा विवाहं कुर्वीत पत्नी दीर्घायुषी भवेत्॥

Colophon:

इति गुरुबालचित्तरञ्जनव्याख्यायां बालकाण्डे त्रिसप्ततितमस्सर्गः॥

(f) चरणव्यूहः.

CARAṆAVYŪHAḤ.

Foll. 27a—30a.

Same work as that described under No. 897 of the D.C.S. MSS Vol. II.

Complete.

(g) तिथ्यादिनिर्णयः.

TITHYĀDINIRṆAYAḤ.

Foll. 30b—36a. Fol. 36b is left blank.

Similar to the work described under No. 3123 of the D.C.S. MSS, Vol. VI.

Incomplete.

Beginning:

सायन्तन्यपरत्र चेत् मृततिथिः सैवाब्दिके मासिके
सा ग्राह्या ह्यपराह्णयोर्यदि तथा यत्राधिका सा मता।
तुल्या चेदुभयापराह्णसमये पूर्वा न चेत्तद्द्वयोः
पूर्वैव त्रिमुहूर्तगास्तसमये नो चेत्परैवोचिता॥

अस्यार्थः—मृततिथिः यदि दिनद्वये सायन्तन्यां वर्तते अपरा अपरत्र परदिने सायन्तन्यां विद्यमाना आब्दिके मासिके च ग्राह्या ।

End :

त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिकाः ।
ता एव दक्षिणे पूर्वमतीते चोत्तरायणे ॥
अस्तात्प्राक् सङ्क्रमे नक्ते तदहः पुण्यमाचरेत् ।
प्रदोषे वार्धरात्रे वा स्नानं दानं परेऽहनि ॥

R. No. **1970.**

Palm-leaf. 18⅜ × 1⅛ inches. Foll. 93. Lines, 9 in a page. Telugu. Fair.

Presented in 1916-17 by M.R.Ry. Rāyaprōlu Rāmabrahmamgāru of Guruza, Guḍivāḍa taluk, Kistna district.

प्रतापरुद्रीयव्याख्यानम्—रत्नशाणः.

PRATĀPARUDRĪYAVYĀKHYĀNAM : RATNAŚĀṆAḤ.

By Cilakamarti Tirumalācārya. Same work as that described under R. No. 1923 ante.

Contains the Kāvyaprakaraṇa, and the Nāṭakaprakaraṇa complete and the Rasaprakaraṇa incomplete.

Beginning :

अथ काव्यप्रकरणं व्याख्यायते । अथेति । अथ नायकस्वरूपनिरूपणानन्तरं काव्यस्य कविकर्मणः शब्दार्थसंदर्भरूपस्य स्वरूपं निरूप्यते ; लक्षणोदाहरणाभ्यां स्पष्टीक्रियते । काव्यलक्षणमाह—गुणेति । गुणैः प्रसादादिभिः अलंकारैरुपमादिभिः सहितौ दोषवर्जितौ दोषरहितौ शब्दार्थौ ।

* * * *

Colophon :

इति श्रीप्रतापरुद्रीयव्याख्याने रत्नापणा(रत्नशाणा)ख्याने काव्यस्वरूपनिरूपणं नाम द्वितीयं प्रकरणं समाप्तम् ॥

इत्थं श्रव्यकाव्यं निरूप्य दृष्टकाव्यनिरूपणं प्रतिजानीते—तत्र प्रबन्धेषु चतुर्विधैरिति ।

परगतसुखदु:खभावनाभावितान्तःकरणत्वं सत्त्वं ततो भवाः सात्त्विकाः स्तम्भादयः तत्संबन्ध्यभिनयः सात्त्विकः निर्निमेषनयनत्वादिः ।

* * * *

Colophon:

इति श्रीचिलकमर्तितिरुमलाचार्यविरचिते नाटकप्रकरणव्याख्याने पञ्चमोऽङ्कः ॥

प्रकरणं निगमयन्नाह—एवमिति । एवमुक्तरीत्या साङ्गमङ्गसहितं नाटकं नाटकाख्यं रूपकमुदाहृतमुदाहृत्य प्रदर्शितम् । प्रकरणसमाप्तिं कथयति—इतीति ॥

Colophon:

इति श्रीमदुभयवेदान्तप्रवर्तकाचार्यपुरु(ष)पुरस्कृतस्य सर्वविद्याविचक्षणस्य श्रीवात्स्यवंशमुक्तामणेः श्रीरामानुजाचार्यस्य प्रियशिष्येण व्याख्यातृमूर्धन्यश्रीवेङ्कटाचार्यप्रमुखान्तर्मुखभूषितशुकवटवंशसंभूतश्रीरामानुजाचार्यसूनुना तिरुमलाचार्येण विरचिते प्रतापरुद्रीयव्याख्याने रत्नशाणाख्याने नाटकप्रकरणं समाप्तम् ॥

दृश्यश्रव्यभेदेन द्वयेऽपि प्रबन्धा निरूपिताः । तेषामात्मभूतस्य रसस्य स्वरूपनिरूपणं प्रतिजानीते—अथेति । जीवितभूतस्य आत्मभूतस्य रसस्य सामान्यलक्षणमाह—विभावैरिति ।

विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः ।

वक्ष्यमाणलक्षणाः त एव सामग्री, साधनसामग्री तया सरसकाव्यसङ्गृहीतया निपुणनटप्रदर्शितया वा सामाजिकभाव्यमानया समुल्लसितः स्वाद्यमाननिर्भरानन्दसंविद्रूपतां नीयमान इत्यर्थः ।

End:

शृङ्गारकरुणौ मिथः परस्परं वैरिणौ विरुद्धौ । वीरबीभत्सरसौ मिथो वैरिणौ इत्याद्यन्वयक्रमः । प्रसङ्गात् शृङ्गारादिभ्यः हास्यादीनामुत्पत्तिमाह—रसादित्यादिना । अथ व्यभिचारिभावानां तत्तद्रसेषु व्यवस्था ।

R. No. **1971.**

Palm-leaf. $18\frac{1}{4} \times 1\frac{5}{8}$ inches. Foll. 62. Lines, 6 in a page. Telugu. Fair.

Presented in 1916-17 by M.R.Ry. Rāyaprōlu Rāmabrahmamgāru of Guruza, Guḍivāḍa taluk, Kistna district.

(*a*) भर्तृहरिसुभाषितम्.

BHARTṚHARISUBHĀṢITAM.

Foll. 1*a*—32*b*.

By Bhartṛhari. Same work as that described under No. 12080 of the D.C.S. MSS., Vol. XX; but together with introductory stanzas only relating to the commentary written by Rāmacandrabudhēndra.

Complete.

Date of copying: Saturday, the 2nd of the dark fortnight of the Phālguna month in the year Krōdhana.

(*b*) चातुर्मास्यप्रयोगः.

CĀTURMĀSYAPRAYŌGAḤ.

Foll. 33*a*—57*a*.

Similar to the work described under R. No. 1003(*c*) ante.

Complete.

Beginning:

अक्षय्यꣳह वै चातुर्मास्ययाजिनस्सुकृतं भवति ।
फाल्गुन्यां पौर्णमास्यां चैत्र्यां वैश्वदेवेन यजेत ॥

चातुर्मास्यानां प्रयोग उच्यते । उत्तरायणे शुक्ले पक्षे प्रतिपद्दर्शयागानन्तर मुदगयनापूर्यमाणपक्षस्य देवनक्षत्रेषु द्वादशाहे चातुर्मास्यैर्यजेत । प्रथमेऽहनि वैश्वदेवेनेष्ट्वा चतुर्थ्यां वरुणप्रघासैः अष्टम्या नवम्याञ्च साकमेधैः द्वादश्यां शुनासीरीयेणेति ।

End:

तेनाहमस्य ब्रह्मणा निवर्तयामि जीवसे अग्निस्तिग्मेनेति समानम् । ब्राह्मण एकहोतेति चानुवाकमनन्तरे पर्वाणि पशुबन्धः ॥

Colophon:

समाप्तानि चातुर्मास्यानि ॥

Foll. 57*a*—58*b* contain Cāturmāsyaprayōgavacana and 59—62 Brāhmaṇācchaṁsiprayōga.

R. No. 1972.

Palm-leaf. 16½ × 1⅝ inches. Foll. 103. Lines, 7 in a page. Telugu. Injured.

Presented in 1916-17 by M.R.Ry. Rāyaprōlu Rāmabrahmamgāru of Guruza, Guḍivāḍa taluk, Kistna district.

Foll. 96*a*—103*b* are left blank.

आपस्तम्बीयाध्वरतन्त्रव्याख्या— प्रयोगरत्नमाला.

APASTAMBĪYĀDHVARATANTRAVYĀKHYĀ : PRAYŌGA-RATNAMĀLĀ.

By Caundapācārya. Same work as that described under R. No. 795 ante.

Contains the first Praśna complete and the second incomplete.

R. No. **1973.**

Palm-leaf. 16 × $1\frac{3}{8}$ inches. Foll. 56. Lines, 6 in a page. Telugu. Fair.

Presented in 1916–17 by M.R.Ry. Rāyaprōlu Rāmabrahmamgaru, of Guruza, Guḍivāḍa taluk, Kistna district.

(*a*) प्रहसनम्.

PRAHASANAM.

Foll. 1*a*—24*b*. Foll. 25—29 are left blank.

By Vēṅkatēśvarakavi. Same work as that described under R. No 821 (*g*) ante.

Complete.

(*b*) कृष्णयजुर्वेदारण्यकभाष्यम्.

KṚṢṆAYAJURVĒDĀRAṆYAKABHĀṢYAM.

Foll. 30*a*—56*b*.

By Sāyaṇācārya. A commentary on the Āraṇyaka portion of the Black Yajurvēda.

Contains the second Praśna from the beginning to the end of the 19th Anuvāka.

Beginning:

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
प्रपाठके हि प्रथमे वह्निरारुणकेतुकः ।
सम्यक् प्रीतो द्वितीये तु स्वाध्यायब्राह्मणाभिधा ॥

तत्र आद्यानुवाके अध्ययनाङ्गत्वेन यज्ञोपवीतं विधातुं तत्प्रशंसार्थमादावुपाख्यानमाह । सह वै देवानाश्चासुराणाश्च— असुरान् पराभावयन् । वयमेवाधिपत्यनिमित्तं स्वर्गं गमिष्यामि(म) इत्येवं देवा यथा यज्ञे प्रवृत्ताः तथा असुरा अपि प्रवृत्ताः ।

End :

सर्वस्य स्वामिने तुभ्यमपि नमः । किं बहुना नमश्शिशुकुमाराय नमः शिशुकुमारस्य जलग्रहविशेषस्य कुमारो बालः तदाकारो यो ध्रुवः तस्मै नमस्कारोऽस्तु । उभयतो नमस्कारद्वयमादरार्थम् ॥

Colophon :

इति साय—एकोनविंशोऽनुवाकः ॥

R. No. **1974.**

Palm-leaf. 20 × 1½ inches. Foll. 55. Lines, 8 in a page. Telugu. Fair.

Presented in 1916–17 by M.R.Ry. Suśarla Dakṣiṇāmūrtī Śāstrigāru of Pedakallepalli, Kistna district.

अभिनवषडशीतिः, धर्मप्रदीपिकाव्याख्यासहिता.

ABHINAVAṢAḌAŚĪTIḤ WITH THE COMMENTARY DHARMAPRADĪPIKĀ.

By Subrahmaṇyasudhī, son of Vēṅkaṭāmbā of Pōndūr family. Same work as that described under No. 3011 of the D.C.S. MSS., Vol. V.

Complete.

R. No. **1975.**

Palm-leaf. 15⅛ × 1¼ inches. Foll. 58. Lines, 6 in a page. Telugu. Much injured.

Presented in 1916–17 by M.R.Ry. Suśarla Dakṣiṇāmūrtī Śāstrigāru of Pedakallepalli, Kistna district.

स्मृतिभास्करः.

SMṚTIBHĀSKARAḤ.

A digest of the Smṛtis, dealing specially with the social duties and religious rites of Śūdras.

Wants the beginning and the end.

Beginning :

. . . . पातकनाशनम् ॥
साधुवृत्तस्य शान्तस्य नित्यं शास्त्ररतस्य च ।
क्रियानिष्ठस्य दान्तस्य तस्य न स्पृशते कलिः ॥
नित्यं नैमित्तिकं काम्यं यस्य न च्यवते सदा ।
भक्तिर्विष्णोस्तथा पित्रोः तस्य न स्पृशते कलिः ॥

नित्यं त्रिवर्गशून्यस्य परदाररतस्य च ।
भिन्नवृत्तस्य लुब्धस्य सर्वदा तद्गृहे कलिः ॥

* * * *

इति चतस्र आहुतीर्हुत्वा पुनरलंकृत्य सूतिकागृहरक्षिणो नियोजयेत् । अहरहर्विषयब्राह्मणपक्षः, शूद्रस्य दैर्घ्याशौचत्वात् नियमासंभवाच्च ॥

Colophon:

इति स्मृतिसङ्ग्रहे जातकर्मविधिस्समाप्तः ॥

* * * *

अथ परलोकक्रिया—

* * * *

यदा सांवत्सरिकं प्राप्तं तदा स्वयं नियमः ।

Colophon:

इति स्मृतिभास्करे शूद्रसपिण्डीकरणविधिः समाप्तः ॥

End:

एधोदकमूलपुष्पफलगन्धग्रासशाखानां स्तेये वाचा बाध्यः । विदुषः, अयं धर्मः अयमधर्म इति वेदिनः । शूद्रस्य वाससः परिमोषणे अवध्यः । परस्त्रीगमने शिशुहनने मार्गविरोधग्रामदाहपशुमारणकर्मणः शूद्रस्य राज्ञा वधः कर्तव्यः ॥

Coolphon:

इति सर्वस्मृतिसङ्ग्रहे स्मृतिभास्करे शूद्रधर्मसन्देहनिवृत्तिर्नाम व्यवहारप्रकरणं समाप्तम् ॥

कामधेनौ प्रदीपेऽब्धौ कल्पवृक्षलतादिषु ।
शम्भुद्रविडकेदारलोल्लटाद्यैश्च भाषितम् ॥

अथेदानीं प्रायश्चित्तप्रकरणं वक्ष्ये । तदाह मार्कण्डेयः—

ब्रह्माण्डपुराणे—

ब्रह्महा क्षयरोगी स्यात्सुरापी स्याददन्तकः ।
सुवर्णचोरः कुनखी दुश्चर्मा गुरुतल्पगः ॥
अन्नहर्ता भवेद्गुल्मी धान्यस्तेयी च दर्दुरः ।

* * * *

पराशरः—

न प्रातर्भोजनं कुर्यान्नान्तरा विधिरुच्यते ।
न सन्ध्ययोस्तथा शूद्रः नाशुचिर्भोजनं चरेत् ॥
यामादर्वाक् न भुञ्जीत याममु . . . . ।

R. No. **1976.**

Paper. $7\frac{7}{8} \times 6\frac{1}{2}$ inches. Foll. 133. Lines, 21 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. Nimmagadda Narasiṁhāvadhānulugāru, Gōdavarru, Gōdāvari district.

(*a*) शमानसन्धिव्याख्यानम्—पददर्पणम्.
ŚAMĀNASANDHIVYĀKHYĀNAM: PADADARPAṆAM.

Foll. 1*a*—16*b*.

By Mallayācārya Yajvan. Same work as that described under No. 981 of the D.C.S. MSS., Vol. II.

Complete.

Colophon:

इति श्रीमल्लयाचार्ययज्वकृतौ पददर्पणसमानसन्ध्यध्यायस्समाप्तः ॥
शमानसन्धेः कृतवान् हि भाष्यं श्रीमल्लिनाथार्यवराध्वर(री) सत् ।
विपश्चितां वेदविदामपूर्वकं . . . . ॥

(*b*) विलङ्घ्यम्, पददर्पणव्याख्यासहितम्.
VILAṄGHYAM WITH THE COMMENTARY PADADARPAṆA.

Foll. 16*b*—30*b*.

Same work as that described under No. 960 of the D.C.S. MSS., Vol. II, with a commentary thereon by Mallināthāryayajvan.

Complete.

Beginning:

एवं लुप्तविसर्गाणि पदानि अकारादिक्रमेण सम्यक् लक्षयित्वा तेनैव क्रमेण पदकाले एकारैकारान्तानि पदानि सुबोधनं న్రై కైలుకు నాంసుగోళ్ల లक्षयितुमुपक्रमते—अथ यजुस्संहितायामकाराकारपूर्वस्वरपरो येषु प्रवक्ष्यन्ते

अत्रायमथशब्द आनन्तर्ये, लुप्तविसर्गापेक्षया आनन्तर्यार्थश्च ।अकारा-

कारपूर्वस्वरप(र)श्च यकारो येषु पदेषु लुप्यते तेषु पदेषु मध्ये एकारैकारान्तानि पदानि प्रवक्ष्यन्ते इति योजना ।

End:

अनिङ्ग्यान्तः । सान्निध्यात् हस्त इति लभ्यते । हस्त इति शब्दः परः अनिङ्ग्यान्तस्सन् पदकाले एकारान्तो भवति । हस्त आदाय सविता बिभ्रत् । अनिङ्ग्यान्त इति किम् । विश्वतोहस्त उत विश्वतोमुखः । इङ्ग्यस्य अन्तः इङ्ग्यान्तः, स न भवतीत्यनिङ्ग्यान्तः ॥

Colophon:

इति श्रीमल्लिनाथार्ययज्वकृतौ पददर्पणे व्यक्तिवेलुकुनामाध्यायस्समाप्तः ॥

व्याख्यानं रचितं व्यक्तिवेलुकोर्लक्षणस्य च ।
बुधश्लाध्यं बुधश्लाध्यं मल्लिनाथेन यज्वना ॥

(*c*) नपरतपरम्, पददर्पणसहितम्.

NAPARATAPARAM WITH THE COMMENTARY PADA-DARPAṆA.

Foll. 30*b*—42*a*.

Same work as that described under No. 917 of the D.C.S. MSS., Vol. II, and together with the commentary of Pōgalla Mallayārya.

Complete.

Beginning:

इत्थमाकारादिवर्णक्रमेण एकारैकारान्तानि पदानि लक्षयित्वा अकारादिवर्णानुसारेणैव संश्लिष्टानि नकारान्तानि पदानि नतपराख्येन ग्रन्थेन लक्षयितुं भगवान् प्रारभते—अथ यजुस्संहितायां च छ ज त थ द ध न म ल पराः तत्तत्सानुनासिकाः पदान्ताः पदकाले नकारा दृश्यन्ते । अत्रायमथशब्द अधिकारार्थः ।

* * * *

नकारप्रयुक्त्या पूर्वसूत्रमुक्तम् अनुस्वारप्रयुक्त्या इदमुक्तमिति नाप्रतिज्ञातप्रतिपादनदोष इति रमणीयम् ॥

Colophon:

इति श्रीमत्पोगल्लमल्लयाचार्ययज्वकृतौ पददर्पणे नपराख्याध्यायस्समाप्तः ॥

End:

एतेष्वन्त्योऽनुनासिकः नकारपरस्सन् पदकाले तकारमापद्यते—यथा—मा-
माहिंसीन् निषसाद प्रहिणुयान् निरृतिम्, न निहन्यान् न लोहितम्, अग्ने यत्ते
परंहन्नाम, हविष्मन्निधनं पूर्वमहर्भवति, हविष्कृन्निधनमुत्तरं प्रतिष्ठित्यै ॥

Colophon:

इति न(परत)परं समाप्तम् ॥

(*d*) अवर्णि, सव्याख्यानम्.

AVARṆI WITH COMMENTARY.

Foll. 42*a*—53*b*.

Same work as that described under R. No. 1964(*g*) ante.

Complete.

(*e*) आवर्णि, सव्याख्यानम्.

ĀVARṆI WITH COMMENTARY.

Foll. 54*a*—59*a*. Foll. 59*b*—133*b* are left blank.

Same work as that described under R. No. 1964(*h*) ante.

Complete.

Date of copying: Thursday, the 4th day of the bright fortnight of the Vaiśākha month in the year Sādhāraṇa.

R. No. **1977.**

Paper. 15¼ × 1½ inches. Foll. 57. Lines, 6 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry Naṇḍūri Śēṣacarlu, Kanumōlu, Gōdāvari district.

(*a*) सिंहाचलक्षेत्रमाहात्म्यम्.

SIṀHĀCALAKṢĒTRAMĀHĀTMYAM.

Foll. 1*a*—54*a*. Fol. 54*b* is left blank.

Same work as that described under R. No. 852 ante.

Complete.

Date of copying: Friday, the 5th day of the bright fortnight of the Puṣya month in the year Dhātu.

(*b*) యతిరాజదణ్డకము.

YATIRĀJADAṆḌAKAMU.

Foll. 55*a*—57*a*. Fol. 57*b* is left blank.

See the Telugu part of this Triennial Catalogue, Vol. III.

R. No. **1978.**

Paper. $8\frac{1}{2} \times 6\frac{7}{8}$ inches. Foll. 31. Lines, 21 in a page. Telugu. Good

Presented in 1916-17 by M.R.Ry. Cerukupalli Narasiṁha Śāstri, Nuzvid.

Fol. 1*a* contains the name, etc., of the place in which the MS. was transcribed. Foll. 1*b* and 2 are left blank.

सात्राजितीपरिणयः.

SĀTRĀJITĪPARIṆAYAḤ.

Foll. 3*a*—29*b*. Foll. 30 and 31 are left blank.

A (Campū) work in verse and prose describing the marriage of Śrī-Kṛṣṇa and Satyabhāmā, the daughter of Satrājit: by Gāṅgēyakavi, son of Sītā and Rāmēśvara of Śaunaka family. The author says that he was prompted in a dream by Śrī-Kṛṣṇa to write this poem. He is said to have been patronised by Amarēndra Śōbhanādri, king of Nuzvid.

Complete in four Stabakas.

Name of the scribe: Mādirāja Veṅkaṭasubbā Rao.

Date of transcription: Friday, the 11th day of the bright fortnight of the Āśvija month in the year Sādhāraṇa.

Beginning:

प्रत्यूहव्यूहमोहान्धतमसस्तोमभास्करम् ।
जगदालम्बहेरम्बचरणाम्बुजमाश्रये ॥
कलापकृतकोटीरौ घनव्यालमदापहौ ।
कलये कमलासक्तौ रमोमारमणौ हृदि ॥
शरणागतवन्दारुकरुणावरुणालये ।
तरङ्गय कुरङ्गाक्षि मङ्गलं सर्वमङ्गले ॥
नमः कमलवासिनीनयनकैरवोल्लासिने
तमश्शमविधायिने तपनमण्डलस्थायिने ।
विमस्तकितराहवे वरदरारिमद्बाहवे
नमज्जनहृदम्बुजान्तरचरिष्णवे विष्णवे ॥
पराकृतसरोरुहं पवनदैत्यदर्पान्तकं
पतञ्जलिनुतं बलिप्रचुरभाग्यपाटच्चरम् ।
फणीन्द्रफणमण्डलप्रकटनर्तनप्रक्रिया-
प्रसङ्गपटुपण्डितं पदयुगं भजे श्रीहरेः ॥

अस्ति स्वस्तरुणीकराम्बुजगलन्मन्दारबृन्दान्तर-
स्यन्दत्सान्द्रमरन्दबिन्दुसुभगा स्वर्गैवनिर्वापिका ।
पाकारिप्रमुखाखिलामरवरव्यूहोत्तमाङ्गोल्लस-
च्चूडारत्नशलाकिकाञ्चितशिलापूर्द्वारका द्वारका ॥

या खलु पुरा मुरारातिप्रीतिकृते कृतिना शतधृतिसुतेन विश्वविश्वंभराविचित्रानल्पकल्पनाकल्पकाशिल्पकलापारदृश्वना विश्वकर्मणा विनिर्मिता ।

* * * *

श्रीमन्मनोहरमहःपटलप्ररोहप्रोद्दीपिताखिलदिगन्तरदिव्यमूर्तिः ।
सत्राजितस्सुकृतिनस्सुगुणावलम्बो भामामणिस्सुरमणिस्सदने विभाति ॥

Colophon:

इति श्रीकृष्णदासगाङ्गेयकृतौ सात्राजितीपरिणये प्रथमस्तबकः ॥

End:

एवं नवप्रियसमागमलज्जितां तां पूर्णेन्दुबिम्बरुचिरं मुखमुन्नमय्य ।
शौरिस्सुधामधुरया च गिरानुनीय शय्यां निनाय शनकैर्जननाथपुत्रीम् ॥
कान्ते कैशिकलोलपाणिकमले स्विन्ना कपोलद्वयी
स्निग्धं चुम्बितगण्डमण्डलमभूद्वक्षोजगुच्छद्वयी ।
प्रोन्मीलत्पुलकाङ्किता स्तनतटे मृद्वं च नीवीपुटी
न स्पृष्टा स्वयमस्फुटाद्विलसितं चित्रं मनोजन्मनः ॥

Colophon:

इति श्रीकृष्णदासगाङ्गेयकृतौ सात्राजितीपरिणये चतुर्थस्तबकः ॥
श्रीशौनकान्वयसुधानिधिपूर्णसोमरामेश्वराख्यधरणीसुरसूरिसूनुः ।
गाङ्गेयसूरिरकरोत्सरसोक्तियुक्तं सात्राजितीपरिणयाख्यममुं प्रबन्धम् ॥

* * * *

अथ कदाचित् निखिलसंपत्सारनिधिनूजवीट्पुरनिवासाखिलनिगमागमसारपारावारावनीसरामरेन्द्रशोभनाद्रिमहीपालपरिपालितशौनककुलजलनिधिराकानिशाकररामस्वाम्याख्यसूरिसूनोः सीताम्बिकागर्भशुक्तिमौक्तिकस्य गाङ्गेयेश्वरनामसूरिणः स्वप्नगतः श्रीकृष्णः सात्राजितीपरिणयाख्यं मच्चरित्रं कुर्वित्युदीर्यान्तरधत्त। तदनु सोऽय गाङ्गेयेश्वरसूरिः श्रीकृष्णानुग्रहात्तमधुरसरससुगुणसूक्तिभिः सात्राजितीपरिणयाख्यं श्रीकृष्णचरितमकरोत् ॥

R. No. **1979.**

Palm-leaf. 18½ × 1⅝ inches. Foll. 133. Lines, 6 in a page. Telugu. Fair.

Presented in 1916-17 by M.R.Ry. Śiṣṭla Narasiṁha Śāstrigāru of Bandar

The first 4 foll. and foll. 41*b*, 50*b*, 62*a* and 73*a* are left blank.

(*a*) **विश्वप्रकाशः.**

VIŚVAPRAKĀŚAḤ.

Foll. 5*a*—76*b*.

By Mahēśvara. For remarks and extracts see pages 44 and 192 of the Report on a Search for Sanskrit and Tamil MSS. by M. Seshagiri Sastri, No. 2.

Complete in two Pāricchēdas.

Name of the scribe—Śiṣṭla Viśvapati. Date of transcription : Monday, the 15th day of the bright fortnight of Mārgasira month in the year Vibhava.

Beginning:

ओं नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः ॥
अपर्णनाम्नी जनना पिता ते स्थाणुर्विशाखस्तव सोदरोऽपि ।
तथाप्यासि ह्याश्रितकल्पवृक्षः चित्रं चरित्रं तव विघ्नराज ॥

Then follow the stanzas quoted on pages 44 to 46 of the report referred to above. The following stanzas are found in addition at their end:—

कोशावकाशात्प्रकटप्रभावः संभावितानर्घगुणस्स एषः ।
संपादयन्नेष्यति वाञ्छितार्थान् कथं न चिन्तामणितां कवीनाम् ॥
आमित्रशैलचरमाचलमेखलाद्रिकैलासभूमिवलयाद्यदिहास्ति किञ्चित् ।
एकत्र संभवमगोचरशब्दरत्नमालोक्यतां तदखिलं सुधिय. कवीन्द्राः ॥

Here follow the stanzas given on page 192 of the report referred to above.

Colophon:

इति श्रीसकलवैद्यराजमुक्ताशेखरस्य (कविराज) परमेश्वरस्य गद्यपद्यविद्यानिधि· श्रीपरमेश्वरस्य कृतौ विश्वप्रकाशाभिधाने नानार्थः प्रथमः परिच्छेदः ॥

End:

अहाशब्दो वियोगार्थेऽप्युक्तार्थे च नियुज्यते । ह ।
मङ्क्षु शीघ्रभृशार्थे च तत्त्वार्थेऽपि कचित्स्मृतम् ॥

अव्ययानेकार्थवर्गः ॥

यद्यत्पूर्वतया किञ्चिन्नामात्र प्रतिभाति च ।
तत्तदन्विष्यतां सद्भिर्नामपारायणादिषु ॥
एतत्कवीन्द्रैरथ पण्डितेन्द्रैः प्रयोगसंबोधफलद्वयाप्त्यै ।
यैर्नाम कर्णाभरणं कृतैस्तैस्सर्वज्ञता च प्रणयीकृतेव ॥
स्वैरप्रचारैः परिकल्पिताभिः शब्दार्थसम्बोधकथाप्रथाभिः ।
व्याख्याभिरप्राप्तमुदां प्रमोदमाराद्र(दा)तुमते(मतै)रपरिक्र(श्र)मो नः ॥
एतां कृतिं कृतधियः कृतकृत्यभावा-
मापादयन्तु सततं मदयन्तु चेतः ।
नित्यं महेश्वरकवेः परिभावमन्तः
सन्तः परोन्नतितिरो(परा)हि भवन्ति लोकः(के) ॥

Colophon:

इति श्रीसकलवैद्यराजव(च)क्रमुक्ताशेखरस्य कविराजमहेश्वरस्य गद्यपद्यविद्यानिधिश्रीमहेश्वरस्य कृतौ विश्वप्रकाशाभिधाने नानार्थपरिच्छेदो द्वितीयः ॥

विश्वप्रकाशाभिधेयशब्दानुशासनं सम्पूर्णम् ॥

(*b*) पञ्चतन्त्रसंक्षेपः.

PAÑCATANTRASAṂKṢEPAḤ.

Foll. 77*a*—119*a*. Foll. 92*b*, 116*b* and 119*b* are left blank.

Same work as that described under R. No. 951 ante.

Complete.

Name of the scribe: Śiṣṭla Sītārāma. Date of copying: Thursday, the 11th day of the bright fortnight of the Kārttikai month in the year Vibhava.

(*c*) जगन्मोहनवृत्तशतकम्.

JAGANMŌHANAVṚTTAŚATAKAM.

Foll. 120*a*—126*b*.

Gives the names of different kinds of metres with illustrative fascinating stanzas amounting in all to 100 in number. By Vāsudēvaparabrahmapaṇḍita, son of Advaitabrahmapaṇḍita and Jānakī.

Complete.

Beginning:

पथ्यावृत्तम्—

ललिता यदि प्रसीदति संपद्यन्ते समस्तपुरुषार्थाः ।
अन्यप्रसादलाभात्पुरुषार्थोऽन्यतम आप्नोति ॥

वसन्ततिलकावृत्तम्—

गतिसंस्थितिभुक्तिभिस्समानौ शुककाकौ भवतस्तथापि तत्र ।
शुक एव नृदेवतावचांसि श्रुतिमात्रेण निजास्यतो ब्रवीति ॥

पुष्पिताग्रावृत्तम्—

उदितवति सुधाकरे तमिस्रा विलसति वर्धत उच्चकैः पयोधिः ।
विकसति कुमुदं तथापि चित्रं सलिलरुहं मुकुलीभवत्यतीव ॥

दांपत्यवृत्तम्—

कालविशेषे कोकिल उच्चैः कूजति काकस्सन्ततमेव ।
कूजन्तं पिकमालोक्यार्याः सन्तुष्यन्ति न काकं दृष्ट्वा ।

End:

क्रौञ्चपदावृत्तम्—

सन्ति शतं चूताः फलपूर्णाः शुकपिकमुखखगनिकरमवन्तः ।
पूर्णमरन्दान्यब्जवनान्यद्भुतविधिरतमधुलिहसहितानि ॥
उन्मदधारा हस्तिन उच्चैः सुरतममृतवति सरसि चरन्तः ।
कण्टकबाधाः क्वापि न चास्ते प्रविशति सततमपि सलिलमब्जः ॥

पथ्यावक्रवृत्तम् ।

वासुदेवपरब्रह्मपण्डितः कर्तुमर्हति ।
कथामप्रस्तुतां चापि प्रस्तुतार्थोपयोगिनीम् ॥

Colophon:

इति श्रीजानकीजानेरद्वैतब्रह्मपण्डितस्यात्मजेन शतघण्टावधानकृता वासुदेवपरब्रह्मपण्डितेन विरचितं जगन्मोहनवृत्तशतकं संपूर्णम् ॥

(*d*) श्रीसूक्तव्याख्यानम्.

ŚRĪSŪKTAVYĀKHYĀNAM.

Foll. 127*a*—130*a*. Fol. 130*b* is left blank.

By Mādhavācārya. Same work as that described under No. 23 of the D.C.S. MSS., Vol. I., Part I.

Incomplete.

(*e*) आत्मानात्मविवेकः.

ĀTMĀNĀTMAVIVĒKAḤ.

Foll. 131*a*—133*a*. Fol. 133*b* is left blank.

Similar to the work described under No. 4560 of the D.C.S. MSS., Vol. IX.

Complete.

Transcribed for one Rāmuḍu from the MS. of Nṛsimha Śāstri, the copying having been completed on Friday, the 7th day of the dark fortnight of the Āṣāḍha month in the year Śukla.

Beginning:

आत्मानात्मविवेकः कथ्यते। आत्मा—स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तः, अवस्थात्रयसाक्षी, पञ्चकोशव्यतिरिक्तः, चतुर्विंशतितत्त्वेभ्यो व्यतिरिक्तः; किन्तु नित्यशुद्धभुक्तमुक्तसत्यपरमानन्दस्वरूपः आत्मा। अनात्मा—स्थूलसूक्ष्मकारणशरीराणि। कारणशरीरं नाम—आत्मज्ञानं साभासमव्याकृतमित्युच्यते। तच्च न सत्, नासत्, नापि सदसत्, न भिन्नं, नाभिन्नं, नापि भिन्नाभिन्नम्।

End:

षडूर्मिर्नाम अशना(या)पिपासे, शोकमोहौ, जरामृत्यू। अशना(या)पिपासे प्राणधर्मौ, शोकमोहौ मनोधर्मौ, जरामरणे स्थूलदेहधर्मौ। एतत्सर्वमनात्मा ॥

Colophon:

आत्मानात्मविवेकस्समाप्तः ॥

R. No. **1980**.

Palm-leaf. 18½ × 1⅜ inches. Foll. 52. Lines, 8 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. Śiṣṭla Narasiṁha Śāstrigāru of Bandar, Kistna district.

(*a*) जातककलानिधिः.

JĀTAKAKALĀNIDHIḤ.

Foll. 1*a*—30*a*. Fol 30*b* contains Digbala, Sthānabala, etc.

Same work as that described under Nos. 13669 and 13670 of the D.C.S. MSS., Vol. XXIV, wherein see for the beginning.

Contains up to the end of the Strījātaka.

End:

सौरे मध्यबले हीने तीक्ष्णांशुर्भार्गवेन्दुजैः।
शेषैर्व . . . . . . स्वोच्चगैर्वा स्वराशिगैः ॥
समे लग्नेन्दुगे जाता सर्वशास्त्रविवादिनी।
एवं त्र्यादिग्रहैर्युक्ता विद्वान् तत्तत्फलं वदेत् ॥

Colophon:

इति जातककलानिधौ(स्त्रीजातक)कथनं नाम ।

(*b*) जातकयोगार्णवः.

JĀTAKAYŌGĀRṆAVAḤ.

Foll. 31*a*—42*a*. Foll. 42*b* and 43*a* contain some astrological passages.

Slightly different from the work described under No. 13695 of the D.C.S. MSS., Vol. XXIV.

Contains the fifth Adhyāya.

Beginning:

लग्नात् सप्तमगे चन्द्रे चन्द्रादष्टमगे रवौ ।
गुरुणा संयुते लग्ने कुसुमोद्योग ईरितः ॥
कुसुमोद्योगभूपालो विसि(पि)ता बन्धुश्च रक्षकः ।
ग्रामान् नगरकर्ता च विंशदब्दा . . . . . ॥
बन्धुकर्मगृहाधीशावन्योन्यक्षेत्रमाश्रितौ ।
लग्नेशे स्वोच्चराशिस्थे चापयोग उदीरितः ॥

End:

कचिद्भाग्यं कचित् सौख्यं कचिद्भाग्यं कचिद्यशः ।
कचिद्दारिद्र्ययोगस्स्यात् कचिद्दुःखं कचित् फलम् ।

Colophon.

इति योगार्णवे पञ्चमोऽध्यायः ॥

(*c*) जातकपारिजातः.

JĀTAKAPĀRIJĀTAḤ.

Foll. 43*b*—47*a*.

By Vaidyanātha. Same work as that described under No. 1592 of the Triennial Catalogue of MSS., Vol. II, Part I-C.

Contains the Aṣṭakavargādhyāya only.

Foll 47*a*—50*b* contain Aṣṭakavarga, Saṁvatsaraphala, etc. The remaining leaves are left blank.

R. No. **1981.**

Palm-lea $16\frac{3}{8} \times 1\frac{1}{2}$ inches. Foll. 58. Lines, 7 in a page. Telugu. Injured.

Presented in 1916-17 by M.R Ry. Śiṣṭla Narasiṁha Śāstrigāru of Bandar, Kistna district.

(*a*) जातकचन्द्रिका, आन्ध्रटीकासहिता.

JĀTAKACANDRIKĀ WITH TELUGU MEANING.

Foll. 1*a*—10*b*.

Same work as that described under No. 13679 of the D.C.S. MSS., Vol. XXIV, but with slight difference in the end.

Incomplete.

End :

शुभाशुभानामेव ग्रहाणामुच्चता स्वक्षेत्रादिगुणः नीचता शत्रुक्षेत्रादिदोषश्च बलवत्त्वदौर्बल्यत्वयोरिव हेतुरिति भावः ॥

The scribe adds—

श्रीविश्वनाथात्मजविश्वनाथ(:) पाराशरीं भावनिमित्तहोराम् ।

मूर्त्यादिभा . . . . वमत्र सविश्वनाथस्सम्यग्विलिख्य तदनु प्रकटीकरोति ॥

(*b*) जातकनिर्णयः.

JĀTAKANIRṆAYAḤ.

Foll. 11*a*—23*a*.

Similar to the work described under No. 13691 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

Beginning :

श्रीरूपलक्षवर्णानि क्लेशदीपिसुखायुषः ।
वयःप्रमाणजातीनां तनुस्थानं निरीक्षयेत् ॥
मणिमुक्ताफलं स्वर्णरत्नधातुकद(कुटु)म्बकम् ।
क्रिया एतानि सर्वाणि धनस्थाने निरीक्षयेत् ॥

End :

लग्नात् तृतीयभावस्थो जीवस्सूर्यमहीसुतः ।
तदीशो बलहीनश्चेत् त्रिमासान्तरतो मृतिः ॥

(*c*) भावनिघण्टुः.

BHĀVANIGHAṆṬUḤ.

Fol. 23*a*. Foll. 23*b*—24*b* contain Bhāvanirupaṇa.

Same work as that described under No. 13868 of the D.C.S. MSS., Vol. XXIV.

Complete.

(*d*) केरलीयसूत्रम्.

KĒRALĪYASŪTRAM.

Foll. 24*b*—28*b*.

Deals with horoscopy according to the system prevailing in the Kērala country.

Contains the portion dealing with the Bhāvas of which the first six are wanting.

Beginning:

कलत्रभावः—

अथ राहुदशाफलम्—

राहोस्तु वृषभं केतुः वृश्चिके तुङ्गसंज्ञिकम् ।
मूलत्रिकोणं कर्के च युग्मचापं तथैव च ॥
कन्या च स्वगृहं प्रोक्तं मीनमेषौ च मित्रभम् ।

* * * *

कलत्रस्थानाधिपतत्कारकौ षष्ठाधिपयुक्तौ तत्र कुजांशकयुक्ताश्चेत् जारः

End:

तत्र पापयोगे अधिकदिव्यसंवत्सरनरकस्थापनपापं पुनर्जन्म भवति । पूर्वोक्तषष्टिभोगादिनवांशकस्वरूपे फलप्राप्तिः ॥

Colophon:

इति श्रीविरचितायां केरलशास्त्रे द्वादशभावफलस्समाप्तः ॥

Foll. 28*b*—39*a* contain Karmajīvanirṇaya, Navagrahaphala and Rājayōga, etc. Fol. 39*b* is left blank.

(*e*) जातकपारिजातः, आन्ध्रटीकासहितः.

JĀTAKAPĀRIJĀTAḤ WITH TELUGU MEANING.

Foll. 40*a*—44*b*.

By Vadiyanātha. Same work as that described under R. No. 1592 of the Triennial Catalogue of MSS., Vol. II, Part I-C.

Wants the beginning; otherwise complete.

(*f*) नक्षत्रजातकम्.

NAKṢATRAJĀTAKAM.

Foll. 45*a*—57*a*. Fol. 58*b* is left blank.

A treatise in horoscopy dealing with the Daśās that would befall to persons born under the influence of the various constellations. The

work is said to have been based on the Viṣṇusāra which contains the sayings of many eminent astrologers.

Incomplete.

Beginning:

श्रीनृसिंहं हरिं वन्दे श्रुतिकल्पतरुं गुरुम् ।
वागीशं वरदं विष्णुमन्तरायोपशान्तये ॥
गङ्गादिपरमं तीर्थं सर्वपापहरं नृणाम् ।
यस्मिन्नस्तमिते तीर्थं तस्मै स्वात्मवते नमः ॥
आचार्यैर्बहुभिः प्रोक्तं बहु तत्त्वादिदर्शिभिः ।
विष्णुसारं द्रुसत्यमु वक्ष्ये नक्षत्रजातकम् ॥
इनशशिकुजराहुर्जीवमन्दज्ञकेतुः
भृगुज इति नवानां भास्करादिक्रमेण ।

तनु ६ नय १० सिनि ७ जाया १८ तोय १५ धात्रा १९ सका १७ सा ७ नर २० इति विदुरात्मा कृत्तिकादिक्रमेण ॥

जन्मर्क्षे दशां विद्यात् दशा मूलदशास्त्रिभिः ।
हत्वा तामहताः कुर्यात्साब्दे संस्पष्टयेत् पुनः ॥
स्वदशां त्रिगुणीकृत्य द्वादशेन हतं पुनः ।
खाग्निनाप्तं भवेल्लब्धं मासं शेषदिनं भवेत् ॥

End:

व्ययार्थोभयकश्चन्द्रं विना भानुर्न चेत् गृहात् ।
कश्चिद्वास्या विना चन्द्रो लग्नात्केन्द्रगतोऽपि वा ॥
योगः केमद्रुमो नाम . . . तस्यादत्र गर्हितः ।

R. No. **1982.**

Palm-leaf. $18\frac{3}{4} \times 1\frac{1}{2}$ inches. Foll. 41. Lines, 8 on a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. Śistla Narasiṁha Śāstrigāru of Bandar, Kistna district.

सर्वागमरत्नाकरः.

SARVĀGAMARATNĀKARAḤ.

This treatise forms part of the Mahātraipurasiddhānta. The different topics dealt with in this portion are given below.

Complete.

१. उपोद्घातः.
२. गुरुशिष्याचार्यविवरणम्.
३. रश्मिमालाविवरणम्.
४. सर्वमन्त्रयजनप्रकारः.
५. दीक्षाविधानम्.
६. गायत्र्यनुष्ठानकथनम्.
७. गायत्रीमाहात्म्यम्.
८. गायत्रीपूजाविधानम्.
९. जपमहिमानुवर्णनम्.
१०. शक्रमन्त्रविवरणम्.
११. सौरमन्त्रविवरणम्.
१२. प्रणवमाहात्म्यम्.
१३. तुरीयगायत्रीस्वरूपकथनम्.
१४. सदाचारः.
१५. चक्षुष्मतीस्वरूपवर्णनम्.
१६. गन्धर्वराजमन्त्रविधिः.
१७. षड्रुद्रमाहात्म्यम्.
१८. ताराविधानम्.
१९. नामत्रयविधानम्.
२०. गणपत्यन्तर्यागविवरणम्.
२१. महागणपतितर्पणविधानम्.
२२. महागणपतिपूजाविधानम्.
२३. महागणपतिविद्याविवरणम्.
२४. पञ्चाक्षरप्रशंसा.
२५. मृत्युञ्जयमाहात्म्यम्.
२६. श्रुतधरीविद्यामाहात्म्यम्.
२७. मातृकामाहात्म्यम्.
२८. शिवादिविद्यास्वरूपम्.
२९. संपत्सरस्वतीमाहात्म्यम्.
३०. कालसङ्कर्षिणीमाहात्म्यम्.
३१. शाम्भवविद्यामाहात्म्यम्.
३२. परान्तर्यजनम्
३३. परायजनविधानम्.
३४. पराविद्याप्रयोगकथनम्.
३५. कुमारीन्यासविवरणम्.
३६. कुमारीमन्त्रधारणविवरणम्.
३७ कुमारीबहिर्यजनविधानम्.
३८. बालाप्रयोगकथनम्.
३९. अन्नपूर्णेश्वरीकथनम्.
४०. परमेश्वरीयजनम्.
४१. गुरुपादुकाविवरणम्.
४२. कामेश्वरीयजनविधानम्.
४३ कामेश्वरीनित्यामाहात्म्यम्.

Beginning :

गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ।
अनाध्यायो शिलाध्यायो मायिने गतमायिने ।
अरूपाय सुरूपाय शिवाय गुरवे नमः ॥
बालसूर्यसहस्राभं दशबाहुं किरीटिनम् ।
महागणपतिं वन्दे प्रत्यूह ध्वान्तभास्करम् ॥

श्रीदेव्युवाच—

भगवन् देवदेवेश वृषभध्वज शङ्कर ।
सर्ववागीश सर्वज्ञ सर्वशास्त्रैकनायक ॥
रहस्यं यत् त्रिलोकेषु चतुर्वेदेषु यत्परम् ।
चतुर्वर्णेषु यद्गुह्यं चतुर्मूर्तिषु यत्परम् ॥
यद्गुह्यं दिक्षु चतुर्षु यच्चतुस्सागरेषु च ।
चतुर्गिरिषु यद्गुह्यमाश्रमेषु चतुर्ष्वपि ॥
पञ्चाम्नायेषु यद्गुह्यं शतक्रतुषु यत्परम् ।
नवरत्नेषु यद्गुह्यं षण्मतेष्वपि यत्परम् ॥
षड्दर्शनेषु यद्गुह्यं तन्ममाचक्ष्व शङ्कर ॥

ईश्वर उवाच—

शृणु वक्ष्यामि गिरिजे सुमना भव पार्वति ।

* * * *

Colophon:

इति श्रीमहात्रैपुरसिद्धान्ते सर्वागमरत्नाकरे प्रथमो विलासः ॥

* * * *

महात्रिपुरसिद्धान्ते सर्वतन्त्रोत्तमोत्तमम् ।
साङ्गाश्च चतुरो वेदाः श्लोकेनैकेन नो समाः ।
व्यासवक्त्रात्पुराणानि श्रुतयो मधिपानतः(?) ।
शास्त्राणि मुनिवक्त्रेभ्यो निभृतानि मम प्रिये ॥
महात्रैपुरसिद्धान्तं मम वक्त्राद्विनिस्सृतम् ।
अस्मिन् तन्त्रे मया प्रोक्तं यस्य तत्सत्यमेव हि ।
अस्मिन् तन्त्रे मया देवि श्लोकं श्लोकार्धमेव वा ।
ज्ञायते . . . ता यस्य स एव त्रिपुरस्स्मृतम् ॥

* * * *

Colophon:

इति श्रीमहात्रैपुरसिद्धान्ते सर्वागमरत्नाकरे सर्वमन्त्रयजनप्रकारो नाम चतुर्थः पटलः ॥

End:

त्रैलोक्यद्रावणाकर्षवश्यसंक्षोभकारकम् ।
सौभाग्यमतुलं दत्वा महासारस्वतं तथा ॥

अजरामरणत्वं वा वाञ्छिता: कन्यकोत्तमा: ।
ददात्यस्मै न सन्देह: सत्यं सत्यं मम प्रिये ॥
इति कामेश्वरीविद्यामाहात्म्यं किञ्चिदीरितम् ।
सर्वाभीष्टप्रदं देवि किं पुन: श्रोतुमिच्छसि ॥

Colophon:

इति श्रीमहात्रैपुरीसिद्धान्ते सर्वागमरत्नाकरे कामेश्वरीनित्यामाहात्म्यं नाम त्रिचत्वारिंशो विलास: ॥

R. No. **1983.**

Palm-leaf. 15⅜ × 1½ inches. Foll. 33. Lines, 7 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. Śistla Narasiṁha Śāstrigāru of Bandar, Kistna district.

कृष्णयजुस्संहिता.

KṚṢṆAYAJUSSAṀHITĀ.

Same work as that described under No. 71 of the D.C.S. MSS., Vol. I, Part II.

Contains the third Kāṇḍa complete.

Name of the scribe: Vēmūri Rāmaśēsayyar. Date of copying: Thursday, the 11th day of the bright fortnight in the year Āṅgirasa.

R. No. **1984.**

Palm-leaf. 16⅛ × 1½ inches. Foll. 36. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R.Ry. Śistla Narasiṁha Śāstrigāru of Bandar, Kistna district.

कृष्णयजुस्संहिता.

KṚṢṆAYAJUSSAṀHITĀ.

Same work as that described under No. 71 of the D.C.S. MSS., Vol. I, Part II.

Contains the seventh Kāṇḍa complete.

Name of the scribe: Maddūri Somanna. Date of transcription: Wednesday, the 3rd day of the bright fortnight of the Mārgaśira month in the year Viśvāvasu.

R. No. **1985.**

Paper. 8¾ × 4½ inches. Foll. 4. Lines, 11 in a page. Telugu. Fair.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

आत्मार्पणस्तोत्रम्.

ĀTMĀRPAṆASTŌTRAM.

Same work as that described under No. 11232 of the D.O.S. MSS., Vol. XIX, the stanzas being arranged in a different order with the following end.

Complete.

End:

आत्मार्पणस्तुतिरियं भगवन्निबद्धा
यद्यप्यनन्यमनसा न मया तथाऽपि ।
वाचापि केवलमयं शरणं वृणीते
दीनो वराक इति रक्ष कृपानिधे माम् ॥ १० ॥

Colophon:

स्तुतिस्समाप्ता ॥

R. No. **1986.**

Paper. $12\frac{3}{8} \times 4\frac{1}{8}$ inches. Foll. 6. Lines, 13 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) कारकवादार्थः.

KĀRAKAVĀDĀRTHAH.

Foll. 1*a*—3*b*.

By Jayarāma. Same work as that described under R. No. 114(*c*) ante.

Incomplete.

(*b*) वादार्थः.

VĀDĀRTHAḤ.

Foll. 4*a* and 5. Fol. 4*b* is left blank.

Discusses the meaning of certain important Sūtras of Pāṇini's grammar. By Rāmakṛṣṇa.

Incomplete.

Beginning:

पाणिन्यादिमुनीन् नत्वा तद्वचांस्यनुचिन्त्य च ।
कुर्वेऽहं रामकृष्णाख्यो वादार्थं न्यायवि(त्त)रैः ॥
पतञ्जल्यादिभिः शिष्टैर्निष्कर्षे प्रापिते सति ।
किन्तत्रास्ति विचारं मे नव्योक्तियुतथापि कृत् (?) ॥

युक्तायुक्तविचारार्थं प्रवर्तेत . . . मं बुधाः ।
विदाङ्कुर्वन्तु निर्मुक्तमत्सरास्सादरं भृशम् ॥

हलन्त्यम् ॥ अन्योन्याश्रयव्यावृत्त्यर्थं सूत्रमेवावर्तनीयम् । न तु हलित्येकदेशः, समाहारद्वन्द्वस्य सहविवक्षासम्भवेन वक्तुमशक्यत्वात् षष्ठीसमासस्य क्लिष्टत्वाच्चेति नव्याः । तन्न, गौरवादित्याधुनिकटीकाकृतः । तत्र कश्चित्—गौरवस्य प्रामाणिकत्वेनादोषत्वात्सूत्रावृत्तिरेव न्याय्येति । तच्चिन्त्यम् ।

End:

अतएव कास्प्रत्ययादित्यत्र कास्यनेकाच इति वार्तिकेन सूत्रस्थप्रत्ययग्रहणप्रत्याख्यानं भाष्यानारूढं फलभेदे जागरूकेऽपि स्वपरग्रन्थोक्तं हरदत्ताद्युक्तं च सङ्गच्छते । किञ्चैवं निष्ठायामनि.

Fol. 6*a* contains Bhaṭṭōjikuṭṭana, and 6*b* contains a list of MSS. handed over to Kōdūr Subbā Śāstri of Bellary.

R. No. **1987.**

Paper. $10\frac{7}{8} \times 4\frac{3}{8}$ inches. Foll. 6. Lines, 11 in a page. Telugu. Fair.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

कारिकावली.

KĀRIKĀVALĪ.

By Viśvanāthapañcānana. Same work as that described under No. 3928 of the D.C.S. MSS., Vol. VIII.

Complete.

R. No. **1988.**

Paper. $12\frac{1}{4} \times 4\frac{3}{8}$ inches. (Seven of the leaves are only $9\frac{1}{2}$ inches long). Foll. 47. Lines, 14 and 8 in a page. Dēvanāgarī. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

महाभाष्यम्.

MAHĀBHĀṢYAM.

By Patañjali. Same work as that described under No. 1293 of the D.C.S. MSS., Vol. III.

Contains IV-1-1 (without beginning and end) and also the portion beginning in the course of II-2-1 and breaking off in II-4-2.

R. No. **1989.**

Paper. 11, 9⅝ × 4⅝ inches. Foll. 11. Lines, 11 in a page. Telugu and Dēvanāgarī. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

मङ्गलवादः.

MAṄGALAVĀDAḤ.

Foll. 1b—5b. Foll. 6a—11b contain Vyāptinirūpaṇa.

This treatise discusses whether an auspicious beginning is necessary or not for the successful termination of an undertaking and comes to the conclusion that it is necessary. By Harirāmatarkavāgīśa.

Complete.

Beginning:

ननु मङ्गलं न समाप्तिसाधनम्, मङ्गले सत्यपि कादम्बर्यादौ ग्रन्थासमाप्तेः। मङ्गलं विनापि प्रत्ता(त्ता)नुष्ठितेन समाप्तेरन्वयव्यतिरेकाभ्यां व्यभिचारात्। नापि विघ्नध्वंसः। मङ्गलं विनापि तस्य विनायकस्तवपाठादिना जायमानत्वेन व्यभिचारः। तस्मान्मङ्गलं निष्फलमेवेति चेत्तत्राहुः। मङ्गलं सफलकम्, अविगीतशिष्टाचारविषयत्वादित्यनुमानेन मङ्गलस्य सफलत्वसिद्धिः।

End:

तदेतन्मङ्गलं प्रधानम्। विघ्नवान् विघ्नज्ञानवान् वा अधिकारी तु संशये तद्भ्रमेऽपि वा तदाचरणात्। यत्तु आकरे अनैमित्तिकादिकमस्य विचारितं तत्त्वनुपयुक्तत्वादुपेक्षितमस्माभिः॥

Colophon:

इति हरिरामतर्कवागीशविरचितो मङ्गलवादः समाप्तः।

R. No. **1990.**

Paper. 11⅜ × 5¼ inches. Foll. 24. Lines, 13 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

वाग्भूषणम्, सव्याख्यानम्.

VĀGBHŪṢAṆAM WITH COMMENTARY.

A group of periphrastic and otherwise curiously composed stanzas addressed to and in praise of नवग्रह, दशावतार, त्रिमूर्ति, त्रिशक्ति, दिक्पाल,

दशदिक्पाल, कुमार, ब्राह्मण, पुरुषार्थ. The author of the text as well as of the commentary is Rāmacandra of Bhārgavagōtra and the native of a place on the banks of the Tamraparṇī in the Pandya kingdom.

Complete.

Beginning :

नत्वा गुरुं राममपीष्टदैवं भक्तस्तयोस्तेन कृतस्य तन्वीम् ।
काव्यस्य वाग्भूषणसंज्ञकस्य व्याख्यां करोति स्म स रामचन्द्रः ॥
विप्राधिपारिरिपुसूनुविरोधितातो मित्रात्मजारिजनकारिसुताङ्कसंस्थः ।
पार्थाग्रजाग्रजनकाशनशत्रुपत्रज्येष्ठो ददातु कचमध्यमुखः शुभं वः ॥

व्या--विप्रेति । विप्राधिप चन्द्रः तस्यारिः राहुः तस्य रिपुः कृष्णः तस्य सूनुः कामः तं विरोद्धुं शीलं यस्य सः शिवः तस्य तातः पुत्रः तातस्तु पितृपुत्रयोरिति कोशः ।

* * * *

गौर्गोजिनिर्गविगवां स्वगवाचितानां वृष्ट्याभिनन्दयति योजनतास्वगोदः ।
गोपत्रगोपतिगवेन्द्रगवेश्वराणां पूज्यो गवां सभुगसौ दधतां श्रियं वः ॥

* * * *

स्रोतस्विनीशकमलप्रणिविष्टदैत्यप्राणैस्सहाहृतसमर्पितवेदविद्यैः ।
भृग्वापवादिमुनिभिः परिसेव्यमानः पाठीनमूर्तिरवताद्भवतो रमेशः ॥

End :

सुदामदौर्गत्यहरं तमोऽपहं पूतेष्टदानैः पुरुषार्थदं नृणाम् ।
पद्माढ्यपार्श्वं मकरादिरूपिणं सिद्ध्यै मुकुन्दं शरणं गतोऽस्म्यहम् ॥

* * * *

एकान् द्विरूपान् त्रिचतुर्भिरीडितान् पञ्चास्यषड्वक्त्रसुतांश्च सप्त च ।
नाष्टाभिराप्यान्नवभिर्दशाध्युतान् व्रजामि नित्यं शरणं विमुक्तये ॥

* * * *

पादे यस्य धुती दिवश्शिरसि वा देहे गले मेचकः
शय्या यस्य फणी च भूषणमहो मारस्सुतो वा रिपुः ।
भर्ता भूमिभृतां च यस्य निलयो यं षट्पुरारिं विदुः
यं बाहुस्त्रिपुरारिमेमि शरणं वा तत्त्वतोमाधवम् ॥

* * * *

उमाधवं शिवं शरणमेमि प्राप्नोति अर्थादुभयमपीति सर्वेष्टसिद्धिः । षट्पुरवासिनो दैत्याः श्रीकृष्णेन व्यापादिता इति हरिवंशादौ स्पष्टम् ।

पाण्ड्ये पण्डितमण्डिते मलयजाश्रीताम्रपर्णीजलैः
पूते निर्वृतिसम्भवेन गुरुणा श्रीरामचन्द्रेण नः ।
इत्थं गूढपदं मतिप्रदमदो वाग्भूषणाख्यं कृतं
काव्यं व्याक्रियतेऽत्र येन विदुषा तं तं नमामो वयम् ।

पाण्ड्य इति । एतत्काव्यकर्तुः शिष्योक्तिरियम् । पण्डितमण्डिते विद्वद्भिरलङ्कृते ।

* * *

तं विद्वांसं वयं नमामः । तस्य दासो भवाम इत्यर्थः ।
काव्यस्य वाग्भूषणसंज्ञकस्य गूढाक्षरस्य स्वकृतस्य चित्राम् ।
व्याख्यां प्रचक्रे शतकस्य सूक्ष्मां विद्वन्मुदे भार्गवरामचन्द्रः ॥

Colophon:

इति श्रीरामचन्द्रकृतं बृहद्वाग्भूषणाख्यं शतकं सम्पूर्णम् ॥

शुभं तु रामो जयतीति तुभ्यं काव्यं कृतेन भट्टरामचन्द्रेण ।
सप्तम्यां च रवेर्वारे बुधस्य प्रतिदे(व)नम् ॥
संवर्ताख्यस्तदा योगो वर्जि(त)व्यश्शुभे सदा ।
नन्दा शुक्रे बुधे भद्रा शनौ रिक्ता कुजे गुरौ ।
पूर्णा तिथिस्स विज्ञेयास्सिद्धयोगा शुभावहा ॥

R. No. **1991.**

Paper. 10 × 4⅜ inches. Foll. 4. Lines, 9 on a page. Dēvanāgarī. Fair.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

हनुमत्प्रतिष्ठाविधिः.

HANUMATPRATIṢṬHĀVIDHIḤ.

On certain details such as the proper time, the necessary religious ceremonies, etc., for consecrating the image of Hanumat—according to Bōdhāyana.

Complete.

Beginning:

उत्तरायणे माघफाल्गुनवैशाखमासेषु शुभदिने शुभनक्षत्रेषु स्थिरलग्ने पञ्चमशुद्धिं कुर्यात । केन्द्रस्थाने शुभग्रहे स्थिरमुहूर्ते त्रिकोणस्थाने क्रूरग्रहे स्थिरे

तस्मिन् दिने प्रतिष्ठापनं कुर्यात् । ततः पूर्वेद्युः स्वस्तिवाचनं कुर्यात् । गृहोत्तरभागे वेदिकां कुर्यात् । तस्योपरि चतुर्द्वारशोभितं मण्टपं कुर्यात् । पूर्वद्वारे सूक्तजपार्थमृग्वेदिनं विप्रं संस्थाप्य ।

End:

यथाशक्ति षोडशोपचारपूजां कृत्वा पुरुषसूक्तेन प्रतिऋचं षोडशाज्याहुतीर्हुत्वा होमशेषं समापयेत् । ततः कङ्कणं विसृज्य वैश्वदेवादिकं कुर्यात् । ब्राह्मणान् गन्धपुष्पादिभिरभ्यर्च्य यथाशक्ति ब्राह्मणान् भोजयेत् । आत्मा देवानामिति मन्त्रं जपित्वा । आदित्यरथवेगेनेति मन्त्रं जपित्वा बन्धुभिस्सह स्वयं भुञ्जीतेत्याह भगवान् बोधायनः ॥

Colophon:

हनुमत्प्रतिष्ठाविधिस्समाप्ता ॥

R. No. **1992.**

Paper. $10\frac{5}{8} \times 4\frac{1}{2}$ inches. Foll. 29. Lines, 10 in a page. Dēvanāgarī. Slightly injured.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Fol. 1*a* is left blank.

सुदर्शनमीमांसा.
SUDARŚANAMĪMĀṀSA.

Foll. 1*b*—27*b*.

This treatise purports to establish by means of authoritative quotations the imperative nature of the Taptamudrādhāraṇa ceremony. As the wearing of the five weapons of God Viṣṇu on the body of a person is enjoined herein, it may be inferred that the author of the work must be a follower of the Dvaita school of the Vēdānta.

Complete.

Beginning:

लक्ष्मीलताश्लेषविशेषरम्यं नारायणं संश्रितपारिजातम् ।
संसारमार्गश्रमभारखिन्नः समाश्रये सद्गुरुदर्शिताध्वा ॥

पञ्चायुधैरपि यथाविधि लाञ्छितानां पद्माक्षबीजवलयैश्च परिष्कृतानाम् ।
फालस्थलीविलसदूर्ध्वसुपुण्ड्रकाणां पादारविन्दयुगलं हृदि शीलयामि ॥

इह खलु केचन परमपुरुषचरणारविन्दनिष्यन्दमकरन्दरसास्वादवैदेशिका कलिमलविलसितध्वान्तावृतस्वान्ताः दितिजदमनदयामन्दाकिनीमञ्जुलकल्लोलमाला-संक्षालितसकलदुरितसमुदायैराहते चक्रादिधारणे विमन्यन्ते । ते ह्येवं सङ्गिरन्ते— न हि चक्रादिधारणकर्तृतायां प्रत्यक्षमनुमानं वा प्रमाणं भवति, तयोर्धर्मे प्रामाण्या-भावात् । न च काचन श्रुतिरेतद्विषया पठ्यमाना दृश्यते । सन्ति खलु ग्विलश्रुत-य इति च न, तासां श्रुतित्व एव विश्वासाभावात् ।

* * * *

अथर्वणे—चक्रं बिभर्ति वपुषाभितप्तं तं देवानाममितस्य विष्णोः । स एति नाकं दुरितं विधूय विशन्ति यद्यतयो वीतरागाः ॥

अमितस्यापरिमितस्य सर्वव्याप्तस्य विष्णोः सम्बन्धिनं देवानां बलभूतमभि-तप्तं चक्रं यो वा पुरुषो बिभर्ति स दुरितानि विधूय वीतरागाः यत्पदं विशन्ति प्राप्नुवन्ति तन्नाकं परमपदं प्राप्नुवन्ती(प्नोती)त्यर्थः ॥

End:

आत्मपौरुषे श्रुतिवाक्यगणविहितस्य स्मृतीतिहासपुराणवचनशतोपबृंहितस्य स्वतः सर्वज्ञसदाचारसङ्ग्रहप्रवृत्तपरमकारुणिकपरमपुरुषप्रणीतपञ्चरात्रशास्त्रप्रतिपा-दितस्य परमर्षिसंभावितस्य क्वचिदप्यनिषिद्धस्य यज्ञोपवीतादिवदधिगतनित्यधार-णस्य नानाफलसाधनभूतस्य सकलसदाचाराधिकारापादकस्य ध्यानाद्यङ्गभाक्त्वेन निर्णीतमोक्षोपयोगस्य मालाकरणादिवत् निरुपाधिकनारायणकैङ्कर्यरूपस्य तप्तपञ्चा-युधधारणस्य सकलदेशनिवासिभिरनुष्ठेयता सिद्धेति सर्वं समञ्जसम् ॥

Colophon:

इति सुदर्शनमाहात्म्यं समाप्तम् ॥

Foll. 27*b*—29*a* contain some stanzas regarding Ēkādaśīśrāddha.

Fol. 29*b* contains :—सुदर्शनमीमांसा समाप्ता ।

R. No. **1993.**

Paper. $10\frac{3}{8} \times 8\frac{5}{8}$ inches. Foll. 27. Lines, 14 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R.Ry N. Kuppusvāmi Ayyagāru, B.A.' Pleader, Tirupati.

Foll. 17—20 are lost.

तर्कभाषा.

TARKABHĀṢĀ.

By Kēśavamiśra. Same work as that described under No. 4104 of the D.C.S. MSS., Vol. VIII.

Complete.

R. No. **1994.**

Paper. 10 × 4 inches. Foll. 8. Lines, 11 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 7*b* and 8*a* are left blank. Fol. 8*b* contains the name Nyāyasiddhāntamañjarī.

न्यायसिद्धान्तमञ्जरी.

NYĀYASIDDHĀNTAMAÑJARĪ.

By Jānakīnātha alias Cūḍāmaṇibhaṭṭācārya. Same work as that described under No. 4215 of the D.C.S. MSS., Vol. VIII.

Contains the Anumāna portion incomplete.

R. No. **1995.**

Paper. $10\frac{3}{4} \times 4\frac{5}{8}$ inches. Foll. 72. Lines, 11 in a page. Dēvanāgarī. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

परिभाषेन्दुशेखरटीका.

PARIBHĀṢĒNDUŚĒKHARAṬĪKĀ.

Fol. 1*a* gives the place where and the name of the person by whom the book was lithographed and fol. 72*b* gives the title of the work as follows :—

इति श्रीमन्नुदेवविरचिता परिभाषेन्दुशेखरटीका समाप्ता.

By Mannudēva. Same work as that described under No. 1466 of the D.C.S. MSS., Vol. III, wherein see for the beginning.

Complete.

End:

अत एव ॐ आदेशस्य स्थानिवत्त्वान्मय उञ इति प्रकृतिभावापवादभूते आन्तरतम्यादनुनासिके वकारे किम्वितीति रूपं मनोरमायां प्रतिपादितम् । स्पष्टं चेदमीदूत्सूत्रे भाष्यकैयटयोः ॥

Colophon:

इति श्रीमन्मन्नुदेवविरचिता परिभाषेन्दुशेखरटीका समाप्ता ॥

संवत् १९३४.

R. No. **1996.**

Paper. 11⅞ × 4⅜ inches. Foll. 42. Lines, 13 in a page. Dēvanāgarī. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

परिभाषेन्दुशेखरव्याख्या—त्रिपथगा.

PARIBHĀṢĒNDUŚĒKHARAVYĀKHYĀ : TRIPATHAGĀ.

Fol. 1*a* gives the place of lithograph and the name of the person by whom it was lithographed with year; and 42*b* gives the colophon of the work as "इति परिभाषेन्दुशेखरव्याख्या त्रिपथगा समाप्ता".

A commentary on the Paribhāṣēnduśēkhara which work has been described under No. 1464 of the D.C.S. MSS., Vol. III: by Rāghavēndrācārya, son of Vēṅkaṭēśa and Sāvitrī.

Complete.

Beginning:

पुरान्तकसुराधिपप्रमुखसेवितं दैवतं
पुरातनगिरा स्तुतं कमलया समालिङ्गितम् ।
चराचरविधायि तत्प्रणिपतीपताम्यादरा-
दुरःसरधराधरप्रवरनीलधाराधर(म्) ॥
श्रीविङ्कटेशं पितरं सर्वतन्त्वविशारदम् ।
सावित्रीं मातरं नौमि गुरून् विद्याप्रदांस्तथा ॥
वितन्यते त्रिपथगा विष्णुपादाब्जसङ्गिनी ।
सागरस्य प्रिया चेन्दुशेखराङ्कविहारिणी ॥

प्रारिप्सितग्रन्थसमाप्तिप्रचयादिप्रतिबन्धकदुरितोपशमाय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति—नत्वेति । नागेश इति । नन्वात्मनामेति निषेधादयुक्तमिदमिति । अत्र केचित् । आत्मनामेति निषेधो व्यावहारिकनाममात्रविषयः । इदं तु यौगिकं नाम । अत एव भगवान् पतञ्जलिरपि गोनर्दीय आहेति तत्र तत्र यौगिकं नाम जग्राहेति । तन्न, नामान्तरेणाव्यवहारात् । व्यवहारेऽप्येतन्नाम्न एव प्रसिद्धेश्च । अभिवादनादौ व्यावहारिकनामोत्कीर्तनं न दोषायेति तत्त्वम् ॥

End:

जहत्स्वार्था वृत्तिः अजहत्स्वार्था वृत्तिः ।
जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी ॥
अन्त्या [न्त्या] सर्वत्र ।
इयं के परिभाषेन्दुशेखरेण विधार्यताम् ।
यतस्त्रिपथगा विष्णुपदस्पृक् सुमनःप्रिया ॥

Colophon:

इति राघवेन्द्राचार्यकृता परिभाषेन्दुशेखरव्याख्या त्रिपथगा समाप्ता ॥
संवत् १९३८ पौषशुक्ल.

R. No. **1997**.

Paper. $12\frac{1}{8} \times 4\frac{3}{8}$ inches. Foll. 8. Lines, 17 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

तर्कामृतम्.

TARKĀMṚTAM.

By Jagadīśatarkālaṅkāra. Same work as that described under No. 4191 of the D.C.S. MSS., Vol. VIII.

Complete.

R. No. **1998**.

Paper. $9\frac{7}{8} \times 4\frac{1}{4}$ inches. Foll. 55. Lines, 8 in a page. Dēvanāgarī and Telugu. Slightly injured.

Presented in 1916–17 by M.R Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

तत्त्वचिन्तामणिव्याख्या—तत्त्वदीपिका.

TATTVACINTĀMAṆIVYĀKHYĀ : TATTVADĪPIKĀ.

Foll. 1*a*—45*b*.

Foll. 46*a*—51*b* contain Pūrvapakṣavyāpti and foll. 52*a*—55*b* Siddhāntalakṣaṇa.

By Raghudēva. Same work as that described under No. 3999 of the D.C.S. MSS , Vol. VIII.

Incomplete.

R. No. **1999**.

Paper. $9\frac{5}{8} \times 4\frac{1}{8}$ inches. Foll. 17. Lines, 11 in a page. Dēvanāgarī. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

गङ्गामाहात्म्यम्.

GAṄGĀMĀHĀTMYAM.

A treatise explaining with authoritative quotations the religious sanctity of the river Ganges in 40 Prakaraṇas as given below: by Sōḍhadēva.

१. प्रभवप्रकरणम्.
२. स्वभावप्रकरणम्.
३. सर्वदेवमयत्वप्रकरणम्.
४. वैशिष्ट्यप्रकरणम्.
५. स्मृतिप्रकरणम्.
६. कीर्तनप्रकरणम्.
७ यात्राप्रकरणम्.
८. क्षेत्रप्रमाणप्रकरणम्.
९. संश्रुतिप्रकरणम्.
१०. गीतप्रकरणम्.
११. अभयप्रकरणम्.
१२. दर्शनप्रकरणम्.
१३. नमस्कारप्रकरणम्.
१४. स्पर्शनप्रकरणम्.
१५. अवगाहनप्रकरणम्.
१६. स्नानप्रकरणम्.
१७. पुण्यकालविशेषस्नानप्रकरणम्.
१८. मृत्तिकाप्रकरणम्.
१९. तर्पणप्रकरणम्.
२०. जपप्रकरणम्.
२१. पूजाप्रकरणम्.
२२. दानप्रकरणम्.
२३. व्रतचर्याप्रकरणम्.
२४. श्राद्धप्रकरणम्.
२५. पिण्डदानप्रकरणम्.
२६. जलप्रकरणम्.
२७. जलपानप्रकरणम्.
२८. आश्रयप्रकरणम्.
२९. विघ्नप्रकरणम्.
३०. प्रतिग्रहप्रकरणम्.
३१. अभक्तदूषणप्रकरणम्.
३२. प्रायश्चित्तप्रकरणम्.
३३. आक्षेपप्रकरणम्.
३४ कृतकृत्यप्रकरणम्.
३५. मृत्युप्रकरणम्.
३६. अस्थिप्रकरणम्.
३७. केशनखभस्मपातादिप्रकरणम्.
३८. प्रकीर्णकप्रकरणम्.
३९. गङ्गाद्वारफलम्.
४०. मुक्तिप्रकरणम्.

Complete.

Beginning:

श्रीगङ्गायाः प्रभवस्वभावसर्वामरादिवैशिष्ट्यस्मृतिकीर्तनयात्राक्षेत्रप्रमाणसंश्रुतयः गतिभयवैदर्शनमस्क्रियास्पर्शनावगाहनाख्याः स्नानकालविशेषस्नानमृत्तर्पणजपपूजाश्च.

* * * *

गङ्गाद्वारादिफलं मुक्तिश्चैवमतिपुण्यमतिरहस्यं लिखितं चत्वारिंशत्प्रकरण-मिति सोढदेवेन । तत्र प्रभवप्रकरणं महाभारते—

महापुण्यां हि गगनात्पतन्तीं यां महेश्वरः ।
दधार शिरसा गङ्गां तामेव दिवि सेवते ॥

End:

माहात्म्यं ये तु गङ्गायाः शृण्वन्ति च पठन्ति च ।
तेऽप्यसङ्ख्यैर्महापुण्यैर्मुच्यन्ते नात्र संशयः ॥
अतिदूरस्थितस्यापि गङ्गामाहात्म्यवेदिनः ।
अयोग्यस्यापि पापस्य नाशं गङ्गा प्रयच्छति ॥

Colophon:

इति सोढदेवकृतं गङ्गामाहात्यं समाप्तः(म्) ॥
संवत् १७३९.

R. No. 2000.

Paper. 8¼ × 4⅛ inches. Foll. 10. Lines, 10 in a page. Dēvanāgarī. Fair.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

अपामार्जनकल्पः.

APĀMĀRJANAKALPAḤ.

Same work as that described under No. 7740 of the D.C.S. MSS., Vol. XV.

Complete.

R. No. 2001.

Paper. 11¾ × 4⅜ inches. Foll. 6. Lines, 12 in a page. Telugu. Fair.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

लिङ्गानुशासनवृत्तिः.

LINGĀNUŚĀSANAVṚTTIḤ.

By Bhaṭṭōjidīkṣita. Same work as that described under No. 1496 of the D.C.S. MSS., Vol. III.

Complete.

R. No. 2002.

Paper. 13¼ × 3¾ inches. Foll. 35. Lines, 11 in a page. Telugu. Fair.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(a) वेदान्तसारः.

VĒDĀNTASĀRAḤ.

Foll. 1*a*—12*b*.

By Sadānanda. Same work as that described under No. 4746 of the D.C.S. MSS., Vol. IX.

Complete.

(b) तत्त्वचिन्तामणिः, दीधितिसहितः.

TATTVACINTĀMAṆIḤ WITH DĪDHITI.

Foll. 13*a*—19*a*. Fol. 19*b* is left blank.

By Gaṅgēsōpādhyāya and Raghunāthasirōmaṇibhaṭṭācārya. Same work as that described under Nos. 3982 and 4002 of the D.C.S. MSS., Vol. VIII.

Contains the Savyabhicāra only.

The colophon given as सामान्यनिरुक्तिदीधितिः समाप्ता is wrongly written.

(c) तत्त्वचिन्तामणिव्याख्या—फक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ : PHAKKIKĀ.

Foll. 20*a*—32*b*.

By Madhurānātha. Same work as that described under No. 4020 of the D.C.S. MSS., Vol. VIII.

Contains the Pakṣatā complete and the Sāmānyanirukti incomplete.

Foll. 33—35 cantain a small portion of the Gadādhara's Sāmānyanirukti.

R. No. 2003.

Paper. 12¾ × 4½ inches. Foll. 37. Lines, 12 in a page. Dēvanāgarī and Telugu, Fair.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(a) ब्रह्मतर्कस्तवः, सव्याख्यः.

BRAHMATARKASTAVAḤ WITH COMMENTARY.

Foll. 1*a*—25*b*.

Slightly different from the work described under R. No. 618 ante. Incomplete.

Beginning:

अथ ब्रह्मतर्कस्तवस्य नातिविस्तरं विवृण्वन्(वरणं) क्रियते। अत्र स्तोत्रस्य प्रतिपाद्यसकलार्थप्रतिज्ञापरोऽयमाद्यश्लोकः—

उच्चावचैरुपनिषत् . तर्कयामः ॥

प्रशस्तवाची प्रकाण्डशब्दः। प्रशस्तान्युपनिषद्वचनानि कारणवाक्यानि तानि।

End:

आगत्य गर्भं तत्याज सुखेनैव महामुने।

सा तु संत्यज्य तं बालं ब्रह्माणं सहसागमत् ॥

अहो मया ब्रह्मशापात्संजाता कुटिला सती।

एवं वह्निविसृष्टशिववीर्यधारण . . . . कुटिला गङ्गे(ति) निश्चीयते।

(*b*) तैत्तिरीयारण्यकम्.

TAITTIRĪYĀRAṆYAKAM.

Foll. 27*b*—37*b*. Fol. 27*a* is left blank.

Same work as that described under No. 169 of the D.C.S. MSS., Vol. I, Part II.

Contains the first Praśna which wants the beginning.

R. No. **2004**.

Paper. $12\frac{5}{8} \times 4$ inches. Foll. 57. Lines, 9 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 30*b*, 44*b* and 57*b* are left blank.

तत्त्वचिन्तामणिव्याख्या—फक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ: PHAKKIKĀ.

By Madhurānātha. Same work as that described under No. 4020 of the D.C.S. MSS., Vol. VIII.

Contains the Pūrvapakṣavyāpti, Siddhāntavyāpti and Prāmāṇyavāda.

R. No. **2005.**

Paper. $12\frac{5}{8} \times 5$ inches. Foll. 63. Lines, 11 in a page. Dēvanāgarī. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 1*a* and 23*b* are left blank.

तत्त्वचिन्तामण्यालोकटिप्पणी.

TATTVACINTĀMAṆYĀLŌKAṬIPPAṆĪ.

By Madhūranāthatarkavāgīśa. Same work as that described under R. No. 1540 ante.

Contains the Tātparyavāda, Śabdānityatvavāda, Ucchannapracchannavādas complete and Vidhivāda incomplete.

The MS. is dated: 3rd of Kārttikai, Samvat 1849.

R. No. **2006.**

Paper. $12\frac{5}{8} \times 3$ inches. Foll. 35. Lines, 10 in a page. Telugu. Slightly injured, the left side being bitten by rats.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) **तत्त्वचिन्तामणिव्याख्या—दीधितिः.**

TATTVACINTĀMAṆIVYĀKHYĀ: DĪDHITIḤ.

Foll. 1*a*–7*b*.

By Raghunāthabhaṭṭācārya. Same work as that described under No. 4002 of the D.C.S. MSS., Vol. VIII.

Contains the Avayava.

(*b*) **तत्त्वचिन्तामणिव्याख्या—तत्त्वदीपिका.**

TATTVACINTĀMAṆIVYĀKHYĀ: TATTVADĪPIKĀ.

Foll. 8*a*—20*b*. Fol. 21 is left blank.

By Raghudēvabhaṭṭācārya. Same work as that described under No. 3999 of the D.C.S. MSS., Vol. VIII.

Contains the Sāmagrīvāda which wants the beginning.

(*c*) **तत्त्वचिन्तामणिदीधितिप्रकाशिका.**

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

Foll. 22*a*—31*b*. Fol. 27 is left blank.

By Gadādhara. Same work as that described under No. 4041 of the D.C.S. MSS., Vol. VIII.

Contains the Sāmānyalakṣaṇa portion.

Fol. 32 contains the Satpratipakṣaśirōmaṇi and foll. 33a—34a contain a portion of the Tarkavāda. Fol. 34b is left blank. Fol. 35 contains a portion of Śaṅkarapatra on Gadādhara's Sāmānyanirukti.

R. No. **2007.**

Paper. 12⅛ × 4 inches. Foll. 14. Lines, 13 in a page. Dēvanāgarī. Slightly injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Fol. 14b is left blank.

सामान्यनिरुक्तिक्रोडपत्रम्.

SĀMĀNYANIRUKTIKRŌḌAPATRAM.

Similar to the work described under No. 4320 of the D.C S. MSS., Vol. VIII.

Wants the beginning; otherwise complete.

Beginning:

त्त्वं तदन्यत्वस्य विवक्षितत्वात् । उक्ता बाधज्ञानप्रतिबन्धकता तु न तादृशसाध्याभावरूपविशिष्टविषयानतिरिक्तेत्याहुः । ननु स्वावच्छेदकत्वस्वानिरूपितकारणतावच्छेदकत्वान्यतरसम्बन्धेन कार्यत्वोपलक्षितविषयित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वं हेत्वाभासत्वम् ।

End:

एतादृशप्रतीतिविषयीभूताभावप्रतियोगितानिरूपिता या निरूपितत्वसम्बन्धावच्छिन्नावच्छेदकता जातिजातिमन्निष्ठावच्छेदकता तत्पर्याप्त्यवच्छेदकं यद्रूपं सकलजातिजातिमन्निष्ठसमुदायत्वं तदवच्छिन्नपर्याप्तिकावच्छेदकताकविषयताशून्यत्वस्य ह्रदो जातिमानिति ज्ञाने सत्वात् ज्ञातिमान् जातिमानिति अभावात्तदसङ्ग्रहः ॥

Colophon:

इति सामान्यनिरुक्तिक्रोडपत्रिका समाप्ता ।

R. No. **2008.**

Paper. 12⅛ × 5⅝ inches. Foll. 65. Lines, 22 in a page. Telugu. Fair.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) व्रतोद्यापनकौमुदी.

VRATŌDYĀPANAKAUMUDĪ.

Foll. 1*a*— 44*b*.

On the proper time and ceremonies, etc., to be observed preliminary to a resolution to stop observing certain Vratas : by Śaṅkara, son of Dhāra Ballālasūri of Cittapāvana family.

Complete.

Beginning:

नत्वा गणेशं सन्तुष्ट्यै शङ्करेण वितन्यते ।
मुदा पुराणविख्यातव्रतोद्यापनकौमुदी ॥

इह तावत्सर्वव्रतोपयोगि किञ्चिन्निर्णयादिकं लिख्यते—

तत्र व्रतलक्षणम्— अभियुक्तव्रतसिद्धिविषयः सङ्कल्पविशेष एव व्रतम् । तत्र कालमाह हेमाद्रौ गार्ग्यः—

अस्तगे च गुरौ शुक्रे ह्रासे वृद्धे मलिम्लुचे ।
उद्यापनमुपारम्भं व्रतानां नैव कारयेत् ॥

End:

पीठादि आचार्याय दत्वा मण्टपं सदस्याय दत्वा भूयसीं दत्वा शताधिकान् ब्राह्मणात् भोजयिष्ये । सदन्नेन संभोज्याशिषो गृहीत्वा व्रतोद्यापनपूर्णतां वाचयित्वा इष्टजनैस्सह भुञ्जीत ॥

इत्यश्वत्थव्रतोद्योपनम् ॥

Colophon:

इति श्रीमच्चित्तपावनकुलाब्धिसंभवधारे इत्युपनामकबल्लालसूरिसूनुशङ्करविरचिता व्रतोद्यापनकौमुदी समाप्ता ॥

(*b*) अघसंग्रहः.

AGHASAṄGRAHAḤ.

Foll. 45*a*—46*a*. Fol. 46*b* is left blank.

Similar to the work described under No. 2985 of the D.C.S. MSS., Vol. V.

Complete.

Beginning:

प्रणम्य श्रीनृसिंहस्य पादाम्बुजयुगं मुहुः ।
लिख्यते सुखबोधाय विदुषामघसङ्ग्रहः ॥

तत्र जाताशौचं निर्णीयते---ब्राह्मणानां जाताशौचं प्रसूतिनिमित्तं दशरात्रम् । क्षत्रियाणां द्वादशरात्रम् । वैश्यानां पञ्चदशाहम् । शूद्राणामर्धमासम् । सर्ववर्णानां दशरात्रादि जाताशौचं तत्कालातिक्रमे नास्ति ।

End:

यदि पूर्वं कस्यचित् दहनं कृत्वा तदाशौचमध्ये अन्यानपि बन्धून् एकं द्वौ बहून् वा दहति तदा पूर्णा(र्वा)शौचेनोत्तराशौचानां निवृत्तिः । आशौचान्ते षड्घटिकानन्तरं स्नानकालः । सन्ध्यावन्दनमत्र समन्त्रकमर्घ्यप्रदानं कुर्यात् । अन्यत्सर्वं मनसा कुर्यात् ॥

(*c*) आशौचत्रिंशच्छ्लोकी, सव्याख्या.

ĀŚAUCATRIMŚACCHLŌKĪ WITH COMMENTARY.

Foll. 47*a*--65*a*. Fol. 65*b* is left blank.

Same work as that described under No. 3020 of the D.C.S. MSS., Vol. V.

Complete.

R. No. **2009.**

Paper. $12\frac{1}{8} \times 4\frac{1}{8}$ inches. Foll. 29. Lines, 12 in a page. Telugu. Slightly injured.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

The leaves are bound in disorder.

तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

By Gadādharabhaṭṭācārya. Same work as that described under No. 4043 of the D.C.S. MSS., Vol. VIII.

Contains the Nañvāda.

R. No. **2010.**

Paper. $10\frac{7}{8} \times 5\frac{1}{2}$ inches. Foll. 25. Lines, 21 in a page. Telugu. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvami Ayyagāru, B.A., Pleader, Tirupati.

रुद्रप्रश्नभाष्यम्.

RUDRAPRAŚNABHĀṢYAM.

By Bhaṭṭabhāskara. Same work as that described under No. 134 of the D.C.S. MSS., Vol. I, Part 2.

Almost complete.

R. No. **2011.**

Paper. 10 × 5½ inches. Foll. 9. Lines, 16 in a page. Telugu. Fair.

Presented in 1916-17 by M.R.Ry. N. Kuppasvāmi Ayyagāru, B.A., Pleader, Tirupati.

Fol. 9 is left blank.

काशिकातिलकम्.

KĀŚIKĀTILAKAM.

A work in prose and verse written after the model of Viśvaguṇādarśa. The story of this Campu is as follows:—Once upon a time Kubēra on his way to worship Śiva in Kailāsa was informed by the sage Nārada that God Śiva had gone to Avimuktāpuram. Thereupon Kubēra sent two Gandharvas, Śṛṅgāraśēkhara and Induśēkhara, to seek out Śiva. They went out in the guise of mortals visiting and describing the sacred shrines including Kāśī. By Nīlakaṇṭhabhaṭṭa of Kauṇḍinyagōtra, second son of Rāmabhaṭṭa who is said to have been well-versed in the six systems of philosophy.

Complete.

Beginning:

वन्दे गुरुं शिवं साम्बं दक्षिणामूर्तिमव्ययम् ।
यद्वन्दनेन मन्दोऽपि विन्देद्गुरुसमानताम् ॥
अम्बिकाहृदयाम्भोजमरन्दास्वादबम्भरः ।
वन्दारुकविमन्दार पाहि मां भव शङ्कर ॥

वन्दे श्रीहरिपादपङ्कजरजग्रासालिवन्मानसा-
नुर्वीमण्डलमण्डनायितयशोराशीनशेषान् गुरून् ।
दन्तिद्योतिदिवाप्रदीपबिरुदप्रख्यातविख्यातिकान्
वादावादिनिरस्तशात्रवसुधीवादप्रभेदप्रभान् ॥
श्रीकौण्डिन्यमहातपोधनकुलक्षीराम्बुराशिस्फुर-
द्राकेन्दीवरबन्धुराजलनिधेर्विख्यातनामाङ्कितः ।
नानाग्रन्थनिबन्धनैकनिपुणः षड्दर्शनीसम्पदा
गाढालिङ्गितमानसो विजयते श्रीरामभट्टाग्रणीः ॥

श्रीरामभट्टतनयो घनसांख्ययोगसत्तर्कतन्त्रमुखतन्त्रगणस्वतन्त्रः ।
श्रीमन्नृसिंहपरिपालितवंशसिन्धुपूर्णेन्दुरार्यनुतकीर्तिलसत्कवीन्द्रः ॥

विश्वनाथपदाम्भोजमरन्दास्वादलोलुपः ।
काशिकातिलकं शम्भोः प्रीतये कुरुते सुधीः ॥

कुबेरः शिवपूजार्थं कैलासं गन्तुमिच्छया ।
प्रयत्नं कारयामास भटैः कार्यपरायणैः ॥

तस्मिन् काले तु भगवान् नारदो मुनिपुङ्गवः ।
आगत्य चाब्रवीद्वाक्यं कृतार्चं किन्नरेश्वरम् ॥

अहो राजराज सदाशिवपदारविन्दमरन्दास्वादविलसन्मिलिन्दायमानारविन्दनन्दनसङ्क्रन्दनप्रमुखनिखिलवन्दारुबृन्दारकानीकमुकुटतटीलुठदनूननूतनरत्नदीपकलिकानिकामनीराजितचरणारविन्द.

End:

किन्नरौ चतुरौ वीरौ हरदर्शनतोषितौ ।
प्रणम्य दण्डवत्पूर्वमवादिष्टां प्रभुं प्रति ॥

अहो राजराज शिवपूजाधुरन्धर श्रीविश्वनाथपरिपालिता या मुक्तिनगरी तस्याः गुणगणान् कथयितुं सहस्रमुखः शेषोऽपि न समर्थः । पार्वतीपतिरमारमणप्रभृतयः तत्रैवाधिष्ठिताः । अतः तत्र्यानां साफल्यं किं वक्तव्यं बहुना ।

एवं श्रुत्वा कुबेरोऽयं सन्तुष्टस्सन् समागतः ।
सर्वेऽप्यभूवन् सन्तुष्टाः किन्नरप्रमुखास्तथा ॥
कौण्डिन्यगोत्रसम्भूतो नीलकण्ठाख्यपण्डितः ।
कृतिमार्पिपदेतस्मै चन्द्रचूडाय मङ्गलम् ॥

Colophon:

इति श्रीमत्पाण्ड्यवंशपारावारराकाचन्द्रमसः षड्दर्शनीपारदृश्वनः श्रीरामभट्टाभिधानविदुषो द्वितीयतनूभवेन श्रीनीलकण्ठभट्टविदुषा विरचितः श्रीकाशिकातिलकाख्यः शृङ्गारप्रबन्धो भगवतः प्रीतये भूयात् ॥

R. No. **2012.**

Paper. 8⅝ and 10¼ × 4⅝ inches. Foll. 18. Lines, 10—12 in a page. Dēvanāgarī and Telugu. Fair.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) तारकब्रह्मनिरूपणम्.

TĀRAKABRAHMANIRŪPAṆAM.

Foll. 1*b*—5*b*. Fol. 1*a* contains the name of this work.

An investigation into the nature of the Supreme Brahman which is capable of conferring the salvation of soul-emancipation. It is in the form of a dialogue between Pārvatī and Śiva.

Complete. Taken from the Padmapurāṇa.

Beginning:

देव्युवाच—

मृत्युकाले जगन्नाथं काशीपुर्यां हि प्राणिनाम् ।
उपदेशः कथं तेषां तन्मे ब्रूहि महेश्वर ॥

ईश्वर उवाच—

ओङ्कारबिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः ।
अस्मिन् मध्ये स्थितं तत्त्वं दर्शयन्ति जगद्गुरु ॥
ओमित्येव परं ब्रह्म सर्वतत्त्वानुग्राहकम् ।
आब्रह्मस्तम्बपर्यन्तं सर्वानुग्रहकारणम् ॥
प्रथमं तारकं ज्ञात्वा द्वितीयं दण्डकोच्यते ।
तृतीयं कुण्डलाकारं चतुर्थमर्धचन्द्रकम् ॥
पञ्चमं बिन्दुसङ्काशं प्रणवः पञ्चदेवता ।
वेदगर्भसमुद्भूतं तद्वेदं निरञ्जनम् ॥

End:

न होमं न क्रिया यस्य धनं . णादिकं नहि ।
तस्मात् . . . . मुक्तं सर्वदा प्रिये ॥
अतः परं निरूपेण नास्ति नास्ति कदाचन ।
संपूर्णो हि श्रीरामं च अल्पारामोदिकं मम ॥
एकोऽपि होमकर्ता च जीर्णकाया पुनर्नवा ।
ऋद्धिसिद्धिप्रदातारं ब्रह्मज्ञानं विशेषतः ॥

Colophon:

इति श्रीपद्मपुराणे ईश्वरपार्वतीसंवादे तारकब्रह्मनिरूपणं समाप्तम् ॥

(*b*) प्रत्यङ्गिरास्तवः.

PRATYAṄGIRĀSTAVAḤ.

Foll. 6*a*—9*a*. Foll. 6*b* and 9*b* are left blank.

Same work as that described under No. 10783 of the D.C.S. MSS., Vol. XIX, wherein see for the beginning.

Complete. Taken from the Uḍḍīśatantra.

End:

कूठस्थां कुरुते दिक्षु विदिक्षु विजयं तथा ।
फट्कारेण समायेत रक्षयेत् साधकोत्तमम् ॥
यद्दुर्लभं भवेत्कर्म यदि शक्यं न जायते ।
तत्र तत्र नियोक्तव्या महादेवि मनीषिभिः ॥
ॐ २ क्रुक्रों ॐ २ देवदात्त ॐ २ न्द्रूं औं न्दौं सं उः ॥

Colophon:

इति श्रीउड्डीशतन्त्रे प्रत्यङ्गिरास्तवः सम्पूर्णः ॥
श्रीं दुर्गेस्वारी ॐ ॥

(*c*) छन्दोविचितिसूत्रम्, सवृत्ति.

CHANDŌVICITISŪTRAM WITH VṚTTI.

Foll. 10*a*—13*a*. Fol. 13*b* is left blank.

By Bhaṭṭa-Halāyudha. Slightly different from the work described under No. 907 of the D.C.S. MSS., Vol. II.

Breaks off in the second Adhyāya.

Beginning:

मयरसतजभनलगसमितं भ्रमति वाङ्मयं जगति यस्य ।
स जयति पिङ्गलनागः शिवप्रसादाद्विशुद्धमतिः ॥
वेदानां प्रथमाङ्गस्य कवीनां नयनस्य च ।
पिङ्गलाचार्यसूत्रस्य मया वृत्तिर्विधास्यते ॥
क्षीराब्धेरमृतं यद्वदुद्धृतं देवदानवैः ।
छन्दोऽब्धेः पिङ्गलाचार्यैश्छन्दोमृतं तथोऽद्धृतम् ॥
त्रिविरामं दशवर्णं त्रि . . . त्रमुवाच पिङ्गलसूत्रम् ।
छन्दोवर्गपदार्थप्रत्ययहेतोश्च शास्त्रादौ ॥
श्रीमत्पिङ्गलनागोक्तच्छन्दश्शास्त्रमहोदधौ ।
वृत्तानि मौक्तिकानीव कानिचिद्विचिनोम्यहम् ॥

इह हि त्रैवर्णिकानां साङ्गस्य वेदस्याध्ययनमाम्नायते ।

* * * *

तथा लघुनोपायेन शास्त्रावबोधसिद्ध्यर्थं संज्ञां परिभाषते सूत्रकारः . धीः

श्रीः श्रीम् . . धीः श्रीः स्त्री इत्यनेन गुरुत्रयं सांज्ञित्वेनोपलभ्यते मकारश्च संज्ञात्वेन

* * * *

Colophon:

इति भट्टहलायुधकृतायां छन्दोवृत्तौ प्रथमोऽध्यायः ॥

End:

अष्टम्यां पङ्क्तौ प्रथमे कोष्ठे ब्राह्मीशब्दं व्यवस्थाप्य द्वितीयादौ क्रमेण गायत्रीषट्त्रिंशदाद्यङ्कान् विन्यसेत् । प्राग्यजुषामार्ष्यः ; तिस्रस्तिस्र इत्यनुवर्तते । यजुषां पङ्क्तेः प्राक् प्राजापत्यासुरी दैवीति यास्तिस्रो गायत्र्यस्ताः सत्यश्चतुर्विंशत्यप्सरा एका आर्षी गायत्री भवति ।

(*d*) श्रुतबोधः.

ŚRUTABŌDHAH.

Foll. 14*a*—17*b*.

Same work as that described under No. 1800 of the D.C.S. MSS., Vol. III. Attributed to Kālidāsa.

Complete.

Fol. 18 contains the names and the Lakṣaṇa of Chandas and metres.

R. No. **2013.**

Paper. 10½ × 4⅝ inches. Foll. 42. Lines, 9 in a page. Dēvanāgarī. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) काशीमाहात्म्यम्.

KĀŚĪMĀHĀTMYAM.

Foll. 1*a*—40*b*.

Same work as that described under No. 2388 of the D.C.S. MSS., Vol. IV, Part 2.

Complete.

Lithographed on Sunday, the 12th day of the bright fortnight of the Jyēṣṭha month in 1940 Samvat, in the Vrajacandra Press at the instance of one Nārāyaṇa Rao.

(*b*) कालभैरवाष्टकम्.

KĀLABHAIRAVĀṢṬAKAM.

By Śaṅkarācārya. Same work as that described under R. No. 488(*d*) ante.

Complete.

(*c*) विश्वनाथनगरीस्तोत्रम्.

VIŚVANĀTHANAGARĪSTOTRAM.

Foll. 41*b*—42*b*.

By Śaṅkarācārya. Slightly different from the work described under R. No. 488(*b*) ante.

Complete in eight stanzas.

Beginning:

स्वर्गतस्सुखकरी दिवौकसां शैलराजतनयातिवल्लभा ।
डुण्ढिभैरवविदारितविघ्ना विश्वनाथनगरी गरीयसी ॥
यत्र देहपतनेन देहिनां मुक्तिरेव भवतीति निश्चितम् ।
पूर्वपुण्यनिचयेन लभ्यते विश्वनाथनगरी गरीयसी ॥

End:

यत्र देवतटिनी प्रथीयसी यत्र विश्वजननी पटीयसी ।
यत्र भैरवकृतिर्बलीयसी विश्वनाथनगरी गरीयसी ॥
विश्वनाथनगरीस्तवनं वै यः पठेत् प्रयतमानसस्सदा ।
पुत्रदारधनलाभमव्ययं मुक्तिमार्गमनघं लभेत्सुधीः ॥

Colophon:

इति श्रीमच्छङ्कराचार्यविरचितं विश्वनाथनगरीस्तोत्रं सम्पूर्णम् ॥

R. No. **2014.**

Paper. $10\frac{1}{2} \times 4\frac{1}{4}$ inches. Foll. 38. Lines, 13 in a page. Dēvanāgarī. Injured.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Fol. 38*b* is left blank.

शिवगीता.

ŚIVAGĪTĀ.

Same work as that described under No. 2546 of the D.C.S. MSS., Vol. IV, Part 2.

Complete.

R. No. **2015.**

Paper. 9½ × 4⅝ inches. Foll. 23. Lines, 12 in a page. Telugu. Injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) श्यामलादण्डकम्.

ŚYĀMALĀDAṆḌAKAM.

Foll. 1*a*—2*b*.

By Kālidāsa. Same work as that described under **No.** 10837 **of the** D.C.S. MSS., Vol. **XIX.**

Complete.

(*b*) महिम्नस्स्तवः, सव्याख्यः.

MAHIMNASSTAVAḤ WITH COMMENTARY.

Foll. 3*a*—10*b*.

By Puṣpadanta. Same work as that described under R. No. 399 ante for the text and same as No. 11123 of the D.C.S. MSS., Vol. **XIX** for the commentary.

Complete.

End:

याचेऽहं २ मनसि सततं ध्यानममलं
याचेऽहं २ मनसि सततं निर्मितपदम् ।
याचेऽहं २ शिव तव चरणारविन्दयोर्भक्तिं
याचेऽहं २ पुनरपि तामेव तामेव ॥

Colophon:

इति पुष्पदन्तविरचितं महिम्नस्स्तोत्रम् ॥

(*c*) रघुवंशम्—संजीवनीव्याख्यासहितम्.

RAGHUVAMŚAM WITH THE COMMENTARY SAÑJĪVANĪ.

Foll 11*a*—23*b*.

By Mallinātha. Same work as that described under No. **11636 of** the D.C.S. MSS., Vol. XX, by Kālidāsa with the commentary described under No. 11680 of the D.C.S. MSS., Vol. XX.

Contains the third Sarga.

R. No. **2016.**

Paper. 9½ × 4½ inches. Foll. 6. Lines, 15 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) मेधादक्षिणामूर्तिमन्त्रकल्पः.

MĒDHĀDAKṢIṆĀMŪRTIMANTRAKALPAḤ.

Foll. 1*a*—6*a*. This is bound in the reverse order.

Similar to the work described under No. 6957 of the D.C.S. MSS., Vol. XIII.

Contains the Kavaca, the Mahātmya and the Prayōga.

Beginning:

अस्य श्रीमेधादक्षिणामूर्तिकवचमहामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः श्रीदक्षिणामूर्तिकल्याणसागरपरमशिवो देवता। मेधां बीजम्, स्वाहा शक्तिः, दक्षिणामूर्तीति कीलकम्, श्रीदक्षिणामूर्तिकवचप्रसादसिद्ध्यर्थे जपे विनियोगः।

End:

निर्वाणमुद्रया नेत्रगोलकद्वारा हृदये निधाय, आचम्य, विभूत्यादि धृत्वा, आचम्य, सन्ध्यामाचरेत्॥

(*b*) दक्षिणामूर्तिभुजङ्गस्तोत्रम्.

DAKṢIṆĀMŪRTIBHUJAṄGASTŌTRAM.

Fol. 6.

A eulogy in praise of Mēdhā Dakṣiṇāmūrti in the Bhujaṅgaprayāta metre. According to the colophon Śaṅkarācarya is the author.

Complete in 15 stanzas.

Beginning:

विशुद्धं प्रशान्तं मनोवागतीतं निरालम्बमीशं परानन्दरूपम्।
विधिश्रीशदूरं चिदभ्रावकारं भजामि स्मरारेरनौपम्यरूपम॥

End:

भुजङ्गप्रयातं पठेद्यस्तु नित्यं स मुक्तवाराशिमग्नस्स . . . . ।
सकृत् स्तोत्रमेतत्पठेद्यस्तु नित्यं सदा तस्य गौरीशसेवाग्रगण्यः॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचिते दक्षिणामूर्तिभुजङ्गस्तोत्रं संपूर्णम्॥

R. No. **2017.**

Paper. $8\frac{1}{8} \times 4\frac{1}{8}$ inches. Foll. 15. Lines, 11 in a page. Dēvanāgarī. Fair.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

अनेकार्थध्वनिमञ्जरी.

ANĒKĀRTHADHVANIMAÑJARĪ.

Similar to the work described under No. 1590 of the D.C.S. MSS., Vol. III. The author is probably Mahākṣapaṇaka.

Complete in three Muktakas, viz., Ślōkādhikāra Ardhaślōkādhikāra and Pādaślōkādhikāra.

Beginning:

सरस्वतीं नमस्कृत्य बालव्युत्पत्तिसिद्धये ।
करोम्यनेकार्थशब्दमौक्तिकं विद्वदुत्तमम् ॥

शिवध्वनिः—

शिवश्शर्वश्शिवश्शुक्रः शिवः कीलं शिवो वसु ।
शिवा गौरी शिवा क्रौष्ट्री भवेदामलकी शिवा ॥
शिवो विद्वान् शिवो गौरो शिवोऽद्रिश्च शिवो गुणः ।
शिवः कल्याणकर्मा च शिवः प्रोक्तस्सुभाषितः ॥

गौरीध्वनिः—

* * * *

Colophon:

इत्यनेकार्थध्वनिमञ्जर्यां काश्मीराम्नाये महाकविविरचिते श्लोकाधिकारः प्रथमा मुक्तकस्समाप्तः ।

End:

महिलारवः—

महिला रमणी प्रोक्ता महिला वेदिका मता ।

Colophon:

इत्यनेकार्थध्वनिमञ्जर्यां काश्मीराम्नाये महाकविविरचिते अर्धश्लोकाधिकारो द्वितीयो मुक्तकस्समाप्तः ॥

पयोराजशब्दः—

राजा चन्द्रो नृपो राजा पयः क्षीरं पयो जलम् ।

* * * *

चीवरशब्दः—चीवरं वल्कले वस्त्रे करेऽपि च तथोदरे ॥

समर्थासूनुशब्दः—

हिते शक्ते समर्थस्स्यात्सूनुः पुत्रे तथाऽनुजे ॥

Colophon:

इत्य(नेकार्थध्वनिमञ्जर्यां काश्मीराम्नाये महाकाविविराचिते पादश्लोकाधिकारः) तृतीयो मुक्तकः ॥

R. No. 2018.

Paper. $10\frac{5}{8} \times 5$ inches. Foll. 33. Lines, 24 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

मुक्तावलीव्याख्या—दिनकरी.

MUKTĀVALĪVYĀKHYĀ: DINAKARĪ.

By Dinakarabhaṭṭa. Same work as that described under No. 3955 of the D.C.S. MSS., Vol. VIII.

Breaks off in the Pratyakṣakhaṇḍa.

R. No. 2019.

Paper. $9\frac{1}{4} \times 4\frac{5}{8}$ inches. Foll. 148. Lines, 8 in a page. Dēvanāgarī. Slightly injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A. Pleader, Tirupati.

Foll. 47*b* and 48*a* are left blank.

रामार्चनचन्द्रिका.

RĀMĀRCANACANDRIKĀ.

Same work as that described under No. 8683 of the D.C.S. MSS., Vol. XVI.

Complete.

The date of the MS.

शके १८८६ संवत् १९१९ मार्गशीर्षकृष्णभृगुवासरे इदं समाप्तम् ।

R. No. 2020.

Paper. $9\frac{5}{8} \times 4\frac{1}{4}$ inches. Foll. 144. Lines, 14 in a page. Dēvanagarī. Fair.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) मालतीमाधवम्.

MĀLATĪMĀDHAVAM.

Foll. 1*a*—34*b*. Fol. 2*a* gives the name of this work and fol. 26 is left blank.

By Bhavabhūti. Same work as that described under R. No. 821(*d*) ante.

Breaks off in the tenth act and wants the middle portion of the eighth act.

(*b*) मालतीमाधवटीका.

MĀLATĪMĀDHAVAṬĪKĀ.

Foll. 35*b*—144*b*. Fol. 35*a* gives the name of this work.

By Tripurāri. Same work as that described under R. No. 1575 ante.

Complete.

The scribe gives the date of the MS.

सुभानुनामसंवत्सरे चैत्रमासे शुक्लपक्षे त्रयोदश्यां तिथौ भृगुवासरे इाटिकेल चिन्तय्यपुत्रगोपालेन लिखितम् ।

R. No. 2021.

Paper. 8 × 4⅜ inches. Foll. 7. Lines, 12 in a page. Telugu. Injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

रघुवंशम्.

RAGHUVAṀŚAM.

Foll. 1*a*—7*a*. Fol. 7*b* is left blank.

By Kālidāsa. Same work as that described under No. 11636 of the D.C.S. MSS., Vol. XX.

Contains the third Sarga.

R. No. 2022.

Paper. 8⅜ × 4⅝ inches. Foll. 4. Lines, 13 in a page. Telugu. Injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

शिवकवचम्.

ŚIVAKAVACAM.

Same work as that described under No. 7386 of the D.C.S. MSS., Vol. XIV.

Complete.

R. No. 2023.

Paper. 8½ × 4⅝ inches. Foll. 26. Lines, 22 in a page. Dēvanāgarī, Fair.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

विष्णुसहस्रनामावलिः.

VIṢṆUSAHASRANĀMĀVALIḤ.

The name of the work is given on fol. 1*a*.

Same work as that described under No. 9038 of the D.C.S. MSS., Vol. XVII.

Complete.

R. No. **2024.**

Paper. 14 × 5 inches. Foll. 67. Lines, 15 in a page Telugu. Injured.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

By Gadādhara. Same work as that described under No. 4053 of the D.C.S. MSS., Vol. VIII.

Contains the Caturdaśalakṣaṇī complete.

R. No. **2025.**

Paper. 12¾ × 4⅝ inches. Foll. 25. Lines, 12--15 in a page. Telugu. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) बाधबुद्धिप्रतिबन्धकताविचारः.

BĀDHABUDDHIPRATIBANDHAKATĀVICĀRAḤ.

Foll. 1*a*—15*b*.

By Madhurānātha. Same work as that described under No. 4274 of the D.C.S. MSS., Vol. VIII.

Complete.

(*b*) तत्त्वचिन्तामणिव्याख्या—दीधितिः.

TATTVACINTĀMAṆIVYĀKHYĀ : DĪDHITIḤ.

Foll. 16*a*—19*b*.

By Raghunāthaśirōmaṇibhaṭṭācārya. Same work as that described under No. 4003 of the D.C.S. MSS., Vol. VIII.

Contains the Satpratipakṣavibhājakalakṣaṇa portion only.

(*c*) तत्त्वचिन्तामणिव्याख्या --फक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ : PHAKKIKĀ.

Foll. 20*a*—25*b*.

By Madhurānātha. Same work as that described under No. 4020 of the D.C.S. MSS., Vol. VIII.

Contains the Tarka portion only.

R. No. 2026.

Paper. 12¼ × 5 inches. Foll. 28. Lines, 10 in a page. Dēvanāgarī. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

विधिवादार्थविचारः.

VIDHIVĀDĀRTHAVICĀRAḤ

An investigation of the meaning of Vidhivada which forms part of the Śabdakhaṇḍa in the Tattvacintāmaṇi

Incomplete.

Beginning:

कालकूटगलक्रूरभुजङ्गवलयोऽपि यः ।
न नश्यति तमाश्चर्यविग्रहं नौमि दुर्ग्रहम् ॥

उच्छन्नप्रच्छन्नवादे वेदे आचारमूलत्वं व्यवस्थापितम् । तच्चाचारपदस्य प्रवृत्त्यर्थकतया प्रवृत्तिजनकज्ञानजनकत्वरूपप्रवृत्तिप्रयोजकत्वम् । एवञ्च प्रवर्तकज्ञानस्योच्छन्नप्रच्छन्नत्वादभिहितनिरुक्ताचारमूलत्वघटकतया तथाविधं पूर्वं यथाभिहितनिरुक्तवेदनिष्ठाचारमूलत्वरूपं यत्प्रकृततद्घटकत्वरूपोपोद्घातसङ्गत्या वेदे आचारमूलत्वस्य व्यवस्थापनानन्तरं प्रवर्तकज्ञानं निरूप्यते । उपपादितश्चानुमानिरुक्तिप्रकाशे प्रकृतघटकत्वस्याप्युपोद्घातसङ्गतित्वमस्माभिरिति ।

End:

प्रकारान्तरेण द्रव्याकाङ्क्षानिवृत्त्यसम्भवरूपबाधकसत्त्वेन सोमपदस्य कर्मनामधेयत्वानुपपत्त्या द्रव्यबोधकत्वस्यावश्यकत्वे तथाविधिजन्यबोधस्यान्यथानुपपत्त्या तत्र मत्वर्थलक्षणाभ्युपगमात् ॥

R. No. 2027.

Paper. 12¼ × 5⅝ inches. Foll. 52. Lines, 19 in a page. Telugu. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.

GĪTAGŌVINDAM WITH THE COMMENTARY OF ŚRUTIRAÑJANĪ.

Same work as that described under No. 22 of M. Seshagiri Śāstri's Report No. 2. The text is by Jayadēva and the commentary by Lakṣmaṇasūri.

Complete.

R. No. **2028.**

Paper 12¾ × 4½ inches. Foll. 3. Lines, 12 in a page. Telugu. Good.

Presented in 1916-17 by M R Ry N Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati

वृष्टिमन्त्राः.

VṚṢṬIMANTRĀḤ

The due repetition of these Vēdic Mantras is supposed to bring about plenty of showers of rain. They have been taken from the Kṛṣṇa-Yajurvēda :—Saṁhitā, Kāṇḍa II-4-7 to 10 Anu ; Āraṇyaka, Praśna I—29 and 30 Anu ; Saṁhitā III—1-11, V-3-10, V-4-1 (4th Pañcāśat alone) and V-4-8.

Complete.

Beginning :

मारुतमसि मरुतामोजोऽपां धारां भिन्धि रमयत मरुतः श्येनमायिनं मनो जवसं वृषणं सुवृक्तिम् । श्येन शर्ध उग्रमवसृष्टमेति तदश्विना परिधत्तँ स्वस्ति ।

End :

अष्टाचत्वारिंशतो जुहोत्यष्टाचत्वारिंशदक्षरा जगती जागताः पशवो जगत्यैवास्यै पशूनवरुन्धे वाजश्च प्रसवश्चेति द्वादशं जुहोति द्वादश मासाः संवत्सरः संवत्सर एव प्रतितिष्ठति ॥

R. No. **2029.**

Paper. 11¾ × 4½ inches. Foll. 150. Lines, 16 in a page. Telugu and Dēvanāgarī. Slightly injured.

Presented in 1916-17 by M.R Ry N Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 1*b*, 29*b*, 32*b*, 49*b*, 52*b* and 90*b* are left blank

---

न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKA-PRAKĀŚIKĀ.

By Śitikaṇṭha. Same work as that described under No. 4223 of the D.C.S. MSS., Vol. VIII.

Foll. 1*a*—29*a* contain Pratyakṣa complete ; foll 30*a*—49*a* Anumāna incomplete ; foll. 50*a*—53*b* Upamāna complete ; foll. 54*a*—86*b* Śabdakhaṇḍa incomplete and foll. 83*a*—150*b* Śabdakhaṇḍa in duplicate and incomplete.

R. No. 2030.

Paper. 8⅜ × 4 inches. Foll. 36. Lines, 12 in a page. Dēvanāgarī. Good.

Presented in 1916-17 by M.R.Ry. N Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Fol. 7*b* is left blank, and fol 36*b* contains the name of the work.

कृष्णयजुर्वेदसंहिता.

KṚṢṆAYAJURVĒDASAṀHITĀ.

Same work as that described under No 78 of the DCS MSS., Vol. I, Part II.

Contains from the third Anuvāka of the third Praśna in the fourth Kāṇḍa to the end of the same Kāṇḍa

---

R. No. 2031.

Paper. 12⅜ × 5 inches. Foll. 211. Lines, 9 in a page. Dēvanāgarī. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

तत्त्वचिन्तामणिव्याख्या—तुरीयमणिफक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ: TURĪYAMAṆI-PHAKKIKĀ.

By Madhurānātha. Same work as that described under No. 4027 of the D.C.S. MSS., Vol. VIII, wherein see for the beginning.

Contains the Śabdakhaṇḍa, breaking off in the Vidhivāda.

End:

उच्छन्नप्रच्छन्नग्रन्थेन वेदस्याचारमूलत्वनिरूपणानन्तरं प्रवर्तकज्ञानं निरूपयितुं प्रवर्तकज्ञाने आचारमूलत्वस्योपपादकत्वरूपामुपोद्घातसंगतिं प्रदर्शयन् शिष्यावधानाय प्रतिजानीते—आचारेति । आचारः प्रवृत्तिः

* * * *

प्रवर्तकज्ञानजनकत्वज्ञानं विनापि आचारमूलत्वज्ञाने विरोधाभावात् । तथा सत्याचारमूलत्वज्ञा.

R. No. 2032.

Paper. 9⅛ × 4¼ inches. Foll. 69. Lines, 10 in a page. Dēvanāgarī. Injured.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll 2b—14b are left blank.

कृष्णयजुर्वेदसंहिता.

KṚṢṆAYAJURVĒDASAṀHITĀ

Same work as that described under No. 86 of the D.C.S. MSS, Vol. I, Part 2.

Contains the first Praśna of the third Kāṇḍa and the seventh Kāṇḍa only.

The former owner of the MS. is stated to be Cintāvadhāni. Name of the scribe—Damba Tammaṇabhaṭṭa.

R. No. **2033.**

Paper. $10\frac{5}{8} \times 5\frac{3}{8}$ inches. Foll. 23. Lines, 17 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Fol. 2b is left blank.

तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

By Gadādharabhaṭṭācārya. Same work as that described under No. 4053 of the D.C.S. MSS., Vol. VIII.

Contains the Pañcalakṣaṇī complete.

R. No. **2034.**

Paper. $12\frac{7}{8} \times 5$ inches. Foll. 511. Lines, 10 in a page. Dēvanāgarī. and Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 1a, 90b, 155a, 192b, 271a, 315a, 367b, and 511b are left blank.

तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

By Gadādharabhaṭṭācārya. Same work as that described under No. 4041 of the D.C.S. MSS., Vol. VIII.

Contains the Anumānakhaṇḍa incomplete.

R. No. **2035.**

Paper. $7\frac{1}{8} \times 4\frac{1}{8}$ inches. Foll. 75 Lines, 12 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 1b and 10a are left blank. Fol. 1a contains the names of the work, author and scribe.

परिभाषेन्दुशेखरव्याख्या—चन्द्रिका.
PARIBHĀṢĒNDUŚĒKHARAVYĀKHYĀ—CANDRIKĀ.

A commentary by Viśvanātha on the Paribhāṣēnduśēkhara of Nāgēśabhaṭṭa which work has been described under No. 1463 of the D.C.S. MSS., Vol. III.

Breaks off in the Asiddhaparibhāṣā

Beginning:

परिभाषेन्दुचन्द्रिका प्रारभ्यते—

नत्वा विश्वेश्वरं देवमानन्दाल्लब्धवृत्तिना ।
क्रियते विश्वनाथेन परिभाषेन्दुचन्द्रिका ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तिप्रचारादिप्रतिबन्धकदुरितप्रशमाय कृतं मङ्गलमध्येतॄणामनुषङ्गतो मङ्गलाय च निबध्नाति—नत्वा साम्बं शिवमिति । साम्बशिवं ब्रह्मेति पदत्रयेण यतो वा इमानि भूतानि जायन्ते इति श्रुति प्रतिपादितपरब्रह्म प्रतिपाद्यते । शेते जगद्यस्मिन्निति व्युत्पत्त्या सर्वजगल्लयाधिकरणत्वस्य, अम्बया जगदुत्पादयित्र्या सहित इति व्युत्पत्त्या सर्वजगत्स्रष्टृत्वस्य, बृंहयति वर्धयतीति व्युत्पत्त्या सर्वजगद्वर्धकत्वस्य च बोधात् । नागेश इति । न चात्मनामेति श्रुत्यात्मनामग्रहणस्य निन्दितत्वात्कथं स्वनामग्रहणमिति वाच्यम् ।

* * * *

अस्मिन् ग्रन्थे लक्षणत्वसम्पादनोद्देश्यं बाधबीजनिरूपणं तन्त्रशेषश्चेति प्रकरणत्रयम् । तत्र तन्त्रस्य शेषत्वादेव तन्त्रशेषस्य चरमव्याख्यानं युक्तम् । लक्षणत्वसम्पत्तिमन्तरा बाधबीजनिरूपणस्य कर्तुमशक्यत्वात् प्रथमं तावल्लक्षणत्वसम्पादनोद्देश्यप्रकरणमारभ्यते—नन्वित्यादिना । व्याख्यानत इत्यारभ्यैकदेशविकृतन्यायान्तं लक्षणत्वसंपादनोद्देश्यं नाम प्रकरणम् । पूर्वपरेत्यारभ्य लिङ्गविशिष्टपरिभाषापर्यन्तं बाधबीजनिरूपणं नाम प्रकरणम् । अग्रे च तन्त्रशेषः । सन्देहादिति ।

End:

ऊङ् ऊवतुरित्यत्र सवर्णदीर्घे कर्तव्ये उवङोऽसिद्धत्वाद्विशिष्टस्य तत्त्वेऽवतुरिति स्यात् । रामयोरित्यत्र एत्वस्यासिद्धत्वादयादेशो न स्यात् । सखी-

नित्यत्राल्लोपस्यसिद्धत्वाद्यणादेशस्स्यात् । एवं बहुविधानि आयान्तीत्यवश्यमेषा अङ्गीकर्तव्येति । अन्यथा बहुस्थलेषु परिभाषाया अनित्यत्वाङ्गीकार इति महद्गौरवम् ।

R. No. 2036.

Paper. $8\frac{5}{8} \times 4\frac{1}{8}$ inches. Foll. 72. Lines, 15 in a page. Dēvanāgarī. Slightly injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

न्यायरत्नम्.

NYĀYARATNAM.

A treatise on Nyāya; by Maṇikaṇṭha. A commentary on this work has been described under No. 4204 of the D.C.S. MSS., Vol. VIII.

Complete.

Beginning:

न्यायरत्नप्रसादेन तमःप्रशमहेतुना ।
हस्तामलकवत्प्राज्ञाः सर्वं जानीत सम्प्रति ॥
अनुमाननिदानस्य व्याप्तिज्ञानस्य कारणम् ।
आदौ तर्कं निरूप्येह पश्चादन्यन्निरूप्यते ॥

तथाहि—किमनुमितौ तर्कस्साक्षात्कारणमन्यथा वा । तत्र लिङ्गपरामर्शः करणमनुमितौ । तच्च व्यापारवद्भवति । व्यापारस्यान्यथानुपपत्त्या तर्क एव तद्व्यापार इत्यनुमितौ तर्कस्य साक्षात्कारणत्वमिति वदन्ति । तदसत् । तृतीयलिङ्गपरामर्शस्यैव साक्षादनुमितिकारणत्वेनान्यथोपपत्तेः । एतत्कारणीभूतस्यैव व्याप्तिस्मरणादेरनेनैव व्यापारेणानुमितिकारणत्वात् । अत एव तदनन्तरं तर्कोत्पत्तौ प्रमाणमेव नास्ति । तृतीयलिङ्गपरामर्शस्य यथानुमितौ साक्षात्कारणत्वं तथाऽग्रे दर्शयिष्यते ।

End:

अवह्निमत्त्वम् अवह्निमत्त्वप्रतियोगिकैतद्वृत्त्यन्योन्याभावातिरिक्तैतत्पर्वतवृत्त्यभावप्रतियोगि एतन्महानसम् एतन्महानसैतत्पर्वतातिरिक्तान्यवह्निमद्वृत्तिधर्मशून्यम् ।

दशावतारादनुमानखण्डनं दशावतारादनुमानखण्डनम् ।
करोति वैकुण्ठधियं सपक्षगः करोति वैकुण्ठधियं सपक्षगः ॥
एतद्विस्तरस्तु प्रकरणान्तरादनुसन्धीयत इति ॥

मिश्रश्रीमणिकण्ठेन सतां कण्ठविभूषणम् ।
तत्प्रकाशचमत्कारि न्यायरत्नमिदं कृतम् ॥
यद्विवेचनचातुर्यं यद्ग्रन्थग्रथनौचिती ।
तनोति मुनिमूर्धन्यगौतमस्यापि कौतुकम् ॥
जानन्ति नैव बहवो हि परं प्रयासं
ज्ञात्वापि हन्त कुटिला विमतिं वहन्ति ।
ते केचिदेव शशिकान्तमणिस्वभावा
येषां मनः परगुणैर्द्रवतामुपैति ॥
गुरुत्वादवगाहन्त आशयस्य महाशयाः ।
उत्प्लवन्ते तु तुच्छत्वादन्तश्शून्या इतस्ततः ॥

Colophon:

इति श्रीमिश्रश्रीमणिकण्ठेन कृतं न्यायरत्नं समाप्तम् ॥

The scribe gives the date—

प्लवङ्गनामसंवत्सर आश्विनमासे पक्षे द्वादश्यामिन्दुवासरे रामचन्द्राचार्यसुतलक्ष्मणभट्टानां सुतेन नारायणेन लिखितः मणिकण्ठस्समाप्तः ॥

R. No. **2037.**

Paper. 8 × $4\frac{3}{8}$ inches. Foll. 16. Lines, 10 in a page. Telugu. Good.

Presented in 1916–17 by **M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A.,** Pleader, Tirupati.

शनिप्रदोषव्रतम्.
ŚANIPRADŌṢAVRATAM.

Deals with the observance of a vow when Pradōṣa and Saturday come together with a view to please Śiva and Pārvatī.

Complete. Taken from the Skāndapurāṇa.

Beginning:

एवङ्गुण . शुभतिथौ शनित्रयोदशीव्रताङ्गं(म्) आदौ गणपतिपूजां करिष्ये । गणानां त्वा गणप . नम् । आवाहनादिषोडशोपचारपूजां कुर्यात् ।

* * * *

एवङ्गुण . तिथौ यजमानस्य . सिध्यर्थमुमामहेश्वरप्रीत्यर्थं शनित्रयोदशीव्रतं करिष्ये । तदङ्गकलशाराधनं करिष्ये । कलशस्य . कुरु । इमं मे .

मृडय । आपोवा . आप ओम् । शङ्खपूजां कृत्वा, अथातः पञ्चाङ्गरुद्राणाम् । भगवान् बोधायनः ।

स्नात्वा प्रदोषसमये नद्यां तु विमले जले ।
ततस्स्वभवनं गत्वा पूजयेत् गिरिजापतिम् ॥
लिङ्गस्याभिमुखं स्थित्वा ध्यात्वा सङ्कल्पपूर्वकम् ।
तिलाक्षतैर्बिल्वपत्रैर्यजेद्देवमुमापतिम् ॥

End:

शनिप्रदोषे पूजां यस्सम्यक् कुर्याच्छिवस्य च ।
सोऽश्वमेधफलं प्राप्य शिवलोके महीयते ॥
इदं व्रतं सप्तवारं यः कुर्यात्स जितेन्द्रियः ।
अरुणाद्यो भवेच्छीघ्रं मुच्यतेऽरुणरोगिभिः ॥
त्रिस्सप्तवारं यः कुर्यात्सर्वपापक्षयं भवेत् ।
मुक्तिश्चैव ततः प्राप्य ऋणरोगादिमोचनम् ॥
चतुर्विंशतिवारं वा यावज्जीवं करोति यः ।
नियमेन व्रतमिदं स नरश्च शिवो भवेत् ॥
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
स याति शिवसारूप्यं लभते नात्र संशयः ॥

Colophon:

इति श्रीस्कान्दपुराणे अगस्त्यसनत्कुमारसंवादे शनित्रयोदशीव्रतकथा संपूर्णा ॥

R. No. **2038.**

Paper. 16 × 11¾ inches. Foll. 29. Lines, 56 in a page. Telugu. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

महाभाष्यम्—प्रदीपोद्योतनसहितम्.

MAHĀBHĀṢYAM WITH PRADĪPA AND UDYŌTANA.

The authors of Mahābhāṣya, Pradīpa and Udyōtana are Patañjali, Kaiyaṭa and Annambhaṭṭa respectively.

Same work as that described under No. 1293 of the D.C.S. MSS., Vol. III and R. No. 271 ante.

Contains from the third Āhnika of the first Pāda in the first Adhyāya to the end of the sixth Āhnika of the same Pāda and the same Adhyāya complete, and the seventh Āhnika incomplete.

R. No. **2039.**

Paper. 13 × $4\frac{1}{8}$ inches. Foll. 56. Lines, 10 in a page. Telugu. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Fol. 56*b* is left blank.

व्युत्पत्तिवादः.

VYUTPATTIVĀDAḤ.

By Gadādhara. Same work as that described under No. 4290 of the D.C.S. MSS., Vol. VIII.

Breaks off in the Dvitīyāvibhakti.

R. No. **2040.**

Paper. $11\frac{1}{4}$ × $4\frac{3}{4}$ inches. Foll. 26. Lines, 16 in a page. Telugu. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

By Gadādhara Same work as that described under No. 4056 of the D.C.S. MSS., Vol. VIII.

Contains the Pakṣatā portion incomplete

R. No. **2041.**

Paper. $12\frac{3}{4}$ × 4 inches Foll. 156. Lines, 12 in a page. Telugu and Dēvanāgarī. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 8*b* and 156*b* are left blank.

तत्त्वचिन्तामणिदीधितिव्याख्या—जागदीशी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ—JĀGADĪŚĪ.

By Jagadīśatarkālaṅkāra. Same work as that described under No 4086 of the D.C.S. MSS., Vol. VIII.

Contains from the Pañcalakṣaṇī to Siddhāntalakṣaṇa.

R. No. **2042.**

Paper. $12\frac{1}{8}$ × $4\frac{1}{4}$ inches. Foll. 67. Lines, 11 in a page. Telugu. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Fol. 42*b* is left blank.

तत्त्वचिन्तामणिदीधितिव्याख्या — जागदीशी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ—JĀGADĪŚĪ.

By Jagadīśatarkālaṅkāra. Same work as the above.

Contains the Caturdaśalakṣaṇī complete and the Pūrvapakṣagrantha incomplete.

R. No. **2043.**

Paper. 12¾ × 4⅛ inches. Foll. 53. Lines, 10 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

By Gadādhara. Same work as that described under No. 4059 of the D.C.S. MSS., Vol. VIII

Breaks off in the Hētugrantha of the Avayava portion.

R. No. **2044.**

Paper. 11 × 4½ inches. Foll. 364. Lines, 11 in a page. Dēvanāgarī. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 210*a*, 269*a*, 309*a*, 310*a* and 364*b* are left blank.

महाभाष्यप्रदीपोद्योतः.

MAHĀBHĀṢYAPRADĪPŌDYŌTAḤ.

By Nāgōjibhaṭṭa. Same work as that described under No. 1309 of the D.C.S. MSS., Vol. III.

Contains the Navāhnika of the first Pāda and the fourth Pāda (which wants the beginning) in the first Adhyāya and from the fourth Pāda of the sixth Adhyāya to the third Pāda (wants beginning) of the seventh Adhyāya.

R. No. **2045.**

Paper. 12¼ × 5⅝ inches. Foll. 7. Lines, 14 in a page. Telugu. Injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) प्रयोगसङ्ग्रहः.

PRAYŌGASAṄGRAHAḤ.

Foll. 1*a*—3*b*.

Similar to the work described under No. 1504 of the D.C.S. MSS., Vol. III.

Incomplete.

Beginning:

अथ व्युत्पित्सुबालानां सम्यग्व्युत्पत्तिसिद्धये ।
प्रयोगसङ्ग्रहं वक्ष्ये पार्वतीशकृपावशात् ॥
प्रयोगाः सप्त विख्यातास्तेष्वाद्याः कर्तरि त्रयः ।
तेऽकर्मकः सकर्मकस्तथा चायं द्विकर्मकः ॥
क्रमाद्भावे कर्मणि च तद्वत्कर्मककर्मणि ।
कर्मकर्तरि ये चैते चत्वारोऽन्ये प्रकीर्तिताः ॥
यथा गौरीश्वरो भाति स त्वकर्मककर्तरि ।
शङ्करो भुवनं पाति स सकर्मककर्तरि ॥

End:

यथा स शम्भुर्भवति भवसि त्वं भवाम्यहम् ।
पुरुषस्य तथैकस्य त्रीण्येव वचनानि च ॥
स्युरेकत्वे तथा द्वित्वे बहुत्वे तान्यनुक्रमात् ।
. . . . ॥
दिङ्मात्रमेवैतदुक्त.

Fol. 4 contains Chandassūtraviṣaya.

(*b*) प्रातिपदिकार्थनिर्णयः.

PRĀTIPADIKĀRTHANIRṆAYAḤ.

Foll. 5*a*—7*a*. Fol. 7*b* is left blank.

A discussion as to what all the grammatical base of a substantive word can denote and connote. The author salutes one Bhairavaguru, well-versed in all the Darśanas.

Incomplete.

Beginning:

वन्देऽहं वन्दनीयानां वन्द्यां वाचामधीश्वरीम् ।
कामिताशेषकल्याणकलनाकल्पवल्लिकाम् ॥
श्रीमच्छङ्करदुग्धवारिधिमहोल्लासप्रदं सन्ततं
विद्वत्कैरवसङ्घतोषणकरं सर्वज्ञभूषामणिम् ।

वन्देऽहं द्विजराजभैरवगुरुं नानादिगन्तागत-
च्छात्रानेकचकोरवाञ्छितकलादानैकदक्षं मुदा ॥
व्यासं वेदान्तभागे श्रुतिनिचयविदं जैमिनिं पूर्वतन्त्रे
शेषं भाष्येऽक्षपादं बुधजनविनुते कर्कशे तर्कशास्त्रे ।
शास्त्रव्याख्याविशेषे सुरगुरुमनिशं शिष्यरक्षानुदक्षं
वन्देऽहं भैरवार्यं गुणमणिनिलयं बुद्धिवैशद्यसिद्ध्यै ॥

आयासेन विना शब्दे व्युत्पित्सुभिरपेक्षितः ।
यः प्रातिपदिकार्थोऽसौ मया सम्यक् प्रकाश्यते ॥

अथ स्वार्थद्रव्यलिङ्गसङ्ख्याकर्माद्यात्मकः पञ्चकं प्रातिपदिकार्थ इति केषाञ्चिद्वैयाकरणानां मतम् । अन्येषां तु स्वार्थद्रव्यलिङ्गात्मकस्त्रिक इति । तत्र पञ्चकं प्रातिपदिकार्थ इति पक्षे सङ्ख्याकर्मादयोऽपि प्रातिपदिकेनोच्यन्ते । विभक्तयस्तु द्योतकाः । त्रिकपक्षे विभक्तयो वाचकाः । तत्र त्रिकं प्रातिपदिकार्थ इति पक्ष एव युक्तत्वादङ्गीकृत्य बहुषु बहुवचनमित्यादीनां विध्यर्थता आश्रिता आचार्यवर्यैः ।

End:

अग्निग्रन्थपर्यन्तमधीत इत्यर्थः । इयं समाप्तिरसकलेऽप्यध्ययने भवतीति साकल्याद्भेदः । ननूपकृष्णादागत इत्यादौ अव्ययीभावस्याव्ययार्थप्रधानत्वात् पूर्वपदस्याव्ययत्वेन तदर्थस्यासत्त्वभूतत्वम् । ततस्तस्य क्रियान्तरेण सम्बन्धो नास्तीत्यपादानादित्वाभावादव्ययीभावत्वम्.

R. No. **2046.**

Paper. 12⅜ × 4⅝ inches. Foll. 37. Lines, 7 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

कारिकावलीव्याख्या—मुक्तावली.

KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

By Viśvanātha. **Same work as that** described under No. 3939 of the D.C.S. MSS., Vol. VIII.

Wants the beginning ; otherwise complete.

Name of the scribe : Vēṅkaṭācalayya.

R. No. 2047.

Paper. 11⅞ × 4 inches. Foll. 4. Lines, 12 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

धर्मितावच्छेदकवादः.

DHARMITĀVACCHĒDAKAVĀDAḤ.

By Harirāmabhaṭṭācārya. Same work as that described under No. 4250 of the D.C.S. MSS., Vol. VIII.

Incomplete

R. No. 2048.

Paper. 10⅜ × 5¼ and 8⅝ inches. Foll. 41. Lines, 16 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

तर्कसङ्ग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ.

Foll. 1*a*—41*a*. Fol. 41*b* is left blank.

By Annambhaṭṭa Same work as that described under No. 4154 of the D.C.S. MSS., Vol. VIII.

Complete in duplicate.

R. No. 2049.

Paper. 12⅛ × 5⅓ inches. Foll. 102. Lines, 21 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 6*b*, 70*a* and 102*b* are left blank.

शब्दकौस्तुभः.

ŚABDAKAUSTUBHAḤ.

Same work as that described under No. 1324 of the D.C.S. MSS., Vol. III; by Bhaṭṭōjidīkṣita.

Contains form the first Āhnika (incomplete) to the eighth Āhnika (incomplete) of the first Pāda of the first Adhyāya and the first Pāda of the second Adhyāya (incomplete).

R. No. 2050.

Paper. 12⅓ × 4 inches. Foll. 51. Lines, 12 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) साङ्ख्यकारिकाः, साङ्ख्यतत्त्वकौमुदीव्याख्यासहिताः.
SĀṄKHYAKĀRIKĀḤ WITH THE COMMENTARY SĀṄKHYATATTVAKAUMUDĪ.

Foll. 1*b*—29*b*. Fol. 1*a* is left blank.

Same text as that described under R. No 139 ante. By Īśvarakṛṣṇa with the commentary entitled Sāṅkhyatattvakaumudī of Vācaspatimiśra.

Complete.

Beginning:

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां नमामः ।
अजा ये तां जुषमाणां भजन्ते जहत्येनां भुक्तभोगां नुमस्तान् ॥

कपिलाय महामुनये मुनये शिष्याय तस्य चासुरये ।
पञ्चशिखाय तथेश्वरकृष्णायैते नमस्यामः ॥

इह खलु प्रतिपित्सितमर्थं प्रतिपादयन्नेव प्रतिपादयितावधेयवचनो भवति प्रेक्षावताम् । अप्रतिपित्सितं तु प्रतिपादयन् नासौ लौकिको नापि परीक्षक इति प्रेक्षावद्भिरुपेक्षणीयः स्यात् । स चैषां प्रतिपित्सितोऽर्थो यो ज्ञातः सन् परमपुरुषार्थाय कल्पत इति प्रारिप्सितशास्त्रविषयकज्ञानस्य परमपुरुषार्थसाधनहेतुत्वात् तद्विषयजिज्ञासामवतारयति—

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ ।
दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥

एवं हि शास्त्रविषयो न जिज्ञास्येत यदि दुःखं नाम जगति न स्यात् । सदा न जिहासितम् । जिहासितं तावद्वाऽशक्यसमुच्छेदम् ।

End:

सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिकाविरहिताः परवादविवर्जिताश्चापि ॥

तथा च राजवार्तिकम्—

प्रधानास्तित्वमेकत्वमर्थवत्त्वमथान्यता ।
पारार्थ्यञ्च तथा नैक्यं वियोगो योग एव च ॥

शेषवृत्तिरकर्तृत्वं मौलिकार्थाः स्मृता दश ।
विपर्ययः पञ्चविधस्तथोक्ता नव तुष्टयः ॥

करणानामसामर्थ्यमष्टाविंशतिधा मतम् ।
इति षष्टिः पदार्थानामष्टाभिः सह सिद्धिभिः ॥
सेयं षष्टिपदार्थी कथितेति सकलशास्त्रार्थकथाभिधं (थनान्नेदं) प्रकरणम् ।

* * * *

मनांसि कुमुदानीव बोधयन्ती सतां सदा ।
श्रीवाचस्पतिमिश्राणां कृतिः स्तात्तत्वकौमुदी ॥

Colophon :

इति श्रीवाचस्पतिमिश्रविरचिता साङ्ख्यतत्त्वकौमुदी समाप्ता ॥

(*b*) साङ्ख्यकारिकाः.

SĀṄKHYAKĀRIKĀḤ.

Foll. 30*b*—32*b*. Fol. 30*a* is left blank.

Same text as the above. The last stanza and the colophon of the Sāṅkhyatattvakaumudī are herein added in the end.

Complete.

(*c*) साङ्ख्यदर्शनम्, सभाष्यम्.

SĀṄKHYADARŚANAM WITH BHĀṢYAM.

Foll. 33*b*—51*a*. Fol. 33*a* and 51*b* are left blank.

The Sūtras of Kapila's Sāṅkhyadarśana with a commentary by Vijñānabhikṣu.

Breaks off in the 56th sūtra of the first Adhyāya.

Beginning :

एकोऽद्वितीय इति वेदवचांसि पुंसि
सर्वाभिमानविनिवर्तनतोऽस्य मुक्त्यै ।
वैधर्म्यलक्षणभिदाविरहं वदन्ति
नाखण्डतां ख इव धर्मशताविरोधात् ॥
तस्य श्रुतस्य मननार्थमथोपदेष्टुं
सद्युक्तिजालमिह साङ्ख्यकृदाविरासीत् ।
नारायणः कपिलमूर्तिरशेषदुःख-
हानाय जीवनिवहस्य नमोऽस्तु तस्मै ॥
नानोपाधिषु यन्नानारूपं भात्यनलार्कवत् ।
तत्समं सर्वभूतेषु चित्सामान्यमुपास्महे ॥

ईश्वरानीश्वरत्वादिचिदेकरसवस्तुनि ।
विमूढा यत्र पश्यन्ति तदस्मि परमं महः ॥
कालार्कभक्षितं साङ्ख्यशास्त्रं ज्ञानसुधाकरम् ।
कलावशिष्टं भूयोऽपि पूरयिष्ये वचोऽमृतैः ॥
चिदचिद्ग्रन्थिभेदेन मोचयिष्ये चितोऽपि च ।
साङ्ख्यभाष्यमिषेणास्मात् प्रीयतां मोक्षदो हरिः ॥
तत्त्वमेव त्वमेवैतदेवं श्रुतिशतोदितम् ।
सर्वात्मनामवैधर्म्यं शास्त्रस्यास्यैव गोचरः ॥

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादिश्रुतिषु परमपुरुषार्थसाधनस्यात्मसाक्षात्कारहेतुतया श्रवणादित्रयं विहितम् ।

* * * *

शास्त्रकारः शिष्यावधानाय शास्त्रारम्भं प्रतिजानीते—

अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः ॥

अथ शब्दोऽयमुच्चारणमात्रेण मङ्गलरूपः। अतएव मङ्गलाचरणं शिष्टाचारादिति स्वयमेव पञ्चमाध्याये वक्ष्यति ।

End :

नियतकारणात्तदुच्छित्तिर्ध्वान्तवत् ।

शुक्तिरजतादिस्थले लोकसिद्धं यन्नियतकारणं विवेकसाक्षात्कारस्तस्मात्तस्याविवेकस्योच्छित्तिर्भवति ध्वान्तवत् । यथा ध्वान्तमालोकादेव नियतकारणान्नश्यति नोपायान्तरेण तथैवाविवेकोऽपि विवेकादेव नश्यति ।

R. No. **2051.**

Paper. $11\frac{1}{8} \times 4\frac{1}{2}$ inches. Foll. 40. Lines, 11 in a page. Dēvanāgarī. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 1*a* is left blank and 1*b* contains Mīmāṁsāsūtra.

तत्त्वबोधिनी.

TATTVABŌDHINĪ.

By Jñānēndrasarasvatī. Same work as that described under No. 1429 of the D.C.S. MSS., Vol. III.

Contains the Samāsa incomplete.

R No. 2052.

Palm-leaf. 14¾ × 1¼ inches. Foll. 247. Lines, 5 in a page. Telugu, Slightly injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

प्रक्रियाकौमुदीव्याख्या—प्रसादः.

PRAKRIYĀKAUMUDĪVYĀKHYĀ: PRASĀDAḤ.

By Viṭṭhala. Same work as that described under No. 1349 of the D.C.S. MSS., Vol. III, wherein see for the beginning.

Commences with the Vibhaktyartha and breaks off in the Prāgivīya in the Taddhitaprakaraṇa.

End:

अपदादावित्येव, अग्निः करोति, वायुः पिबति । कुप्वोरित्येव, सर्पिस्तत्र ।

पूरणात् ॥

पूरणाधिकारे विहितत्वात् पूरणार्थाभिधायित्वाद्वा पूरणस्तीयः । पूरणग्रहण मुत्तरार्थम् । न ह्यपूरणस्तीयोस्ति, ननुमुखपार्श्वतसोरीयः मुखतीयः, पार्श्वतीय इत्यत्रापूरणोऽपि तीयोऽस्ति, मैवं वोचः । अर्थवद्ग्रहणपरिभा.

Fol. 247*a* contains Kārakaviṣayaślokas. Fol. 247*b* contains the name of the work as given above.

R. No. 2053.

Palm-leaf. 14½ × 1½ inches. Foll 40. Lines, 7 in a page. Telugu. Injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

The first fol. has lost its right half.

विधिरसायनदूषणम्.

VIDHIRASĀYANADŪṢAṆAM.

By Śaṅkarabhaṭṭa, son of Nārāyaṇabhaṭṭa. A hostile criticism on Appayadīkṣita's Vidhirasāyana, a work on Mīmāṃsā treating of the three kinds of scriptural commandments.

Complete.

Beginning:

विध्यादित्रयलक्षणानिरचितान्याचार्यवर्यैर्गिरा. . . . .

. . . . ।

. . . . ह कुर्वते बहुनतिं ये तन्निरासक्षमाः

तेषामेष कृतेषु शङ्करबुध . . . . । . . . . . . तत्र करणविध्यभावेऽतिदेशात्प्रकृतविधिसमानशाखीयविधितोऽसंभव . . . .

* • * *

इति तत्रत्यनिशाविधिनेहाद्येऽह्वा विंशत्यात्मके भागे ऐन्द्रवायवाग्रतासिद्धौ तदन्तर्गतयोराद्ययोरह्नोः पुनरैन्द्रवायवाग्रताविधि . . . . ताचेत्तत्प्रयोजनं तन्त्ररत्ने तयोर्विध्योरव्याप्तिरुक्ता दीक्षितैः प्रकृतविध्युद्देश्येऽप्राप्तस्य विधिरित्युक्तौ अस्मदुक्तविशेषणेन तु सा गता। प्रकृतविधिवि . . . तु प्रथमादिभागत्वेनेति नाव्याप्तिरिति। इति प्रथमश्लोकदूषणम्।

End:

अथैतद्दोषभिया द्वितीयपक्ष उच्यते, तदपि न, तत्रैवातिव्याप्तेः। इमामिति मन्त्रस्यैव हि अश्वरशनादानत्वसामान्यधर्मावच्छिन्नया प्राप्तिस्तर्किता, लैङ्गिक औदासीन्यभिन्नस्य किञ्चिच्छब्दवाच्यस्य प्रकरणेन प्राप्तस्य यवप्रयोगान्तर्गतस्य यत्र कचित्प्रदेशे पाठस्य निवर्तनीयत्वेवेति। तदेवं दृष्टार्थत्वस्य नियमविधिलक्षणस्य पूर्वश्लोकोक्तस्य पूर्वश्लोकदूषणावसर एव दूषितत्वात्। दोषाष्टकग्रस्तत्वाच्च एतच्छ्लोकोक्तस्य नियमविधिलक्षणस्य च तदपेक्षमपूर्वविधिलक्षणमपि निरस्तमेवेति। किं च न्यूनत्वेन प्रायशः पूर्वेषु नियमविधिषु असंभवि युष्मत्कृतं नियमविधिलक्षणम्। तेन नित्यौदासीन्यभिन्नेति तत्प्रकृतविधिविषयाङ्गभिन्नत्वेऽपि किंचिच्छब्दार्थविशेषणं देयम्। अन्यथाऽवघातादिप्राप्तेरवघाताङ्गनिवृत्तिर्नियता न भवतीति तत्तल्लक्षणं न वर्तत इति॥ इति चत्वारिंशत्तमश्लोकदूषणम्॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसासाम्राज्यधुरन्धरश्रीभट्टनारायणात्मजभट्टशङ्करकृतं विधिरसायनदूषणं समाप्तम्॥

R. No. **2054.**

palm-leaf. 15½ × 1½ inches. Foll. 96. Lines, 8 in a page. Telugu, Slightly injured.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

अग्निष्टोमप्रयोगः.

AGNIṢṬŌMAPRAYŌGAḤ

Same work as that described under No. 1124 of the D.C.S. MSS., Vol. II.

Wants the beginning; otherwise complete.

R. No. **2055.**

Palm-leaf. 13¾ × 1⅛ inches. Foll. 72. Lines, 6 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvami Ayyagāru, B.A., Pleader, Tirupati.

(*a*) न्यायरत्नम्.

NYĀYARATNAM.

Foll. 1*a*—4*b*.

By Maṇikaṇṭha. Same work as that described under R. No. 2036 ante.

Incomplete.

(*b*) न्यायलीलावती.

NYĀYALĪLĀVATĪ.

Foll. 5*a*—72*a*. Fol. 72*b* is left blank.

This is an original and ancient work in the Vaiśēṣika school, by Vallabhācārya. In this work Udayanācārya is quoted often. This work has been printed.

Breaks off in the Vaidharmyaparicchēda.

Beginning:

नाथः सृजत्यवति यो जगदेकपुत्रः प्रीत्या ततः परमनिर्वृतिमादधाति।
तस्मै नमः सहजदीर्घकृपानुबन्धलब्धात्रितत्त्वतनवे पुरुषोत्तमाय ॥
द्रव्यं नाकुलमुज्ज्वलो गुणगणः कर्माधिकं श्लाघ्यते
जातिर्विप्लुतिमागता न च पुनः श्लाघ्या विशेषस्थितिः।
संबन्धः सहजो गुणादिभिरयं यत्रास्तु सत्प्रीतये
सान्वीक्षानयवेश्मकर्मकुशला श्रीन्यायलीलावती ॥

षडेव पदार्था इति नियमव्यवच्छेद्यं प्रतीतं नो वा। अप्रतीतं चेत्कथं निषेधः। प्रतीतं चेत्सप्तैव पदार्थाः। पदार्थेषु सप्तत्वं नास्तीति चेन्न, आन्तर्गणिकभेदेन सत्त्वात्। षड्लक्षणयोगितया नास्तीति चेन्न, षड्लक्षणयोगिष्वेव सप्तत्वप्रसक्तेर(प्र)कृतत्वेन तत्प्रतिषेधेऽप्यविवादात्।

End:

असंबद्धत्वेऽप्याश्रितबुद्धिजनकस्वभावत्वनियमेनैव सामानाधिकरण्यबुद्धिनि

वाहकत्वात् । भेदाभेदाभ्यां व्यावृत्तस्य गन्धवत्त्वस्येव सन्देहापादकत्वात् । अन्यथा भुवोऽपि नित्यतापत्तेः ॥

Colophon :

इति न्यायलीलावत्यां विभागपरिच्छेदः समाप्तः ॥

व्यावृत्तत्वेन पदार्थज्ञानं तच्च वैधर्म्याधीनम्, तदपि व्यतिरेकि मानमिति तत्परिच्छेदोऽयमारभ्यते ।

* * * *

परानात्मकतयानुभवस्य तादृशत्वात् । न च स्वतः प्रामाण्यापत्तिः, परात्मतानुभवसं(दे)हसत्त्वात् । न च सावधारणेऽतिप्रसक्तिः, निश्चयानुपपत्तेः । न च परात्मताप्रतिषेधवत्तयानुभवस्य सत्यत्वम् । किंतु.

R. No. **2056.**

Palm-leaf. $16\frac{1}{4} \times 1\frac{3}{8}$ inches. Foll. 197. Lines, 5 in a page Telugu. Slightly injured.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Fol. 1*a* contains the name Kātantravṛtti and foll 1*b* and 2*a* are left blank. Two foll. bearing Nos. 42 and 47 are lost.

कातन्त्रवृत्तिविवरणपञ्जिका.

KĀTANTRAVṚTTIVIVARAṆAPANJIKĀ.

Foll. 2*b*—197*b*.

A commentary by Trilōcanadāsa on the Kātantravṛtti of Durgasiṁha. Kātantra is a work on Sanskrit Grammar of the Kaumāra school. It is also called Kālāpavyākaraṇa and Kaumārasūtra. In the commentary under notice Kādambarī and Śiśupalavadha also are referred to

Breaks off in the last Sūtra of the Taddhitapāda, i.e, the sixth Pāda of the second Kaṇḍa.

Beginning :

प्रणम्य सर्वकर्तारं सर्वदं सर्ववेदिनम् ।
सर्वियं सर्वगं शर्वं सर्वदेवनमस्कृतम् ॥
दुर्गसिंहोक्तकातन्त्रवृत्तिदुर्गपदान्यहम् ।
विवृणोमि यथाप्रज्ञमज्ञसंज्ञानहेतुना ॥

तत्रादौ तावदिष्टदेवतानमस्कारप्रतिपादनार्थं शास्त्रस्य संबन्धप्रयोजनाभि-

धानार्थं च श्लोकमेकं चकार—देवदेवमित्यादि । ननु विप्रतिषिद्धमेतत् दुर्गसिंहः खल्वेष वृत्तिकरणे कृताभिनिवेशः । तत्कथमप्रस्तुतेष्टदेवतास्तवे प्रवृत्तः । न चैतद्वक्तव्यम् अभिमतदेवतानमस्कारसमुद्भूतधर्मान्निर्विघ्नाभिप्रेतस्य सिद्धिरिति । कथम् व्यभिचारोपलब्धेः; तथाहि—कादम्बर्यादौ सकलदेवता-नमस्कारसंभवेऽपि अभिप्रेतस्यासिद्धिरुपलभ्यते । क्वचित्तु शिशुपालवधादौ नम-स्कारमन्तरेणापि साध्यसिद्धिरुपलभ्यते । तथा चाप्रस्तुताभिधायी कणादः कैश्चिदुपालब्धः—

धर्मं व्याख्यातुकामस्य षट्पदार्थोपवर्णनम् ।
सागरं गन्तुकामस्य हिमवद्गमनोपमम् ॥

* * * *

यस्माल्लौकिकानां शब्दानां व्याकरणमेव संप्रदायः । तदभावे बहुप्रक्रिया-विषयाः कथमवधारयितुं वृद्धपरम्परया शक्यन्ते इति । वैदिकानां पुनश्शब्दानां युगमन्वन्तरादिष्वप्यनवच्छिन्नसम्प्रदायप्रायत्वात् लौकिकज्ञैरवधारयितुं न पार्यन्त इत्यर्थः ॥

Colophon :

इति त्रिलोचनदासविरचितायां दुर्गसिंहोक्तकातन्त्रवृत्तिविवरणपञ्जिकायां प्रथमा सन्धिः समाप्तः ॥

End :

कथं नमस्कर्तुमित्यादीत्यत आह—नञिनिर्दिष्टमनित्यमिति । नमसो विभाषा प्रतिपत्तव्या, नमः कृत्य गतः, नमस्कृत्य गतः । तिरसो घञि यपे च विभाषा; तिरस्कारः तिरःकारः तिरस्कृत्य तिरःकृत्य ।

Colophon :

इति त्रिलोचनदासविरचितायां कातन्त्रवृत्तिविवरणपञ्जिकायां नाम्नि समास-पादः समाप्तः ॥

अपत्यस्य सम्बन्धित्वादपत्यवतः प्रत्ययो भवेदर्थात् षष्ठ्यन्तादेव भवतीत्याह—षष्ठ्यन्तादित्यादि । धर्मेणापत्यम्, धर्मायापत्यम्, धर्मादपत्यमित्यादौ न भवति, सापेक्षत्वात् ।

* * *

एवं स्वादुमृदोरपत्यं सौवादुमृदवः, शुन इदं शौवनं मांसम्, शुनस्सं-कोचः शौवः, नस्तु क्वचिदिति नलोपः । स्वस्येदं सौवम् । ननु कथमिदमिति

. . . . प्राप्तिरिति प्रतिषेधस्याभावात् तन्निमित्ता वृद्धिरागमो न स्यात् . . . . सुग्रामे भवः सौग्रामिक·

R. No. **2057.**

Palm-leaf. 17⅛ × 1⅓ inches. Foll. 22. Lines, 6 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

कृष्णयजुर्वेदसंहिता.

KṚṢṆAYAJURVĒDASAṀHITĀ.

Same work as that described under No. 71 of the D.C.S. MSS., Vol. I, Part II.

Contains the Praśnas 1, 2, 4 complete and 3 incomplete in the first Kāṇḍa

---

R. No. **2058.**

Palm-leaf. 15 × 1⅛ inches. Foll. 149. Lines, 5 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 141 and 149*b* are left blank.

रूपावतारः.

RŪPĀVATĀRAḤ.

Same work as that described under No. 1332 of the D.C.S. MSS., Vol. III. By Dharmakīrti.

Breaks off in the Taddhitaprakaraṇa.

R. No. **2059.**

Palm-leaf 15⅛ × 1⅜ inches Foll. 34. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

न्यायरत्नम्.

NYĀYARATNAM.

By Maṇikaṇṭha. Same work as that described under R. No. 2036 ante.

Incomplete.

R. No. 2060.

Palm-leaf. 11¼ × 1½ inches. Foll. 123. Lines, 7 in a page. Telugu. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 10*a*, 81*a* and 106*a* are left blank.

अद्वैतदीपिका.

ADVAITADĪPIKĀ.

By Nṛsiṁhāśrama. Same work as that described under No. 4514 of the D.C.S. MSS., Vol. IX.

Wants the beginning in the first Paricchēda and breaks off in the third Paricchēda.

R. No. 2061.

Paper. 7½ × 4¼ inches. Foll. 27. Lines, 7 in a page. Dēvanāgarī. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A. Pleader, Tirupati.

रामसहस्रनामस्तोत्रम्.

RĀMASAHASRANĀMASTŌTRAM.

A eulogy in verse containing 1,000 significant names, mostly beginning wtih the letter र् and addressed to Rāma, one of the incarnations of God Viṣṇu It is said to have been taught by God Śiva to Goddess Pārvatī.

Complete. Taken from the Brahmayāmala.

Beginning:

देव्युवाच—

देव देव महादेव भक्तानुग्रहकारक ।
त्वत्तो मया श्रुताः पूर्वं मन्त्राणां शतकोटयः ॥

* * * *

श्रीरामतत्त्वजिज्ञासा जायते परमेश्वर ।
रहस्यं रामचन्द्रस्य रकाराक्षरपूर्वकम् ॥
ब्रूहि रामसहस्रं त्वं यद्यहं तव वत्सला ।
स्त्रियो वा पुरुषो वापि श्रुत्वा ब्रह्मत्वमाप्नुयुः ॥
तद्रहस्यं समासेन वदस्व करुणानिधे ।

* * * *

रामो रामाकरो दीप्तो रक्तनेत्रो रमापतिः ।
रणभूमीविहारी च रक्तपादोऽरुणच्छविः ॥
रघुवीरो महावीरो धीरो वै सर्वराड्विः ।
रङ्गनाथार्चितपदो रामो राजीवलोचनः ॥

End:

विजयं सर्वमाप्नोति दुर्लभं सुलभं भवेत् ।
सत्यं सत्यं पुनस्सत्यं गोप्तव्यं पशुसन्निधौ ॥
तव भक्त्या मयाख्यातं नाख्येयं यस्य कस्य चित् ।
इह लोके सुखी भूत्वा परे मुक्तो भविष्यति ॥
अं अं ह्रीं ह्रीं श्रीं श्रीं क्लीं क्लीं अं अं रां रां क्लीं ह्रीं स्वाहा ।

Colophon:

इति श्रीब्रह्मयामले तन्त्रे सृष्टिप्रशंसायामुमामहेश्वरसंवादे रकारादिश्रीरामसहस्रनाम समाप्तिमगमत् ॥

The scribe adds—

संवत् १९११ वैशाखमासे शुक्लपक्षे नृसिंहचतुर्दश्यां गुरुवासरे लिखितं श्रीधरमिश्रेण अनन्ताचार्यपठनार्थम् । शुभं भूयात् ।

R. No. **2062.**

Paper. 8 × 4 inches. Foll. 11. Lines, 12 in a page. Dēvanāgarī. Fair.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) शिवसहस्रनामस्तोत्रम्.

ŚIVASAHASRANĀMASTŌTRAM.

Foll. 1*b*—10*b*. Fol. 1*a* contains the name of the work.

Similar to the work described under No 9271 of the D.C.S. MSS., Vol. XVII. It is said to form part of the Skāndapurāṇa and to have been taught by God Śiva to the demigod Kubēra.

Complete.

Beginning:

कदाचिच्च महादेवो जगाम परमेश्वरः ।
अन्वितः कार्तिकेयेन रम्ये बिन्दुसरोवरे ॥
नवरत्नशिलाबद्धं वनराजिविराजितम् ।
लहरीचित्रसोपानं चलज्जलविहङ्गमम् ॥

* * * *

कुबेर उवाच—

देवदेव महादेव महापुरुषसत्तम ।
अणिमादिगुणैश्वर्यज्ञानविज्ञानसागर ॥

* * * *

सहस्रनामविद्यां तां व्याहरिष्यामि देहिनाम् ।
श्रीमतोऽपि यथा श्रीमान् मुच्यते कर्मबन्धनात् ॥

* * * *

ओङ्कारः केवलो देवो महादेवो महेश्वरः ।
निरक्षरो निरालम्बो निःप्रपञ्चो निरामयः ॥

End;

शम्भो महेश्वर बिभर्ति सदा त्रिपुण्ड्रं
सद्भस्म(ना)सलिलधौतललाटपट्टे ।
योऽनुक्षणं शिव शिवेति जपत्यसौ वा
लोकत्रयोपरि सदा शिव ते प्रियोऽस्तु ॥

Colophon:

इति श्रीस्कान्दे हिमवत्खण्डे शिवप्रोक्तं कुबेरं प्रति शिवसहस्रनामस्तोत्रं संपूर्णम् ॥

(*b*) शिवभुजङ्गस्तोत्रम्.

ŚIVABHUJAṄGASTŌTRAM.

Foll. 10*b*—11*b*.

This is a eulogy on Śiva written in stanzas of the Bhujaṅgaprayāta metre. The authorship is attributed to Śaṅkarācārya.

Complete.

Beginning:

यदा दारुणाभाषणा भीषणा मे
भविष्यन्त्युपान्ते कृतान्तस्य दूताः ।
तदा मन्मनस्त्वत्पदाम्भोरुहस्थं
कथं निश्चलं स्यान्नमस्तेऽस्तु शम्भो ॥

End:

भुजङ्गायपादात्(ङ्गप्रयातं) पठेद्यस्तु भक्त्या
समाधाय चित्ते भवन्तं पुरारे ।
स मोहं विहायाशु युष्मत्प्रसादात्
समाश्रित्य योगं व्रजत्यच्युतत्वम् ॥

Colophon:

इति श्रीमच्छङ्कराचार्यविरचितं शिवभुजङ्गस्तोत्रं संपूर्णम् ॥

R. No. **2063.**

Paper. 9½ × 4⅝ inches. Foll. 20. Lines, 16 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Fol. 20*b* is left blank.

तत्त्वचिन्तामणिदीधितिः.

TATTVACINTĀMAṆIDĪDHITIḤ.

By Raghunāthaśirōmaṇi. Same work as that described under No. 4002 of the D.C.S. MSS., Vol. VIII.

Contains up to Liṅgakāraṇatā and Kēvalānvayī.

R. No. **2064.**

Paper. 9⅝ × 4⅝ inches. Foll. 81. Lines, 8 in a page. Dēvanāgarī. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 1*a* and 81*b* are left blank. Foll. numbered 65 to 122 and 127 to 145 are wanting.

तत्त्वचिन्तामणिः.

TATTVACINTĀMAṆIḤ.

By Gaṅgēśōpādhyāya. Same work as that described under No. 3984 of the D.C.S. MSS., Vol. VIII.

Contains the Śabdakhaṇḍa only.

The scribe adds—

संव. १६६ अगहनपासे शुक्लपक्षे चतुर्दशी नलनामसंवत्सरे बीहबैवासरे लिखितमिदं पुस्तकं काश्यां रुद्रदेवेन विश्वेश्वरसन्निधौ ।

R. No. 2065.

Paper. 10 × 4⅝ inches. Foll. 124. Lines, 10 in a page. Dēvanāgarī. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 6 to 13, 17 to 19, and 69 to 75 are wanting.

तत्त्वचिन्तामणिदीधितिः.

TATTVACINTĀMAṆIDĪDHITIḤ.

By Raghunāthaśirōmaṇi. Same work as that described under No. 4002 of the D.C.S. MSS., Vol. VIII.

Contains the Anumāna incomplete.

R. No. 2066.

Paper. 11⅛ × 4⅛ inches. Foll. 42. Lines, 19 in a page. Telugu. Injured.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Fol. 32*b* is left blank.

तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

By Gadādharabhaṭṭācārya. Same work as that described under R. No. 304(*c*) ante.

Contains the Siddhāntalakṣaṇa only.

R. No. 2067.

Paper. 9⅞ × 4 inches. Foll. 20. Lines, 11 in a page. Telugu. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Fol. 16*b* is left blank.

तत्त्वचिन्तामणिः.

TATTVACINTĀMAṆIḤ.

By Gaṅgēśōpādhyāya. Same work as that described under No 3982 of the D.C.S. MSS., Vol. VIII.

Contains the Nyāya and the Savyabhicāra incomplete.

R. No. **2068.**

Paper. 9¾ × 4½ inches. Foll. 18. Lines, 14 in a page. Telugu and Dēvanāgarī. Fair.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) वेदान्तसारः.

VĒDĀNTASĀRAḤ.

Foll. 1*a*—11*a*. Fol. 11*b* is left blank.

By Sadānanda. Same work as that described under No. 4746 of the D.C.S. MSS., Vol. IX.

Complete.

(*b*) देवीपूजाविधिः.

DĒVĪPŪJĀVIDHIḤ.

Foll. 12*a*—18*b*.

On details connected with the worship of the Goddess Dēvī.

Incomplete.

Beginning:

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
तत्त्वदर्पणं च . . . . दशांशतः ।
ततोऽसौ मन्त्रसिद्धिस्स्यात्ततो योगप्रयोगके ।
यस्य मन्त्रे यथा भक्तिः तथा तस्य फलं भवेत् ।
यं यं प्रार्थयते कामान् इह लोके परत्र च ॥
जारणं मारणं वश्यं स्तम्भनं मोहनं तथा ।
द्वेषमाकर्षणं शान्तिः कृतमात्रेण सिध्यति ॥

इति मन्त्रसाधनविधिः ।

शयनतलादुत्थाय श्रीगुरुपङ्क्तिं स्मृत्वा श्रीगुरुभ्यो नमः । परमेष्ठिगुरुभ्यो नमः । परमाचार्यगुरुभ्यो नमः । सिद्धिगुरुभ्यो नमः । स्वगुरुभ्यो नमः ॥

शिवोऽन्यत्र नमोऽन्यत्र गुरुरन्यत्र चिन्तयेत् ।
न सिध्यति वरारोहे कल्पकोटिशतैरपि ॥

नित्यानुष्ठानार्थमनुज्ञां गृहीत्वा तां दिशं नमस्कुर्यात् ।

End:

इन्द्रादिलोकपालैश्च पूजयेद्भूपुरेषु च ।
एवं क्रमेण नित्या तां देवीं बालां च सर्वदा ॥
नित्यं यः पूजयेद्भक्त्या स विद्वान्नात्र संशयः ॥

Colophon:

बालास्तवराजं सम्पूर्णम् ॥

अभयं वरदं चैव किरीटं मकरकुण्डलम् ।
पुस्तकम् अक्षमाला च षण्मुद्राश्च प्रकीर्तिताः ॥

R. No. 2069.

Paper. 8⅜ × 4⅛ inches. Foll. 18. Lines, 8 in a page. Dēvanāgarī. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

ब्रह्मतर्कस्तवः, सव्याख्यः.

BRAHMATARKASTAVAḤ WITH COMMENTARY.

Same work as that described under R. No. 618 ante, wherein see for the beginning. According to the colophon the commentator is Appayadīkṣita.

Wants the beginning; otherwise complete.

End:

शिवस्य भक्तिग्राह्यत्वम् । "भावग्राह्यमनीशाख्यं भावाभावकरं शिवम्" इति श्वेताश्वतरोपनिषन्मन्त्रेण ।

कृतकृत्यस्य तृप्तस्य मम किं क्रियते नरैः ।
बहिर्वाभ्यन्तरे वा(पि) मया भावोऽपि गृह्यते ॥

इत्यादिशिववचनैश्च प्रसिद्धम् ॥

Colophon:

इति श्रीमदद्वैतविद्याचार्यश्रीमद्विश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ ब्रह्मतर्कस्तवविवरणं समाप्तम् ॥

R. No. 2070.

Paper. 9¾ × 4½ inches. Foll. 31. Lines, 10 in a page. Dēvanāgarī. Fair.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

रुद्रसारसङ्ग्रहव्याख्या—रुद्रमीमांसा.

RUDRASĀRASAṄGRAHAVYĀKHYĀ ; RUDRAMĪMĀṀSĀ.

A commentary on the Rudrasārasaṅgraha which investigates the meaning of the fifth Praśna of the fourth Kāṇḍa of the Black Yajurvēda: by Nīlakaṇṭha, son of Gōvindasūri. From a stanza given at the end which is given below in the extract, the author appears to have learnt the Vēdas from Gōpāla, Vēdānta from Lakṣmaṇārya, sacrificial lore from Tīrthanārāyaṇa, logic from Dhīrēśa, Yōga from Pōlagaṅgādhara and Śrauta from Cintāmaṇi.

Complete.

Beginning:

अथ रुद्रसारग्रन्थो व्याक्रियते । तत्राचार्यः स्वेष्टदेवताप्रणतिपूर्वकं चिकीर्षितं प्रतिजानीते ।

नमस्कृत्य महादेवं न्यग्रोधतलवासिनम् ।
तेनान्तर्यामिणादिष्टो व्याख्यास्ये शतरुद्रियम् ॥

ननु पूर्वैर्व्याख्यातस्य किं पुनर्व्याख्यानेनेत्याशङ्क्याह—

यं बह्वृचा महत्युक्थ्ये यं छन्दोगा महाव्रते ।
मीमांसन्ते तमात्मानमग्नावध्वर्यवो यतः ॥

एते ह्येव बह्वृचा महत्युक्थ्ये मीमांसन्त एतमग्नावध्वर्यव एव एतं महाव्रते छन्दोगा इत्यैतरेयकेऽग्निचयने रुद्रो वा एष यदग्निरित्युपक्रम्य शतरुद्रीयं जुहोतीति चेतव्याग्निसंबन्धादग्निसंज्ञिते शतरुद्रिये पुराकल्पमुखेनात्मा मीमांसितव्य इति यतो विधीयते अतो मीमांसकमर्यादया शतरुद्रियं व्याकुर्वतो नास्ति पौनरुक्त्यम् ।

End:

शेषं यथाभाष्यं व्याख्येयम् ।

गोपालं मूर्ध्नि वेदे शिवमथ विनये दाक्षिणामूर्त्युपास्तौ
वेदान्ते लक्ष्मणार्यं क्रतुविधिविवृतौ तीर्थनारायणार्यम् ।
तर्के धीरेशमिश्रान् फणिपतिभणितौ पोलगङ्गाधरार्यं
श्रौते चिन्तामणिं यो गुरुमकृत कृतिं तस्य सन्तः पुनन्तु ॥

उत्तमश्लोकतीर्थाब्धिलब्धसद्युक्तिमौक्तिकैः ।
खचिता रुद्रसूक्तस्य द्योततां धीमतां हृदि ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरन्धरचतुर्धरवंशावतंसगोविन्दसूरिसूनोः श्रीनीलकण्ठस्य कृतिः रुद्रसारसङ्ग्रहव्याख्या रुद्रमीमांसाख्या समाप्तिमगमत् ॥

R. No. **2071.**

Paper. $11\frac{3}{4} \times 4\frac{7}{8}$ inches. Foll. 36. Lines, 13 in a page. Dēvanāgarī. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) पूर्वपक्षावलिः.

PŪRVAPAKṢĀVALIḤ.

Foll. 1*b*—18*b*. Foll. 19 and 20*a* are left blank. Fol. 1*a* gives the title of the work as " अथ पूर्वपक्षावलीप्रारम्भः ". Foll. 20*b* and 21*a* give the place of lithograph and the name of the person by whom it was lithographed as well as the date.

A collection of critical interrogatories on Pāṇini's grammatical aphorisms made by certain eminent Pandits at Poona : by Hōrila.

Complete.

Beginning :

यत्तु धातोस्तन्निमित्तस्यैवेति सूत्रे यादौ प्रत्यये परे धातोरेचश्चेद्वान्तादेशस्तर्हि तन्निमित्तस्यैवेति सूत्रार्थः । नियमार्थमिदं सूत्रम् । ऌव्यादौ वान्तो यि प्रत्यये इत्यनेनैव सिद्धत्वादिति । एवकारग्रहणं विपरीतनियमबाधनार्थम् । अन्यथा यादौ प्रत्यये एचश्चेद्वान्तादेशस्तर्हि धातोरेवेति नियमस्स्यात् । तथासति बाभ्रव्यमित्यादौ वान्तादेशो न स्यात् ।

End :

न च एङ्ह्रस्वादिति सूत्रस्थं हे ज्ञान इत्यादौ लोपोपपत्तये हल्पदानुवृत्तिव्यधिकरणान्वयाङ्गीकारपरं भाष्यं बाधकमस्तीति । मैवम्, लाघवात् सामान्यापेक्षमेव ज्ञापकं सिद्धान्तिनोक्तम् । व्यधिकरणान्वयहल्पदानुवृत्तिपरं भाष्यमेकदेश्युक्तिगौरवात् । तस्मात् मकारच्छेदऽङ्गाक्षेपव्यधिकरणान्वयहल्पदानुवृत्तयो न कर्तव्या न क्वापि दोषलेशश्च समाधानमूह्यम् ॥

Colophon :

इति श्रीमद्धोरिलसन्दर्भितपुण्यग्रामसभासत्प्रौढपण्डितविप्रतिपत्तिजन्यपूर्वपक्षसङ्ग्रहः समाप्तिमगात् ॥

संवत् १९४८ मि ज्येष्ठशुदि १.

(b) उत्तरपक्षावलिः.

UTTARAPAKṢĀVALIḤ.

Foll. 21b–36a. Fol. 36b gives the place of lithograph and the name of the person by whom it was lithographed as well as the date which is Samvat 1949, Āśvina Śukla, 9th, Friday.

The respective replies to the different interrogatories in the work described under (a) subdivision are given herein by a disciple of Mannudēva.

Complete.

Beginning:

विद्याविनोदचतुरं विद्यादं विघ्ननाशनम् ।
तथाविधं मन्नुदेवं गुरुं वाग्देवतां भजे ॥
प्रश्नावल्यां हारिलस्य ये प्रश्नाः पण्डितैः कृताः ।
तेषां सदुत्तरार्थाय क्रियते उत्तरावली ॥

तत्र तावत् धातोस्तन्निमित्तस्येति किम्? ओयतेति मूलोक्तदोषनाशाय न यकीति न्यासः । तत्समाधानमाचारक्विबन्तप्रकृतिककर्तृक्विबन्तगोग्लौशब्दादिभ्यः तत्र साधुरिति यति गोयं ग्लौयमित्यादि । तथा विजन्तभूधातोर्भो इत्यस्माद्यति भोयमित्यादौ च धातोरेव यादिप्रत्ययभिन्नस्य वान्तादेशो मा भूदिति न यकीतिन्यासो दुष्टः ।

End:

यत्तु वे(टे)रित्यत्र स्थानित्वेनोपात्तात्स्थानिसत्त्वाच्चङ्परनिर्ह्रासे इति वचनं वारि आख्यदवीव इत्यादौ चरितार्थमतः सूत्रे एवाच्स्थानिक इत्युक्ते सर्वेष्टसिद्धिरित्युक्तम् । तन्न, टिपदेनाच एव(।)ग्रहणाद(ज्मा)त्रादेशाभावेनादोषात् । अतएव मरुतमाचष्टे मारयतीति वृद्धौ कृतायां न स्थानिवद्भाव इति दिक् ॥

Colophon:

इत्युत्तरपक्षावली समाप्ता ॥

R No. **2072.**

Paper. 10 × 4½ inches. Foll. 45. Lines, 12 in a page. Dēvanāgarī. Good.

Presented in 1916–17 by M.R.Ry N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

Foll. 1a and 45b are left blank.

कारिकावलीव्याख्या—मुक्तावली

KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

By Viśvanāthapañcānana. Same work as that described under No. 3939 of the D.C.S. MSS., Vol. VIII.

Complete.

R. No 2073.

Paper. 11 × 4⅜ and 9⅞ × 4 inches. Foll. 10. Lines, 16 in a page. Dēvanāgarī and Telugu. Fair.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(a) धातुरूपावलिः.

DHĀTURŪPĀVALIḤ.

Foll. 1a—4a. Fol. 4b is left blank.

A grammatical treatise dealing with the conjugations of verbs in the different tenses, etc.

Incomplete.

Beginning:

धातुरूपावलिर्लिख्यते—

तत्र धातवो द्विविधाः । सार्वधातुकवन्त आर्धधातुकवन्तश्चेति । लट्-लङ्लोड्विध्यादिलिङन्ताः सार्वधातुकवन्तः । आशीर्लिङ्लिट्लुङ्लुट्लृट्लृङ-न्ताः आर्धधातुकवन्तः । तत्र भू सत्तायां कर्तरि सार्वधातुके शप् अकर्मकपरस्मैपदी । कर्तरि लटि यथा—भवति भवतः भवन्ति ।

End:

भावकर्मणोरात्मनेपदं सार्वधातुके यक् च कर्मणि लटि दीव्यते लङि अदीव्यत लोटि दीव्यताम् । विध्यादिलिङि दीव्येत आशीर्लिङि देविषीष्ट लिटि दिदिवे लुङि अदेवि लुटि देविता लृङि अदेविष्यत लृटि देविष्यते ।

(b) तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

Foll. 5a—19b.

Same work as that described under No. 4041 of the D.C.S. MSS., Vol. VIII.

Contains the Viśeṣavyāpti complete; but wants the beginning.

R. No. **2074.**

Paper. 8½ × 4¼ inches. Foll. 10. Lines, 13 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

पूर्वपक्षावलिः.

PŪRVAPAKṢĀVALIḤ.

Same work as that described under R. No. 2071(a) ante.

Incomplete

R. No. **2075.**

Paper. 10 × 4½ inches. Foll. 154. Lines, 11 in a page. Dēvanāgarī. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

मुक्तावलीव्याख्या—दिनकरी.

MUKTĀVALĪVYĀKHYĀ: DINAKARĪ.

By Mahādēva. Same work as that described under No. 3955 of the D.C.S. MSS., Vol. VIII.

Complete.

R. No. **2076.**

Paper. 7¼ × 4⅝ inches. Foll. 15. Lines, 7 in a page. Dēvanāgarī. Slightly injured.

Presented in 1916–17 by M.R.Ry. N Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

वायुस्तोत्रम्.

VĀYUSTŌTRAM.

By Trivikramācārya, son of Subrahmaṇyasūri. Same work as that described under No. 9810 of the D.C.S. MSS., Vol. XVIII.

Complete.

R. No. **2077.**

Paper. 10 × 4⅚ inches. Foll. 50. Lines, 12 in a page. Dēvanāgarī. Slightly injured.

Presented in 1916–17 by M.R.Ry. N. Kuppusvami Ayyagāru, B.A., Pleader, Tirupati.

Foll. 48 and 49 are lost.

जागदीशीव्याख्या.

JĀGADĪŚĪVYĀKHYĀ.

A commentary on the Caturdaśalakṣaṇī of Jagadīśa.

Breaks off in the Cakravartilakṣaṇa.

Beginning :

विषयतायाः विषयिरूपतामते स एव दोषः । विषयरूपतामतेऽपि घटादीनां समवायीत्येवेत्यत आह ; पदार्थान्तरमिति । अतिप्रसक्तत्वात् । तीरादेर्गङ्गादिपदवाच्यत्वप्रसङ्गात् । वाच्यत्वस्येश्वरेच्छारूपत्वपक्षे च नायं दोषः । गङ्गायां वर्तमानस्य तस्य तीरादावभावात् । विषयभेदेन विषयतायाः भेदात् । न च गङ्गापदबोद्धव्यत्वप्रकारकत्वविशिष्टेच्छावत्त्वस्य तीरे सत्त्वान्नातिप्रसङ्ग इति वाच्यम् ।

End :

हेतुव्यापकतावच्छेदकत्वं हेतुतावच्छेदकताघटकसम्बन्धेन वाच्यम् । तेन तत्रैव च वह्न्यादिनिष्ठव्यापकतायां धूमत्वादेः कालिकसम्बन्धेनावच्छेदकत्वेऽपि न क्षतिः । यद्वा येन सम्बन्धेन यद्व्यनिष्ठावच्छेदकताकं येन सम्बन्धेन ।

R. No. **2078.**

Paper. 9¼ × 4⅝ inches. Foll. 24. Lines, 10 in a page. Telugu and Dēvanāgarī. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvami Ayyagāru, B.A., Pleader, Tirupati.

(*a*) **गणपतिकवचः.**

GAṆAPATIKAVACAḤ.

Foll. 1*a*—3*b*.

Eulogistic stanzas addressed to God Gaṇapati and seeking his protection for all the limbs and organs of one's body in all places and times. The work is said to form part of the Gaṇapatipurāṇa and to have been taught by God Śiva to Goddess Pārvatī.

Complete.

Beginning :

अस्य श्रीमहागणपतिकवचमहास्तोत्रमन्त्रस्य भगवान् महादेव ऋषिः, श्रीमहाशक्तिगणपतिर्देवता, गं बीजम्, ह्रां शक्तिः ।

* * * *

पूर्वस्यां दिशि विघ्नेशो पातु विश्वेश्वरप्रियः ।
दक्षिणस्यां शिवात्मा च पातु मां गणनायकः ॥

End :

जले स्थिते शिवात्मा च सर्वं पातु च तुन्दिलः ।
य इदं कवचं नित्यं पठेद्विद्वान् शुचिः स्थितः ॥

* * * *

आयुर्बलं यशो लक्ष्मीः स्वान्तनिष्ठा च लभ्यते ।

Colophon :

इति श्रीगणपतिपुराणे ईश्वरपार्वतीसंवादे गणपतिकवचं संपूर्णम् ॥

(b) गणपतिसहस्रनामस्तोत्रम्.

GAṆAPATISAHASRANĀMASTŌTRAM.

Foll. 3b—11b.

Similar to the work described under No. 8794 of the D.C.S. MSS., Vol. XVII. The significant names of Gaṇapati contained herein begin with the letter ग्.

Complete.

Taken from the Rudrayāmala and taught by God Śiva to Goddess Pārvatī.

Beginning:

कैलासशिखरे रम्ये सुखासीनं त्रिलोचनम् ।
प्रणम्य शिरसा नाथं पार्वती पर्यपृच्छत ॥

पार्वत्युवाच—

त्वत्तः श्रुतं पुरा देव गणेशस्य महात्मनः ।
नाम्नां सहस्रं तच्चित्रं गकारादिकमिष्टदम् ॥
तन्मे वदस्व देवेश ह्यहं तव वल्लभा ।

* * * *

गणेश्वरो गणाध्यक्षो गणाराध्यो गणप्रियः ।
गणनाथो गणस्वामी गणेशो गणनायकः ॥

End:

इति श्रुत्वा महादेवं देवी विस्मितमानसा ।
पूजयामास विधिना गणेश्वरपदद्वयम् ॥

Colophon:

इति श्रीरुद्रयामले शिवपार्वतीसंवादे गकारादिगणेशसहस्रनामस्तोत्रम् संपूर्णम् ॥

The scribe adds—

साधारणाब्दे आश्वीजे द्वादश्यां दक्षिणायने ।
गुरुवारे शुक्लपक्षेऽपराह्णे च शरदृतौ ॥
स्तवं श्रीगणनाथस्य नामसाहस्रकं परम् ।
नारायणेन लिखितं सर्वं लम्बोदरार्पणम् ॥

(c) भूतशुद्धिमन्त्रः.

BHŪTAŚUDDHIMANTRAḤ.

Foll. 12a—17b.

Similar to the work described under No. 6838 of the D.C.S. MSS., Vol. XIII.

Incomplete.

Beginning:

अथ भूतशुद्धिप्रारम्भः—

उत्पतन्ति ह भूतानि पृ(थि)व्यन्तरवासिनः ।
आसनादौ नमस्कृत्य ब्रह्मकर्म समारभेत् ॥
अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥
अपक्रामन्तु भूतानि पिशाचास्सर्वतो दिशम् ।
सर्वेषामविरोधेन ब्रह्मकर्म समारभेत् ॥
तीक्ष्णदंष्ट्र महाकाय कल्पान्तगहनोपम . . अर्हसि ॥

भूमौ वामपादेन घातत्रयं कृत्वा पृथ्वीति मन्त्रस्य मेरुपृष्ठऋषिः कूर्मो देवता सुतलं छन्दः आसने विनियोगः ।

End:

षं नमः मज्जात्मने हृदयादिपादयुगलाय नमः । सं नमः । खात्मने जठराय नम । हं नमः । प्राणात्मने मुखाय नमः क्षं नमः जीवात्मने सर्वश.

(*d*) सूर्यशतकम्, सव्याख्यानम्.

SŪRYAŚATAKAM WITH COMMENTARY.

Foll. 18*a*—24*b*.

By Mayūrakavi. Same text as that described under R. No. 139(*b*) ante; but the commentary herein is different.

Contains 14 stanzas only.

Beginning:

जम्भारातीभकुम्भोद्भवमिव . . . भानवो भानवीयाः ॥

जम्भेति । जम्भो नाम कश्चिदसुरः तस्यारातिः शत्रुः इन्द्रः तस्य इभ ऐरावतः तस्य कुम्भौ तयोरुद्भवः आविर्भूतः(भावः)यस्य सः जम्भारातिभकुम्भोद्भवः तम् । अनेन किमभिधीयते सान्निध्यात्पूर्वदिगिभकुम्भोद्भवमित्यभिधीयते ।

End:

एकं ज्योतिः सूर्यरूपं तेजः गदितं दृशौ लोचने द्वे गदिते तथाभूतानां । पृथिव्यप्तेजोवाय्वाकाशानां मध्ये पञ्चममन्यरूपं गदितम् । षट्सु वसन्ताद्यृतुषु नानाविधानि नानाप्रकाराणि गदितानि । एतदुक्तं भवति—यत् किञ्चित्सामान्यतेजोरूपं तत्सर्वं गदितमिति । तिस्रो दशा येषां ते त्रि.

R. No. **2079**.

Paper. 6¾ × 4⅜ inches. Foll. 10. Lines, 12 in a page. Dēvanāgarī and Telugu. Good.

Presented in 1916-17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A. Pleader, Tirupati

(*a*) गर्भोपनिषत्.

GARBHŌPANIṢAD.

Foll. 1*a*—3*b*. Fol. 3*b* contains the name of the work as given above.

Same work as that described under No. 436 of the D.C.S. MSS., Vol. I, Part 3.

Complete.

(*b*) ब्रह्मोपनिषत्.

BRAHMŌPANIṢAD.

Fol. 4.

Same work as that described under No. 655 of the D.C.S. MSS., Vol. I, Part 3.

Incomplete.

(*c*) कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPANIṢAD.

Foll. 5*a*—6*b*.

Same work as that described under No. 356 of the D.C.S. MSS., Vol. I, Part 3.

Complete.

(*d*) మంత్రవిషయాలు.

MANTRAVIṢAYĀLU.

Foll. 7*a*—10*a*. Fol. 10*b* is left blank.

See the Telugu part of the Triennial Catalogue.

R. No. **2080**

Paper. 6⅝ × 4¼ inches. Foll. 26. Lines 10 in a page. Telugu. Slightly injured. Good.

Presented in 1916-17 by M R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) आह्निकम्.

ĀHNIKAM.

Foll. 1*a*—13*a*.

Similar to the work described under No. 2822 of the D.C.S. MSS., Vol. V. This is not intended for a Vaiṣṇavite.

Complete.

Beginning:

प्रातरुत्थाय पादौ प्रक्षाल्याचम्य प्राणानायम्य ।
उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ करुणाकर ।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु ॥

ततः स्तोत्रपाठादिकं पठित्वा नदीं तटाकं वा गच्छेत् । तत्र मृत्तिकाशौचादीन् विधाय सर्गस्थितिप्रलयहेतुमित्यादिकमुच्चरन् स्नात्वा ।

End:

अपराधसहस्राणि क्रियन्ते ह्यनिशं मया ।
दासोऽहमिति मां बुद्ध्वा क्षमस्व परमेश्वर ॥
भूमौ स्खलितपादानां भूमिरेवावलम्बनम् ।
त्वयि सर्वापराधानां त्वमेव शरणं गुरुः ॥

(*b*) दक्षिणामूर्त्यष्टकम्.

DAKṢIṆĀMŪRTYAṢṬAKAM.

Foll. 13*a*—16*a*. Fol. 16*b* is left blank.

By Śaṅkarācārya. Same work as that described under R. No. 118(*b*) ante.

Complete.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादाचार्यविरचितं दक्षिणामूर्त्यष्टकं सम्पूर्णम् ॥

Foll. 17*a*—18*b* contain the वेदशान्तिसूक्त and शङ्कराचार्यविषयकध्यानश्लोक. Fol. 19*a* is left blank. Foll. 19*b*—20*b* contain दण्डधारणविधि and some Telugu sentences.

(*c*) महावाक्यमन्त्रः.

MAHĀVĀKYAMANTRAḤ.

Foll. 21*a*—26*a*.

Gives particulars such as the Ṛṣi, Chandas, Dēvatā, Nyāsa, Śānti, Guruparamparā, etc., for the due repetition of the Vēdantic Mahāvākyas

which are held by the followers of the Advaita Vēdānta to contain the highest truth.

Complete.

Beginning:

अस्य श्रीमहावाक्यमहामन्त्रस्य परब्रह्मा ऋषिः, परमात्मा देवता, अव्यक्ता गायत्री छन्दः, हं बीजम्, सः शक्तिः, सोऽहं कीलकम्, ब्रह्माद्यधिकारयोग्यतासिद्ध्यर्थे जपे विनियोगः ।

End:

सर्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्यान्मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मे अस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु, ओं शान्तिश्शान्तिश्शान्तिः ॥ भद्रं कर्णेभिः शृणुयाम देवाः । . . .

* * * *

स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥ ओं शान्तिश्शान्तिश्शान्तिः ॥

R. No. **2081**.

Paper. 7⅜ × 4½ inches. Foll. 21. Lines, 20 in a page. Telugu. Good.

Presented in 1916–17 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., Pleader, Tirupati.

(*a*) कृष्णकर्णामृतम्.

KṚṢṆAKARṆĀMṚTAM.

Foll. 1*a*—6*b*.

By Līlāśukamuni. Same text as that described under No. 20 of M. Seshagiri Sastri's Report No. 2 on pages 57, 199 to 201.

Complete.

Colophon:

इति श्रीकृष्णलीलाशुकमुनिविरचितं कर्णामृतं नाम प्रथमशतकं दशश्लोकोत्तरं सम्पूर्णम् ॥

(*b*) मणिकर्णिकास्तोत्रम्.

MAṆIKARṆIKĀSTŌTRAM.

Foll. 7*a*—8*b*.

By Śaṅkarācārya. Same work as that described under R. No. 226(*b*) ante.

Complete.

(c) अग्नीषोमीयनिर्णयः.

AGNĪṢŌMĪYANIRṆAYAḤ.

Foll. 9a—19b. Fol. 13b is left blank.

On a discussion as to who is entitled to perform the Agnīṣōma sacrifice.

Complete.

Beginning:

पौर्णमास्यामसोमयाजिनो ब्राह्मणस्याग्नीषोमदेवताकः पुरोडाशो भवति न वेति विचार्यते । नासोमयाजिनो ब्राह्मणस्याग्नीषोमीयः पुरोडाशो विद्यते इति आपस्तम्बसूत्राहग्वेदिनां यजुर्वेदिनां सर्वेषामेवासोमयाजिनां नाग्नीषोमीयः पुरोडाशयाग इति पूर्वपक्षः ।

End:

सामिधेनिसप्तदशे, प्रकृतौ कृता तु पूर्वमतप्रकृतौ पञ्चदशेनैव विकल्प्यत इति ॥

Colophon:

इत्यग्नीषोमीयनिर्णयस्समाप्तः ॥

(d) प्रश्नोत्तररत्नमाला.

PRAŚNŌTTARARATNAMĀLĀ.

Foll. 20a—21b.

By Śaṅkarācārya. Same work as that described under R. No. 1906(b) ante.

Complete.

R. No. **2082.**

Palm-leaf. 14⅝ × 1⅛ inches. Foll. 44. Lines, 8 in a page. Grantha. Fair.

Purchased in 1916–17 from M.R.Ry. Trivēdi Kṛṣṇasvāmi Śrautigal of Mullandram, North Arcot district

(a) सौन्दर्यलहरी, सव्याख्या.

SAUNDARYALAHARĪ WITH COMMENTARY.

Foll 1a—33a. Fol. 33b is left blank.

Same text as that described under No. 48 on pages 97, 98, 255 and 256 of M. Seshagiri Sastri's Report No. 2 It is followed by a commentary entitled the Bālaprabōdhikā by Rāmacandra, a resident of Mullandram village and the son of Rāmabhadrasumati of Kāśyapa-

gōtra. The author is said to have learnt the Vōdas from Śōṇādri-ajvan, grammar from Rāmasvāmin and Sāhitya from Vallīsahāya-dhī.

Complete.

Beginning:

शुक्लाम्बरधरं . . . शान्तये ॥
संसन्नटेश्वरीं ध्यात्वा नत्वाचार्यं च शङ्करम् ।
सौन्दर्यलहरीटीकां कुर्वे बालप्रबोधिकाम् ॥
शान्तस्वान्ताः कान्तविद्या . . . . ।
. . . लकान् स्युः शिल्पा लीलाधूली निष्ठितागारशिल्पान् ॥

अत्र व्याख्यानं कीदृशमित्यत उच्यते—

स्वशब्दैः परशब्दैश्च व्याक्रियालङ्क्रियादिभिः ।
निघण्टुभिश्च शब्द . . . . पबृंहणम् ।, इति ॥

* * * *

विग्रहाः प्रतिशब्दाश्च उच्यन्ते चावबुद्धये ।
व्याक्रियालङ्क्रिया चैव क्वचित् क्वचिदुदीर्यते ॥

स्वकृतव्याख्यास्वरूपं दर्शयति—

ज्ञातॄणामव . . . . . . प्रबोधिनी ।
अविरुद्धा बहुविदां गुणज्ञानामियं सुधा ॥

इह खलु तत्रभवन्त आचार्यपादाः श्रीमच्छङ्कराचार्याः सौन्दर्यलहरीं नाम श्लोकशतनिर्मितस्तोत्र . . . . . मङ्गलरूपां सर्वमङ्गलात्मिकां प्रस्तौति—शिवेत्यादि ।

शिवश्शक्त्या युक्तः . . . कृतपुण्यः प्रभवति ॥

शिव इति । त्वामिति युष्मदः प्रयोगात् सम्बोधनमप्यध्याह्रियते । हे अम्ब शिवः ईश्वरः शक्त्या सर्वज्ञत्वादिशक्त्या . . . यदि तदा प्रभवितुं प्रपञ्चसृष्ट्यादि कर्तुं शक्तः समर्थः । एवं न चेत् तद्योगाभावो यदि देवः दीव्यमानः स्वप्रकाशप्रकाशितजगत्त्रयः परमेश्वर इति यावत् ।

End:

उपमेयवाक्यगतस्तुतिशब्दस्योच्चारणात्मकतया च धर्मभेदात् स्वरूपतो बिम्बप्रतिबिम्बभावाच्च ।

चेत् बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिरिति लक्षणात् । अध्याहारान्वयभेदवस्तुपरामर्शरूपभेदैः यद्यप्यलङ्काराणां साङ्कर्यं न भवति । तथापि श्लोकैक्यादत्र निदर्शनाप्रतिवस्तुदृष्टान्तानामलङ्काराणां सङ्करः । अत्र शतमपि शिखरिणीवृत्तलक्षिताः ।

यदि प्राच्यो ह्रस्वाः कलितकमले षष्ठकपराः
ततो वर्णाः पञ्च प्रकृतसुकुमाराङ्गरचिताः ।
त्रयोऽन्ये चोपान्त्यास्सुतनु जघनाभोगसुभगे
रसैरीशैर्यस्यां भवति विरतिस्सा शिखरिणी ॥ इति लक्षणात् ॥

Colophon :

इति श्रीमुल्लाण्डाख्याग्रहारवास्तव्येन काश्यपकुलजलधिचन्द्रेण रामचन्द्रेण विरचिता बालप्रबोधिकाख्या सौन्दर्यलहरीव्याख्या सम्पूर्णा ॥

श्रीमत्काश्यपरामभद्रसुमतिर्यस्योदये कारणं
काव्यालङ्कृतिनाटकाभिसरणे वल्लीसहायस्सुधीः ।
रामस्वामिबुधोऽपि शब्दभजने शोणाद्रियज्वा श्रुतौ
व्याख्या रामबुधेन शङ्करकृतेस्तेनेह जीयात् कृता ॥

(*b*) व्याकरणविषयः.

VYĀKARAṆAVIṢAYAḤ.

Foll. 34*a*—44*b*.

A controversial discussion on certain grammatical points.

Incomplete.

Beginning :

भूवादयो धातवः—

भूश्च वाश्चेति द्वन्द्वः । आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः । भूवौ आदी येषामिति बहुव्रीहिः । भूप्रभृतयो वासदृशाः; सादृश्यं च क्रियावाचित्वेन, ततः क्रियावाचिनो भ्वादयो धातुसंज्ञास्स्युः भ्वादयः किम् । हिरुक् पृथगित्याद्यव्ययानां शिश्य इति भावार्थस्य तिङन्तस्य च मा भूत् । क्रियावाचिन किम् । याः पश्यसीत्यादौ धातुत्वं मा भूत् । तस्मिन् सति ह्यातो धातोरिति स्यात् । इति मनोरमायामुक्तम् ।

अत्र वाग्रहणं मास्तु । याः पश्यसीत्यादौ धातुत्वमपि न भवति, लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति न्यायात् । न च या प्रापण इति टाबन्तस्यैवानुकरणम्, प्रतिपदोक्ताभावादिति वाच्यम्, यातीत्यादि प्रतिपदोक्तस्यैव सत्त्वात् ।

End :

अस इत्यत्र समासात् परस्य सोः तच्छब्द . . . भिधायित्वेन प्राप्तं लोपं वारयितुमनञ्समासग्रहणस्यावश्यकतयैतत्तदोर्विहित इति व्या . . . . तस्यानावश्यकतया पञ्चम्या अभावेन एतत्तद्भ्यां परस्येति व्याख्यातुमशक्यतया चेति भावः ॥

Colophon :

पुस्तकं कक्षिसमाप्तम् ॥

हकारे वकारे यकारे च रेफे लकारे तृतीये तुरीये परेऽन्त्ये ।
विसर्गस्य लोपो भवेदात्परस्यैषसाभ्यां परस्याल्यशेषे विना तम् ॥

* * * *

लकारादचि स्याल्लचः पूर्वकस्य ह्यथैचोऽयवायावयिष्टा अचि स्युः ।
तथैङः पदान्तात्परेत्येङ्तयोरोत्प्रकृत्याव्यये चिच्चितौ बोधनस्य ॥

लाकृतिः, हरयेहि, विष्णविह, श्रियायुद्यतः, गुरावुत्कः ।

R. No. **2083.**

Palm-leaf. 17 × 1¼ inches. Foll. 82. Lines, 6 in a page Grantha. Slightly injured.

Purchased in 1916-17 from M.R.Ry. Trivēdi Kṛṣṇasvāmi Śrautigal of Mullandram, North Arcot district.

(*a*) **हरिश्चन्द्रचरित्रचम्पूः.**

HARIŚCANDRACARITRACAMPŪḤ.

Foll. 2*a*—65*b*. Fol. 1 contains some passages left out on fol. 2.

A work describing in verse and prose the leading incidents in the life of Hariścandra, the famous king of the solar race. The author is Gururāma of Kāśyapagōtra and a native of Mullandram which is said to be a place in the Kāñcī country. He is said to have been honoured with a garland in the midst of opposing disputants for his skill in composing a verse in praise of God Viṣṇu and to have conquered a Śaiva devotee. This work is said to have been written on Monday in the month of Tulā of the year Nala of the cycle after Kali 4709 (?).

Complete.

Beginning:

वन्देऽहं शिवयोर्द्वन्द्वं शिवायाद्वन्द्वमव्ययम् ।
यद्भासा भुवनं विश्वं [1]भासते गुणवत्तया ॥

अपि च—

या वाणी चतुराननस्य वदनेष्वङ्केऽपि पर्यङ्किनी
त्वावेधःक्रमिकं जगत्त्रयमिदं यत्कर्तृ वाग्व्यापृति ।
सा मां विभ्रमसंभ्रमभ्रमदलिभ्रान्तिप्रदाक्ष्यंशुना
रक्षत्वक्षतचन्द्रकान्तवदना पीयूषसंवर्षिणा ॥

संसन्नटेशीचरणाम्बुजद्वयं प्रजेशमुख्यैश्चिरमर्थनीयम् ।
हृद्भृङ्गडिम्भं कृतिकल्पतृष्णं प्रसादपीयूषरसैर्धिनोतु ॥

किं कालिदासादिकवीन्द्रनुत्या तिष्ठन्तु ते सत्यमहो महान्तः ।
यश्चैकपद्यस्तुतचक्रपाणेर्जग्राह मालां प्रतिवादिमध्ये ॥

यः शैवडिम्भमविनीतनिकृत्तजिह्वं संप्रार्थिनाच्छिशिधरात् गुरुरामनाम,
चक्रे ह्यसौ च हसनं जयतादसौ यद्वाचां प्रबन्धकरणेषु न भारलेशः ॥

किञ्चिज्ज्ञोऽहं मम तु धिषणा किञ्च किञ्चित्तरैषा
बाला वाणी कथमिह कविस्वान्तमाराधयेद्वा ।
(श)श्वच्चिन्ता हृदयसरणिं दीव्यतीत्यप्रमादात्
वाचां गुम्भे तदपि च मुहुस्संसदीशस्य नुत्याम् ॥

किं बहुना—

दोषाणां वेत्त्युदयं कमलाकर इव कविराट्जनबृन्दः ।
अवगमो विदुषां तु वा संस्रक्ष्यति वाक्षेद्य यथामति काव्यम् ॥

भीतिर्नास्ति कवीश्वरादपि बुधात्तात्पर्यवक्तुर्ममा-
रब्धुं ग्रन्थमथाज्ञतो न च कदाप्युक्तार्थवेत्तुर्न वा ।
तस्मादेव खलादभिज्ञमिति यः स्वं मन्यते भूतले
स्वेष्टार्थं न शृणोति चेष्टपुरुषात्स्वस्यापि वेत्तुं न धीः ॥

यस्मिन् भूपसभे बुधाः प्रभुमताः प्रायस्सदोपेक्षका
मौनं केचन कुर्वते ह्यनुसरन्त्येके परं दूषकम् ।

---

[1] प्रतिबिम्बायित मुहुः इत्यपि पाठः.

. . . . विनो निजगिरामारम्भलेशं विना
तस्मिन् कः कवयन् कविस्स्फुरति भो भूपेऽनभिज्ञे सति ॥
काव्यालङ्कृतिनाटकेष्वकुशलाः के सन्ति क्रूराः खलाः
के वा जाग्रति मानिनो न नितरां साहित्यसत्त्वादृताः ।
के वानन्यबुधप्रचोदितमहाकक्ष्यास्फुरद्वाङ्मुखाः
शब्दब्रह्मविदां यदाह परतस्तेषां तदा का गतिः ॥

* * * *

रामं कृष्णं नलं वा प्रथितसुयशसं धर्मसूनुं रघुं वा
स्तोतुं वाञ्छन्ति सर्वे निजवचसि मलं हर्तुकामाः प्रहृष्टाः ।
इच्छाम्यग्रे हरिश्चन्द्रनृपतिकथया सारपीयूषवृष्ट्या
बालां वाचं मदीयाममलयितुमहं सर्वकाह्लादयित्र्या ॥
पद्यगद्यमयवाग्विजृम्भितं शोकधीरकरुणारसपूर्णम् ।
चम्पुकाव्यमधुना विरच्यते किं बुधा मनसि मन्वते मयि ॥

* * * *

अस्ति किल सकललेखालेखकुलनिराकुलप्रविभक्तोत्तराधरदेशस्य वैरिमण्डलखण्डनशौण्डीरतुण्डायुधचण्डतराण्डजातपत्रनाभीपुण्डरीकजाताण्डमण्डल-मण्डपमणिस्तम्भायमानस्य

* * * *

राजधानीत्यमरावती ।

* * * *

पृष्टो मघोना स मुनिस्तथेत्यादिष्टोऽमराचार्यकटाक्षधाम्ना ।
तुष्टो वसिष्ठोऽनुपदं बभाषे शिष्टो हरिश्चन्द्रनृपोऽस्ति भूमौ ॥

* * * *

श्रीमत्काश्यपनन्दनप्रजनिते चम्प्वाख्यकल्पद्रुमे
चैक्ष्वाकस्य कथारसातिभरिते सद्बोधसर्वस्वदे ।
भास्वद्गद्यविशालशाखिनि महापद्यप्रमोदान्विते
तस्मिन्नित्थमभूदपूर्वकलिका प्रायस्सुगन्धान्विता ॥

End:

साकेताख्ये पुरेऽस्मिन् रिपुजनदुरापे पौर्वसिंहासनस्थो
राजा सर्वप्रजेश(न)प्रथितसुकिरीटप्रो(टो)ल्लसद्रत्नभाभिः ।

रज्यत्पादाब्जयुग्मो रविकुलमहेन्द्रस्संश्रयं शङ्करं तं
साक्षाद्विष्णुः किलायं त्वरमत च लक्ष्म्या भूयसा चन्द्रवत्या ॥
पृथ्वीपालास्समन्तादिह च वसुमतीं पान्तु निस्तन्द्रिणोऽमी
स्वेष्टां वृष्टिं महेन्द्रो जनयतु पृथिवी सस्य . . . . ।
गावो निस्तन्द्रदोग्ध्र्यो द्विजकुलमखिलं स्यात्तु वेदेष्वधीति
श्रीमान् शम्भुः कटाक्षं मयि महितयशा सर्वदा . . . ॥
. . . . पार्वतीशम्भुनाम्नोरनितरजनसाध्यस्नेहसंश्लेषयोश्च ।
असितसितशरीरज्योतिषोरर्पितः स्याच्चरणकमलयुग्मे चम्पुपुष्पाञ्जलिर्मे ॥
मूलाण्डाख्याग्रहारे महितमणिचये प्रोज्ज्वलत्सद्गुणाढ्ये
काञ्चीसीमावधूटीकुचकलशतटस्याग्रहारे मनोज्ञे ।
वेदेऽधीती स चास्ते यजुषि तु सकले काश्यपो रामनामा
विश्वासाभिप्रणामैर्निजकृतकृतिभिः प्रीणयंस्तानिदं कृत् ॥
कलेर्युगस्य वर्षेषु गतेषु सनघ(थ)ाद्युषु ।
हरिश्चन्द्रचरित्राख्यमेतच्चम्पु विनिर्मितम् ॥
नलनाम्नि हायनेऽस्मिन् नलिनहितेऽपि खगे तुलाकुलायिनि ।
आसीदिदं तु पूर्णं भूते भूतपतिमण्डनवासरे ॥

Colophon:

इत्यष्टमी कलिका ।

(*b*) हरिश्चन्द्रचरितचम्पूः.

HARIŚCANDRACARITACAMPŪḤ.

Foll. 66*a*—82*b*.

Same work as the above.

Breaks off in the second Kalikā.

R. No. **2084.**

Palm-leaf. 16¾ × 1½ inches. Foll. 103. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1916–17 from M.R.Ry. Trivēdi Kṛṣṇasvāmi Śrautigal of Mullaṇḍram, North Arcot district.

Foll 95*b* and 103*b* are left blank.

संक्षेपशङ्करदिग्विजयः.

SAṄKṢEPAŚAṄKARADIGVIJAYAḤ.

By Vidyāraṇya. Same work as that described under No. 12174 of the D.C.S. MSS., Vol. XXI.

Breaks off in the tenth Sarga.

R. No. 2085.

Palm-leaf. 17 × 1½ inches. Foll 144. Lines, 9 in a page. Grantha. Slightly injured

Purchased in 1916–17 from M.R.Ry. Trivēdi Kṛṣṇasvāmi Śrautigal̤ of Mul̤l̤aṇḍram, North Arcot district.

सिद्धान्तसारावली, सव्याख्या.

SIDDHĀNTASĀRĀVALĪ WITH COMMENTARY.

Same work as that described under No. 5554 of the D.C.S. MSS., Vol. XI, wherein see for the beginning. The text is by Trilōcanaśivācārya and the commentary by Anantaśivācārya.

Contains the Jñānapāda, the Kriyāpāda and the Caryāpāda.

Complete.

End:

ब्रह्माव्यक्तगतश्च मोहकगतो रुद्रेश्वर ऐशगे
. . . . पिच सदेशान्तस्सदेशात्मकः ।
दुर्गार्को शैवतत्त्वे वृषभपरमथो शक्तिके वागधीशः
स्वाहानाथस्स देशो गणपतिकमले चेश्वरे वाक् तथैव(?) ॥
विद्येशाश्शुद्धविद्या भुवनगणवरास्तत्र च द्वारपाला
धर्माद्या मन्त्ररुद्राश्शिवमतसहिताः कौहरे मूर्तयश्च(?) ।
लोकेशास्सूरयक्ष किन्नरमुनिक्षेत्रेशवेतालका
भूतास्सप्त सरित्समुद्रगणपा विद्याधराश्चापरे(?) ।
श्रीमच्छैवमतार्थसारनिचिता सिद्धान्तसारावली
शैवज्ञानधिया त्रिलोचनशिवाचार्येण क्लृप्ता शुभम् ॥

R. No. 2086.

Palm-leaf. 15 × 1 inches. Foll 25. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1916–17 from M.R.Ry. Trivēdi Kṛṣṇasvāmi Śrautigal̤ of Mul̤l̤aṇḍram, North Arcot district.

(*a*) अभिधानचिन्तामणिः.

ABHIDHĀNACINTĀMAṆIḤ.

Foll. 1*a*—17*b*.

A dictionary of synonymous names in Sanskrit. The author is Hēmacandra.

Contains the Kāṇḍas one and two.

Beginning:

प्रणिपत्यार्हतस्सिद्धसाङ्गशब्दानुशासनम् ।
रूढयौगिकमिश्राणां नाम्नां मालां तनोम्यहम् ॥
व्युत्पत्तिरहिताः शब्दा रूढा आखण्डलादयः ।
योगोऽन्वयस्सत्त्वगुणक्रियासम्बन्धसंभवः ॥
गुणतो नीलकण्ठाद्याः क्रियातः स्रष्टसंभवाः ।
स्वस्वामित्वादिसम्बन्धस्तत्राहुर्नाम तद्वताम् ॥
सत्पालधनभुग्नेत्रपतिमत्वर्थकादयः ।
भूपालो भूधनो भूभुत् भूनेता भूपतिस्तथा ॥

* * * *

Colophon:

इत्याचार्यहेमचन्द्रविरचितायामभिधानचिन्तामणौ नाममालायां देवाधिदेवकाण्डः प्रथमः ॥

स्वर्गस्त्रिविष्टपं द्योदिवौ भुवि स्वविषताविषौ नाकः ।
गौस्त्रिदिवमूर्ध्वलोकस्सुरालयस्तत्सदस्त्वमराः ॥

End:

देवी कृताभिषेकान्या भट्टिनी गणिकाज्जुका ।
नीचा चेटी सखीहूतौ हण्डे हञ्जे हला क्रमात् ॥
अब्रह्मण्यमवद्योक्तौ ज्यायसी तु स्वसान्तिका ।
मर्तार्यपुत्रो माताम्बा भदन्तास्सौगतादयः ॥
पूज्योऽत्रभवानत्रभवांश्च भगवानपि ।
पादा भट्टारको देवप्रयोज्याः पूज्यनामतः ॥

Colophon:

इत्याचार्यहेमचन्द्रविरचितायां नाममालायां द्वितीयः काण्डः ॥

(*b*) एकाक्षरकोशः.

ĒKĀKṢARAKŌŚAḤ.

Foll. 18*a*—20*b*.

Taken from the Visvaprakāśa of Mahēśvara.

Gives in verse what meaning each of the letters of the alphabet denote.

Incomplete

Beginning:

अकारो ब्रह्मविष्णवीशकमठेष्वङ्कणे रणे ।
गौरवेऽन्तःपुरे हेतौ भूषणे प्रमुखेज्ययोः ॥
आकारस्तु पदे भावे परितापे पितामहे ।
इकारः फणिरत्नार्चिष्वग्रतोर्थे गुहार्थियाः ॥

End:

ञुः कीर्त्यां सङ्गरे जीर्णे जीवे व्यामपिशाचयोः ।
जोऽस्त्री वाण्यां झशब्दस्तु पुमान् धातरि हंसके ॥
ईश्वरः

Foll. 21*a*—23*b* contain the Subrahmaṇyanāmāvali, and some portion of Nānārthamālā, and 24 and 25 are left blank.

R. No. 2087.

Palm-leaf. 15, 13⅛ × 1¼ inches. Foll. 61. Lines, 7 in a page. Grantha Slightly injured.

Purchased in 1916-17 from M.R.Ry. Trivēdi Kṛṣṇasvāmi Śrautigaḷ of Muḷḷaṇḍram, North Arcot district.

(*a*) **रत्नावली.**

RATNĀVALĪ.

Foll. 1*a*—35*a*. Fol. 35*b* is left blank.

By Śriharṣa. Same work as that described under No. 12629 of the D.C.S. MSS., Vol. XXI.

Complete.

The scribe adds—

मया रत्नावली नाम नाटिका लिखिता समे ।
नन्दनाख्ये माघमासि सम्यग्रामार्यसूनुना ॥

(*b*) **वल्लीपरिणयः.**

VALLĪPARIṆAYAḤ.

Foll. 36*a*—61*b*.

By Bhāskarayajvan. Same work as that described under No. 12773 of the D.C.S. MSS., Vol. XXI.

Breaks off in the fifth Aṅka.

R. No. 2088.

Palm-leaf. 14⅜ × 1⅝ inches. Foll. 65. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1916–17 from M.R.Ry. Trivēdi Kṛṣṇasvāmi Śrautigaḷ of Mullaṇḍram, North Arcot district.

कृष्णविलासः.

KṚṢṆAVILĀSAḤ.

A poem in 14 Sargas describing the leading incidents in the life of Śrī-Kṛṣṇa: by Gurusvayambhūrāma, son of Svayambhūguru and the daughter's son of Rājanātha.

Complete.

Name of the copyist: Śaṅkara of Perumāḷkoil, i.e., Conjeeveram. Date of transcription: 10th day of the month of Tai in the year **Āṅgirasa**

Beginning:

वन्दे हरिं . . योगाद्रिषु वृन्दावनमेव धन्यम् ।
नारीषु राधा यमुना नदीषु द्रुमेषु वंशो भुवि नन्दघोष ॥
यस्मै स्व . . . मानहव्यादाभीरगव्यानि हठाहृतानि ।
मुदे मुनीन्द्रस्तवतोऽपि यस्य मुग्धानि गोपीपरिभाषणानि ॥

* * * *

बोधो मुरारेरपि भारवेश्च यस्यां न . . . भोजसदस्यभिख्याम् ।
चकार या बाणविलासचारुरसा शारदोल्लासकला चकास्ति ॥
वाण्या मुखालङ्करणं सुरेखा वाल्मीकिवागेव ललाटिकाभूत् ।
तदन्तरे दीव्यति कालिदासवचस्सुवृत्तं तिलकानुवृत्त्या ॥
साहित्यरत्नाकरसंगृहीतमोजःप्रसादोत्तरमुक्तिबन्धम् ।
नालं पुरोभागितया विहन्तुं खलास्समीरा इव रत्नदीपम् ॥
असत्कवेरुक्तिरसौम्यवृत्तिरर्थो विभिन्नस्थितिरप्रसादात् ।
दुरन्वयं तद्द्वयमेकशय्यावियोगमेवानुभवत्यसह्यम् ॥

* * * *

अस्ति प्रशस्ता नगरी पुरीषु पुण्यासु मस्वपि पूर्वगण्या ।
निःश्रेयसद्वारनिदानभावात् निर्धारितद्वारवतीप्रतीतिः ॥
पातालनस्सिन्धुपथेन नियन् वाताशनेन्द्रो वलयीकृताङ्गः ।
आसेवते यत्र हरिं विशालसालच्छलाच्छ्रुङ्गफणावलीभिः ॥

* * * *

Colophon :

इति गुरुस्वयंभूरामकृतौ कृष्णविलासनाम्नि महाकाव्ये प्रथमस्सर्गः ॥

अस्ति प्रतीता मधुरेत्यवन्यां भोगापवर्गोद्भवभूमिरेका ।
वैकुण्ठलीलां वसुदेवसूनोर्विस्मारयित्री विभवानुभावैः ॥

* * * *

कंसो नृशंसोऽभिजने तदीये स्वैरं मदोत्सेकसुदुस्सहोऽभूत ।
अव्याजमाप्लावितजीवलोके दम्भोलि . . . . ॥

* * * *

तस्मादनार्यादनु तत्र वंशे हालाहलादम्बुनिधौ सुधेव ।
पुण्यासु रामासु पुरा प्रशस्या कन्याभवत काचन देवकीति ॥

End :

इत्थं प्रसादाभिमुखस्तवेन याथार्थ्यहृद्येन यदुप्रवीरः ।
अथानयोरस्तु तवास्तु सिद्धं गीतेऽपि काव्ये कृतलक्षणत्वम् ॥

माधुर्योपनिबद्धलक्षणतया गीतं मनोरञ्जनं
सन्दर्भोऽपि गिरां प्रगल्भमधुरश्शब्दार्थसौहार्दभूः ।
अप्यन्यत् कथयामि वामनु(स)रत्सङ्गीतसाहित्य(तः)
प्रत्यावृत्तमिव प्रमोदयति मां तद्बालविक्रीडितम् ॥

इति बहुमतिपूर्वं तौ महर्षिं यशोदा-
पतिमपि गमनाय प्रत्यनुज्ञाय मायी ।
सह युवतिसहस्रैः प्राप्य साम्राज्यलक्ष्मीं
चिरमरमत देवः श्रीपतिर्द्वारकायाम् ॥

Colophon :

इति श्रीगुरुस्वयम्भूनाथरामकृतौ कृष्णविलासनाम्नि महाकाव्ये चतुर्दशस्सर्गः ॥

पुण्यश्लोकतमस्य तत्र भवतः पुत्रः स्वयंभूगुरोः
दौहित्रः कवितानिरूढयशसः श्रीराजनाथस्य च ।
रामः कृष्णविलासनाम कृतवान् काव्यं तदर्हन्त्वमी
सन्तश्शोधयितुं समग्रितगुणग्राहा दुरूहादृते ॥

R. No. 2089.

Palm-leaf. 16½ × 1⅝ inches. Foll 150. Lines, 8 in a page. Grantha. Good.

Purchased in 1916-17 from M.R.Ry. Trivēdi Kṛṣṇasvāmi Śrautigaḷ of Muḷḷanḍram, North Arcot district.

(a) उत्तररामचरितम्.

UTTARARĀMACARITAM.

Foll. 1a—43b.

By Bhavabhūti. Same work as that described under No. 12500 of the D.C.S. MSS., Vol. XXI.

Complete.

The scribe adds—

अलिखद्वेङ्कटार्यस्य सूनुर्नन्दनवत्सरे ।
उत्तरं रामचरितं सायाह्ने खगवासरे ॥

(b) अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Foll. 44a—88b.

By Kālidāsa. Same work as that described under No. 12465 of the D.C.S. MSS., Vol. XXI.

Complete.

The scribe adds—

विजयाब्दे मिथुने मासि मध्याह्ने भृगुवासरे ।
आलिखद्वेङ्कटार्यस्य सूनुश्शाकुन्तलं कृतिम ॥

(c) सुभद्राधनञ्जयम्.

SUBHADRĀDHANAÑJAYAM.

Foll. 89a—115b.

By Gururāmakavi. Same work as that described under No. 12723 of the D.C.S. MSS., Vol. XXI.

Complete.

The scribe adds—

अब्दे नन्दननामके दिनकरे मध्यं गते वासरे
मन्दाख्ये खलु पुष्यमासि सितके पक्षे च तस्मिन्दिने ।
आलिख्यन्वेङ्कटार्यस्य तनुभुवा लग्ने वृषे तारके
पुष्ये पार्थसुभद्रपूर्वकमिदं कृष्णस्य मिश्रं शुभम् ॥

(*d*) रत्नेश्वरप्रसादनम्.

RATNEŚVARAPRASĀDANAM.

Foll. 116*a*—150*b*.

By Gururāmakavi. Same work as that described under No. 12632 of the D.C.S. MSS., Vol. XXI, with the addition of one stanza at the end as given below:—

कवीन्द्रास्सन्दर्भक्रमकृतमुखास्सन्ति बहवः
तदुल्लेखश्लाघाप्रकटितविवेका हि विरलाः ।
प्रगल्भन्ते पद्माः प्रतिसरसि सौरभ्यजनने
परं भास्वानेकः प्रतिभवति तद्भासनकृते ॥

Complete.

The scribe adds—

अलिखत्(लेखि) श्रीनिवासेन सायाह्ने विजयवत्सरे ।
अष्टम्यां रत्ननाथस्य प्रसादं नाम नाटकम् ॥

R. No. 2090.

Palm-leaf. 15⅞ × 1¼ inches. Foll. 174. Lines, 7 in a page. Grantha. Slightly injured. Fair.

Purchased in 1916-17 from M.R.Ry. Trevēdi Krsnasvāmi Śrautigal of Mullandram, North Arcot district.

(*a*) महावीरचरितम्.

MAHĀVĪRACARITAM.

Foll. 1*a*—57*a*. Fol. 57*b* is left blank.

Same work as that described under No. 12583 of the D.C.S. MSS., Vol. XXI, wherein see for the beginning.

From a passage added at the end it is known that Bhavabhūti wrote this drama up to the stanza beginning दौरात्म्यात् in the 5th Act and that the remainder was added on by one Subrahmaṇyakavi. This portion of the remainder has been printed in the body of the work of the Nirṇaya Sāgara Press edition and is said to have been commented upon by Vīrarāghava.

Complete.

End:

ततः प्रविशति सम्पातिर्नाम वानरः ।

वा—अङ्गदेन वानरराजसूनुना प्रेषितोऽस्मि संपाते वालिनः प्लवङ्गमाधीशस्य वृत्तान्तो न विज्ञायते, तदन्वेषणाय दिशि दिशि प्रस्थिताः । त्वं च ऋश्यमूकसमीपं विचारयेति । तत्र हि सुग्रीवविभीषणाभ्यां सह कृतसख्यो राम-

स्तिष्ठति । तत्रैवायं वृत्तान्तो विदितस्स्यात् । अग्रतोऽवलोक्य, अयं हनुमानित-एवाभिवर्तते, यावदेनं पृच्छामि ॥

* * * *

Colophon :

षष्ठोऽङ्कः ।

ततः प्रविशत्याकाशयानेन प्रहृष्ट इन्द्रो दशरथश्च ।

इन्द्रः—महाराज चिरात् परिपूर्णोऽयमस्माकं मनोरथः ।

अयं किल तवात्मजो महात्मा रामभद्रः,

हत्वा हन्त दशाननं सतनयं सभ्रातरं सान्वयं
हित्वा स्त्रैणमहो निहत्य तरसा सर्वं च सेनागणम् ।
दत्वा तत्र विभीषणाय नमते लङ्काधिराज्यश्रियं
तत्त्वाख्यायिनि जातवेदसि ततस्सीतां प्रियामादित ॥

* * * *

निष्क्रान्ता महेश्वरादयः। रामादयस्सर्वे यथोचितमुपविशान्ति ।

विश्वा—किन्ते भूयः प्रियमुपहरामि ।

रा—किमतः परं प्रियमस्ति।

हन्तव्या जगदातङ्कहेतवो राक्षसा हताः ।
प्रजापालनदीक्षा च प्रविष्टा शाश्वती मया ॥

(तथापदिमस्तु भरतवाक्यम्)

साहित्योदधिसंभृतो विजयते संभूय सारस्वत-
स्सारो यत्र समन्ततस्सहृदयैस्संभावनीयोदयः ।
सम्यक् भावितसंविधानतरलस्सोऽयं सुधासुन्दर-
स्सन्दर्भो विदुषाममन्दहृदयानन्दाय सञ्जायताम् ॥

किञ्च—अस्मिन्नाटके वालिप्रकरणे दौरात्म्यादरिभिरिति श्लोकपर्यन्तेन सन्दर्भेण भवभूतिना त्रिभागपरिमिता कथा विरचिता । ततः अवश्यं च श्रेयस्विना भावितव्यमिति वाक्यादारभ्य भरतवाक्यपर्यन्तेन ग्रन्थसन्दर्भेण सुब्रह्मण्यकविना कृत्स्नोऽपि कथाशेषः पूरितः ॥

इति निष्क्रान्तास्सर्वे ॥

Colophon :

सप्तमोऽङ्कः ॥ समाप्तमिदं महावीरचरितं नाम नाटकम् ॥

(*b*) कर्पूरमञ्जरी.

KARPŪRAMAÑJARĪ.

Foll. 58*a*—92*b*.

A drama in Prākṛt by Rājaśēkhara, a commentary whereon has been described under No. 12510 of the D.C.S. MSS., Vol. XXI.

Complete.

Beginning:

भद्दं होदु सरस्सईअ कइणो णंदंतु वासाइणो
अण्णाणं वि परं पअट्टदु परा वाणी छउल्लप्पआ ।
वच्छामी तह मागही पुरदु णो सा किं च पंचालिआ
रीईओ विलिहंदु कव्वकुसला जोह्नं चओरा विअ ॥
(छा) भद्रं भवतु सरस्वत्या कवयो नन्दन्तु व्यासादयः
अन्येषामपि परं प्रवर्ततां परा वाणी विदग्धप्रिया ।
वैदर्भी तथा मागधी स्फुरतु नस्सा किंच पाञ्चालिका
रीतीर्विलिहन्तु काव्यकुशला ज्योत्स्नां चकोरा इव ॥

* * * *

नान्द्यन्ते सूत्रधारः—

सू—ससिहण्डमण्डणाणं सं मुहासणाणं सुरअणपिआणम् ।
गिरिस गिरिन्द-सुआणं संघाटी वो सुहं देदु ॥

* * * *

(नेपथ्ये प्रविश्य पारिपार्श्वकः)
आणवेदु भावो, आज्ञापयतु भावः ।
सू—किं उण णट्टप्पअट्टा विअ दिसह । किंपुनर्नाट्यप्रवृत्ता इव दृश्यथ ।
पारि—सट्टअं णिट्टिदव्वम् (छा)सट्टकं नर्तितव्यम् ।
सू—को उण तस्स कई - (छा)कः पुनस्तस्य कविः ।
पारि—भाव कहिज्जइ एअं किं भणइ रअणिवल्लहसिहण्डो ।
रहुउळचूडामणिणो महिन्दवालस्स को णु गुरु ।
(छा) भाव कथ्यत एतत् किं भण्यते रजनिवल्लभशिखण्डः
रघुकुलचूडामणेर्महेन्द्रपालस्य को नु गुरुः ।
सू—आ अए पण्णुत्तरं एदं । (छा) अये प्रश्नोत्तरमेतत् ।
(प्रकाशम्) अवि राअसेहरो, अपि राजशेखरः ।
पा—सो एतस्स कई, स एतस्य कविः ।

* * * *

वाहुआण कुलमौलिमालिआ राअसेहरकलइगेहिणी ।
भत्तुणो किदिमवन्दिसुन्दरी सा पओजइदुमेअमिच्छई ॥

(छा)बाहुजानां कुलमौलिमालिका राजशेखरकवीन्द्रगेहिनी ।
भर्तुः कृतिमवन्तिसुन्दरी सा प्रयोजयितुमेतामिच्छति ॥

किञ्च—

चण्डपालधरणी हरिणङ्को चक्कवट्टिपदलाहाणिमित्तम् ।
एद्ध सट्टअवरे रससोंते कुन्तलाहिवसुअं परिणेइ ॥

(छा) चण्डपालधरणी हरिणाङ्कश्चक्रवर्तिपदलाभानिमित्तम् ।
अत्र सट्टकवरे रसस्रोतसि कुन्तलाधिपसुतां परिणयति ॥

* * * *

Colophon:

प्रथमं यवनिकान्तरम् ॥

End:

देवीं शेपकषायमाणवसतिं नो भवति सा वर्त्मनि
लब्धा पूर्णशशाङ्कमण्डलमुखी शृङ्गारसञ्जीविनी ।
सञ्जाता अपि चक्रवर्तिपदवी किमन्यदभ्यर्थनं
सर्वं युष्मदनुग्रहेण भरितं यन्मानुषे लभ्यते ॥

(तथाप्येतदस्तु भरतवाक्यम्).

अणुपमगुणं कईणं परिमलमहिअं मुहेसु विइरन्ति ।
कप्पूरमञ्जरीयं तिहुवणतिलअं पुणो जअइ ॥

अनुपमगुणं कवीनां परिमलमाधिकं मुखे विकिरन्ति ।
कर्पूरमञ्जरीयं त्रिभुवनतिलकं पुनर्जयतु ।

अणुदिअहवड्ढरन्तो मणिसिजणसअलगुणविणासअरो ।
रित्तत्तणदावग्गो विरमउ कमलाकडक्कववरिसेण ॥

अनुदिवसविजृम्भमाणो मनीषिजनसकलगुणविनाशकरः ।
रिक्तत्वदावाग्निर्विरमतु कमलाकटाक्षवर्षेण ॥

Colophon:

इति तुरीयं यवनिकान्तरम् ॥

समाप्तमिदं सट्टयं नाम नाटकम् ॥

(*c*) **प्रबोधचन्द्रोदयम्.**

PRABŌDHACANDRŌDAYAM.

Foll. 93*a*—137*b*.

Fol. 138 contains certain stanzas of the Uttararāmacarita.

By Kṛṣṇamiśra. Same work as that described under No. 12549 of the D.C.S. MSS., Vol. XXI.

Complete.

(*d*) वीरभद्रविजयः.

VĪRABHADRAVIJAYAḤ.

Foll. 139*a*—173*b*. Fol. 174 is left blank.

This work is written in a peculiar kind of dramatic composition called Ḍima (the characteristics of which are described in a stanza in the introduction). The plot of this drama is the creation of Vīrabhadra by Śiva and the destruction of Dakṣa and his sacrifice. It is said to have been enacted on the occasion of the festival of God Rājanāthasvāmin in Bhūpatirāyapura. The author is Kumāraḍiṇḍima alias Aruṇagirinātha, son of Durgādēvī and Rājanātha and grandson of Diṇḍima Aruṇagirinātha of Gautamagōtra. The author is a native of Parēndrāgrahāra. His ancestors are said to have been patronised by the kings of Cēra, Cōla and Pāṇḍya and to have migrated from the Gauḍadēśa which is on the banks of the Ganges.

Complete.

Beginning:

यस्योन्मेषे निमीलात्यखिलमपि जगद्यन्निमेषेऽखिलाना-
मुन्मेषो विष्टपानामुपनमति यदग्नेरनङ्गः पतङ्गः ।
आसुर्यश्चापि पुर्यस्त्रिभुवनकुशलायाहुतिर्यत्र भूता
रौद्रं तद्रुद्रनेत्रं रचयतु निटिलज्योतिभद्रोदयं वः ॥

नान्द्यन्ते सूत्रधारः—पुरोऽवलोक्य, अये समागतमत्र किल भुवनत्रयभरणकेलिकारस्य भूपतिरायपुरालङ्कारस्याभिरामनायिकासनाथस्य राजनाथस्य भगवतो भवानीपतेः यात्रोत्सवे सकलकल्पकलापकनकनिकषदृषदा मनीषिपरिषदा ।

* * * *

तत् डिण्डिम(डिम)प्रबन्धो नाटयितव्य इति परिषदादेशः ।

तथाहि—

सन्ध्यङ्गाश्चतुरो विमर्शविगमं सङ्ग्राममायादिकं
वस्तु ख्यातमुशन्ति यत्र निखिला वृत्तिं विना कैशिकीम् ।
स्थायी रौद्ररसः षडेव हि रसाः शृङ्गारहास्यौ विना
दिव्याः षोडश नायकाः फलभुजो दीव्यन्ति यत्रोद्धताः ॥ इति

* * * *

सू—गौडीयप्रसङ्गेन गौडभूसुरोत्तंसं कुमारडिण्डिमकविं प्रबन्धारमनुस्मारितोऽस्मि ।

नटी—जो सब्भासासव्वहोमोत्ति सुव्वइतारामस्स परपवकइणो वंसाणुक्कमो सोदव्वो ।

सू—शृणु तावत् । सन्ति खलु सन्ततशिवलिङ्गाराधनव्रतिनो गङ्गातटालङ्कारगौडदेशचूडापीडवरेण्यमहारनायकमणयः, शैवागमजीवातवश्चोरचोलपाण्ड्यशिष्यकुलसत्कृतमहिमानस्सामवेदसीमानः श्रौताचारपूतात्मानः पवित्रतरगौतमगोत्रजन्मानो द्विजन्मानः ।

नटी—तदो २.

सू—तदन्ववायार्णवपूर्णचन्द्रस्य नागणकविनागकेसरिणः सरसकवितासाम्राज्यानुभोगसार्वभौमस्य कविप्रभोः नृत्तराजस्य पौत्रः परममाहेश्वरस्य पवित्रतरचारित्रस्य शिवतत्त्वज्ञानशीलस्य श्रीमतो राजनाथस्य पुरातनपुण्यपरिणामस्समभूदभूतपूर्वचतुर्विधकवितास्वर्लोकसरित्कल्लोलमाली . . . रीप्रचण्डतरकाहलघण्टाडिण्डिमविरचितविरुदघोषणो डिण्डिमकविसार्वभौमापरनामा श्रीमानरुणगिरिनाथो नाम ।

नटी—जो विरुदकविप्पविद्दामहोत्ति भणिज्जइ । तदो २.

सू—ततोऽजनि बुधोत्तमात्तदुपमानवाग्वैखरी-
यशोभिरुपशोभितो यमकचित्रवृत्त्या कविः ।
प्रचण्डजयडिण्डिमः प्रतिदिनप्रबन्धक्रिया-
चमत्कृतसमग्रधीः स खलु राजनाथः कृती ॥

नटी—जं दशरूवअग्गणावरनामाअणं भणन्ति । तदो २.

सू—तस्य खलु दुर्गादेवीसहचरस्य चतुर्विधकविताचातुर्यस्य सूनुना कुमारडिण्डिमकविना अरुणगिरिनाथेन प्रणीतो वीरभद्रविजयाभिधानो डिमप्रबन्धोऽस्माकं हस्ते समर्पितोऽभिनीतपूर्वश्च ।

नटी—(सहर्षम्) ता अह्माणं फलीअं मणोरहेण ।

सू—फलितमिति किमुच्यते ।

चण्डीशस्य चरित्रमेव विषयस्तं डिण्डिमोऽयं कविः
कर्ता तस्य कुमारडिण्डिमकविर्गोष्ठी गुणग्राहिणी ।

अस्माकं च चतुर्विधेष्वभिनयेष्वस्त्येव शिक्षाधिकं
सामग्री गुणसम्पदामियमहो दैवेन सम्पादिता ॥

* * * *

(नेपथ्ये) साधु भरतपुत्र साधु, यत्त्वया तत्रभवतो वीरभद्रदेवस्य दक्षाध्वरध्वंसनायोपक्रममाणस्य विक्रमोचितमभिहितम् ।

End:

तथास्तीदमस्तु भरतवाक्यम्—

शम्भोरङ्घ्रिसरोजभक्तिरनिशं . . . .
सन्तस्सन्तु परोपकारनिरतास्साहित्यजीवातवः ।
वाग्देवी रमया सहास्तु समये वर्षन्त्वपो वायवो
राजानश्च (यथो)क्तधर्मनिरता रक्षन्तु पृथ्वीमिमाम् ॥

इति निष्क्रान्तास्सर्वे ॥

Colophon:

चतुर्थोऽङ्कः ॥

बिरुदकविपितामहस्य बिरुदाडिण्डिमव्याजसन्ताडितविमतकविगण्डमण्डलस्य डिण्डिमकविसार्वभौमस्य श्रीमतोऽरुणगिरिनाथस्य पौत्रेण विचित्रतरचित्रयमककाव्यधूर्वहस्याप्रतिरूपबहुरूपकसृष्टिकौशलपरमेष्ठिनः परममाहेश्वरस्य कविताचातुर्यधुर्यस्य राजनाथाचार्यस्य पुत्रेण पवित्रतरगौतमगोत्रेण गङ्गातटालङ्कारगौडदेशरत्नापीडवैरन्ध्यग्रहारमौलिमणिना दुर्गादेवीस्तनन्धयेन . . . दोर्हन षड्भाषासार्वभौमेन कुमारडिण्डिमकविनारुणगिरिनाथेन प्रणीतो वीरभद्रविजयो नाम डिमप्रबन्धस्समाप्तोऽयम् ॥

Fol. 173*b* states that a copy of the deed of gift presented to Kumāraḍiṇḍima Aruṇagirinātha is found engraved in the 4th enclosure wall of God Ēkāmrēśvarar temple.

R. No. **2091**.

Palm-leaf $16\frac{7}{8} \times 1\frac{1}{8}$ inches. Foll. 93. Lines, 6 in a page. Grantha. **Slightly injured.**

Purchased in 1916-17 from M.R.Ry. Trivēdi Kṛṣṇasvāmi Śrautigaḷ of Muḷḷanḍram, North Arcot district.

वसुमङ्गलनाटकम्, सव्याख्यानम्.

VASUMAṄGALANĀṬAKAM WITH COMMENTARY.

By Pērusūri. Same work as that described under No. 12659 of the D.C.S. MSS., Vol. XXI.

Complete.

The scribe adds—

रक्ताक्ष्यब्द उदीचीं भानौ प्राप्ते झषं च सितपक्षे ।
द्वादश्यां वसुमङ्गलमलिखद्विश्वेश्वरश्शशिजवारे ॥

R. No. **2092**.

Paper. $8\frac{5}{8}$ × 7 inches. Foll. 59. Lines, 25 in a page. Telugu. Good.

Purchased in 1916–17 from M.R.Ry. Kutumbayya Śāstri of Mylapore.

वीरशैवापरप्रयोगः.

VĪRAŚAIVĀPARAPRAYŌGAḤ.

Foll. 3*a*—52*b*.

Fol. 1*a* contains particulars regarding the person who proposed to publish the work. Foll. 1*b* and 2*b* are left blank. Fol. 2*a* contains the name of the work. Foll. 53 to 55 contain particulars of persons who helped in the publication of the work. Foll. 56 to 58 are left blank. Fol. 59*b* contains a price list of certain works available with the publisher.

Deals with the details of ceremonies to be performed in relation to a person who professes the Vīraśaiva religion when he is on his death-bed and after his death.

Date of copying: Monday, the 3rd of the bright fortnight of the Māgha month in the year Virōdhikṛt.

Complete.

Beginning:

श्रीनन्दिभृङ्गीरिटवीरकवीरभद्रचण्डीश्वरप्रमथमुख्य.

अथ षडङ्गशुद्धियुक्तस्य यस्य कस्य चिद्वीरशैवदीक्षितस्य लिङ्गाङ्गिनो ब्राह्मणस्य देहावसानकालपरिप्राप्तौ कर्ता भूतिफलं परिगृह्य, तत्रोमास्वरूपयाज्ञिकैराहूय नमस्कृत्य तैस्सह गृहं प्रविश्य, नद्यां तटाककूपप्रदेशे वा स्नात्वा

* * * *

नवविधानां पापानामपनोदनार्थं सुखेन प्राणोत्क्रमणसिद्धिद्वारा लिङ्गैक्यानुसिद्ध्यर्थमेकपाप(व)नीयमुक्त(ख्य)प्रायश्चित्तस्याशक्यत्वात् सर्वनिवर्तकमेकमखण्डं सर्व-

प्रायश्चित्तं करिष्ये । अथ विधायकस्य दक्षिणाताम्बूलपूर्वकं वरणं दत्वा दक्षिण-हस्तेन यथाशक्ति दक्षिणां गृहीत्वा,

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि प्रणश्यन्ति प्रदक्षिणपदेपदे ॥

इति प्रदक्षिणीकृत्य माहेश्वरविज्ञापनं कुर्यात् ।

End:

हिरण्यरूपस्सहिरण्यसंदृगपां नपात्सेदु हिरण्यवर्णः । हिरण्ययात् परियो-नेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥

* * * *

अयं मूर्धा परमेष्ठी सुवर्चास्समानानामुत्तमश्लोको अस्तु । शतमानं भवति शतायुः पुरुषश्शतेन्द्रिय आयुष्येवेन्द्रिये प्रतितिष्ठति ॥

R. No. **2093.**

Palm-leaf. 16 × 1⅛ inches. Foll. 18. Lines, 8 in a page. Grantha Good.

Purchased in 1916–17 from M.R.Ry. E. R. Śrīnivāsarāghavācāryar of Kalyāṇapuram, Tanjore district.

(*a*) नवार्णपद्धतिः.

NAVĀRṆAPADDHATIḤ.

Foll. 1*a*—9*b*.

Same work as that described under R. No. 1692 ante.

Contains the Paṭalas 20 to 24 complete and the 25th incomplete.

(*b*) कात्यायनीतन्त्रम्.

KĀTYĀYANĪTANTRAM.

Foll. 9*b*—13*b*.

Same work as that described under No. 5573 of the D.C.S. MSS., Vol. XII.

Contains the Paṭalas 20 to 23.

(*c*) सप्तशतीमन्त्रविभागः.

SAPTAŚATĪMANTRAVIBHAGAḤ.

Foll. 13*b*—18*a*. Fol. 18*b* is left blank.

Slightly different from the work described under No. 8131 of the D.C.S. MSS., Vol. XV. In the first stanza the author is said to be Ananta, son of Vipulārya and an inhabitant of Paṭṭagrāma.

Contains the Kātyāyanīmata complete, and the Jñānārṇavamata incomplete.

Beginning:

पट्टग्रामनिवासी च विपुलार्यसुतस्सुधीः ।
अनन्तस्तनुते सप्तशतीमन्त्रविभाजनम् ॥
अष्टसप्तत्युत्तराणां श्लोकानां शतपञ्चकम् ।
प्रोक्तं सप्तशतीस्तोत्रे तत्सप्तशतसङ्ख्यया ॥
विभज्य जुहुयान्मन्त्रैरिति कात्यायनीमतम् ।
ज्ञानार्णवमतं चैकमग्रे वक्ष्यामि वै स्फुटम् ॥

End:

इति मन्त्रविभागोऽयं देवीमाहात्म्यगोचरः ।
कात्यायनीतन्त्ररीत्या मया सोऽयं स्फुटीकृतः ॥
पट्टग्रामनिवासी च (यः) काश्यपोऽनन्तशर्मणा ।
तेनायं विभजेन्मन्त्रः ज्ञेयस्सप्तशतावधि ॥

Colophon:

इति कात्यायनीतन्त्रे त्रयोदशध्यानानां मन्त्रविभागः ॥
ज्ञानार्णवमतेनैव विभागो मन्त्र उच्यते ।
प्रथमाध्यायमारभ्य त्रयोदशान्ततः क्रमात् ॥

* * * *

नवार्णमष्टोत्तरशतं जप्त्वा सम्मार्ज्य ललाटे लापयेत् । अन्ते त्रयोदशपात्रस्थानि जलानि प्रक्षाल्य पिबेत् । दिवैव कृत्वा गृहं गच्छेत् । कवित्वादिवाक्सिद्धिरिति पञ्चमः ।

R. No. 2094.

Palm-leaf. 16 × 1⅝ inches. Foll. 11. Lines, 9 in a page. Grantha. Good.

Purchased in 1916–17 from M.R.Ry. E. R. Śrinivāsarāghavācāryar of Kalyāṇapuram, Tanjore district.

रामायणोपाख्यानम्.

RĀMĀYAṆŌPĀKHYĀNAM.

Foll. 1*a*—6*a*. Foll. 7—11 are left blank.

Taken from the Brahmarahasyakhaṇḍa of the Padmapurāṇa.

Purports to narrate the leading incidents in the life of Rāma There is difference in details between the story as related herein and that given in Vālmīki's Rāmāyaṇa. The portion contained in the MS. deals with the worship of Śivaliṅga by Rāma at the instance of the sage Agastya who commends such worship as being conducive to the conquest of Rāvaṇa.

Contains the Adhyāyas 125 and 126.

Beginning:

प्रकटनिस्सृतदानजलाशयं निकटसंचरनीलमधुव्रतम् ।
शकटपाणिमुखामरवन्दितं विकटचक्रगणाधिपमाश्रये ॥
सेतुमारभमाणस्य रामस्याक्लिष्टकर्मणः ।
द्रष्टुं समागतास्सर्वे कुम्भजाद्या महर्षयः ॥
दक्षिणाम्बुनिधेस्तीरे निषण्णं रघुनन्दनम् ।
स्वनेत्राञ्जलिभिस्सर्वे पीत्वा तन्मुखसारसम् ॥
आनन्दाश्रुपरिक्लिन्ना निषण्णास्तेन पूजिताः ।
दृष्ट्वा रामं रमानाथमगस्त्यो भगवानृषिः ॥
सर्वलोकहितार्थाय रामं वचनमब्रवीत् ।
राम राम महाबाहो रावणः प्राकृतैर्जनैः ॥
शिवभक्ताग्रणीस्सोऽयमवध्यो देवदानवैः ।
तं जेतुमसुरं सङ्ख्ये शरणं याहि शङ्करम् ॥

* * *

तत्र रामेश्वरं लिङ्गं सैकतं नलनिर्मितम् ।
लक्ष्यलक्षणसंयुक्तं लिङ्गं लोकमनोहरम् ॥
मनउन्मनसंयुक्तं भागत्रयसमन्वितम् ।
लिङ्गं नलकृतं तत्र दृष्ट्वा रामोऽतिहृष्टधीः ॥
स्नात्वा तु मानसे तीर्थे भूतिरुद्राक्षभूषितः ।
कृत्वा सन्ध्यादिकं रामो सकलीकृतविग्रहः ॥
महापुण्यप्रदे रम्ये पर्वते गन्धमादने ।
मार्गमासेऽसिते पक्षे दशम्यां भृगुहस्तयोः ॥

गरानन्दे व्यतीपाते सुमुहूर्ते सुलग्नके ।
सर्वलोकहितार्थाय रामो राजीवलोचनः ॥
सेतुमूले महादेवं रामो रामेश्वरं शिवम् ।
संस्थाप्य पूजयामास शङ्करं लोकशङ्करम् ॥

* * * *

Colophon:

इति श्रीपाद्मे पुराणे ब्रह्मरहस्यखण्डे रामायणोपाख्याने रामेणार्चित- रामेश्वराविर्भावं नाम पञ्चविंशोत्तरशततमोऽध्यायः ॥

End:

इत्युक्त्वान्तर्दधे शम्भुर्भवान्या सह दैवतैः ।
रामेण पूजिते तत्र लिङ्गे रामेश्वराभिधे ॥

Colophon:

इति श्रीमत्पाद्मे पुराणे ब्रह्मरहस्यखण्डे रामायणोपाख्याने रामस्य वर-प्रदानं नाम षड्विंशोत्तरशततमोऽध्यायः ॥

सूतः—

पूजयित्वा जगन्नाथं रामो रामेश्वरं शिवम् ।
सर्वलोकहितार्थाय रामो वाचमुवाच ह ॥
प्रणमेत् सेतुबन्धं यो दृष्ट्वा रामेश्वरं शिवम् ।
ब्रह्महत्यादिपापेभ्यो मुच्यते मदनुग्रहात् ॥
सेतुबन्धे नरस्स्नात्वा दृष्ट्वा रामेश्वरं हरम् ।
सङ्कल्प्य नियतो भूत्वा गत्वा वाराणसीं नरः ॥
आनीय गङ्गासलिलं रामेशमभिषिच्य च ।
समुद्रे क्षिप्य तद्भारं ब्रह्म प्राप्नोत्यसंशयः ॥

R. No. 2095.

Palm-leaf. 14⅜ × 1¼ inches. Foll. 38. Lines, 5 in a page Nandinägarī. Slightly injured.

Purchased in 1916-17 from M R.Ry. E. R. Śrīnivāsarāghavācaryar of Kalyāṇapuram, Tanjore district.

वल्कलाक्षेत्रमाहात्म्यम्.

VALKALĀKṢĒTRAMAHĀTMYAM.

Deals with the holiness and religious importance of the Valkalākṣētra also called Janārdanakṣētra which is situated in the Travancore State and which is dedicated to the worship of Lord Kṛṣṇa.

Contains the Adhyāyas 1 to 13 complete, as found in the Brahmāṇḍapurāṇa.

Beginning:

वन्दे सुन्दरराजीवं श्रीवराहात्मकं शुभम् ।
पवनागारनिलयं जनार्दनतनुं हरिम् ॥
सुपुण्ये नैमिशारण्ये शौनकाद्या महर्षयः ।
प्रात(स्सवन)होमान्ते सूतं पप्रच्छुसा(रा)दरात् ॥

ऋषयः—

व्यासशिष्य महाप्राज्ञ सूत तद्वद विस्तरात् ।
वल्कलाख्ये महापुण्ये क्षेत्राणामुत्तमोत्तमे ॥
दक्षिणाम्बुनिधेस्तीरे रामक्षेत्रे जनार्दनः ।
नित्यं वसति सर्वेषां दर्शनान्मुक्तिदो नृणाम् ॥

* * * *

Colophon:

इति श्रीब्रह्माण्डपुराणे क्षेत्रकाण्डवैभवे वल्कलाक्षेत्रमाहात्म्ये प्रथमोऽध्यायः ॥

End:

जनार्दनस्य देवस्य माहात्म्यमिदमद्भुतम् ।
श्रवणात् सर्वपापघ्नं श‍ृणुध्वं मुनिसत्तमाः ॥
(धन्योऽस्म्य)पि कृतार्थोऽस्मि विष्णोर्माहात्म्यकीर्तनात् ।
सत्सङ्गशेवधिर्नृणां कुलशालीह सन्तु वः (?) ॥
इत्युक्तास्ते महाभागा ऋषयस्ते तपोधनाः ।
(सन्तोषम)तुलं प्राप्य सर्वकर्मसमर्पणम् ॥
समर्पयन्तो देवेशे ब्रह्मणि श्रीजनार्दने ।
सन्तुष्टचित्तास्ते तत्र पूर्ववत्सत्रमासत ॥

Colophon:

इति श्रीमद्ब्रह्माण्डपुराणे ब्रह्माण्डगोलविस्तारे जनार्दनवल्कलाक्षेत्रमाहात्म्ये त्रयोदशोऽध्यायः ॥

The scribe adds—

. . . ङ्गिके अब्दे आश्वीजे अधिकेऽसिते ।
नवम्यां सौम्यवारे तु लिखितं ग्रन्थमुत्तमम् ॥
नवनीवंशसम्भूतरामचन्द्रार्यसूनुना ।
आनन्दतीर्थेन लिखितं माहात्म्यं केशवस्य तु ॥

R. No. 2096.

Palm-leaf. 13⅝ × 1⅛ inches. Foll. 36. Lines, 5 in a page. Nandināgari. Good.

Purchased in 1916-17 from M.R.Ry. E. R. Śrīnivāsarāghavācāryar of Kalyāṇapuram, Tanjore district.

गयामाहात्म्यम्.

GAYĀMĀHĀTMYAM.

Foll. 1*a*—34*b*. Foll. 35—36 are left blank.

This work is taken from the Vāyupurāṇa. It deals with the sanctity of Gayā and is said to have been narrated by Sanatkumāra to Nārada at the request of the latter.

Complete in eight Adhyāyas.

Beginning:

श्रीसूतः—

सनकाद्यैर्महाभागैः देवर्षिस्सह नारदः कृ
सनत्कुमारं पप्रच्छ प्रणम्य विधिपूर्वकम् ॥

नारदः—

सनत्कुमार मे ब्रूहि तीर्थं तीर्थोत्तमोत्तमम् ।
तारकं सर्वभूतानां शृण्वतां पठतां सदा ॥

सनत्कुमारः—

वक्ष्ये तीर्थवरं पुण्यं श्राद्धादौ सर्वतारकम् ।
गयातीर्थमतिश्रेष्ठतीर्थेभ्यो ह्यधिकं शृणु ॥

* * * *

यन्नाम्ना दापयेत् पिण्डं तं नयेत् ब्रह्म शाश्वतम् ॥
ब्रह्मज्ञानं गयाश्राद्धं गोग्रहे मरणं तथा ।
वासः पुंसां कुरुक्षेत्रे मुक्तिरेव चतुर्विधा ॥

* * * *

Colophon:

इति श्रीवायुपुराणे गयामाहात्म्ये प्रथमोऽध्यायः ॥

End:

उपाख्यानमिदं पुण्यं गृहे तिष्ठति पुस्तकम् ।
सर्पाग्निचोरजनितं भयं तस्य न विद्यते ॥
पूजयेत् सततं यस्तु पुस्तकं मुनिपुङ्गवाः ।
गृहे तस्य स्थिता लक्ष्मीः सुप्रसन्ना भविष्यति ॥

सूतः—

सनत्कुमारो मुनिपुङ्गवाय पुण्यां कथां यत्र निवेश्य भक्त्या ।
स्वमाश्रमं रम्यवनैरुपेतं विसर्जसंगीतगरं जगाम ॥

Colophon:

इति श्रीवायुपुराणे श्वेतवराहकल्पे गयामाहात्म्ये अष्टमोऽध्यायः ॥

The scribe adds—

मार्गशीर्षे मन्मथस्य वर्षे कृष्णतृतीयके ।
आनन्दतीर्थेन लिखितं प्रीत्यै माधवमध्वयोः ॥

R. No. 2097.

Palm-leaf. 14⅜ × 1⅛ inches. Foll. 169. Lines, 9 in a page. Grantha. The middle part is bitten by rats and ants.

Purchased in 1916-17 from M.R.Ry. E. R. Srinivasaraghavacaryar of Kalyāṇapuram, Tanjore district.

(*a*) कारणागमः (प्रतिष्ठातन्त्रम्).

KĀRAṆĀGAMAḤ (PRATIṢṬHĀTANTRAM).

Foll. 1*a*—141*b*. Foll. 73*b* and 142 to 166 are left blank.

Same work as that described under R. No. 1612 ante.

Contains 42 Paṭalas in the Pratiṣṭhātantra of the Kriyāpāda.

(*b*) बाणलिङ्गलक्षणम्.

BĀṆALIṄGALAKṢAṆAM.

Foll. 167*a*—168*a*. Fol. 169*a* contains Sōmavāravrata. Fol. 169*b* is left blank.

Gives the distinguishing characteristics of Bāṇaliṅgas. This work is purported to have been based upon the different Śaivāgamas.

Incomplete.

Beginning:

सकलागमसंग्रहे—

बाणं लिङ्गमरिष्टमिष्टमनिश माषादिहस्तान्तकं
जम्बूपक्कफलोपमं मधुनिभं भृङ्गप्रभं कज्जलम् ।

नीलं वा प्रतिबिम्बवत् करिकरं तद्वर्णपीठं क्रमं
श्यामं गोस्तनकुक्कुटाण्डसदृशं लिङ्गं सदा श्रेयसे ॥
पक्वचूतफलकल्पमञ्जरीबाणलिङ्गमयमुत्तमोत्तमम् ।
सिद्धगोपयवकप्रभासितं चारुश्लक्ष्णमयमम्बुजं गृहेत् ॥

End:

तुङ्गनाहसमपीठविस्तरं विस्तरस्य शखेदतुङ्गकम् (?) ।
तुङ्गकार्धमथ गोमुखायतं गोमुखान्तमथ कर्णनालकम् (?) ॥
एतेषां सङ्करो दोषं सङ्करः कर्तृनाशनम् ।
तस्मिंस्तस्मिन् प्रकर्तव्यं सङ्करे सर्वदोषभाक् ॥

R No 2098.

Palm-leaf. 16½ × 1¼ inches. Fol. 69. Lines. 5 in a page. Nandināgarī. Good

Purchased in 1916-17 from M.R.Ry. E. R. Śrīnivāsarāghavācāryar of Kalyāṇapuram Tanjore district.

(*a*) वेङ्कटगिरिमाहात्म्यम्.
VEṄKAṬAGIRIMĀHĀTMYAM.

Foll. 1*a*—26*a*. Fol. 26*b* is left blank

Deals with the holiness and religious importance of the sacred shrine dedicated to God Śrīnivāsa on the top of the Tirupati Hills.

Breaks off in the eighth Adhyāya, as found in the Bhaviṣyōttara-purāṇa.

Beginning:

शौनकः—

कथितं रङ्गमाहात्म्यं तथा हस्तिगिरीशितुः ।
जगन्नाथस्य वै विष्णोः महात्म्यमतुलं मुने ॥
इदानीं श्रोतुमिच्छामि माहात्म्यं वेङ्कटेशितुः ।
यथाश्रुतं मया पूर्वं सुखेनामिततेजसा ॥
तथा चाहं समाचक्षे सावधानमनाः शृणु ।
पुरा तु जनको नाम राजा परमधार्मिकः ॥
सत्यवाक् सर्वशास्त्रेषु सर्वदा कोपवर्जितः ।
वासुदेवप्रसादेन मुख्यपात्रोऽभवन्नृपः ॥

* * * *

Colophon :

इति श्रीभविष्योत्तरपुराणे श्रीवेङ्कटगिरिमाहात्म्ये प्रथमोऽध्यायः ॥

End :

असमे सङ्कटं प्राप्तं देहनाशकरं परम् ।
इत्थं चरन् रमाकान्तो जगामोत्तरदिङ्मुखः ॥
आरुह्य सोपानमनामयो विभु . . . . न्दयन् लोकिकमाशुकर्मा ।
शयानमानन्दपुटोऽपि माधवो मघायुगान्ते वटपत्रशायी ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे वेङ्कटगिरिमाहात्म्ये श्रीनिवासपद्मावतीसंवादो नाम सप्तमोऽध्यायः ॥

सूतः—

शयानं . . . . पर्यङ्के श्रीनिवासं वृषाकपिम् ।
शुद्धान्नं पायसान्नं च गौडमुद्गान्नमेव च ॥

* * * *

शयानं श्रीनिवासं च वल्मीकस्थानमाश्रितम् ।
श्वसन्तं दीर्घनिश्वासं तुदन्तं नेत्रबिन्दुभिः ॥
आभाष्यमाणं श्रीकान्तं

(*b*) वेङ्कटगिरिमाहात्म्यम्.

VĒṄKAṬAGIRIMĀHĀTMYAM.

Foll. 27*a*—69*b*.

Similar to the above.

Complete in the following 12 Adhyāyas :—

१. शेषगिरिवर्णन.
२. वेङ्कटेशावतारवर्णन.
३. . . . .
४. अवतारवर्णन.
५. do.
६. पद्मावतीसंवाद.
७. . . . .
८. पद्मावतीनिश्चय.
९. लग्नपत्रिकाशुकवकुलागमन.
१०. विश्वकर्ममण्डपनिर्माण.
११. रमागमन.
१२. वेङ्कटेशकल्याण.

Beginning :

पुरा तु ऋषयस्सर्वे शौनकाद्या महर्षयः ।
सुमखं जाह्नवीतीरे सदैते चक्रिरे द्विजाः ॥

तस्मिन् काले मुनिश्रेष्ठो नारदो मुनिसत्तमः ।
शिष्यसङ्घैः परिवृतः तत्रागाज्जाह्नवीतटम् ॥
तत्र स्थिता महाभागाः पूजां चक्रुर्महात्मने ।
संपूजितो महाभागैः ब्राह्मणानिदमब्रवीत् ॥
यज्ञं किमर्थमुद्युक्ताः कर्तुं यूयं द्विजोत्तमाः ।
के भुञ्जते यज्ञफलं को दाता तत्फलं नृणाम् ॥
यज्ञं कृत्वा यज्ञफलं ह्यर्पितं मुनिसत्तमाः ।
इति नारदवाक्यं तु श्रुत्वा तु मुनिपुङ्गवाः ॥
संशयंम(यग्र)हसम्पन्ना ऊचिरेऽथ महर्षयः ।
तदा सर्वे मिलित्वा तु भृगुं ब्रह्मविदां वरम् ॥
तमूचुर्भक्तिनम्राश्च कृताञ्जलिपुटास्स्थिताः ।
गच्छ शीघ्रं महाभाग परीक्षार्थं सुरोत्तमम् ॥
इति तेषां वचः श्रुत्वा भृगुः कञ्जजमन्दिरम् ।
तत्र दृष्ट्वाष्टबाहुन्तं साक्षात् ब्रह्माणमग्रजम् ॥

* * * *

तं मदान्धमिति ज्ञात्वा निर्ययौ ब्रह्मणः पुरात् ।
कैलासगिरिमासाद्य दृष्टवान् गिरिजापतिम् ॥

* * * *

रमोवाच तदा देवं श्रीनिवासं वृषाकपिम् ।
गच्छामि देवदेवेश त्यक्त्वा त्वां जगदीश्वर ॥
ताडितोऽसि जगन्नाथ ऋषिपादतलेन वै ।
मया(दा)लिङ्गस्थले देव मदाज्ञां न ददासि चेत् ॥
करवीरपुरं दिव्यं गच्छामि गरुडध्वज ।
इत्युक्तो रमया देवः प्रत्युवाच च तां प्रति ॥
मत्स्वभावस्त्वेवमेव भक्तवत्सलता रमे ।

* * * *

इति मत्वा जगन्नाथः तदागाद्भुवनस्थलम् ।
गङ्गाया दक्षिणे देशे योजनानां शतद्वये ॥
सुवर्णमुखरी नाम नदीनां प्रवरा शुभा ।
शुकस्य वरदा पुण्या अगस्त्यो मुनिभिस्स्थितः ॥
तस्यामेवोत्तरे तीरे क्रोशार्धद्वयमात्रके ।
श्रीवेङ्कटगिरिर्नाम वर्तते पुण्यपर्वतः ॥

* * * *

वदनं वेङ्कटगिरिः नृसिंहाचलमध्यगः ।
श्रीशैलः पुच्छभागस्थः अयं क्षेत्रोत्तमो गिरिः ॥

* * * *

Colophon:

इति श्रीभविष्योत्तरपुराणे वेङ्कटगिरिमाहात्म्ये शेषगिरिवर्णनं नाम प्रथमोऽध्यायः ॥

End:

आयुःकामश्च दीर्घायुः मोक्षेच्छुर्मोक्षमाप्नुयात् ।
यः शृणोति च भक्त्या वै श्रावयेद्वा समाहितः ॥
सर्वान् कामानवाप्यैव तौ चोभौ मोक्षभाजनौ ।
नारी श्रुत्वा सुपुत्रं च कन्या भर्तारमाप्नुयात् ॥
विधवा ज्ञानमाप्नोति पुमान् वै मोक्षभाग्भवेत् ।
कलौ चरित्रं परिदर्शयन् मुहुर्विरिश्चिशर्वेन्द्रमुखादिकानाम् ।
आयाममस्यास्य विडम्ब . . जानन्ति मानुष्यमुपासितं ते ॥

Colophon:

इति श्रीमद्भविष्योत्तरपुराणे वेङ्कटगिरिमाहात्म्ये वेङ्कटेशकल्याणो नाम द्वादशोऽध्यायः ॥

The scribe adds—

प्लवङ्गवर्षे ज्येष्ठस्य शुक्लपक्षे तृतीयके ।
आनन्दतीर्थेन लिखितं प्रीत्यै माधवमध्वयोः ॥

R. No 2099.

Palm-leaf. 11⅞ × 1⅜ inches. Foll. 122. Lines, 5 in a page. Grantha. Slightly injured.

Purchased in 1916-17 from M R.Ry. E R. Śrīnivāsarāghavācāryar of Kalyāṇapuram, Tanjore district.

(a) आपस्तम्बश्रौतप्रायश्चित्तम्.

ĀPASTAMBAŚRAUTAPRĀYAŚCITTAM.

Foll. 1*a*—114*b*. Fol. 115 contains some verses **relating** to sacrifices.

Same work as that described under No. 1082 of the **D.C.S. MSS., Vol. II, wherein see for the end.**

Complete.

Beginning:

प्रणयनात्पूर्वं गार्हपत्यानुगतिप्रायश्चित्तम्—

प्रणयनकालात्पूर्वं गार्हपत्यानुगमने चेद्गार्हपत्यं भस्मना नित्यारणिं संस्पृश्य तूष्णीं मथित्वा गार्हपत्यायतने निधाय तूष्णीमाहवनीयं प्रणीय गार्हपत्यानुगतिप्रायश्चित्तार्थे तपस्वतिष्ठास्थाने मित्रादिद्वादशाहुतीः होष्यामि इति सङ्कल्प्य- जुह्वा जुहोति ॥

(*b*) श्रीचक्रकवचम्.

ŚRĪCAKRAKAVACAM.

Foll. 116*a*—120*b*. Foll. 121—122 are left blank.

The due repetition of this Kavacamantra is believed to be efficacious in securing one's protection.

Incomplete.

Beginning:

नमामि सद्गुरुं शान्तं प्रत्यक्षशिवरूपिणम् ।
शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये ॥
या नित्या परमा शक्तिः जगच्चैतन्यरूपिणी ।
यस्यां सर्वं समुत्पन्नं यस्यामद्यापि तिष्ठति ॥
लयमेष्यति तामेकां पञ्चमीं प्रणमाम्यहम् ।
अधः कल्पतरोर्नित्यं भवान्या रत्नमन्दिरे ॥
रत्नसिंहासने देव्याः श्रीचक्रं प्रणमाम्यहम् ।
भूगृहं गुणरेखा च वेदद्वारोपशोभितम् ॥
आवृत्तं षोडशदलं तथाष्टदलकर्णिकम् ।
मनुकोणद्विदिक्कोणं वसुत्रैकोणबैन्दवम् ॥
एवमेतन्महाचक्रं नित्यं श्रीत्रिपुरामयम् ।
इन्द्रो मां रक्षयेत् पूर्वमाग्नेय्यामग्निदेवता ॥
याम्ये यमस्सदा पातु नैरृत्यां निरृतिश्च माम् ।

* * * *

एताः कलास्तु सूर्यस्य सूर्यमण्डलसंस्थिताः ।
ककारादि ठकारान्तं भादिडान्तं सबिन्दुकम् ॥
कं भं द्वयं समायोज्य ठं डमित्यन्तमेव च ।
एताभिस्सहितो रक्षामादित्यः कुरुतां मम ॥

End:

तीक्ष्णादीनां पकारादि दशवर्णं सबिन्दुकम् ॥
एताभिस्सहितो रक्षां कुर्याद्रुद्रस्सदा मम ।
ततस्तिरोधानकर्ता बैन्दवात्मा स ईश्वरः ॥
रक्षां करोतु मे नित्यं हुङ्कारात् सर्वसिद्धये ।
तिरोभावकलाः प्रोक्ता मया सिद्धिप्रदायकाः ॥

R. No. **2100.**

Palm-leaf. 14⅜ × 1⅛ inches. Foll. 76. Lines, 6 in a page. Nandināgarī. Injured.

Purchased in 1916 17 from M R.Ry. E. R Śrinivāsarāghavācāryar of Kalyāṇapuram, Tanjore district.

Fol. 1*a* contains the stanzas giving the date of transcription as given by the scribe and found also at the end of the MS., and 1*b* contains some Purāṇaślōkas.

तोताद्रिमाहात्म्यम्.

TŌTĀDRIMĀHĀTMYAM.

On the holiness and religious importance of the sacred shrine in Tōtādri also known as Vānamāmalai which is dedicated to the worship of God Viṣṇu.

Complete, as found in Adhyāyas 1 to 12 of the Kṣētrāvaibhakhaṇḍa of the Brahmāṇḍapurāṇa.

Beginning:

ऋषय ऊचुः—

सूत सर्वज्ञ सद्भक्त पुराणार्थविचक्षण ।
अष्टादशपुराणेषु ब्रह्माण्डं नाम सत्कथम् ॥
पूर्वं त्वया सुकथितं सम्यक् सर्वं शुभं हि तत् ।
तत्र क्षेत्राणि सर्वाणि त्वयोक्तानि शुभानि च ॥
तेषु सर्वेषु मुख्येषु तोताद्रिरिति कथ्यते ।
तत्कथां कथयेदानीं महदाश्चर्यकारिणीम् ॥
ब्रह्माण्डे नारदः श्रीमान् तीर्थमाहात्म्यमुत्तमम् ।
श्रोतुकामश्शिवं प्राथ्र्य कैलासमगमत्तदा ॥

* * * *

Colophon :

इति ब्रह्माण्डपुराणे क्षेत्रवैभवखण्डे उमामहेश्वरसंवादे तोताद्रिमाहात्म्ये प्रथमोऽध्यायः ॥

End:

ये तु शृण्वन्ति तोताद्रिस्थलमाहात्म्यमुत्तमम् ।
. . . . नणां मुक्तिमार्गप्रदायकम् ॥

*　　*　　*　　*

एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः ।
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ॥

Colophon :

इति श्रीमद्ब्रह्माण्डपुराणे क्षेत्रवैभवखण्डे तोताद्रिमाहात्म्ये द्वादशोऽध्यायः ॥

The scribe adds—

आश्विजे चासिते पक्षे वत्सरे च जयाह्वये ।
तृतीयायां भानुवारे प्रीत्यै माधवमध्वयोः ॥
काल्पीवंशसमुद्भूतरामचन्द्रार्यसूनुना ।
आनन्दतीर्थेन लिखितं तोताद्रीशस्य सन्निधौ ॥

Additional leaves marked 26, 52, 69 and 70 are added in their respective places.

R. No. **2101.**

Palm-leaf. 14⅜ × 1½ inches. Foll. 37. Lines, 6 in a page. Nandināgarī. Much injured.

Purchased in 1916–17 from M.R.Ry. E. R. Śrinivāsarāghavācāryar of Kalyāṇapuram, Tanjore district.

अनन्तशयनमाहात्म्यम्.

ANANTAŚAYANAMĀHĀTMYAM.

On the holiness and religious sanctity of the sacred shrine Anantaśayana in Trivendram dedicated to the worship of God Padmanābha, a form of Viṣṇu.

Contains the Adhyāyas 1 to 11 of the Kṣētrakāṇḍavaibhava.

Beginning :

सुपुण्ये नैमिशारण्ये ऋषयः शौनकादयः ।
सत्रं समास्सप्ततमाः सहस्रं हरितुष्टये ॥

. . . . ।
सत्कृतं स्फुटमासीनं पप्रच्छुरिदमुत्सुकाः ॥

ऋषयः—

व्यासशिष्य महाप्राज्ञ सर्वशास्त्रार्थकोविद ।
शुश्रूषता . . . . ॥
अनन्तशयनं नाम दक्षिणाम्बुनिधेस्तटे ।
यत्र शेते स्वयं बिष्णुः दर्शनान्मुक्तिदो नृणाम् ॥
अनन्तभोग . . . . ।
(यदु)क्तं तु त्वया पूर्वं ब्रह्माण्डाख्यानविस्तरे ॥
इच्छामहे स्म तच्छ्रोतुं स्फुटं कौतूहलं हि नः ।
क्षीराब्धिशयनोऽनन्तः . . . . ।
. . . सन्नो भगवान् कस्मादत्रागतस्स्वयम् ॥
एतदन्यच्च नो ब्रह्मन् विस्तराद्रोमहर्षण ।
इति पृष्टस्तदा सूतः स्मृत्वा न . . . . ।
. . . . सन्तोषात् गद्गदाक्षरम् ॥

* * * *

श्रीसूतः—

शृण्वन्तु मुनयस्सर्वे माहात्म्यं . . . . . ।
. . . . योऽनन्तः दक्षिणाम्बुनिधेस्तटे ॥
अनन्तशयनं नाम क्षेत्रं तन्मुक्तिदायकम् ।
तदेव नारसिंहाख्यं पुण्यं क्षेत्रं कृते युगे ॥

* * * *

रामक्षेत्रे महापुण्ये योजनद्वयसंमितम् ।
अनन्तशयनं क्षेत्रं सर्वपापहरं परम् ॥
तत्रागत्य हरिश्शेते शेषभोगे . . . . ।
. . . . पुरे श्रीकृष्णनिर्मिते ।
सर्वे निवासं वै . . . . चक्रुर्युक्तास्तपोधनाः ॥

* * * *

Colophon:

. . . . स्ताराख्याने अनन्तशयनमाहात्म्ये प्रथमोऽध्यायः ॥

End:

सूतपौराणिकं सर्वे पूजयामासुरञ्जसा ।
. . . . . . पुण्यं हरिकथामृतम् ॥
कृत्वार्घ्यं स . . . . व हरिलीलामृतप्रदः ।
इति तं नन्दयित्वा च ते च सर्वे महर्षयः ।
मध्याह्नसवनायाशु प्रो . . . . वनं मुदा ॥

Colophon:

इति श्रीमदनन्तशयनमाहात्म्ये क्षेत्रकाण्डवैभवे एकादशोऽध्यायः ॥

The scribe adds—

जवली(वंश)संभूतरामचन्द्रार्यसूनुना ।
आनन्दतीर्थेन लिखितं पद्मनाभस्य वैभवम् ।
एतद्दृष्ट्वा तु सन्तस्तु आशीः कर्तव्य एव हि ।
दत्तं पुस्तक . . . दत्तदृष्टिरधोमुखः ।
कष्टेन लिखितं ग्रन्थं . . . परिपाल्यताम् ॥

R. No. **2102.**

Palm-leaf. $15\frac{7}{8} \times 1\frac{1}{4}$ inches. Foll. 88. Lines, 7 in a page. Grantha. Much injured.

Purchased in 1916-17 from M.R.Ry. E. R. Śrinivāsarāghavācaryar of Kalyāṇapuram, Tanjore district.

(*a*) **शैवोत्सवविधिः.**

ŚAIVŌTSAVAVIDHIḤ.

Foll. 1*a*—77*a*.

Same work as that described under R. No. 1368 ante.

Incomplete.

Fol. 47 contains Sarvāgamasaṅgrahaprāyaścittaviṣayaślōkas. Foll. 58*b*, 68*b*, 75*b*, 77*b* and 78*b* are left blank.

(*b*) **शिवालयनिर्माणस्थापनदीपिका.**

ŚIVĀLAYANIRMĀṆASTHĀPANADĪPIKĀ.

Foll. 78*a*—86*b*.

Same work as that described under R. No. 1612(*b*) ante.

Incomplete.

Fol. 87*a* contains Adhiṣṭhāpanavidhi. Foll. 87*b* and 88*b* are left blank. Fol. 88*a* contains a portion of आधारशक्ति Mantra.

R. No. **2103.**

Palm-leaf. 9⅝ × 1¾ inches. Foll. 48. Lines, 10 in a page. Grantha. Much injured.

Purchased in 1916-17 from M.R.Ry. E. R. Śrīnivāsarāghavācāryar of Kalyānapuram, Tanjore district.

सपर्याकल्पवल्ली.

SAPARYĀKALPAVALLĪ.

Foll. 1*a*—47*b*. Fol. 48 contains the fourth and the fifth Adhyāyas of the Mantracintāmaṇi.

By Śrīnivāsa. Same work as that described under No. 5750 of the D.C.S. MSS., Vol. XII, but wants the beginning.

Complete.

Colophon :

(श्री)श्रीनिवासेन विनिर्मितायां श्रीमत्सपर्याक्रमकल्पवल्ल्याम् ।
गतोऽयमाद्यः स्तबकः प्रमाणनिरूपणाख्योत्तमसौरभाढ्यः ॥

* * * *

Colophon :

इति श्रीश्रीनिवासविरचितायां चण्डिकासपर्याक्रमकल्पवल्ल्यां पञ्चमस्स्तबकः ॥

समाप्ता चेयं कल्पवल्ली ॥

R. No. **2104.**

Palm-leaf. 17⅜ × 1½ inches. Foll. 20. Lines, 8 in a page. Grantha. Good.

Purchased in 1916-17 from M.R.Ry. E. R. Śrīnivāsarāghavācāryar of Kalyāṇapuram, Tanjore district.

Foll. 18*b*, 19*b* and 20 are left blank.

क्रियाक्रमद्योतिका.

KRIYĀKRAMADYŌTIKĀ.

By Aghōraśivācārya, also called Paramēśvara. Similar to the work described under No. 5435 of the D.C.S. MSS., Vol. XI.

Contains the Mānuṣapratiṣṭhā, Jalādhivāsa and Śivaliṅgapratiṣṭhā.

Beginning :

विशोध्य स्थापयेत् पीठे रत्नादिन्याससंयुते ।
कृत्वाघोराणुना होमं निच्छिद्रासंशतस्तथा ॥

मानुषप्रतिष्ठा—

स्वनामाद्योहं युक्तो वा द्वितीयो वापि गृह्यताम् ।
सप्तमस्य द्वितीयं तु प्रथमस्य चतुर्दश ॥

बिन्दुनादं समायुक्तं मानुष्यं बीजमुच्यते ।
ह्रस्वा ब्राह्मणि चाख्याता दीर्घैरङ्गानि कल्पयेत् ॥

* * * *

Colophon:

इति श्रीमदघोरविरचितायां क्रियाक्रमद्योतिकायां मानुषप्रतिष्ठाविधिस्समाप्तः ॥

अथाङ्कुरार्पणविधिः—

प्रतिष्ठादिकमुद्दिश्य यत्र दिवसेऽधिवासकर्म क्रियते तद्दिनमेकं विहाय पूर्वे नव सप्तपञ्च . . . . शुद्धभूतले षोडशधा विभक्ते मध्यकोष्ठचतुष्टये धान्यपुञ्जेऽलंकृतं कुम्भं निवेश्य

* * * *

Colophon:

इति श्रीपरमेश्वरापरनामधेयश्रीमदघोरशिवाचार्यविरचितायां क्रियाक्रमद्योतिकायां पारमेश्वरयुक्ते अङ्कुरार्पणविधिस्समाप्तः ॥

End:

वाससा विरूक्ष्य सुगन्धैश्चन्दनादिभिरालिप्य, रक्तवा(स)सी परिधाप्य, ब्रह्मभिस्संपूज्य, बहुरूपेण नीराज्य हृदाचमनार्घ्यें दत्वा रक्षकीलकं रोचनाय कृत्वा हृदयेनोत्थाप्य, रथे समारोप्य, सुयन्त्रितं कृत्वा, गीतवाद्यप्रनृत्तैर्ब्रह्मघोषादिमङ्गलैस्सह लाजपुष्पाणि हिरण्यादिकं च.

Foll. 18*a* and 19*a* contain some Āgamavacanas.

R. No. **2105.**

Palm-leaf. 16 × 1¼ inches. Foll. 31. Lines, 6 in a page. Nandināgarī. Slightly injured.

Purchased in 1916–17 from M.R.Ry. E. R. Śrīnivāsarāghavācaryar of Kalyāṇapuram, Tanjore district.

रुक्मिणीशविजयव्याख्या—गुरुभावप्रकाशिका.

RUKMIṆĪŚAVIJAYAVYĀKHYĀ: GURUBHĀVAPRAKĀŚIKĀ.

By Nārāyaṇabhaṭṭa, son of Lakṣmīpatibhaṭṭōpādhyāya. Same work as that described under Nos. 11717 and 11718 of the D.C.S. MSS., Vol. XX.

Contains the 1 to 61 stanzas of the 17th Sarga.

R. No. **2106.**

Palm-leaf. 15½ × 1½ inches. Foll. 109. Lines, 8 in a page. Telugu. Good.

Purchased in 1916–17 from M.R.Ry. Vēṭūri Sundara Śāstrulugāru of Pedakallepalli, Kistna district.

पञ्चाङ्गसरलिः.

PAÑCĀṄGASARALIḤ.

Foll. 1*a*—101*b*. Foll. 102—104 contain a list of the names of the different Vratas to be observed in each of the days of the 12 months of a year. Foll. 105—109 are left blank.

Deals with the preparation of the Hindu astronomical calendars. Also purports to give the calendar for the year Pārthiva

Incomplete.

Beginning:

वाणीं विघ्नेश्वरं चाहं नत्वा विघ्नोपशान्तये ।
पञ्चाङ्गसरलिं वक्ष्ये गणकानन्दकारिणीम् ॥

ब्रह्मसिद्धान्ते—

भूवृत्तद्वादशान्ते तु लङ्कायाः प्राक् शाल्मले ।
मयाय प्रथमप्रश्ने ज्योतिर्ज्ञानं ददौ रविः ॥

पुष्करद्वीपमध्यस्था महापुष्करमध्यमे ।
तिष्ठता सिद्धपूर्यां तु ग्रहाः संस्थापिता मया ॥

श्रीसूर्यसिद्धान्ते—

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने ।
समस्तजगदाधारमूर्तये ब्रह्मणे नमः ॥
अल्पावशिष्टे तु कृते मयो नाम महासुरः ।
रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमम् ॥

लङ्कायाः प्राग्भागे द्वाविंशत्यधिकचतुश्शतयोजनान्तरिते प्रदेशे शाल्मलिद्वीपे भगवानादित्यः तस्मै मयाय योतिर्ज्ञानं प्रादात् ॥

भूरेषा पूर्वभागे सुररिपुपुरतो योजनानामुदीच्यां—

सङ्ख्याशैलाङ्गचन्द्रो १६८ भवति च नियतं यत्र तत्कोण्डवीड्याम् ।
विषुवति गणना त्र्यङ्गुलाः षट्त्रिंशत् ३६ अध्वयोजनानि वेदाः ४०.

ज्योतिश्शास्त्रं महापुण्यं प्रत्यक्षमपि गोपितम् ।
चन्द्रार्कौ साक्षिणौ तत्र श्रौतस्मार्तादिसाधनम् ॥

* * * *

अस्य शास्त्रस्य सम्बन्धाभिधेयप्रयोजनान्युच्यन्ते—

आब्रह्मादिविनिस्सृतं वेदाङ्गमिति सम्बन्धः । सिद्धान्तजातकसंहिताभेदेन स्कन्धत्रयात्मकमित्यभिधेयम् । तत्कालनिर्णयः प्रयोजनान्युच्यन्ते । तत्र ग्रहगणज्योतिश्चक्रभ्रमणपञ्चाङ्गधरणीसंस्थानादिप्रतिपादकः सिद्धान्तस्कन्धः । कर्मवशेन जातस्य जन्मलग्नवशात्तस्य कर्त्रायुर्दायनिर्याणादिप्रतिपादको जातकस्कन्धः । त्रिविधोत्पादनवशाच्छुभाशुभप्रतिपादकः शाखाशब्दवाच्यः संहितास्कन्धः । एतैस्त्रिभिः स्कन्धैः बहुधा विप्रकीर्णेऽस्मिन् शास्त्रे द्विजस्याधिकारः ।

तथाह कश्यपः—

गणितं जातकं शाखां यो वेत्ति द्विजसत्तमः ।
त्रिस्कन्धज्ञो विनिर्दिष्टः संहितापारगश्च सः ॥

* * * *

अस्य समस्तकल्याणभाजनस्य श्रौतस्मार्तनित्यनैमित्तिककर्मानुष्ठानक्रियातत्त्वज्ञानव्यवहारहेतुभूतस्य चान्द्रमानेन पार्थिवनामसंवत्सरस्य श्रीसूर्यसिद्धान्तोक्तप्रकारेण ब्रह्मणः परमायुःप्रमाणनिरूपणम्, तस्य गतकालनिरूपणम्, मन्विन्द्रसमस्तर्षीणां परमायुःप्रमाणम्, महायुगादियुगकालनिरूपणम्, भचक्रभ्रमणकालनिरूपणम्, बल्यादिपुण्यपुरुषगतकालनिरूपणम्, संवत्सरफलसंवत्सराधिपसाचिवसैन्यसस्यधान्यमेघरसनीरसनायकानां तत्तत्फलनिरूपणम्, तिथिवारनक्षत्रयोगकरणनक्षत्राणां राशिनक्षत्रतदंशप्रवेशाश्च, शीघ्रघात्यस्फुटपातगण्डपातमानयोगदलसाम्यद्विभवपात्यलक्षणमध्यग्रहोर्ध्वयोगदशध्रुवमन्दचक्रादिकदशविधपाताश्च, ग्रहणग्रहयुद्धभेद्यसमागमयोर्लिङ्गावमवृद्धिक्षयत्रिद्युस्पृग्युगमन्वादय इत्यादि पञ्चाङ्गं मया लिख्यते—

सर्वेषामेव जन्तूनां शतमेवायुरुच्यते ।
तत्रोच्छ्वासः प्राणकालः सर्वस्यैष विनिर्णयः ॥
साङ्गोपाङ्गं वत्सरस्य ब्रह्मणो जन्म तत्फलम् ।
ये शृण्वन्ति क्रतुफलं प्राप्नुवन्ति न संशयः ॥

इति । ब्रह्मायुर्निरूपणार्थं कालनिर्णयमाह—

मनुः—

कालं कालविभक्तं च नक्षत्राणि ग्रहास्तथा ।
स्रष्टा ससर्ज सृष्ट्यादौ स्रष्टुमिच्छन्निमा प्रजाः ॥

* * * *

श्वेतवराहकल्पगतसौराब्दाः ९ कोटि २७ लक्ष ४८ सहस्र ८६६
ज्योतिश्चक्रभ्रमणादिगताब्दाः १८५ कोटि ८ लक्ष ८४ सहस्र ८६६.

End:

सूर्योदयात् पूर्वमेवौपासनमाध्याह्निकसन्ध्यादिकं सर्वं कृत्वा सूर्योदयानन्तरं द्वादशीमध्य एव भोजनं कार्यम् । अत एवापस्तम्बवेदे ब्रह्मयज्ञकालः महारात्र . . . षसीत्युक्तिः स्वल्पद्वादशीव्यतिरिक्तदिवसे महारात्रिव्यपाः ब्रह्मकालत्वाप्रसक्तेः । तथा—

द्वादशीं श्रवणोपेतां नोपोष्याच्चेत्तु मूढधीः ।
पञ्चसंवत्सरकृतं पुण्यं तस्य विनश्यति ॥

R. No. **2107.**

Palm-leaf. 15⅜ × 1⅝ inches. Foll. 96. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1916–17 from M.R.Ry. Vēṭūri Sundara Śāstrulugāru of Pedakallepalli, Kistna district.

(*a*) कुण्डदर्पणः.

KUṆḌADARPAṆAḤ.

Foll. 1*a*—91*b*. Foll. 37 and 38 are left blank.

By Mallēśvara, younger brother of Vīrabhadra. Same work as that described under R. No. 349 ante.

Complete.

Fol. 92 contains stanzas from the Dharmapravṛtti.

(*b*) शारदातिलकम्.

ŚĀRADĀTILAKAM.

Foll. 93*a*—96*b*.

Same work as that described under No. 8102 of the D.C.S. **MSS.**, Vol. XV.

Contains the Paṭalas 1 to 5.

R. No. 2108.

Palm-leaf. 16¼ × 1½ inches. Foll. 58. Lines, 7 in a page. Telugu Slightly injured.

Purchased in 1916-17 from M.R.Ry. Vēṭūri Sundara Śāstrulugāru of Pedakallepalli, Kistna district.

स्मृतिसारसङ्ग्रहः.

SMṚTISĀRASAṄGRAHAḤ.

Foll. 1*a*—57*a*. Foll. 57*b*—58*b* are left blank.

Same work as that described under R. No. 1213(*b*) ante.

Breaks off in the Garbhiṇīpatidharma

R. No. 2109.

Palm-leaf. 17 × 1⅜ inches. Foll 70. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1916–17 from M R Ry. Vēṭūri Sundara Śāstrulugāru of Pedakallepalli, Kistna district.

Fol. 1 is left blank. Fol. 2 contains Aghōranṛsiṁhamālāmantra.

(*a*) साङ्ख्यायनतन्त्रम्.

SĀṄH Y ĀYANATANTRAM.

Foll. 3*a*—37*b*.

Same work as that described under No 7949 of the D C.S. MSS., Vol. XV. This is also called Bagalākalpa.

Contains Paṭalas two and three complete, but with introductory stanzas in the beginning as given below.

Date of copying : Tuesday, the 11th of the bright fortnight of the Kārttikai month in the year Virōdhikṛt.

Beginning :

जिह्वाग्रमादाय करेण देवीं वामेन शत्रून् परिपीडयन्तीम् ।
गदाभिघातेन च दक्षिणेन पीताम्बराढ्यां द्विभुजां नमामि ॥

(*b*) साङ्ख्यायनतन्त्रोद्धारः.

SĀṄKHYĀYANATANTRŌDDHĀRAḤ.

Foll. 38*a*—40*a*.

On details connected with the worship of the Goddess Bagalā who is a manifestation of Śakti.

Contains two Paricchēdas.

Beginning :

श्रीभवानीपदाम्भोजसेवनादिकतत्परः ।
ब्राह्मे मुहूर्ते चोत्थाय स्वगुरुध्यानमाचरेत् ॥
गुर्वनुज्ञया नदीतीरं गत्वा वैदिकस्नानानन्तरं मन्त्रस्नानं करिष्ये ।
मन्त्रस्नानं विना मन्त्रं तन्मन्त्रं निष्फलं भवेत् ।
तस्मात् सर्वप्रयत्नेन मन्त्रस्नानं विधीयते ॥

यथा—तदुदकं मूलेन मन्त्रेण त्रिवारं शिरसि प्रोक्षयेत् । ततो वैदिक सन्ध्यां कुर्यात् । अनन्तरं मन्त्रसन्ध्यां समाचरेत् ।

* * * *

Colophon :

इति श्रीसाङ्ख्यायनतन्त्रोद्धारे सन्ध्याविधिर्नाम प्रथमः परिच्छेदः ॥

ततः स्वगृहमागत्य द्वारपूजां कुर्यात् । अप्रतिघातस्तम्भादेवीश्रीपादुकां पूजयामि नमः । महोऽर्चिष्माम्बादेवीश्री . नमः इत्यभ्यर्च्य, पशुजनविमुखो भूत्वा पूजामन्दिरद्वारे तिष्ठन् सिताक्षतैर्दक्षिणवामशाखयोः गं गणपतये नमः ।

End :

विशुद्धायै नमः । नन्दितायै नमः । सुप्रभायै नमः । सर्वसिद्धिप्रदायै नमः । तदुपरि चक्रराजाय नम इत्यर्चयेत् ।

* * * *

चतुर्भिश्शिवचक्रैश्च शक्तिचक्रैस्तु पञ्चभिः ।
नवचक्रैश्च संसिद्धं श्रीचक्रं शिवयोर्वपुः ॥

(*c*) बगलामुखीकवचम्.

BAGALĀMUKHĪKAVACAM.

Foll. 40*b*—42*a*.

Similar to the work described under No. 6702 of the D.C.S. MSS., Vol. XIII.

Complete, as found in the Karavīratantra.

Beginning :

बगला पूर्वतो रक्षेदाग्नेय्यां च गदाधरी ।
पीताम्बरी दक्षिणे च स्तम्भिनी चैव नैरृताम् ॥
जिह्वाकीलं ततो रक्षेत् पश्चिमे सर्वकामदा ।

वायव्ये च मदोन्मत्ता कौबेरे च त्रिशूलिनी ।
ब्रह्मास्त्रदेवता त्वीशे पाताले स्तम्भमातृका ॥
ऊर्ध्वे रक्षेन्महादेवी जिह्वास्तम्भनकारिणी ।
एवं दश दिशो रक्षेत् बगला सर्वसिद्धिदा ॥
दुष्टस्तम्भनमुग्रवीर्यदमने कल्याणि तुभ्यं नम इति प्रातः ॥

End:

सुशीलाय मनुं दत्वा गुरुभक्तिपराय च ।
विशुद्धाय महामन्त्रं जापिने देयमुत्तमम् ॥

Colophon:

इति श्रीकरवीरतन्त्रे महोग्रतारभैरवसंवादे श्रीबगलामुखीकवचं संपूर्णम् ॥

(*d*) नवरात्रिपुरश्चर्याप्रयोगः.
NAVARĀTRIPURAŚCARYĀPRAYŌGAḤ.

Foll. 42*a*—43*b*.

Same work as that described under No. 7889 of the D.C.S. MSS., Vol. XV.

Complete.

(*e*) बगलामन्त्रकल्पः.
BAGALAMANTRAKALPAḤ.

Foll. 43*b*—44*b*.

Same work as that described under No. 7963 of the D.C.S. MSS., Vol. XV, wherein see for the beginning.

Complete.

End:

नमः प्रपञ्चस्तम्भिन्यै परमात्मस्वरूपिणि ।
नमो नमस्ते देवेशि बगले ते नमो नमः ॥
एतदुक्तं महास्तोत्रं बगलायाश्च कामदम् ।
यः पठेन्मानवो नित्यं सर्वोपद्रववारणम् ॥
लभेदक्षयसम्पत्तिमाज्ञासिद्धिः स्वयं भवेत ।
सर्वलोकान् वशीकुर्यात् स्तम्भयेच्छत्रुसन्ततिम् ॥
पूजाफलं लभेन्नित्यमन्ते मुक्तिमवाप्नुयात् ।

(*f*) बगलाचक्रनिर्णयः.

BAGALĀCAKRANIRṆAYAḤ.

Foll. 44*b*—45*a*.

Deals with the drawing, etc., of the diagram relating to the goddess Bagalā who is a manifestation of Śakti.

Incomplete.

Beginning:

ग्रन्थान्तरे बगलानिर्णयः—

बिन्दुत्रिकोणषट्कोणवृत्ताष्टदलवृत्तषोडशदलवृत्तभूपुरत्रयमिति । ह्लीं.

पीताम्बरि विशालाक्षि पीतभूषणभूषणे ।
पीतवस्त्रैः पूजिताङ्घ्रि पीतच्छत्रविराजिते ॥
पीतध्यानपरे देवि पीतस्तम्भनकारिणि ।
पितामहादिसंसेव्ये पीतराण्मुक्तिदायिनी ॥

End:

ज्वालामुखि शतमुखि बडबामुखि रौद्रिणि ।
वाराहीमुखि चोल्का च बगलामुखि पाहि माम् ॥
एतैर्नामामृतैर्देवि यः पठेद्भक्तिसंयुतः ।
सर्वसिद्धिमवाप्नोति बगला सुप्रसीदति ॥

(*g*) बगलामालामन्त्रः.

BAGALĀMĀLĀMANTRAḤ.

Foll. 45*a*—46*b*. Fol. 47*a* contains Pratyaṅgirāmantra, and fol. 47*b* Nṛsiṁhamālāmantra.

Similar to the work described under No. 6715 of the D.C.S. MSS., Vol. XIII.

Incomplete.

Beginning:

अस्य श्रीबगलामालामन्त्रस्य, नारदभगवानृषिः, पङ्क्तिच्छन्दः, श्रीबगलाम्बा देवता, ह्लीं बीजम्, ग्लौं शक्तिः, श्रीं कीलकम्, बगलामुखीप्रीत्यर्थे विनियोगः । ह्लामित्यादि षडङ्गन्यासः ।

ध्यानम्—

कालानलनिभां देवीं ज्वलत्पावकलोचनाम् ।
सहस्रबाहुसंघट्टशत्रुसन्ततिनाशनीम् ॥

End:

त्रिकोणरूपिणी शक्तिः बिन्दुरूपपराश्शिवः ।
अविनाभावसम्बन्धः तस्मात् बिन्दुत्रिकोणयोः ॥
एवं विभावमज्ञात्वा श्रीचक्रं यस्समर्चयेत् ।
न तत्फलमवाप्नोति ललिता च न तुष्यति ॥

(*h*) वामकेश्वरतन्त्रम्.

VĀMAKĒŚVARATANTRAM.

Foll. 48*a*—58*b*.

On details connected with the worship of the goddess Lalitā, such as the Mantras to be repeated, the Hōma to be performed, etc.

Fragmentary.

Beginning:

शुद्धस्फटिकसङ्काशं द्विनेत्रं करुणानिधिम् ।
वराभयप्रदं वन्दे श्रीगुरुं शिवरूपिणम् ॥
भक्ताज्ञानतमोभानुं मूर्ध्नि पङ्कजसंस्थितम् ।
सदाशिवमयं नित्यं श्रीगुरुं प्रणमाम्यहम् ॥
श्रीविद्यां जगतां धात्रीं सर्गस्थितिलयेश्वरीम् ।
नमामि ललितां नित्यं भक्तानामिष्टदायिनीम् ॥
बिन्दुत्रिकोणसंयुक्तं वसुकोणसमन्वितम् ।
दशकोणद्वयोपेतं भुवनारसमान्वितम् ।
दलाष्टकतमोपेतं दलषोडशकान्वितम् ।
वृत्तत्रयान्वितं भूमिसदनत्रयभूषितम् ॥
नमामि ललितां नित्यं भक्तानामितदिष्टदम् ।
अमृताम्भोनिधिं तत्र रत्नद्वीपं नमाम्यहम् ॥

* * * *

होमविधिरुच्यते—

देवतां नमस्कृत्य, देशकालौ सङ्कीर्त्य, अग्निकार्यं करोमीति सङ्कल्प्य, प्रधानदेवताङ्गकरन्यासं कृत्वा, देवतां पञ्चोपचारैस्संपूज्य, तदनुज्ञापुरस्सरं बहिर्यजेत् । तद्यथा—मूलेन वीक्षणम्, फडिति प्रोक्षणम्, पुनः फडिति खननोद्धारौ, नम इति पूरणम्, फडिति समीकरणम्, हुमिति सेचनम्, फडिति कुण्ठनम् इत्येतैस्संस्कृतं

सर्वतश्चतुरश्रं चतुर्विंशत्यङ्गुलायाममङ्गुलोन्मितं मेखलात्रययुक्तं मध्यस्थपद्मयुक्तं नवयोनिकुण्डं विरचय्य ।

End :

नमामि त्रिपुरादेव्या हृदयं सर्वकामदम् ।
महारहस्यं सततं दुर्लभं दैवतैरपि ॥
सर्वक्रतुषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ।
तत्पुण्यं लभते नित्यं मानवो नात्र संशयः ॥
विमानान्तं समास्थाय दिव्याभरणभूषितः ।
दिव्यचन्दनलिप्ताङ्गः सदा विंशतिवार्षिकः ॥
स भुङ्क्ते सकलान् भोगान् शीघ्रमेव न संशयः ॥

Colophon :

इति श्रीवामकेश्वरतन्त्रे ।

(*i*) निर्वाणपञ्जरम्.

NIRVĀṆAPAÑJARAM.

Foll. 59*a*—64*a*. Fol. 64 contains the Tripurāpūjā in Telugu language.

Deals with details connected with the Mantra and the Pūjā (worship) of the Goddess Parāśakti. The due worship of the Goddess is considered to confer salvation on the supplicant.

Complete.

Beginning :

श्रीमहादेव उवाच—

देवदेव महादेव सच्चिदानन्दविग्रह ।
परमात्मन् परंधाम सर्वानन्दमयात्मक ॥
निर्मला कौलदेहस्तु सर्वोपनिषदात्मका ।
तापत्रयाग्निसंज्वालदेहजीवादिवर्जित ॥
चिदाभासमुदाभासहृद्भासमनवासक ।
षट्त्रिंशत्तत्त्वातीतात्मन् दृश्यादृश्यादिवर्जित ।

* * * *

निर्वाणदायकं ब्रूहि पराधर्म्योत्तमोत्तमम् ॥

श्रीसदाशिव उवाच—

रहस्यातिरहस्यं च कौलिकामौनपूजितम् ।
कुलं पुरा पराकौलं केवलं मोक्षदायकम् ॥
उमासुवर्चलातन्त्रे स्वरूपं तत्त्वनिर्णये ।
निर्वाणपञ्जरं नाम शाम्भव्यानुत्तरं क्रमम् ॥
उन्मनीनाथयोर्भक्त्या सामरस्यात्मदायकम् ।
एतद्विज्ञानमात्रेण शाम्भवीप्रियवल्लभः ॥
पञ्चप्रेतासनारूढः स्पर्शध्यानेक्षणाद्भवेत् ।
लोके निकृष्टमुत्कृष्टं लोकोत्कृष्टं निकृष्टकम् ॥

End:

निर्वाणपञ्जरं सर्वं चिन्तयेदुन्मनीपते ।
क्षीराज्यं नवनीतं च आत्मानन्दस्सदा भवेत् ॥
नमस्तेऽस्तु भगवति अनामयानिरामयम् ।
कृतार्थोऽहं कृतार्थोऽहं कृतार्थोऽहं न संशयः ॥
यामिन्द्रान्नयानौ आधारे पदम् ॥

Colophon:

इति उमासुवर्चलातन्त्रे स्वरूपतत्त्वनिर्णयसपादलक्षग्रन्थे निर्वाणपञ्जरं नाम षोडशः कल्पः ॥

(*j*) **रहस्याम्नायः.**

RAHASYĀMNĀYAḤ.

Foll. 65*a*—70*b*.

Herein Dattātrēya on being questioned by Vāmadēva explains to him the Mantra relating to the goddess Bālā and the efficacy resulting from the due repetition thereof.

Contains from the 10th to the 16th Parispanda. At the end a few stanzas deal with Sarasvatīmantra.

Beginning:

वामदेव उवाच—

भगवन् देवदेवेश दत्तात्रेय तपोनिधे ।
अत्र बालामहामन्त्रं सूचितो न प्रकाशितः ॥
अस्या देव्या महामन्त्रं वद मे करुणाकर ।

अथ दत्तात्रेयः—

बाला नाम जगन्माता देवी त्रिपुरसुन्दरी ।
शिवशक्तिमयी साक्षात् सर्वकामप्रदायिनी ॥
तस्य मन्त्रमहासिद्धिर्महामुक्तिप्रदायिनी ।
सर्वसंपत्करं नृणां सर्वसौभाग्यदायिनी ॥

* * * *

आद्यबीजेन मर्त्यानां महाविद्याप्रदायिनीम् ।
महाशापानुग्रहकरीं मूकवाक्सिद्धिदायिनीम् ॥
विधिनाराध्य देवेशीं वाग्बीजेन जगन्मयीम् ।
बृहस्पतिरभूद्वाचा बृहस्पतिगुरुप्रभुः ॥

Colophon:

इति श्रीमहागमरहस्ये दत्तात्रेयवामदेवसंवादे दशमपरिस्पन्दः ॥

End:

ब्रह्मलक्ष्मीशगौरीशैरभिपूज्यो भवेदयम् ।
सूर्यकोटिप्रतीकाशतेजसानुत्तमो भवेत् ॥
लभेत सकलान् कामान् ब्रह्माद्यैरपि दुर्लभान् ।
सदाशिवो भवत्येव सत्यं सत्यं वदाम्यहम् ॥
एतत्ते कथितं गुह्यं बालामन्त्रस्य साधनम् ।
समासेन महायोगिन् किं पुनः श्रोतुमिच्छसि ॥

Colophon:

इति श्रीमहागमरहस्ये परमकुलशास्त्रे दत्तात्रेयवामदेवसंवादे षोडशः परिस्पन्दः ॥

वामदेवः—

देवी केन विधानेन पूजिता त्रिपुरेश्वरी ।
ददाति सकलान् कामान् भक्तानां ब्रूहि तन्मम ॥

* * * *

दशलक्षं जपेद्यस्तु वागीशीमन्त्रमुत्तमम् ।
व्याख्याता सर्वशास्त्राणां कवीशो वा कृतो भवेत् ॥
विवादे जयमाप्नोति ग्रहाद्वेदचतुष्टयम् ।
सर्वविद्यानिधिरयं भवेद्वागीश्वरेश्वरः ॥

सर्वान् कामानवाप्नोति पो (मनुजो) नात्र संशयः ।

Colophon:

इति सरस्वतीमन्त्रतन्त्रं समाप्तम् ॥

R. No. **2110.**

Palm-leaf. 16⅜ × 1½ inches. Foll. 57. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1916-17 from M.R.Ry. Vēṭūri Sundara Śāstrulugāru of Pedakallepalli, Kistna district.

महाविद्योद्धारः.

MAHĀVIDYŌDDHĀRAḤ.

Foll. 1*a*—55*b*.

Same work as that described under R. No. 1378 ante.

Incomplete.

Fol 56 contains a list of the Mantras, fol. 57*a* gives a few stanzas relating to the Mantras and fol. 57*b* is left blank.

R. No. **2111**,

Paper. 7¾ × 6½ inches. Foll. 49. Lines, 17 in a page. Telugu. Good.

Purchased in 1916-17 from M R.Ry. Vēṭūri Sundara Śāstrulugāru of Pedakallepalli, Kistna district.

(*a*) वासुदेवमननसङ्ग्रहः.

VĀSUDĒVAMANANASAṄGRAHAḤ.

Foll. 1*a*—15*a*.

Similar to the work described under R. No. 124 ante.

Contains Varṇakas one to five complete, but wants the beginning in the first Varṇaka.

Beginning:

किं तु अनिर्वचनीयमेव तत्स्वरूपम् । अनिर्वचनीयत्वं च मिथ्यात्वम्, या मा सा माया या न विद्यते सा अविद्या इति मायाविद्याशब्दयोः अवयवव्युत्पत्तेश्च। तस्माच्चिद्व्यतिरेकेण वस्त्वन्तरं नास्त्येव । चिन्मात्रस्वरूपमहमेवेति यो जानाति स एव मुक्तः इति वेदान्ताः कथयन्ति गुरवोऽप्युपदिशन्तीत्यस्मिन्नर्थे संशयो न कर्तव्यमिति सिद्धम् ।

स्थूलसूक्ष्मादिदेहानामात्मन्यारोप एव च ।
अपवादस्सतोऽप्येषां सम्यगत्र प्रदर्शितः ॥

Colophon:

प्रथमवर्णकं समाप्तम् ॥

End:

निर्विकार आत्माहमेवेति दृढनिश्चयागम एवास्य विचारस्य फलं सिद्धम् ॥

त्रिविधैरेव करणैः पुण्यपापं च मिश्रकम् ।
क्रियते समयं कर्मण्येवं बुद्धिर्विमुच्यते ॥
रागाद्यैरेव निर्वर्त्यं प्रेरकत्वं न मे क्वचित् ।
इति दृढा च बुद्धिश्च (बुद्धिर्दृढा यस्य) स मुक्तस्स च पाण्डितः ॥

Colophon:

पञ्चमवर्णकं समाप्तम् ॥

(*b*) पञ्चकोशविचारः.

PAÑCAKŌŚAVICĀRAḤ.

Foll. 15*a*—21*b*.

Explains the five kinds of sheaths which are considered to surround the soul.

Complete.

Beginning:

किंरूपाः पञ्च कोशास्स्युः का वा तद्व्यतिरिक्तता ।
आत्मनश्चेति तत्सर्वं सदृष्टान्तं विचार्यते ॥

पञ्चकोशाज्ञाने तद्व्यतिरिक्तात्मा ज्ञातुं न शक्यते इति प्रथमं पञ्च कोशा निरूप्यन्ते—अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया इति पञ्च कोशाः ।

End:

पञ्चकोशो नाम स्थूलदेहः अन्नमयकोश इत्युच्यते । कर्मेन्द्रियैरितरप्राणैश्च सह प्राणमयकोशः । ज्ञानेन्द्रियैस्सहितं मनः मनोमय(कोश)ः । तैरेव सहिता बुद्धिर्विज्ञानमयकोशः । अज्ञानमानन्दमयकोशः । एषां कोशत्वं तेष्वासक्त्या पुरुषस्याखण्डानन्दाद्वैतस्वरूपविस्मारकत्वमस्यादिस्वरूप . . . आच्छादितकोशवत् ।

* * * *

आनन्दं ब्रह्मणो विद्वान्न बिभेति कदा च नेति, अभयं वै जनकप्राप्तोऽसि, ज्ञानाग्निस्सर्वकर्माणि, तथा ज्ञानं लब्ध्वा गच्छति, सर्वधर्मान्परित्यज्य, एतद्बुद्ध्वा भारत इत्यादिश्रुतिस्मृतिभ्योऽयमर्थो विधीयते ॥

ओं तत्सत् ॥

(c) वेदान्तसारसङ्ग्रहः.

VĒDĀNTASĀRASAṄGRAHAḤ.

Foll. 22a—28a.

Similar to the work described under No. 4748 of the D.C.S. MSS., Vol. IX.

Complete.

Beginning:

अखण्डसच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥
अर्थतोऽप्यद्वयानन्दानतीतद्वैतबोधतः(भावनान्) ।
गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति ॥
यत्प्रसादादहं विष्णुस्सर्वं च मयि कल्पितम् ।
इदं जानामि चात्मानं तस्मै श्रीगुरवे नमः ॥

वेदान्तो नाम—उपनिषद इति प्रमाणं च । एतदुपकारकव्याससूत्रादीनि वेदान्त इत्युच्यते । एतस्य वेदान्तप्रकरणत्वेन वेदान्तस्य यदनुबन्धचतुष्टयमस्ति तदनुबन्धचतुष्टयमेव एतस्य प्रकरणस्यालोचनीयम् ।

End:

एतज्जगन्मिथ्येति पश्यति । प्रारब्धनाशे सति विदेहमुक्तो भवति ॥
यत्कटाक्षसुधासिन्धौ मज्जता पुण्यपाकतः ।
भूयो ज्ञानमणिर्लब्धस्तमानन्दगुरुं भजे ॥

Colophon:

इति श्रीमद्वेदान्तसारसंग्रहप्रकरणं संपूर्णम् ॥

(d) जीवेश्वरप्रकरणम्.

JĪVĒŚVARAPRAKARAṆAM.

Foll. 28b—30b.

A tract in Advaita Vēdānta explaining the nature of Jīva and Īśvara and concluding that salvation is attainable by the realization of the identity of the individual soul with the Supreme Brahman.

Complete.

Beginning:

जीवेश्वरस्वरूपं निरूपयामः—

जीवः कीदृशः इत्युक्ते अन्तःकरणमन्तःकरणाधिष्ठानचैतन्यं च अन्तःकरणे प्रतिबिम्बे चैतन्यं च एतत्त्रयं जीव इत्युच्यते । एतेषां विशिष्टानां त्रयाणां जीवत्वं

किमर्थं वक्तव्यं केवलमन्तःकरणस्य भवत्वित्युक्ते घटेऽपि जीवत्वाभावात् केवलमन्तःकरणस्य जीवत्वं वक्तुमशक्यम् ।

End :

एवंप्रकारेण जीवेश्वरयोस्स्वरूपं विचार्य जीवेश्वरौ मायाकल्पिताविति निश्चित्य जीवेश्वराधिष्ठानभूतः निर्विकारः स्वप्रकाशः सर्वसाक्षी प्रत्यगात्मा अहमेवेति यो जानाति स एव मुक्त इति वेदान्तसिद्धान्तः ॥

Fol. 30*b* contains तापत्रयप्रकरण.

(*e*) स्वानुभूतिप्रकाशः.

SVĀNUBHŪTIPRAKĀŚAḤ.

Foll. 30*b* and 31*a*.

On the realization of the self in the individual soul as identical with everything and with the Supreme Brahman: by Sadāśiva Brahmarṣi.

Complete.

Beginning :

गौरीपतिभजन त विलोक(ने)नैकविषयपाशोऽहम् ।
देशिकवरकरुणोदितपरजीवात्मैक्यतत्त्वबोधोऽहम् ॥
प्रशमितनिजमायोऽहं प्रगलितजगदीशजीवभेदोऽहम् ।
प्रत्यगभिन्नपरो [लक्ष्य]ऽहं प्रविततसुखपूर्णसंविदेवाहम् ॥
समुदस्ताश्रमितोऽहं चिद्ध्वस्ताशेषविधिनिषेधोऽहम् ।
अस्तमिताहन्तोऽहं निस्तुलदृशिरूपवस्तुमात्रोऽहम् ॥

End :

निरवधिनिजबोधोऽहं निरुपमनिस्सीमसत्त्वमात्रोऽहम् ।
परमानन्दघनोऽहं पराशिव एवाहमनिशमभयोऽहम् ॥
इति सन्ततमनुभावितपरजीवात्मैक्यबोधतुहिनांशुः ।
अवधूयान्तरतिमिरं परशिवमोहं प्रकाशयति ॥

Colophon :

इति श्रीसदाशिवब्रह्मऋषिविरचितस्वानुभूतिप्रकाशः समाप्तः ॥

(*f*) वेदान्तविषयः.

VĒDĀNTAVIṢAYAḤ.

Foll. 31*a*—46*b*. Foll. 47, 48 and 49 are left blank.

An introductory treatise in Advaita Vēdānta explaining the undermentioned topics.

Contains the following subjects :—

१. प्रतिबन्धत्रयनिरूपणम्.
२. नवविधसंसारः.
३ पुर्यष्टकम्.
४. वैराग्यबोधोपरतयः.
५. वासनात्रयम्.
६. प्रतिबन्धनिवृत्तिश्रवणमननादयः.
७. षण्णवतितत्त्वनिरूपणम्.
८. ब्रह्मविद्वरिष्ठप्रकरणम् (incomplete).

Beginning:

प्रतिबन्धत्रयनिरूपणम्—ज्ञानस्य प्रतिबन्धकं प्रतिबन्धत्रयं तन्निवृत्तिं च निरूपयामः । प्रतिबन्धो नाम—भूतप्रतिबन्धः वर्तमानप्रतिबन्धः भाविप्रतिबन्धश्चेति त्रिधा । तेषां भूतप्रतिबन्धं निरूपयामः—बहुकुटुम्बी ब्राह्मण एकः जीवनार्थमेकां महिषीं संपादयित्वा ततस्तस्या महिष्याः क्षीरदधितक्रघृतादीनां विक्रयं कृत्वा तद्द्रव्येण पुत्रभार्यादिसंरक्षणं कुर्वन् तां महिषीं च तृण तूलबीजादिभिः पालयन् तथानिष्ठोऽवर्तत ।

End:

विक्षेपो नाम—अहं सुखदुःखीः मनुष्यो ब्राह्मण इत्येवंरूपस्यारोपस्य कारणभूतेन देहद्वयेन संयुक्तश्चिदाभासः । अयं च गुरूपदेशात् प्रथमं कूटस्थः कश्चिदस्ति इति परोक्षतया यदा जानाति तत्परोक्षज्ञानम् । अयं चिदाभासः स्वगुरोस्सकाशात् श्रवणादिकं कृत्वा ज्ञानं सम्पाद्य तदनन्तरं स कूटस्थः अहमिति ज्ञानमपरोक्षज्ञानमनर्थनि.

R. No. 2112.

Paper. 8⅝ × 6¼ inches. Foll. 19. Lines, 22 in a page. Telugu. Good.

Purchased in 1916–17 from M.R.Ry. Vēṭūri Sundara Śāstrulugāru of Pedakallepalli, Kistna district

(*a*) कालशक्तिविलासः.

KĀLAŚAKTIVILĀSAḤ.

Foll. 1*a*—7*a*. Foll. 7*b* to 8*b* are left blank.

On the proper time, etc., for conducting the worship connected with Śrīvidyā: by Parasukhānandanātha, a disciple of Paripūrṇānandanātha.

Complete.

Beginning :

श्रीललितां त्रिपुराम्बां सद्गुरुरूपेण दर्शितालम्बाम् ।
निजचरणभक्तबृन्दे करुणारसशालिनीं वन्दे ॥
षट्त्रिंशत्तत्त्वोदयपञ्चकनवनाथराजनित्याढ्याम् ।
युगवर्षमासवासरदिनघटिकाख्यां परां स्तौमि ॥
उपासकानां सर्वेषां श्रीविद्याभक्तिशालिनाम् ।
कालशक्तिविलासोऽयं क्रियते कीर्तिसिद्धये ॥
कालस्वरूपमज्ञात्वा श्रीविद्यां भजते यदि ।
न तत्सिद्धिमवाप्नोति कल्पकोट्यापि साधकः ॥
कालस्तु ब्रह्मसृष्ट्यादिज्ञातव्योऽष्टाङ्गसिद्धये ।
एकाग्रस्थितया बुद्ध्या शास्त्रेण गणितात्मना ॥
सृष्टिस्तु द्विविधा प्रोक्ता बाह्याभ्यन्तरभेदतः ।
अन्तरा मानसी प्रोक्ता बाह्या भूतमयी स्मृता ।
कल्याद्यहर्गणेनैव कृत्वाष्टाङ्गं तु केचन ।
तन्मूलं तु न जानन्ति देवीभ्रूविभ्रमात्मकम् ॥
तस्मात् सृष्ट्यादितः कार्यमष्टाङ्गं सिद्धिकामिना ।
तत्साधनं तु सुलभमार्गेण कथयाम्यहम् ॥
पूर्वकल्पान्तरात्र्यां तु गतायां सद्य उत्थितः ।
इति कर्तव्यतामूढो ब्रह्माभूत्तमसावृतः ॥
तदानीं तु पराशक्तिचिद्रूपां हृदि संस्मरन् ।
समाधिं कृतवान् ब्रह्मा कंचित्कालं तु निष्क्रियः ॥

End :

श्रीविद्यासिद्धिकामश्चेच्छ्रीदेवीभक्तिमान् यदि ।
इमं निधिमिव प्राप्य नन्दत्येव न संशयः ॥
पराहन्त्यैक्यसन्धाननिरतेभ्यो निरन्तरम् ।
नत्वानन्दस्वरूपेभ्यस्साधकेभ्यो नमो नमः ॥
प्रतिदिवसमपीमं कालशक्तेर्विलासं
विमृशति मनसा यस्सादरं साधकेन्द्रः ।
परसुखमिह लब्ध्वा कालशक्तेः प्रसादा-
दचिरमपि समानं मुच्यते कालपाशात् ॥

Colophon :

इति श्रीपरिपूर्णानन्दनाथसद्गुरुचरणाराधकेन श्रीपरसुखानन्दनाथेन विरचितः कालशक्तिविलासः संपूर्णः ॥

सीतां पञ्जरगन्धवेणुधवणासीतायदारागजा
रागन्धा यशसातिकोतियसरालज्जावशाधाविणा ।
धातुः कासरिलाधिपंबजवमोश्वातायसेपस्सुता
गुंजारूमथवामदावयसुता गुंजारुगोजारुमा ॥
धावाङ्कोसितवर्णसौम्मिकतया चक्रं विलिख्य क्रमा-
देकाशीतिपदे नवग्रहमये चक्रं विलिख्येत् क्रमात् ॥

(*b*) शिवलिङ्गप्रतिष्ठाविधिः.

ŚIVALIṄGAPRATIṢṬHĀVIDHIḤ.

Foll. 9*a*—11*a*. Foll. 11*b* to 19*b* are left blank.
On the consecration of the image of Śivaliṅgas.
Incomplete.

Beginning :

स्कन्द उवाच —

श्रृणु कुम्भज वक्ष्यामि प्रतिष्ठायाः क्रमं शुभम् ।
आत्माधिकस्सैतुलिङ्गं स वेधो नैव वर्त्मना (?) ॥
पूर्वपक्षे द्वितीयायां तृतीयायां शुभे दिने ।
अष्टम्यां वा दशम्यां वा राकायां वा विशेषतः ॥
गुर्विन्दुरविशुक्राणां वारे सर्वशुभावहे ।
स्वातीहस्तानुराधश्च मखा मूला च रेवती ॥
श्रवणं चाश्विनी चैव रोहिणी पुष्यमेव च ।
उत्तरात्रितयं चैव शिवस्यापि त्रिजन्मभम् ।
मुख्यमेवं विनिर्दिष्टं चन्द्रताराबलान्वितम् ।
नान्दीश्राद्धं तु पूर्वेद्युः कृत्वा सूत्रोक्तवर्त्मना ॥

* * * *

सर्वलक्षणसम्पन्नं लिङ्गमानीय देशिकः ।
प्रथमं . . . पात्रे तु शुद्धतोयेऽधिवासयेत् ॥

वस्त्रेणादाय तल्लिङ्गं पश्चात्तीरेऽधिवासयेत् ।
वस्त्रेणाच्छाद्य तल्लिङ्गं पश्चाद्गन्धादिके ततः ॥

End:

इति शिवसन्निधौ तर्पणं कृत्वा, कृसरं पायसं गुडोदनं शुद्धोदनं सर्वसस्यसम्पूर्णकांश्च पात्रे वा नूतनपात्रे वा निधाय, अहमस्मीत्यन्नसूक्तं मधुवाता इति जपित्वा, सदाशिवाय सन्तर्प्य, पवित्रं ते वित(त)मिति मन्त्रेण सन्तर्प्य, पश्चात्ताम्बूलं सद्योजाताद्यनुवाकेन दद्यात् । इत्थं षोडशोपचारान् ॥

R. No. **2113.**

Paper. $8\frac{3}{8} \times 6\frac{7}{8}$ inches. Foll. 12. Lines, 21 in a page. Telugu. Good.

Purchased in 1916-17 from M.R.Ry. Vēṭūri Sundara Śāstrulugāru of Pedakallepalli, Kistna district.

दक्षिणामूर्तिकल्पः.

DAKṢIṆĀMŪRTIKALPAḤ.

Contains the following topics :—

१. मूर्तिपञ्जरन्यास.
२. मूर्तिमन्त्राङ्गबालामन्त्र.
३. दक्षिणामूर्तिध्यान.
४. मूर्तिहृदय.
५. दक्षिणामूर्तिकवच.
६. दक्षिणामूर्तिमन्त्रार्णस्तव.
७. मूर्तिपञ्जर.
८. मूर्तिमन्त्रनामावलि.

On certain details connected with the repetition of the Mantra relating to Dakṣiṇāmūrti, a form of Śiva.

Incomplete.

Beginning:

अस्य श्री(दक्षिणा)मूर्तिपञ्जरमहान्यासस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीसदाशिवो देवता, मम श्रीदक्षिणामूर्तिप्रसादसिद्ध्यर्थे न्यासे विनियोगः । ओं नमो भगवते श्रीदक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा महादेवाय दात्रे नमः ।

End:

रत्नमन्दिरमध्यस्थो रत्नपूजापरायणः ।
रत्नाकरो लक्षणेशो लक्ष्यदो लक्ष्यलक्षणः ॥
लक्ष्मीनाथप्रियो लां वं अम्बिकायोगमार्गधृत् ।
लब्धभिक्षो लब्धसिद्धो लब्धलाक्षारुणेश्वरः ॥

R. No. **2114.**

Paper. 8⅜ × 6⅞ inches. Foll. 29. Lines, 21 in a page. Telugu. Fair.

Purchased in 1916–17 from M.R.Ry. Śyāmala Kāmā Śāstrigāru of Karapa, Cocanada post.

Foll. 26—29 are left blank.

मदनाभ्युदयभाणः.

MADANĀBHYUDAYABHĀṆAḤ.

By Kṛṣṇamūrti Śāstrin. Same work as that described under R. No. 1467 ante, wherein see for the beginning.

Incomplete.

End:

मदनवैजयन्ती विजयतेतराम् । अत्र हि चित्रवतीवितीर्यमाणवीटिका-चर्वणगर्वायमाणमपाङ्गभङ्गीमात्रेण निरीक्षमाणं प्रागात्मना सह भोगात्मना सन्तर्पितप्रसूनबाणं शृङ्गारिशेखरं शृङ्गारशेखरमुद्दिश्य वराङ्गनाव्यासङ्गमसहमाना मानाधीना प्रायशस्साभिप्रायमभिनवपद्यामभिनयविद्यां संसज्जनप्रशंसार्हामातन्वाना वसन्तसेना तन्तनीति सन्तोषतरङ्गितमन्तरङ्गम् ।

R. No. **2115.**

Paper. 8⅜ × 6⅞ inches. Foll. 12. Lines, 16 in a page. Telugu. Fair.

Purchased in 1916–17 from M.R.Ry. Śyāmala Kāmā Śāstrigāru of Karapa, Cocanada post.

Foll. 11*b* and 12 are left blank.

वल्लवीपल्लवोल्लासः.

VALLAVĪPALLAVÔLLĀSAḤ.

A dramatic composition in one act technically called Bhāṇa dealing with love-matters.

Wants the beginning and the end.

Beginning:

. . . . मोदं मुहुः
कुर्वन्तः प्रतिगात्रभागभरितस्वेदाम्भसा कम्भिनीम् ।
तन्वन्तस्ततपङ्कसङ्करतलामेते विवृत्तेक्षणाः
पश्यन्तः कृतदन्तशब्दमखिलान् भ्राम्यन्ति ताम्यन्त्यहो ॥

अग्रतोऽवलोक्य किञ्चिद्विहस्य ।

दासा विवृत्तनयनाञ्चलसम्प्रवृत्तबाष्पाम्बुबिन्दुवृषलीजनदत्तचित्ताः ।
तत्तत्परासुजनताभिनुतिप्रवीणा गायन्ति किञ्चिदुपरिप्रसृतात्महस्ताः ॥

उपर्यवलोक्य ।

सम्प्रति समाक्रान्तासुत(म्बर)तलान्तरसरणिस्तरणिः

* * * *

एष खलु मत्पुरातनसखो विटशिखामणिः तदनेन संलपामीति समीपमुपसृत्य सकौतुकम्—सखे विटशिखामणे दिष्ट्या दृष्टोऽसि । एतावन्तं कालं कास्त भवान् । किं ब्रवीषि ? अहो मम भवान्निरत्ययजातप्रत्ययहृत्खलु सुहृत् । अतः चिराय भवन्तमवलोक्य उदन्तमान्तं प्रणिगदामीदि प्रमदो मदन्तरे वरिवर्ति ॥

End :

समीपमुपसृत्य, किञ्चिद्विहस्य ।

उदग्रजनताद्दतेस्सविधमेत्य नीचा भृशं
प्रक्लृप्तकरसम्पुटा भुवि भटावलोकोत्सुकाः ।
स्वजानुयुगलोपरि प्रणिहिताननास्सम्भ्रम-
न्त्यहो बत ततस्ततो झटिति सन्निषण्णा अपि ॥

R. No. **2116.**

Palm-leaf. $15\frac{3}{4} \times 1\frac{5}{8}$ inches. Foll. 20. Lines, 10 in a page. Telugu. Slightly injured.

Purchased in 1916–17 from M.R.Ry. Śyāmala Kāmā Śāstrigāru of Karapa, Cocanada post.

Fol. 1*a* is left blank.

कङ्कणबन्धरामायणम्.

KAṄKAṆABANDHARĀMĀYAṆAM.

Foll. 1*b*—17*a*. Foll. 17*b* to 20*b* are left blank.

A poem describing the leading incidents in the life of Rāma. The stanzas are musical and melodious but difficult to understand and so the author Kṛṣṇamūrti, son of Gaurī and Sarvajña of Vāsiṣṭhagōtra, adds a commentary to his own work. The letters contained in each stanza may be arranged in a circular diagram representing the Kaṅkaṇa and this accounts for the name of the work as Kaṅkaṇabandharāmāyaṇam.

Complete.

Beginning:

वाग्देवतातरुणसत्करुणोरु(प)पाद्य-
विद्यानवद्यतरहृद्यकवित्वशाली ।

वासिष्ठवंशजननिर्ननु कृष्णमूर्तिः
व्याख्यां करोमि निजकङ्कणबन्धमुख्याम् ॥
गौरीसर्वज्ञयोः पित्रोः पदपाथोरुहौ हृदा ।
निरन्तरायमिष्टाप्त्यै निरन्तरमहं भजे ॥
ननु कङ्कणबन्धकृतिः कृतिनामपि नो सुकरा यदि वा कविभिः ।
कतिभिर्घटितास्ति तथापि कथाक्रमसङ्ग्रथिता न चकास्ति भुवि ॥
श्रीरामदिव्यचरितं खलु तत्कटाक्षधाराप्रवर्षणविधाकलितप्रकर्षम् ।
हर्षं वहन्नहमकार्षममर्षशून्ये सारज्ञसंसदधिकं कणमेहि सारम् ॥
चतुष्षष्ठ्यर्धसम्बन्धो बन्धो द्वात्रिंशदक्षरः ।
सतां मुदे विजयतां नितान्तमतिदुष्करः ॥
प्राचेतसादिकविराजविराजमानवाक्केलिसिन्धुनतिसङ्गतिबन्धुरस्य ।
श्रीरामकीर्तिभरभव्यपयःपयोधेस्सेयं कृतिर्भवति कङ्कणबन्ध एव ॥
द्वादशांशं प्रथमतो द्वितीये तु त्रयोदश ।
तृतीये षट् चतुर्थे स्युरेकादश ततो दश ॥
पञ्चमे द्वादश तथा षष्ठे काण्डे क्रमात्कृताः ।
नेता देवालीनामाशाधानाधीनानेकालोकी ।
मास्थानं भाख्यायोगी शं पायादेतं रा मे राजा ॥

नेतेति । आशानामाधानं करणं तदधीनः सन्ननेकालोकी बहुपदार्थद्रष्टा माया लक्ष्म्याः स्थानमत एव भाख्यायोगी कान्तिप्रसिद्धियुक्तः मे रा द्रव्यं देवालीनां नेता देवतासार्वभौमः; विष्णुरित्यर्थः । राजा प्रभुस्सन् एतं जनं मां शं सुखं पायादिति ।

ता देवालीनामाशाधानाधीनानेकालोकीमा ।
स्थानाभाख्यायोगीशं पायादेतं रा मे राजाने ॥

रामायणकथा—देवालीनां ताः प्रसिद्धाः पूर्वदक्षिणादयः आशाः दिशः धा—रक्षकाश्च न नासन् किं तु अधीनानेका अधीरबुद्धिः मूर्खो रावण इत्याशयः ।

* * * *

इति बालकाण्डः समाप्तः ॥

End :

नेजारामेरातं देयापाशं गीयोख्याभानास्था ।
माकीलोकानेनाधीनाधाशामानालीवादेता ॥

नेजाराम न ई यस्य दुर्भग इत्यर्थः तादृशो यो जारः रावणः तममति युद्धार्थमिति हिनस्ति वा नेजारामः रावणसंहर्तेत्यर्थः ।

* * * *

धीनाधाशा धीनाधानां ध्यानसमर्थानामाशा प्राप्यस्थानं, त्वमिति शेषः । इरातं भुवि स्थितं मा माम् अन प्राप्नुहि रक्षेत्यर्थः ॥

भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् ।

* * * *

सुप्रकेतैः सकलार्तिहारिभिः द्युभिः कान्तिभिः वशद्भिः कमनीयाभिर्वर्णैराकारविशेषैश्चैव तिष्ठन् विशेषेण स्थितवान् । तस्यैषा भवति ॥

R. No. **2117.**

Palm-leaf. 9¼ × 1½ inches. Foll. 14. Lines, 9 in a page. Grantha. Fair.

Purchased in 1916–17 from M.R.Ry. V. R. T. Tātācāriyar of Paṭṭukōṭṭa, Tanjore district

(*a*) श्रवणानन्दम्.

ŚRAVAṆĀNANDAM.

Foll. 1*a*—11*b*.

A hymn in praise of God Varadarāja of Conjeeveram and containing stanzas pleasing to the ear: the author is said to be Araśāṇipālai Vēṅkaṭācārya.

Contains 88 stanzas in the second Śataka.

Beginning:

वरदमुपासिषीमहि वपारसगन्धिमुखं
शरदरविन्दफुल्लदलसुन्दरनेत्रयुगम् ।
द्विरदमहीध्रशृङ्गचिरसङ्गतकल्पतरुं
स्थिरदरहेतिराजविलसत्करवारिरुहम् ॥

ललिततनौ तमालनिभया शुभया प्रभया
तुलितमुखे सखेलमधुना विधुना पृथुना ।
चर वरदे सदैव हृदयापदयाभ्युदया-
शयमपरं निरस्य सरुषं परुषं पुरुषम् ॥

दहरसरोरुहे दमशमादिसमाधिसमृ-
द्ध्यनुगुणसद्गुणैर्मुनिगणैरपि या निपुणैः ।

बत परदेवता हि विचिता विचितामपि नः
शुभविभवेन सैव सुलभा कलभाद्रितटे ॥

End:

मनसा कलयामि भक्तिभाजा घनलावण्यमनोज्ञदिव्यदेहम् ।
भुवनावनलीलमब्जयोनेस्सवनाम्नावुदितं परं पुमांसम् ॥
असितं वपुषि स्मिते सितं यत्त्वधरे रोहितमम्बरे तु पीतम् ।
कुशलाय तदस्तु कुन्तले यत् कुटिलं राजति कोमलं तु चित्ते ॥

(*b*) गोपिकागीतम्.

GŌPIKĀGĪTAM.

Foll. 12*a*—14*a*. Fol. 14*b* is left blank

Same work as that described under No. 2420 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

R No. **2118.**

Palm-leaf. 17 × 1¼ inches. Foll. 6. Lines, 7 in a page. Grantha and Tamil. Good.

Purchased in 1916-17 from M.R.Ry. V. R. T. Tātācāriyār of Paṭṭukōṭṭa, Tanjore district.

तत्क्रतुन्यायविचारः.

TATKRATUNYĀYAVICĀRAḤ.

By Pādukāsēvakarāmānujasvāmin, disciple of Śrīnivāsamuni. Similar to the work described under R. No. 94(*a*) ante.

Complete.

Beginning:

श्रीरङ्गाधिपमीडे श्रीनिधियोगीन्द्रदेशिकाकारम् ।
यत्पादाम्बुजयुगलं शरणं प्राप्यं ममाखिलार्थकरम् ॥

श्रीरहस्यत्रयसारे उपायविभागाधिकारे

* * * *

उपासितगुणादेर्या प्राप्तावप्यबहिष्क्रिया ।
स तत्क्रतुनयग्राह्या नाकारान्तरवर्जनम् ॥

इत्यनुगृहीतम् । अत्रायं पूर्वपक्षः—उदाहृतश्रीसूक्तौ तत्क्रतुन्यायः उपास्यतावच्छेदकगुणायोगव्यवच्छेदफलक इति प्रतीयते, श्रीभाष्ये तु उपास्यतावच्छेदकान्यगुणानां प्राप्तिरूपो योऽन्ययोगः तद्व्यवच्छेद्य एव तत्क्रतुन्यायावसेय इति

प्रतीयते । तथाहि—एक आत्मनः शरीरे भावादिति सूत्रे यथा स्वर्गादिफलार्थिनां ज्ञातृत्वाद्याकारमन्तरेण फलानुभवदशायां यादृशरूपप्राप्तिः तादृशरूपमुपायानुष्ठानसमये नानुसन्धातव्यम् ।

End:

इति सारास्वादिनी । एवं च सत्संप्रदायसिद्धमहाप्राज्ञाचार्यसकाशलब्धसकलभाष्यार्थाचार्यपादनिबन्धनस्थाया उपासितगुणादेर्येत्यादि श्रीसूक्तेर्न श्रीभाष्यविरोध इति सर्वं रमणीयम् ।

सारासारविवेकेनिश्लोकोक्तगुणशालिनः ।
श्रीभाष्याद्यर्थरसिकास्सन्तीत्येषा कृतिः कृता ॥
श्रीश्रीवासमुनीन्द्राङ्घ्रिध्यानसंशुद्धबुद्धिना ।
यतिना पादुकासेविलक्ष्मणाख्येन सन्मुदे ॥

R. No. **2119.**

Palm-leaf. $16\frac{3}{4} \times 1\frac{5}{8}$ inches. Foll. 208. Lines, 8 in a page. Grantha. Good.

Purchased in 1916-17 from M.R.Ry. V. R. T. Tātācāriyār of Paṭṭukōṭṭa, Tanjore district.

Fol. 1*a* contains the names of the work and of the author, and foll. 1*b* and 2 are left blank.

(*a*) **न्यायसिद्धाञ्जनव्याख्या.**

NYĀYASIDDHĀÑJANAVYĀKHYĀ.

Foll. 3*a*—189*b*. Foll. 117*b*, 151*b* and 163*b* are left blank.

By Raṅgarāmānujamuni Same work as that described under Nos. 4921 and 4922 of the D.C.S. MSS., Vol. X.

Contains five Paricchēdas only.

(*b*) वेदान्तविषयः.

VĒDĀNTAVIṢAYAḤ.

Foll. 190*a*—208*b*.

Apparently a commentary on some work in Vēdānta.

Wants the beginning and the end.

Beginning:

भवेदित्यर्थः । तथाभूतेति . . . . घातानुवृत्तिरहितेत्यर्थे निरन्वयस . . . . . . वादिसिद्धेतिशेषः ।

* * * *

सत्त्वे सत्त्वेऽपीति । पक्षचतुष्टयमिति । अथ नैयायिकपक्षः सिद्धान्तिपक्षः, साङ्ख्यपक्षः बौद्धपक्षश्चेति । ननु कार्यकारणभावमनभ्युपगच्छता कार्येण कारणोत्पत्त्यापादनमनुपपन्नमित्यत्राह—लोकेति । जायत इत्यस्य घटपदतुल्यार्थत्वे ।

End:

इदं कार्यमिदं कारणमिति वैलक्षण्याभावेन द्वयोरप्यविशेषापत्तिः । पूर्वभावित्वपश्चाद्भावित्वघटितकार्यत्वकारणत्वयोरेकैकस्मिन्नवस्थाने विरोधापत्तिः । द्वयोरपि विरुद्धधर्मा(ध्य)स्तत्वेन प्रत्येकं.

R No **2120.**

Palm-leaf. 15½ × 1½ inches. Foll. 42. Lines, 8 in a page. Grantha. Good.

Purchased in 1916-17 from M.R.Ry. V. R. T. Tātācārya of Paṭṭukōṭṭa, Tanjore district.

सिद्धान्तचिन्तामणिः.

SIDDHĀNTACINTĀMAṆIḤ.

A treatise laying down in accordance with the Viśiṣṭādvaitavēdānta that Brahman is the material as well as the efficient cause of the universe This work seems to be also called Upādānatvasamarthanam. By Śrīnivāsārya, pupil of his elder brother Aṇṇayārya and disciple of Kauṇḍinya Śrīnivāsa, from whom the author learnt the Śrībhāṣya. He was the son of Lakṣmāmbā and Śrīśaila Śrīnivāsatātārya of Śaṭhamarṣaṇagōtra.

Complete.

Beginning:

ध्येयं सतां सर्वपदाभिधेयं मेयं श्रुतीनामपि भागधेयम् ।
सन्त्यक्तहेयं चिदचित्त्वकायं ब्रह्माद्वितीयं प्रणमाम्यमेयम् ॥

यतिपतिमानमामि निगमान्तगुरुं प्रणमा-
म्यहरहराश्रये मम पितामहमण्णगुरुम् ।
पितरमभिप्रणौमि मम भाष्यगुरून् कमला-
निलयमखीश्वरान् सकरुणाभरणान् कलये ॥

अग्रजचरणानुग्रहजाग्रदशेषप्रशस्तशास्त्रगतिः ।
वेदान्तस्य रहस्यं विदुषां प्रीत्यै प्रकाशये किञ्चित्

सिद्धान्तचिन्तामनुभूय भूयस्सैद्धान्तिकं वर्त्म न ये विदन्ति ।
सिद्धान्तचिन्तामणिमेतमादावादाय ते तत्त्वपदं विदन्तु ॥

इह खलु भगवान् बादरायणो मुनिरौपनिषदः पुरुष इत्यादिश्रौतासाधारणनिर्देशैः वेदान्तवेद्यतयावगतं परं ब्रह्म अथातो ब्रह्मजिज्ञासेति जिज्ञास्यतया प्रतिज्ञाय तदवच्छेदकापरिचये तस्य दुरवगमत्वात् तदवगमाय तद्विजिज्ञासस्वेति श्रुत्या निर्दिष्टप्रतिनिर्देशकेन तच्छब्देन यतो वा इमानि भूतानि जायन्त इत्यादिपूर्ववाक्यप्रतिपन्नस्याभिन्ननिमित्तोपादानत्वरूपकारणत्वस्यैव जिज्ञास्यतावच्छेदकताप्रतिपत्तेरिहापि तदेव तदवच्छेदकं दर्शयितुं जन्माद्यस्य यत इत्यसूत्रयत् । अन्यथा अथातो धर्मजिज्ञासा, चोदनालक्षणोऽर्थो धर्म इतिवदथातो ब्रह्मजिज्ञासा, जगज्जन्मादिकारणं ब्रह्मेत्येव निरदेक्ष्यत । अतएव कारणं तु ध्येय इत्यथर्वशिखायास्तदेव ध्येयतावच्छेदकमवगम्यते ।

End:

नराज्जातानि तत्त्वानि नाराणीति ततो विदुः ।
तान्येव चायनं यस्य तेन नारायणः स्मृतः ॥

इत्यादिस्ववचनावगमितसर्वोपादानत्वादिनिमित्तकनारायणादिशब्दव्यपदेश इत्यादिकं सूक्ष्मदृष्ट्यावधातव्यम् । एवमन्यान्यपि प्रमाणानि भाष्यविद्भिरनुसन्धेयानीति ब्रह्म जगतो निमित्तमुपादानं चेति प्रामाणिकः पन्था इति सर्वमवदातम् ॥

अभिमतसकलार्थानर्थितृभ्यो ददद्भ्यः
किमविदितमिहास्ति प्रस्तुतं वस्तथापि ।
सकलसुजनबन्धौ सत्यषाड्गुण्यसिन्धौ
भगवति भर एव प्रापितो वाग्भरेण ॥
निगमशिखरक्रीडत्क्रीडानिगूढनिजाशयाः
विविधकथकोत्कण्ठालुण्टाकपाकवचोभराः ।
यतिपतिमतश्रद्धानिर्धारणैकधुरन्धराः
स्खलितमिह नः क्षन्तुं सन्तो भवन्तु दयामयाः ॥
कौण्डिन्यश्रीनिवासाध्वरिवरकृपयाप्यप्रजानुग्रहेण
श्रावंश्रावं हि भूयो यतिपतिवचसां भावमिष्टानुभावम् ।
शुद्धं सिद्धान्तचिन्तामणिममुमतनोच्छ्रीनिवासो विलासादेवं गृह्णन्तु सन्तः प्रतिकथकमतच्छेदमोदाय भूयः ॥

श्रीशैलान्वयमौलिमण्डनमणिः श्रीतातयार्याग्रणीः
लक्ष्माम्बा च सहाण्णयार्यमखिना प्रासूत यं सादरम् ।
तेन श्रीनिधिनामकेन विदुषा सिद्धान्तचिन्तामणिः
क्लृप्तो लुप्तपरोक्त(युक्ति)निकरो भूयात्सतां प्रीतये ॥

Colophon:

इति श्रीशठमर्षणकुलतिलकवेदान्तविद्यानिषद्यायितहृदयश्रीनिवासतातार्यनन्दनेन लक्ष्माम्बागर्भशुक्तिमुक्ताफलेन कौण्डिन्यश्रीनिवासदीक्षितकटाक्षवीक्षितश्रीमद्भाष्यतत्त्वार्थेन निजाग्रजाण्णयार्यदीक्षितानुग्रहलब्धसद्बुद्धिना प्रतिदिनप्रबन्धनिर्माणधुरन्धरेण श्रीनिवासार्येण विरचितं सिद्धान्तचिन्तामणिर्नाम प्रकरणं समाप्तम् ॥

R. No. **2121.**

Palm-leaf. 17 × 1½ inches. Foll. 43. Lines, 6 in a page. Grantha. Good.

Purchased in 1916-17 from M.R.Ry. V. R. T. Tātācārya of Paṭṭukōṭṭa, Tanjore district.

(*a*) जन्माष्टमीनिर्णयः.

JANMĀṢṬAMINIRṆAYAḤ.

Foll. 1*a*—21*a*. Foll. 21*b*—24*b* are left blank.

In fol. 24*a* it is stated that there is an adverse criticism of the work of Kurucci Raṅgācārya referring probably to the work described here.

Similar to the work described under No. 3117 of the D.C.S. MSS., Vol. VI By Raṅgārya of Ilayavilli family and son of Vēṅkaṭadēśika. The author salutes in the beginning Śrīnivāsayōgin and Vēdāntarāghavayōgin.

Complete.

Beginning:

कवेरतनयातटे विहृतिशालिनः कान्तया
कवेः कलिजितस्सुधीभवदभिख्यया भास्वतः ।
भजे भवभयापहं भगवतः पदाम्भोरुहं
भवाम्बुजभवादिमामरसभाजितं सर्वदा ॥
अजायमानस्य जगत्पतेर्हरेर्जन्माष्टमी या प्रथमा व्रतानाम् ।
प्रपञ्चयंस्तत्र परोदितानां प्रपञ्चमञ्चामि सुधीप्रपञ्चम् ॥

श्रीमल्लक्ष्मणसंयमीन्द्रनिगमान्तार्यावतारौ नवौ
श्रीमच्छ्रीनिधिवेदमौलिरघुराड्योगिप्रबर्हौ सदा ।
ध्यात्वा वेङ्कटदेशीकेन्द्रतनयः श्रीबालधन्व्यन्वयो
रङ्गार्यो रचयत्यमुं विमलधीः सत्तर्कवाचस्पतिः ॥
श्रीमता भगवता गीताचार्येण—
जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥

इति भगवदवताररहस्यनिश्चयस्य मोक्षसाधनत्वं प्रत्यज्ञायि । तन्निश्चयत्वमवतारकालनियतसाधारणमिति तदवतारकालतत्त्वं सकलपुरुषार्थसाधनसमाराधनाङ्गमत्र विविच्यते । तत्र सर्वानुष्ठानातिशयात् जन्माष्टमी प्रथमं निरूप्यते सिंहमासीयकृष्णाष्टमी जन्माष्टमी ।

तथा भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे ।
अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः ॥

इति कल्पतरौ मात्स्योक्तेः ।

नारदीये च—

उपोष्य जन्मचिह्नानि कुर्याज्जागरणं तु यः ।
अर्धरात्रयुताष्टम्यां सोऽश्वमेधफलं लभेत् ॥

इत्यभिधानात् ।

* * * *

न च दिनद्वये अष्टमीसत्त्वेऽप्येकत्रैव जन्माष्टमीव्यवहारानुपपत्तिरिति वाच्यम्, व्यवहार्यतावच्छेदकस्य तदव्यावृत्तत्वात् । अत्र सप्तम्यादिवेधशून्यत्वघटितम् । न च,

सप्तमीसहिताष्टम्यां निशीथे रोहिणी यदि ।
तत्रोपवासं कुर्वीत तिथिभान्ते च पारणम् ॥

इति वचनात् सप्तमीयुक्ताष्टम्या अपि जन्माष्टमीत्वात् तत्र निरुक्तरूपस्याभावादसङ्गतिरिति वाच्यम्, रोहिणीशून्यत्वस्य सप्तमीविशेषणत्वाददोषात् ।

End:

यदि चाष्टम्यां सूर्योदये भरणी उत्तरं च कृत्तिकाः तत्रातिप्रसङ्ग इति मन्यते तदा निरवच्छिन्नविशेषणतासम्बन्धेन तादृशात्यन्ताभाववद्दिनवृत्तित्व-

विशिष्टाष्टमीत्वं तदिति ध्येयम् । प्रतियोगिता कालिकविशेषसंसर्गावच्छिन्ना बोध्या । बुधवारादियोगनिबन्धनविद्धाग्रहणवचनानां जयन्तीपरत्वात् नात्र कश्चिद्विशेषः कृतं पल्लवितेन ।

(*b*) जन्माष्टमीनिर्णयः.

JANMĀṢṬAMĪNIRṆAYAḤ.

Foll. 25*a*—43*b*.

Same work as the above.

Complete.

R. No. **2122.**

Palm-leaf. 16¾ × 1½ inches. Foll. 81. Lines, 10 in a page. Grantha. Good.

Purchased in 1916-17 from M.R.Ry. V. R. T. Tātācārya of Paṭṭukōṭṭa, Tanjore district.

(*a*) यज्ञोपवीतप्रतिष्ठाप्रयोगः.

YAJÑŌPAVĪTAPRATIṢṬĀPRAYŌGAḤ.

Foll. 1*a*—?*b*.

On the consecration of the Yajñōpavīta, the sacred string, with which the twice-born are invested.

Complete.

Beginning:

स्वाध्याययोग्ये काले द्विराचान्तः श्रीपतिमन्दिरादौ पुण्यदशे दर्भेषु प्राङ्मुखः आसीनः स्वाध्यायदिने शुचिकार्पासनिर्मितं सूत्रं प्रणवेनाभिमन्त्र्य, आपो वेत्यभिमन्त्रिताभिरद्भिः सिक्त्वा प्रणवं सप्तवारं जपित्वा स्वनाभिपर्यन्तं यावता भवेत्तावत्सूत्रमच्छिन्न . . . . . प्रथमव्याहृत्या पारिमाण्डल्येन दक्षिणहस्ते गृहीत्वा, द्वितीयव्याहृत्या द्वितीयं तृतीयव्याहृत्या तृतीयं च सूत्रं गृहीत्वा प्रणवव्याहृतीभिः प्रक्षाल्य कूर्चोपरि निधाय ।

End:

सूत्रं स्पृशन् अष्टोत्तरशतकृत्वा गायत्रीं दशकृत्वो वा यथाशक्ति जपित्वा कृतं कर्म भगवते समर्पयेत् । त्रिष्टुप् छन्दः । प्राचीनयज्ञोपवीतविसर्जनसमये तत्रावाहितान् नवतन्त्वादिदेवान् यथास्थानमुद्वासयामीति ।

(*b*) आह्निकम्

ĀHNIKAM.

Foll. 3*a*—75*a*. Fol. 17*b* and foll. 75*b* to 81 are left blank.

On the daily duties of the twice-born classes especially of the Brahmans.

Incomplete.

Beginning:

अथेज्योपयुक्तविशेषवचनानि कानिचित् प्रदर्श्य लिख्यन्ते । भरद्वाजः—

अर्चायामधिकप्रीतिरेकान्ते हरिमर्चयेत् ।
तदभावेऽग्निहृत्सूर्यभूम्यम्बुगगनादिकम् ॥
यस्य गेहेऽन्यदेवार्चा व्यक्तो वा न जनार्दन ।
तस्यान्नं नैव भोक्तव्यमपि क्रतुसहस्रिणः ॥

भारते—

ब्राह्मणानां हितायैव प्रादुर्भावाः कृता मया ।
प्रादुर्भावाकृतिः काचिदर्चनीया जनाधिप ॥

* * * *

अथर्वणवेदे —

ब्राह्मणोऽकृत्रिमं देवं पूजयेत्, स सालग्रामस्तस्योदकपानेनापोऽशनं यथा सोमपाने ।

* * * *

श्रीसात्त्वते—

व्यूहचतुष्टयस्य षट्त्रिंशद्विभवानां च पृथक्पृथगर्चनोक्तेरनेकबिम्बसत्त्वे पृथक् पृथगेवार्चनं कार्यम् । ध्रुवोत्सवादिबेराणां पृथगर्चनस्य प्रसिद्धत्वाच्च ॥

End:

इतीन्द्रादिदेवतान्तरशरीरकपरमात्मयाजिनामपि वैष्णवत्वेन कथनात् तेषामपि प्रतिष्ठादिषु विनियोगस्य पूर्वमुक्तत्वात् तेषाञ्च प्राणाहुतिमत्त्वात् तान् वैष्णवानधिकृत्य भगवत्समाराधनाष्टमाङ्गप्रचिन्तने प्राणाहुतेः प्रसङ्गोऽस्त्येव । तथा च पारमेश्वरेऽनुयागविधौ ततस्तु शेषमादायेत्युपक्रम्य,

त्रयीधर्मेण संयुक्ता आमूलाद्भगवन्मयाः ।

* * * *

बाह्याभ्यन्तरतुल्यानां श्रद्धासंयमसेविनाम् ।
नारायणैकनिष्ठानां ये हि जाता महाकुले ॥

R No. 2123.

Palm-leaf. 17⅜ × 1½ inches. Foll. 70. Lines, 7 in a page. Grantha. Good.

Purchased in 1916-17 from M R.Ry. V. R. T. Tātācārya of Paṭṭukōṭṭa, Tanjore district.

(*a*) श्रीनिवासमुनियात्राविलासचम्पूः.

ŚRĪNIVĀSAMUNIYĀTRĀVILĀSACAMPŪḤ.

Foll. 1*a*—47*b*. Foll. 48—50 are left blank.

A work in prose and verse describing the life and career of Śrīnivāsamuni, a Śrī Vaiṣṇava teacher belonging to what is known as the Munitraya line of teachers. The author, Gōvindadāsa, son of Kṛṣṇavidvat of Kāśyapagōtra and disciple of Śrīnivāsamuni, salutes in the beginning a number of Śrī-Vaiṣṇava teachers, viz., Nāthamuni, Rāmamiśra, Yāmunācārya, Yatirāja, Vēdāntadēśika, Raṅgarāmānujamuni, Vēdāntarāmānujaguru, Gōpālasūri, Vēdāntarāmānujamuni, Kastūriraṅgasūri. The author's Guru, Śrīnivāsamuni, who lived in Srirangam was himself the disciple of Vēdāntarāmānujayati whose Guru was the famous Gōpāladēśika that lived in Kumbakōṇam.

Complete.

Beginning:

श्रेयो भूयः प्रदेयाद्दयिततमरमालिङ्गितो रङ्गधुर्य-
श्चूडाकल्पाङ्घ्रिपद्मश्रुतियुवतिमणेर्दैवतं देवतानाम् ।
रामादीनां च नानाभुवनजननकृज्जन्मभूनाभिदेशः
शेषाहिद्वेषिशेषाशनविजयमुखाशेषसूरीन्द्रवन्द्यः ॥

अपिच—

श्रीमान् कौमारकेलीकृतमुनिसवनोद्दामभीमान्तराय-
प्रेमायामावतीर्णप्रतिभटविजयक्षमकामो जगत्याः ।
रामो नामावशेषीकृतदशवदनस्थेमभूमा दयालुः
श्यामः सोमाननो मामवतु शुभगुणस्तोमधाम त्रिधामा ॥

* * * *

सरलवकुलधाम्ने शान्तिशुद्धान्तसीम्ने
शठरिपुमुनिनाम्ने सद्गुरूणां ललाम्ने ।

सुगुणनिवहधाम्ने स्वान्तरङ्गत्रिधाम्ने
नम इनशतधाम्ने नाथविख्यातभूम्ने ॥
अष्टाङ्गयोगसमवाप्तपराङ्कुशोप-
दिष्टागमाञ्चलयुगाय नमोऽस्तु भूयः ।
शिष्टाम्बुजाक्षमुखरक्षितसम्प्रदाय-
हृष्टाय नाथमुनये यमिनां वराय ॥
राममिश्ररुचिरेक्षणश्रियो भूमतस्तृणितराज्यसम्पदे ।
सोममौलिमतदुर्मतच्छिदे यामुनाय मुनये नमो नमः ॥
करुणारसपरिपूर्णं कलये यतिराजदेशिकं पूर्णम् ।
येन मनः परिपूर्णं विश्वसृजो विरचितं हरेस्तूर्णम् ॥
रामानुजाय मुनये करवै तस्मै नमांसि भूयांसि ।
आवहदशेषशेषी शेषाद्रीशोऽपि यस्य शेषत्वम् ॥
क्रीडानिर्भिण्णतत्तद्विमतकथकदिग्दन्तिदीव्यद्यशस्त-
त्ताद्दृङ्मुक्तासरालङ्कृतविमलफणीन्द्रांशसिद्धान्तलक्ष्मीः ।
दद्यात् ब्रह्मादिसेव्या फणिधरणिधराधीशमूर्धाभिषिक्ता
तद्घण्टाम्नायचूडागुरुरुचिरपदे निस्तुलान् वाग्विलासान् ॥
दिव्या पद्मेशजाताधिकरसमहितानल्पपुण्यक्षमाभृ-
द्धर्येणात्यन्तशुद्धा परमहिमवता हन्त तन्तन्यमाना ।
दीव्यच्चक्राब्जहृद्या स्वयमुपनिषदां भाष्यकर्तुः पुनीते
दीनान् श्रीरङ्गरामानुजयतिनृपतेः श्रीकृपास्वर्धुनी नः ॥
वचोजालैः सन्ध्यानटदमृतरोचिःशिखंजटा-
तटिल्लोलद्गङ्गापतदतुलकल्लोलतुलितैः ।
प्रतिक्षिप्तक्षीबप्रतिकथकदृप्तिर्विजयतां
यतिक्षीणीन्द्रांशः श्रुतिशिखररामानुजगुरुः ॥
तत्ताद्दग्वादिहंसाम्बुदकुलतिलकः शर्वगुर्वर्हतादि-
प्रोद्यद्दुर्वादिगर्वानलनवजलदोल्लासकृद्वाग्विलासः ।
जीयात् गोपालसूरिः प्रवरगुणगणानल्पशीलानुभावः
कल्पद्रुः संश्रितानां प्रणतपरमहंसावतंसाङ्घ्रिपद्मः ॥

श्रीमद्गोपालसूरिप्रवरगुरुकृपारूपदामोच्चलक्ष्मी-
मन्थानोल्लासभूम्ना मथितनिगमवागन्तदुग्धाम्बुराशिः ।
अत्रैवात्मोपलब्धामृतमपि वितरन्नानतानां जनानां
भूयाद्वेदान्तरामानुजयतिनृपतिः श्रेयसे भूयसे नः ॥
सत्त्वोल्लास्यमलानुकूलभुवना सत्तीर्थसार्थादृता
संसाराधिकभीमसागरसमुत्तारावतारादरा ।
अस्मान् विष्णुपदाश्रयप्रणयिनी श्रीवासरामानुज-
श्रीयोगीन्द्रकृपारसामरसरिद्धारा पुनीततराम् ॥
अल्पासारजडाशयानपि परं सत्तीर्थयन्ती क्षणात्
मुक्तानां जननी पवित्रयति मां हंसद्विजेन्द्राश्रया ।
पुण्योज्जीवनदा निराकृतभवा सूर्यात्मजाताञ्चिता
श्रीश्रीवासयतीन्द्रदेशिककृपारवर्लोककल्लोलिनी ॥
गोपालाय नमस्सद्गुरवे तत्सम्प्रदायधुर्याभ्याम् ।
निगमावतंसरामानुजमुनिकस्तूरिरङ्गसूरिभ्याम् ॥
अस्तु स्वस्तिकरः समस्तविमतश्शस्तस्समस्तैर्गुणैः
न्यस्तात्मीयभरः श्रियः प्रियहिते निस्तारयन् न्यासतः ।
विस्तीर्णे दुरितार्णवे निपततस्त्रस्तान्तरान् सन्ततं
निस्तन्द्रश्श्रुतिमस्तकप्रवचने कस्तूरिरङ्गो गुरुः ॥
साक्षाद्रमापतिरुपेन्द्रतनुर्गरुत्मान् पृथ्वीसुरप्रभृतयो यदनन्यगोत्राः ।
तत्तादृगप्रतिमसद्गुरुवीक्षितस्तद्दृश्यस्तनोति कृतिमद्भुतगद्यपद्याम् ॥
पत्युर्यत्युत्तमानां जगदनघगुरोः श्रीनिवासाह्वयस्य
स्तोत्रं यात्राविलासं रचयति विभुना केनचिद्भक्तिभूम्ना ।
विख्यातानन्तविद्वत्प्रवरपरिषदां प्रार्थितानामनुज्ञां
भक्त्या लक्ष्मीशमालामिव नमति वहन् मूर्ध्नि गोविन्ददासः ॥
मदुक्तिरतिबालिकानवगतार्थशब्दादिका
स्खलन्त्यपि पदेपदे दृढदयावलम्बैधते ।
पतञ्जलिवचस्सरित्पतिनिरन्तरालिङ्गनो-
ल्लसत्फणितिजाह्नवीहिमवताममीषां सताम् ॥

आजन्मसद्द्विजविनिर्जितराजराजराजाधिराजसुसमृद्धवणिक्समाजैः ।
तेजस्विनीतरजनैरपि शार्ङ्गधन्वराजन्वती जगति राजते राजधानी ॥
श्रीकुम्भघोणनगरी निखिलजनानन्ददायिनी पुण्या ।
अलकामधरयति पुरीमनुकलमपि सकलसम्पदुल्लासैः ॥

यत्र—सकलजगदुदयलयविभवमयलीलेन श्रुतिविततिमणिविततिचिकुरभरकुसुमसमविमलनखजालेन परममपि पदमपहाय हेमतामरससरोवरपरिसरे हेमर्षिसुतया नमदवनकल्पलतया कोमललतया सह विहृतम् ।

* * * *

परिसरविसृमरकवेरतनूजाशिशिरसमीरमनोहरे तत्र दिव्यनगरे—

श्रीमद्वेङ्कटनाथदेशिकमणि स्वेन प्रतिष्ठापिता-
मुद्धर्तुं पदवीं स्वदेशिककृपाधीनस्तदीयान्वये ।
आविर्भूय विवर्धयन्नधिगतं सत्संप्रदायं बभौ
कोऽपि श्रुत्यवतंसलक्ष्मणमुनेर्गोपालसद्देशिकः ॥

त्रय्यन्तार्थान्निगूढान् शठरिपुभणितिव्याक्रियाषट्सहस्री-
व्याख्यानादिप्रबन्धैः प्रपदनविभवोल्लासिभिर्दर्शयन्तम् ।
लक्ष्मीलीलारविन्दोदरमधुलहरीसारमाधुर्यधुर्यं
ध्यायन् वेदान्तरामानुजयतिपतिमध्यास्त गोपालसूरिः ॥

संन्यासो जातरूपो निरवधिकमहानन्दसन्दोहहेतु-
र्वर्णेनाद्येन हीनः पुनरयमथवा निर्गताद्यद्वितीयः ।
ख्यातः प्राचीनवाचां शिरसि मुररिपुर्यस्समुत्प्रेक्ष्यते स
श्रीमद्वेदान्तरामानुजमुनिरभजत्कोऽपि गोपालसूरिम् ॥

परावरविचारतो नियतरङ्गनीतायुषं
यतीश्वरमतश्रियः प्रथितभागधेयाकृतिम् ।
रमावसतिलक्ष्मणस्सुचिरक्लृप्तशुश्रूषणः
यतीश्वरमशिश्रियच्छ्रुतिकिरीटरामानुजम् ॥

क्षित्यन्तं चरतोऽपि मे चिरतरं गत्यन्तराभाव इ-
त्यत्यन्तावनते(तो)विशुद्धचरिते(तः)श्रुत्यन्तरङ्गाशयम् ।
श्रुत्यन्तप्रतिपादनैकनिरतं श्रुत्यन्तसूरिप्रभं
नित्यं संप्रणनाम संयमिपतिः श्रुत्यन्तरामानुजम् ॥

श्रीमद्वेदवतंसदेशिकगुरोर्वंशावतंसात्ततः
प्राप्तं सद्गुरुसम्प्रदायमनघं सुष्ठु प्रतिष्ठापयन् ।
सर्वत्रोपदिशन् महात्मनि मुनौ श्रीवासरामानुजे
स्वांशेनानुविवेश संयमिपतिः श्रत्यन्तरामानुजः ॥
नाथप्रवृत्तमथ यामुनदर्शितं श्रीरामानुजेन परिवर्धितमद्वितीयम् ।
पद्मालयाग्र दययोपदिदेश कस्मैचिद्योगिने स च मुनित्रयसम्प्रदायम् ॥
तेन श्रीनिधिलक्ष्मणेन यमिनां राज्ञा प्रतिष्ठापितः
तुङ्गे सद्गुरुसम्प्रदायशिखरिण्यन्तः प्रविश्यैव तम् ।
भूयो वर्धयता सपत्नजिदसावासेतुहेमाचलं
जीयात् कोटिसहस्रभानुसदृशः श्रीश्रीनिवासो गुरुः ॥

स च रमानिवासो नाम संयमिपुरोगमः श्रीरङ्गाधिराजनिरवधिविभवनिरीक्षणानुक्षणोदित्वरत्वरः कुलशालिना राजमार्गेण प्रस्थितः ॥

* * * *

श्रीनिवासमूर्तिमिव सालग्रामसरस्स्फुरन्तीं करिणीमिव पुन्नागसेविनामखिलजगन्मङ्गलकरीं रङ्गनगरीमगाहत ।

* * * *

Colophon :

इति काश्यपकुलतिलकश्रीकृष्णविद्वन्मणीन्द्रनन्दनेन श्रीनिवाससंयमिपुरन्दरचरणारविन्दवन्दनोपलब्धवाग्विलासेन गोविन्ददासेन विरचिते यात्राविलासे चम्पुप्रबन्धे प्रथमोल्लासः ॥

End :

चित्ते सन्ततमाविरस्तु शिखया युक्तस्त्रिदण्डान्वितः
काषायांशुकयज्ञसूत्रतुलसीपद्माक्षमालाधरः ।
बाहाचिह्नितशङ्खचक्रविमलस्निग्धोर्ध्वपुण्ड्रोज्ज्वलच्छात्रश्रेण्युपदेशमुद्रितकरः श्रीश्रीनिवासो गुरुः ॥
कुमारिलादिदुर्वचोऽभिमानमूलघातिने
शमाद्यलङ्कृताय निस्समाधिकात्मतेजसे ।
रमानिवासलक्ष्मणोत्तमार्यवारिधीन्दवे
रमानिवाससंयमिक्षमाधिपाय मङ्गलम् ॥

जयतु जयतु रङ्गाद्युत्तमक्षेत्रवर्गो जयतु जयतु पद्मावासनामा यतीशः ।
जयतु जयतु कालक्षेपवैखर्यमुष्य जयतु जयतु तस्य च्छात्रवर्गस्समस्तः ॥
श्रीश्रीवासयतीन्द्रसद्गुरुवरश्रीपादपद्मद्वयी-
सेवालब्धवचोविलासलसता गोविन्दनाम्नोद्धृतम् ।
दासेनैतदनर्घसंयमिगुणाम्बोधेर्वतंसं सता-
माकल्पं कृतिरत्नमस्तु महितं यात्राविलासाह्वयम् ॥

(*b*) श्रीनिवासमुनिपादरेणुस्तवः.
ŚRĪNIVĀSAMUNIPĀDAREṆUSTAVAḤ.

Foll. 51*a*—65*b*.

A eulogy on the dust falling from the feet of Śrīnivāsamuni. The author is Vēdāntadāsa, son of Vigraham Rāghava of Vaṅgipurēśa family and disciple of Śrīnivāsa.

Complete.

Beginning:

अस्तोकगुणविभूषितमागममन्त्रेषु सुप्रशस्ततमम् ।
हृद्याविरस्तु सततं व्रजवास्तव्यं परात्परं वस्तु ॥
नवजलदनीलदेहो नवनीताहारनित्यसक्तात्मा ।
निखिलनिगमावतंसो नित्यं निःश्रेयसाय मे भूयात् ॥
हत्वा पूतनया वृतात् स्वजठरे प्राणैस्सहास्याश्शिशून्
नीत्वा स्तन्यमुखात् स्वकुक्षिमघमप्येषां तदावासजम् ।
व्याहन्तुं व्रजवासिपादरजसा जग्ध्वा विहत्येव त-
न्मातुर्विस्मयदो विदारितमु ो मुग्धो हरिः पातु नः ॥

* * * *

प्रसीदन्त्वाचार्या विमलकरुणापूरितदृशो
मुनेः श्रीवासस्य प्रथितपदरेणोः स्तुतिविधौ ।
प्रयच्छन्तु स्वच्छां मम मधुरवाणीं मृदुपदां
यथा सन्तुष्येयुः सरसवचनाः साधुकवयः ॥
अगस्त्यमुनिसत्कृतैर्द्रमिडवाग्विलासैर्जग-
त्यकृत्रिमवचोगतं सकलमर्थजातं स्फुटम् ।

नगुर्य इह तान् हरेरभिनवावतारान् दश
व्रजामि शरणं मुनीनशरणश्शरण्यानहम् ॥

* * * *

स्वस्ति श्रीश्रीनिवासो दिशतु चिरतरं योगिनां सार्वभौमः
पाषण्डाद्वैतिविद्वन्मकुटतटलसद्दामपादाम्बुजातः ।
श्रीमद्रङ्गाधिनाथप्रविमलकरुणापूतदृक्पातहृष्य
च्चित्तो वृत्तोदयाढ्यान्निजपदरजसा शिष्यवर्गान् वितन्वन् ॥

End:

अयुक्तं युक्तं वा वदति वचनं भूतविवशो
गुणं वा दोषं वा न भजति यथा तत्कृतमसौ ।
तथा भक्त्याविष्टो गुरुपदरजःस्तोत्रमतनो-
दसौ दासः प्राज्ञा न गणयत दोषं गुणविदः ॥
श्रीमद्बङ्गिपुरेशवंशकलशाकूपारराकाविधुः
वाणीविग्रहराघवाह्वयगुरुः ख्यातो दिगन्तेषु यः ।
तत्सूनुः कमलानिवासयतिराट्पादाब्जरेणुस्तवं
चक्रे साधुमुदे वचः सफलयन्वेदान्तदासः कविः ॥

(*c*) श्रीनिवासमुनिपादभक्तिस्तवः.
ŚRĪNIVĀSAMUNIPĀDABHAKTISTAVAḤ.

Foll. 66*a*—70*b*.

A eulogistic poem in 70 stanzas expressing devotion to the feet of Śrīnivāsamuni: by the same author as that of the above.

Complete

Beginning:

श्रीश्रीनिवासयोगीन्द्रपदपद्मयुगं भजे ।
यद्भक्तिलेशपूताः स्युर्ज्ञानवैराग्यभूषिताः ॥
स्वगुरुपरमभक्त्या निस्तुलानन्दमग्ना
य इह गुरुवरेण्यास्सर्वलोकैकपूज्याः ।
हरिगुरुविषयां मे देवतां भक्तिरूपां
स्तुव इह सुविशुद्धां शेमुषीं मे दिशन्ताम् ॥

* * * *

श्रीश्रीनिवासयोगीन्द्रपदपद्मयुगे परा ।
मनीषा भक्तिरूपा मे भूयो भूयः प्रवर्धताम् ॥
बहवो गुरुभक्त्यैव बह्वीस्सिद्धीः प्रपेदिरे ।
अतोऽहमपि तामेव प्रार्थये मे पुनः पुनः ॥
भक्तिर्महद्धनं येषां तेभ्योऽहं करवै नमः ।
अकिञ्चनानां संसेव्यास्त एव हि कलौ युगे ॥

* * * *

भक्ते देवि नमस्ते पाति रमेशस्त्वदाश्रितानेव ।
यद्यपि सर्वसमोऽसौ त्वदुज्झितान्हन्त दूरतस्त्यजति ॥

End:

भक्तिसप्ततिमिमामनुत्तमां भुक्तिमुक्तिफलसाधनक्षमाम् ।
सत्तमा अनुपठन्ति ये नरा उत्तमा न खलु तत्समा भुवि ॥
भक्तिस्तुतिमिमां नित्यं पठन्तु विमलाशयाः ।
यस्य देव इति प्रोक्तपरभक्त्यादिसिद्धये ॥

Colophon:

इति श्रीवाणीविग्रहराघवार्यतनूजेन श्रीश्रीनिवासमहादेशिकचरणारविन्द-मकरन्दचञ्चरीकेण वेदान्ताचार्येण विरचिता श्रीनिवासयतीन्द्रमहादेशिकचरणार-विन्दभक्तिस्तुतिस्सम्पूर्णा ॥

R. No. **2124.**

Palm-leaf. 16 × 1¾ inches. Foll 50. Lines, 7 in a page. Grantha. Good.

Purchased in 1916–17 from M R.Ry V. R T. Tātācāryar of Paṭṭu-kōṭṭa, Tanjore district.

श्रीनिवासमुनियात्राविलासचम्पु.

ŚRĪNIVĀSAMUNIYĀTRĀVILĀSACAMPUḤ.

Similar to the work described under R No. 2123(*a*). By **Śrīnivāsarāmānuja**, son of Tirumala Nallān Cakravarti Śrīnivāsa of **Śrīvatsa-gōtra.**

Complete.

Beginning:

लक्ष्म्याः प्राथमिकोपभोगरभसप्रक्रान्तसंश्लेषण-
त्रासाकृष्टहृदैकदेशनिकषद्वक्षोजविश्राणितम् ।

उन्मीलन्मृगनाभिलक्षणमिर(दं) श्रीवत्सति श्रीपतेः
यस्योरस्यनिशं ददातु परमानन्दं मुकुन्दो मम ॥
चिन्तासन्ततिरत्नसौधपटलीप्वापीनवापीतटी-
लीलाकाननकेलिलोलशुकयद्दिव्याम्बुजाताङ्घ्रिकः ।
लक्ष्मीवासमुनीन्द्रयन्मम भवाकूपारकुम्भोद्भवः
सोऽयं संप्रति बोभवीतु तमसो भङ्गाय रङ्गाधिपः ॥
लक्ष्मीवासमुनीन्द्रदेशिकमणीनामार्तिभूमाश्रिता
सा मे संसृतिदावतापशमनी नन्यात्परा देवता ।
उन्नृत्यन्मदनावरोधललनासौवर्णकर्णारिथो
युञ्जन्मञ्जुलकिङ्किणीझणझणत्कारानुकारा गिरः ॥
कर्णाटक्षितिपालमौलिपटलीकोटीरभूषायिता
यत्पादाम्बुजभव्यरेणुकणिका सेयं वरीवृत्यते ।
नल्लान् तिर्मलचक्रवर्त्यभिजनक्षीराब्धिराकाशशी
सोऽयं सम्प्रति देशिको विजयते श्रीश्रीनिवासाभिधः ॥
तस्यैतस्य तनूजनिः कविरयं श्रीवासरामानुज-
स्तत्तादृक्चरणारविन्दकरुणाकल्लोलपात्रीकृतः ।
उन्मीलन्मृदुगुम्भनारसलसत्पद्यादिहृद्यामिमां
चम्पूं संप्रति यात्रिकाविलसिनीभव्यां विधत्ते मुदा ॥
तत्तादृग्गुरुसार्वभौमचरितग्रामोऽभिरामः क्व वा
काल्पा मे धिषणा तथापि कतिचिच्चारित्रसंवर्णनात् ।
तृप्तिं यामि भृशं घनाघनविनिर्मुक्तेषु वर्षेष्वयं
द्वित्राभिः कणिकाभिरेव भजते तुष्टिं न किं चातकः ॥

* * * *

अथ कदाचित् शरणागतजनव्रजिनगहनगर्वनिर्वापणधुरीणदवहुतवहायमान-विचित्रमहिमविलसननिवसनम् ।

* * * *

लक्ष्मीनिवासमुनिशेखरदेशिकपुरन्दरं निखिलदिशाङ्गनाश्रवणशिखरशेखरायमाणकीर्तयः शङ्करमतमुखसमयसमुदयार्णवचर्वणकुम्भसम्भवायमानयतिपतिनिर्धारितसुजाताभिजातनासनाथाभिजनशालिनः धरणीगीर्वाणा निर्झरनिवहा इव

पयोनिधिं श्लोकसमवाया इव प्रतिपादनशीलं सिद्धिसन्दोहा इव नियमवन्तं विद्याविलासा इव व्यासङ्गशालिनं बृन्दारका इवारविन्दनन्दनममन्दवन्दनपूर्वमासेदुः ।

* * * *

नानादिगन्तरनिरन्तरनिर्गमिष्यदुर्वीसुपर्वमुखलोकनिषेव्यमाणः ।
नारायणस्य जननाजनितापहर्तुः प्रादुर्भविष्यति वसन्तमहोत्सवोऽपि ॥

तदाश्रितजनैस्साकमधुना मधुवैरिणः ।
मङ्गलाशासनकृते गन्तव्यं देशिकोत्तमैः ॥

इति यादवधराणिधरशिखरतिलकायमानमधुमथनसेवाहेवाकमनसां सुमनसां वचनमाकर्ण्यास्माभिरपि चिराभिलषितमिदमिति हृदि निधाय भवतामेवमास्ति चेदाशयः तथा भवत्विति प्रस्थानायारोचिष्ट स गुरुशिखामणिः ।

End:

तदापि देशिकेन्द्रोऽयं वर्षत्यपि बिडौजसि ।
नासेवतेति नैवाहो रङ्गनायकमन्वहम् ॥
श्रीभाष्यश्रीरहस्यत्रितयमुखमहाकुम्भसम्भूतिसूक्तैः
कालोन्मीलन्मधूलीमधुरिमभरितैर्यापयन् सर्वकालम् ।
भूयः प्रख्यापयंस्तत्प्रपदनकलनादुद्धरन् सर्वलोकान्
श्रीरङ्गे चान्तरङ्गे स विजनवसतिर्देशिको जेजयीति ॥
आबिभ्राणस्त्रिदण्डीं नतदुरितहरीं दीप्तकाषायवस्त्रं
मार्ताण्डो मूर्तिशाली निखिलतनुभुवां जङ्गमः पुण्यराशिः ।
प्रज्ञानैर्मल्यसीमा गुरुवरकमलावासयोगीन्द्रनामा
प्रख्याताश्चर्यभूमा स जगति भगवान् प्रीयतां वासुदेवः ॥
शय्यारसादिमृदुपाकसुशिक्षिताङ्गी तादृक्षदेशिककथामृतपानदिव्या ।
यात्राविलासमहिता मम पुत्रिकैषा श्रीरङ्गराजपदयोरधुनार्पिता सा ॥

R. No. **2125.**

Palm-leaf. 14¼ × 1½ inches. Foll. 28 Lines, 7 in a page. Grantha. Good.

Presented in 1916–17 by M.R.Ry. V. R. T. Tātācārya of Paṭṭukōṭṭa, Tanjore district.

श्रीनिवासमुनियात्राविलासचम्पुः.

ŚRĪNIVĀSAMUNIYĀTRĀVILĀSACAMPUḤ.

Same work as the above.

Breaks off in the second Ullāsa.

R. No. 2126.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 145. Lines, 20 in a page. Dēvanāgarī. Good.


Transcribed in 1916-17 from a MS. of M.R.Ry. Karra Jōgayyagāru of Āmalāpuram, Gōdāvari district.

(*a*) साहित्यकल्पद्रुमः.

SĀHITYAKALPADRUMAḤ.

Foll. 1*a*—117*a*. Foll. 117*b* and 118 are left blank.

A work in poetics and rhetoric on the topics mentioned below: by Sōmaśēkhara also called Rājaśēkhara of Gautamagōtra, an inhabitant of Sōmanāthapura, now called Pērūru, on the banks of the river Kauśikī. The author's genealogy is given thus :



The work has been partially printed up to four Stabakas, the fourth being left incomplete. This MS. contains from where the printed book leaves and continues up to the eighth Stabaka in which it breaks off. A copy of the printed book has been secured for the Library. The extracts from the beginning are given from it.

The MS. contains the following Stabakas :—

४. ध्वनिमञ्जरी. | ५. नाटकप्रकरण.

६. जयघोषण.
त्यागघोषण.
भोगावली.
बिरुदावली.
रसनिरूपण.
७. दोषनिरूपण.
८. अलङ्कारनिरूपण (incomplete).

The topics dealt with in the first three Stabakas are—

१. ग्रन्थारम्भसमर्थन. २. नायिकानायकगुणनिरूपण. ३. वाचकतदुत्पत्तिनिरूपण.

Beginning:

प्रियोपविष्टवामोरुं दशबाहुं किरीटिनम् ।
महागणपतिं वन्दे सर्वकार्यार्थसिद्धये ॥
अथ विरहरहितमव्यादखिलजगद्बीजमादिदाम्पत्यम् ।
अरुणिमधवलिमतेजःप्रसरसरित्पूरपूरिताशेषम् ॥
कुम्भौ मे कथमम्ब मूर्ध्नि गिरिजे कस्मादिमौ वक्षसि
स्तस्ते तात इमौ स्पृशत्यनुदिनं नो मामकीनौ कुतः ।
इत्येवं शिशुवक्रतुण्डवदनप्रोद्यद्गिरा सस्मितौ
देयास्तां गिरिजाशिवौ सकरुणौ श्रेयांसि भूयांसि नः ॥

* * * *

देवालयातिरुचिरे कुशिकात्मजायास्तीरे निखातमखखादिरयूपवारे ।
पेरूरुनामाभिदया दिवि राजमानं श्रीसोमनाथपुरमस्ति दिवि प्रसिद्धम् ॥
सोमनाथपुरी सेयं सोमनाथपुरीसमा ।
राजधानी द्विजेन्द्राणां राजधानीव राजते ॥
केचिच्छाङ्करयुक्तिमौक्तिकजुषा व्याख्यातपातञ्जलाः
केचित् कापिलयोगसिद्धविधयः केचित् त्रयीपाठकाः ।
भामत्युल्लसिताः परे विवरणव्याख्यानसत्कौशलाः
सर्वेऽप्यत्र वसन्ति भूसुरगणाः षड्दर्शनीवल्लभाः ॥

* * * *

कोल्लूरुसोपपदसंघटिताभिजातवंशः स गोतमसगोत्रवरो बभूव ।
तस्मिन्महामखसमर्चितरङ्गनाथः श्रीरङ्गनाथमखवानुदभूद् द्विजेन्द्रः ॥
अस्मत्पितामहपितुश्च पितामहः श्रीनारायणाख्यविबुधस्तु ततो बभूव ।
यो जैमिनेरपरमूर्तितया प्रसिद्धश्चक्रे निबन्धनमथो विधिदर्पणाख्यम् ॥

तस्यात्मजः सर्वगुणोपपन्नः श्रीविश्वनाथाभिधया प्रसिद्धः ।
काश्यां समाराध्य च विश्वनाथं लेभे सुतं सोऽपि च विश्वनाथम् ॥
परेतषड्गभेशुचा नितान्तक्रान्तान्तरङ्गे सति विश्वनाथे ।
तस्यात्मजौ द्वौ प्रबभूवतुः श्रीबलाच्युतावानकदुन्दुभेर्वा ॥
सौभ्रात्रमैत्रसुभगत्वभिषक्त्ववत्त्वैस्तौल्यं स्वयोर्मम पितामहयोः समीक्ष्य ।
तावश्विनावसहमानधियावमीवाहस्रौ पुराप्यभवतां पुनरेव दस्रौ ॥
चन्द्रशेखरसोमशेखरनामधेययुतावुभा-
वागमागमवाग्झरीहरिभक्तिमुक्तिपुरस्सरैः ।
दत्तदत्तपसर्पराट्छुकवामदेवमुखान्
जेतुमेव विचेरतुः परमात्मसात्कृतमानसौ ॥
धन्वन्तरेः प्रतिनिधी प्रथितापदेशौ स्ववैद्ययोरनुवसोर्विकृती विवर्तौ ।
नागाधिपस्य शशिभास्करयोर्द्दिरुक्ती संरेजतुर्बहुविधं पितरौ पितुर्नः ॥
कृते धन्वन्तरिर्वैद्यः त्रेतायां तु पतञ्जलिः ।
द्वापरे शन्तनुरभूत्तिष्येऽस्मिन् मत्पितामहः ॥
श्रीचन्द्रशेखरबुधस्तु निजे कलत्रे पुत्रप्रदव्रतसमर्चितलोकमित्रे ।
आर्याङ्कलालितमनेकमुखोद्गतोक्तिं भव्यं कुमारमनघं जनयांबभूव ॥

* * * *

काणादं कलयन् श्रुतीर्मुखरयन् पातञ्जलं संपिबन्
शारीरं परिशोधयन् कपिलवाग्योगान् समुज्जृम्भयन् ।
काव्यान् व्याकलयन् रसान् कबलयन् मन्त्राब्धिमुद्वेलय-
न्नाक्रीडत्यनुवासरं मम पिता श्रीवेङ्कटेशाभिधः ॥

* * * *

कोल्लूरिवंशकलशोदधिपूर्णचन्द्राच्छ्रीवेङ्कटेश्वरबुधादथ सोदमाम्बा ।
पातिव्रताभिधसुभूषणमावहन्ती सा सोमशेखरसमाख्यमजीजनन्माम् ॥
यस्य प्रसादलवलब्धसमस्तविद्यः सद्यः सुरार्यमपि मूकयति प्रसङ्गे ।
तस्यानिशं मम गुरोश्चरणारविन्दमुत्तंसयामि दृढभक्तिभरावनम्रः ॥
सद्वृत्तस्तबकोज्ज्वलः सकलिकः प्रोद्यद्गुणः संस्फुर-
द्रीतिव्रातषडङ्घ्रिझांकृतिमिलद्वृत्तिः स्फुरत्केसरः ।
द्योत्यात्मा भुवि राजशेखरमुखप्रोद्यत्कवित्वामृतः
श्रीभर्तुर्गुणसिन्धुजो विजयते साहित्यकल्पद्रुमः ॥

* * * *

काव्यं सद्विचार्यम्, दृष्टादृष्टप्रयोजनत्वात् । ननु काव्यमविचार्यम्, विषयाभावात्, प्रयोजनाभावात्, निषिद्धत्वात, पुरुषार्थपर्यवसानाभावात, तत्कर्तव्यताबोधकप्रमाणाभावाच्चेति चेत्; नाद्यः, वक्ष्यमाणलक्षणस्यैव काव्यस्य विषयत्वात् । न द्वितीयः, काव्यस्य कीर्त्यादिविविधपुरुषार्थसाधकतया तदङ्गभूतस्य विचारस्यापि प्रयोजनवत्त्वात् । अङ्गानां प्रधानफलेनैव फलवत्त्वनियमात् ।

* * * *

Colophon:

इति श्रीमत्त्रिभुवनपवित्रगोतमसगोत्रकोल्लूरिवंशकलशोदधिराकासुधाकरश्रीविङ्कटेश्वरविबुधसूनुना श्रीसोदमाम्बागर्भशुक्तिमुक्तामणिना निर्मलाचारपूतेन चतुर्दशविद्याविभूषणेन श्रीराजशेखरसंख्यावता विरचिते श्रीमद्यदुकुलतिलकयशःकर्पूरसुरभीकृते साहित्यकल्पद्रुमनामन्यलङ्कारशास्त्रे ग्रन्थारम्भसमर्थनं नाम,

* * * *

श्रीमद्राजावतंसः कविवरमृगराडक्षपाद्गोत्रशृङ्गः
सञ्जातः सोदमाम्बाकृतसुकृतफलं वेङ्कटेशार्यभाग्यम् ।
यस्तस्यार्याङ्घ्रिपद्मस्तुतिशिवशतकश्रीशचम्पूप्रणेतु
पूर्णोऽलङ्कारशास्त्रे यदुपतिचरिते कल्पभूजोऽग्रगुच्छः ॥

Beginning of the manuscript:

गुणालङ्कारव्यतिरिक्तत्वे अविमृष्टविधेयांशादिदोषवच्चारुताहेतुरपि न स्यात् ।

* * * *

Colophon:

कोल्लूरिवंशसंभूतराजशेखरधीमता ।
रचितोऽयं ध्वनिः कृष्ण भूयात्ते काहलिध्वनिः ॥

इति श्रीकृष्णयशःकर्पूरासिते साहित्यकल्पद्रुमनामन्यलङ्कारशास्त्रे ध्वनिमञ्जरी नाम चतुर्थः स्तबकः समाप्तः ॥

End:

अश्लीलम्—

व्रीडाद्यन्यतरार्थो यः स्यात्कविभिः स कीर्त्यतेऽश्लीलः ।

यथा—

धर्माभिमन्युभीमानां त्रयाणामपि मध्यमः ।
अन्तः प्रविशति द्वारं बहिर्व्यूहस्य तिष्ठतः ॥

अत्र योनिप्रजननयोरपि प्रतीतिरित्यश्लीलत्वम् ।

यथा वा—

गोविन्दसुभटः शत्रुसेनागोप्याङ्गमध्यमम् ।
प्रविश्य तेजो निस्सार्य पुनः शाम्यति नान्यथा ॥
अत्रापि तादृश्येव प्रतीतिरित्यश्लीलत्वम् ।
गोविन्दसुभटः कश्चिदपि युद्धेषु विद्विषाम् ॥
सेनाङ्गानि च सर्वाणि न निपात्य निवर्तते ।

एवं दोषान्तराणि यथासंभवमूह्यानि ॥

Colophon :

इति श्रीसाहित्यकल्पद्रुमनामन्यलङ्कारशास्त्रे दोषनिरूपणं नाम सप्तमस्तबकः संपूर्णः ॥

* * * *

अत्र भागुरिस्तु प्रथमं निर्दिष्टानां प्रश्नपूर्वकाणामर्थान्तरविषये निषेधोऽप्यनुनिर्दिष्टश्चेत् सोऽपि यथासंख्यालङ्कारः ।

यथा—

आयामश्लाघनीयं किमभिमतफलप्रापकं किं प्रियं किं
विस्तीर्णं किं स्थिरं किं विमलमथ च किं श्रूयतां श्रीनृसिंह ।
दोस्तम्भस्त्यागलीला स्मितवचनमुरो राज्यलक्ष्मीर्मनस्ते
नाहीशो न द्युशाखी न मधु न गगनं नो सुमेरुर्न चन्द्रः ॥

इति विद्याधरस्तु उदाहरणमाह । तन्नो नवीनाभिमतम्, यथासंख्यं प्रश्नप्रतिवचनयोरेव तदभिमतत्वात् ।

(*b*) अलङ्कारसंग्रहः.

ALAṄKĀRASAṄGRAHAḤ.

Foll. 119*a*—145*a*. In fol. 145*b* it is stated that the MS. was compared with the original MS. and with that of Māḍabhūṣi Kṛṣṇamācāryalugāru of Kottapalli, Gōdāvari district.

Transcribed in 1916–17 from the MS. of M.R.Ry. M. V. Śrīnivāsa-raṅgācārya of Vāḍapalli, Gōdāvari district.

By Amṛtānandayōgin. Same work as that described under No. 12794 of the D.C.S. MSS., Vol. XXII.

Complete.

R. No. **2127.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 59. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. M. V. Śrīnivāsa-raṅgācārya of Vāḍapalli, Gōdāvari district.

अद्वैतबहिष्कारः.

ADVAITABAHIṢKĀRAḤ.

A refutation of the monism of the Advaita school of the Vēdānta: by Raṅgarāja, who salutes Rāmānuja, Gōvindadēśika and Vēdāntaguru and says that he has followed their teachings.

Complete.

Beginning:

शङ्खं चक्रं पुस्तकं बोधमुद्रां बिभ्रद्दोर्भिर्हाममण्डले पुण्डरीकम् ।
अध्यासीनो हारवद्गौरमूर्तिर्वाजिग्रीवो वाञ्छितं मे विधत्ताम् ॥

जैनौ यादवभास्करौ च विदितौ बौद्धाग्रणीः शङ्करः
त्रय्यन्तार्थकदर्थने जगति ये जाग्र . . . . . ।
त्रीनेतान् शिरसि प्रहर्तुमनिशं दण्डात्रयो वैणवा
हस्ते यस्य समिन्धते स जयति श्रीमान् यतीनां पतिः ॥

गोविन्ददेशिकपदाब्जपरागपुञ्जसिद्धाञ्जनेन समुपस्कृतचक्षुषो मे ।
तन्नाममन्त्रजपयन्त्र . . . भूतं किं नाम तत्त्वमपदं भविता विमर्शे ॥

कोपोद्दीपितकुम्भसूतिरसनावारासरद्रप्सता-
मप्सु प्राप्तवतीषु सागरमयीष्वाधारशून्या भुवि ।
गङ्गाद्या निवसन्ति यत्र सरितः संप्राप्त . . . .
तद्वेदान्तगुरोः पदाम्बुजमहातीर्थे विगाहेमहि ॥

प्रणिपत्यास्मदाचार्यैस्तदादिष्टेन वर्त्मना ।
श्रीरङ्गराजेनाद्वैतबहिष्कारो वितन्यते ॥

नित्यनिरतिशयसुखसद्भावेऽपि न त . . . . क्षूणां पुरुषार्थः; किन्तु तदवच्छिन्नधर्म्यभेद एव, सुखी स्यां निर्दुःखी स्यामित्येव पामरपरीक्षकाविशेषेण कामनादर्शनात्.

* * * *

यदुक्तं नवीनैकदण्डिना— अन्तःकरणातिरिक्तोऽहमिति प्रतीयमानो जीवः परप्रतियोगिकभेदाभाववान्, चेतनत्वात्, पदार्थत्वात्, ब्रह्मवत् । विपक्षे भेदग्राहकप्रमाणाभावात् अभेदश्रुत्यप्रामाण्या. कत्वमिति । तदयुक्तम, तत्र साध्ये परप्रतियोगिकभेदाभावमात्रसाधने परस्परभिन्नेष्वपि घटेषु घटत्वावच्छिन्नप्रतियोगिताकभेदाभाववत् जीवेऽपि न्यायनये चेतनत्वपदार्थत्वाद्यवच्छिन्नपरप्रतियोगिकभेदा . . . सिद्धसाधनात् ।

End:

अतो लक्षणप्रमाणयोरभावान्नात्मनः स्वप्रकाशत्वम् । किञ्च, घटादीनां ब्रह्मभिन्नत्वे तन्नियम्यत्वादिकमेव प्रयोजकम्

* * * *

नान्योऽतोऽस्ति द्रष्टेत्यादि न भेदनिषेधपरं तथा वक्ष्यत इति नोक्तहेतूनां बाधितविषयत्वमपीति ॥

Colophon:

इति श्रीरङ्गराजविरचितः अद्वैतबहिष्कारः समाप्तः ॥

R. No. **2128.**

Paper. $10\frac{7}{8} \times 9\frac{3}{8}$ inches. Foll. 103. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R Ry. N. S. Rāmānujācārya of Nāvalpākkam, North Arcot district.

रघुनन्दनविलासः.

RAGHUNANDANAVILĀSAḤ.

A poem describing the story of the Rāmāyaṇa: by Pāṭṭrācārya, son of Śatakratu Tātācārya of Śrīśaila family.

Breaks off in the 15th Sarga.

Beginning:

श्रियं ददातु स्वयमिन्दिरापतिः कृपापरीवाहतरङ्गितेक्षणः ।
अशेषसेवार्हममेयवैभवं वहन्वपुः शेषगिरीन्द्रभूषणम् ॥

सरोजवासा सकलं समीहितं ददातु यस्या दयितस्य वक्षसि ।
अवापतुः कौस्तुभवैजयन्तिके श्रियं मणीदर्पणडोलिकामयीम् ॥
अभूदयोध्येति पुरी गरीयसी वतंसभूता वलयस्य या भुवः ।
सनातनव्योमसनामनि श्रियः पतिश्चिरं यत्र निवासमेष्यति ॥

* * * *

Colophon:

इति श्रीशैलपूर्णकुलतिलकशतक्रतुताताचार्यसूनुना श्रीपादराचार्येण विरचिते रघुनन्दनविलासनाम्नि मधुरकाव्ये प्रथमस्सर्गः ॥

End:

आलोक्याभूतपूर्वं प्रमुदितमनसः सेतुमब्धावगाधे
निर्वाणा राघवाणां प्रभुमभिषिषिचुर्व्योमगङ्गापयोभिः ।
कल्याणोदर्ककृत्या भुवि निखिलजनप्रार्थनाकल्पवृक्षा
रक्षादीक्षासुदक्षाः शुभचरितवतां किं न पूज्या महान्तः ॥

Colophon:

इति श्रीशैलपूर्णकुलतिलकशतक्रतुताताचार्यसूनुना श्रीपादराचार्येण विरचिते रघुनन्दनविलासनाम्नि मधुरकाव्ये चतुर्दशस्सर्गः ॥

पञ्चदशस्सर्गः ॥

अथ कुशलनिमित्तान्याशशान्ते निमित्ता-
न्यपि युधि विजयश्रीहेतुभूतानि पश्यन् ।
बलभिदिव हनिष्यन् शत्रुमुद्वेलमोदः
सम(भजत) पयोधेः सोऽधिवेलं सुवेलम् ॥

* * * *

प्राप्यानुज्ञामथ रघुविभोस्तस्य कल्याणभूभृत्-
सारोदञ्चत्स्वभुजमहसः शौर्यतुङ्गाः प्लवङ्गाः ।
गाहन्तोऽद्रीनहमहमिका . . . .

R. No. **2129.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 119. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Tiru Śrīnivāsavarada Tātācāriyar of Villiyambākkam, Chingleput district.

Bound in two volumes.

न्यासविद्याविजयः.

NYĀSAVIDYĀVIJAYAḤ.

A treatise in Śrī-Vaiṣṇavism written in support of the view of Vēdāntadēśika that Prapatti or complete self-surrender should be made conjointly to Lakṣmī and Nārāyaṇa by those desirous of obtaining salvation by that means. The author is Śrīnivāsa, son of Śrīraṅgarāja of Āṇḍān Śrīśaila (Tirumalaiyāṇḍān ?) family.

Contains the Adhikāras given below :—

१. विषयादिपरिशोधनाधिकार.
२. परपरिकल्पितमीमांसापरिकरभङ्गाधिकार.
३. परोक्तोपबृंहणसमर्थनभङ्गाधिकार.
४. परोक्तपूर्वभागोपबृंहणाविरोधसमर्थनभङ्गाधिकार.
५. परोक्तशारीरकविरोधभङ्गाधिकार.
६. पुरुषकारशरणागतिसमर्थनाधिकार.
७. षडङ्गयोगे श्रियः पुरुषकारत्वसमर्थनाधिकार.
८. परोक्तपुरुषकारत्वप्रमाणभङ्गाधिकार.
९. श्रियः पुरुषकारत्वसमर्थनाधिकार (incomplete).

Beginning :

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

श्रीभाष्यकारसिद्धान्तरत्नाकरसुधांशवे ।
नमो वेदान्तगुरवे दुर्मतध्वान्तभानवे ॥

श्रीरङ्गराजगुरुपुङ्गवमस्मदार्यं रामानुजोत्तरपराङ्कुशमस्य मान्यान् ।
अत्यन्तसूरियतिशेखरयामुनेयान् नाथं शठारिमपि नौम्यथ दम्पती तौ ॥

श्रीमद्वेङ्कटनाथस्य दिव्यघण्टापथे भ्रमन् ।
सदुक्तिमन्त्रैरस्माभिर्निरस्यो ब्रह्मराक्षसः ॥

हयवदनाननाब्जमधुदुग्धपयोधिसुता-
वदनसरोजगन्धमखिलागमसिन्धुसुधाम् ।
शठरिपुभाष्यकृत्प्रभृतिकल्पकशाखिफलं
श्रुतिशिखरार्यसूक्तिमनुभूय भवामि कृती ॥

अत्र खलु--

माधवः परमानन्दं त्यक्त्वा वैकुण्ठमुत्तमम् ।
स्वामिपुष्करिणीतीरे रमया सह मोदते ॥

* * *

रत्नघण्टापदेशेन श्रीमत्काञ्चीपुर्यां स्वयमेवावतीर्य पूर्वावतारफलभूतश्रीगीताशास्त्रार्थश्रीचरमश्लोकमद्यतनाधिकारिष्वतिशयितफलकं तादृशस्वाग्रजांशावतारभूतेन भगवता भाषितमपि अन्यैरुपप्लुतं पुनरनुद्यच्छङ्काङ्कुरमस्खलितानुष्ठानपर्यन्ततया प्रख्यापयितुकामः परमकारुणिकः कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रो भगवान् वेदान्तदेशिक श्रीमद्रहस्यत्रयसाराख्यं महाशास्त्रं प्रणिनाय । अत्र शास्त्रे मुमुक्षव एव अधिकारिणः, तेषां सर्वेषामपि अङ्गविधया स्वतन्त्रतया वा एतत्प्रतिपाद्यप्रपत्त्या विना मोक्षासंभवात् ।

End:

तस्मात् त्वदुक्तं पुरुषकारत्वप्रमाणादिकमनुपपन्नमेवेति सिद्धम् ॥

Colophon:

इति श्रीमदाण्डाञ्च्रीशैलवंशकलशोदधिकौस्तुभश्रीमच्छ्रीरङ्गराजमहादेशिकतनूजस्य तदेकदैवतस्य श्रीनिवासदासस्य कृतिषु न्यासविद्याविजये परोक्तपुरुषकारत्वप्रमाणभङ्गाधिकारोऽष्टमः ॥

* * * *

अत एव पुरुषकारप्रपदनापेक्षापूर्वकमुक्ताकिञ्चनपुरुषकारत्वमाचार्यत्वं चेति नार्थान्तरम्; किन्त्वेकम् । अतः कार्यदशायां भगवत उपायत्वम् ।

R. No. **2130**.

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 63. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R Ry. Mantravādi Veṅkaṭasvāmulugāru of Mañjuvarapukōṭa, Gōdāvari district.

(*a*) शिवाद्वैतनिर्णयः.

ŚIVĀDVAITANIRṆAYAḤ.

Foll. 1*a*--38*b*. Foll. 39 and 40 are left blank.

Deals with the doctrines of the Śaiva-Advaita religion as propounded by Śrīkaṇṭhācārya. By Appayadīkṣita, son of Raṅgarājādhvarin.

Wants the beginning; otherwise complete.

Beginning:

प्रतिपादयन्ति । तद्भावापत्तिर्मुक्तिरिति च ब्रह्मैव सन् ब्रह्माप्येतीति स यो ह वै तद्ब्रह्म वेद ब्रह्मैव भवतीति साधारणश्रुतिः प्रतिपादयति । अतो रूपवान् सगुणः शिवो न परं ब्रह्म, नापि तत्सादृश्यापत्तिः परममुक्तिरिति । सिद्धान्तस्तु—उक्तरूपशिव एव परं ब्रह्म, तत्सादृश्यापत्तिरेव परममुक्तिः ।

End:

अतः प्रामाणिकानां निर्विशेषस्य परब्रह्मणः तत्त्वावबोधार्थं तस्यैव साधकानुग्रहाय सविशेषरूपापन्नस्य निखिलकल्याणगुणगणदिव्यमङ्गलविग्रहविशेषविशिष्टस्य मध्यमाधिकारिकर्तव्याभेदोपासनार्थमवमाधिकारिकर्तव्यस्वस्वामिभावोपासनार्थश्च तस्य सर्वस्यापि यथावत् विविच्य प्रतिपादकं श्रीकण्ठाचार्याणामेव भाष्यमुपादेयमिति सर्वं समञ्जसम् ॥

Colophon:

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ शिवाद्वैतनिर्णयस्संपूर्णः ॥

सदाशिवपदाम्भोजन्यस्तधीरप्पदीक्षितः ।
श्रीकण्ठाभिमतं सर्वं सारमित्थं समग्रहीत् ॥

(b) तर्कामृततरङ्गिणी.

TARKĀMṚTATARAṄGIṆĪ.

Foll. 41a—63b.

Transcribed in 1916–17 from a MS. of M.R.Ry. Mantha Cinnaiya Śāstrigaru of Pantuluvāra Agrahāram, Gōdāvari district.

By Mukundabhaṭṭa, son of Anantabhaṭṭa. Same work as that described under No. 4194 of the D.C.S. MSS., Vol. VIII.

Imperfect.

The following additional stanza is found in the beginning:—

लम्बोदरपदद्वन्द्वचिन्तनाप्तमनोरथम् ।
अनन्तभट्टं मीमांसापारगं तातमाश्रये ॥

R. No. **2131.**

Paper. 10⅜ × 9⅝ inches. Foll. 150. Lines, 20 in page. **Grantha. Good.**

Transcribed in 1916–17 from a MS. of Naṇḍūri Vīrarāghavācārya of Kottakōṭa, Gōdāvari district.

Bound in two volumes.

Foll. 100*b* and 170*b* are left blank.

भागवतव्याख्या—भागवतार्थतत्त्वदीपिका.

BHĀGAVATAVYĀKHYĀ: BHĀGAVATĀRTHATATTVA-DĪPIKĀ.

By Bhāṣyakārasūri who is said to have been the pupil of his maternal uncle Tirumala Vēṅkaṭācārya. Same commentary as that described under R. Nos. 1525(*b*), 1572 and 1755 ante.

Contains the fifth Skandha incomplete and the sixth complete.

Beginning:

पूर्वस्कन्धान्ते 'वंशं प्रियव्रतस्यापि निबोध नृपसत्तम' इति मैत्रेयेण विदुरं प्रति प्रतिज्ञातम् । विदुरमैत्रेयसंवादस्य पूर्वस्कन्धेनैव निवृत्तत्वात् मैत्रेयेण प्रतिज्ञातं पञ्चमस्कन्धे श्रीशुकेन निरूप्यते । तत्र प्रथमं परीक्षित्,

'यो नारदादात्मविद्यामधिगम्य पुनर्महीम् ।
भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदम् ॥'

इति पूर्वस्कन्धान्ते प्रियव्रतस्य प्रथममात्मविद्या, ततो गृहाश्रमः, ततः सर्वसङ्गत्यागेन मोक्ष इत्युक्तम् । तत्र विस्मितः पृच्छति—प्रियव्रत इति ।

End:

तत्तृप्त्या किं फलमत आह—तुष्टा इति । उपसंहरति—राजन्निति । पुण्यं जन्म एतद्व्रतं च ते तवाभिहितः ॥

Colophon:

इति श्रीकौण्डिन्यकुलोदधिपूर्णचन्द्रवेङ्कटाचार्यसूनुना मातुलश्रीतिरुमलवेङ्कटाचार्यप्रसादप्राप्तपाण्डित्येन श्रीभाष्यकारसूरिणा विरचितायां श्रीमद्भागवतव्याख्यायां श्रीभागवतार्थतत्त्वदीपिकासमाख्यायां षष्ठस्कन्धव्याख्यायामेकोनत्रिंशोऽध्यायः । षष्ठस्कन्धव्याख्या संपूर्णा । द्विसहस्रमेते ग्रन्थाः ॥

R. No. 2132.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 142. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. V. R. T. Tātācāryar of Paṭṭukkōṭṭai, Tanjore district.

दुरूहशिक्षा.

DURŪHAŚIKṢĀ.

This work purports to establish certain doctrinal principles of Prapatti as explained by Vēdāntadēśika in his Rahasyatrayasāra and

to criticise and condemn the contrary interpretations and meaning given in the Śrīvacanabhūṣaṇamīmāṁsā. By Śrīnivāsaparakālayati whose Gurus were Śrīnivāsaguru (great grandson of Ghanagiri Śrīnivāsaguru), Varadavēdāntamuni, Varadadēśika and Vēdānta Yatirāja. The subjects dealt with herein are given in detail in the Adhikāras mentioned below.

Contains the following Adhikāras :—

॥ प्रथमः परिच्छेदः ॥

१. उपोद्घाताधिकारभङ्गः.
२. शास्त्रारम्भणाधिकारभङ्गः.
३. शास्त्रारम्भणाधिकारभङ्गः.
४. शास्त्रारम्भणाधिकारभङ्गः.
५. शास्त्रारम्भणाधिकारभङ्गः.
६. लक्ष्म्या निर्व्याजपुरुषकारत्वाधिकारभङ्गः.
७. लक्ष्मीपुरुषकारत्वस्य षडङ्गयोगनिष्ठविषयत्वाभावपराधिकारभङ्गः
८. लक्ष्मीपुरुषकारत्वस्य कुसृष्ट्या प्रामाणिकत्ववर्णनाधिकारभङ्गः.
९. लक्ष्म्युपायत्वशोधनाधिकारभङ्गः.
१०. विशेषणत्वप्रतिक्षेपकाधिकारभङ्गः.
११. लक्ष्म्या अणुत्वप्रतिपादकाधिकारभङ्गः.

॥ द्वितीयः परिच्छेदः ॥

१२. प्रपत्त्यधिकारिविशेषत्वाधिकारभङ्गः.
१३. प्रपत्तेः पापनाशकत्वाभावाधिकारभङ्गः.
१४. वात्सल्यादिगुणोपयोगाभावाधिकारभङ्गः.
१५. कृतकृत्यत्वाधिकारभङ्गः.

॥ तृतीयः परिच्छेदः ॥

१६. षडङ्गयोगस्य नैरपेक्ष्याधिकारभङ्गः.
१७. षडङ्गयोगस्य नैरपेक्ष्याधिकारभङ्गः.
१८. षडङ्गस्य निवृत्तपापाधिकारत्वाधिकारभङ्गः.
१९. षडङ्गस्य फलप्रतिक्षेपकत्वाधिकारभङ्गः.
२०. परार्थकैङ्कर्यस्य षडङ्गफलत्वाभावाधिकारभङ्गः.
२१. षडङ्गस्य फलत्वाभावोपपादकाधिकारभङ्गः.
२२. षडङ्गस्य फलत्वाभावोपपादकाधिकारभङ्गः.

२३. षडङ्गस्य फलत्वाभावोपपादकाधिकारभङ्गः.

२४. षडङ्गस्य फलत्वाभावोपपादकाधिकारभङ्गः.

॥ चतुर्थः परिच्छेदः ॥

२९. पश्चिमवर्णभागवतानां जात्यपगमप्रतिपादकाधिकारभङ्ग·

Beginning:

अस्मद्गुरूणां पङ्क्तिं साममोघहृद्वयवासिताम् ।
भजामः श्रीशपादाब्जमधुधारात्मिकां पराम् ॥
साम्राज्यं वर्धतां वादिकविसिंहस्य सद्गुरोः ।
यत्रोदितोक्तिं स्वप्नेऽपि दाक्षिणात्येभभञ्जकः ॥
रमासखस्याद्यगुरोः शङ्खचक्रादिदो गुरुः ।
व्याख्यामुद्रितहस्ताब्जो जीयाद्यतिपुरन्दरः ॥
श्रीशैलपूर्णं श्रीभाष्यकारदेशिकमाश्रये ।
जगत्प्राणोऽपि यद्दत्तजीवनोऽभूज्जगत्पतिः ॥
शास्ताऽपि गोप्ता समभूत् वक्षसि स्थितया यया ।
वृषाद्रीशस्तां शरणमशरण्यः श्रये श्रियम् ॥
सकरुणारुणफुल्लदृगुज्ज्वलं सहसितोचितदृश्यसुविस्मयम् ।
स्वविनतेषु वृषाचलवल्लभं पुरुषमेव मनो मम गाहताम् ॥
वचोभूषणमीमांसां दुरूहैकशरीरकाम् ।
शिक्षयामो लक्ष्मणार्यमतधौरेयसूक्तिभिः ॥

* * * *

तार्क्ष्ये माक्षिकवत्परोक्तय इमा वेदान्तविद्यागुरोः
सूक्तिष्वत्र विशिष्य रङ्गनिलयः साक्षी परेषामपि ।
यद्यप्येवमथापि नः कृतिरियं वेदान्तसम्राड्गुरोः
सूक्ते माक्षिकचामरप्रसृतिरित्यार्यैर्विचार्या मुहुः ॥
भीर्नो यदभिमानात्तविषयस्थितिवैभवात् ।
प्रसृतेरथमहं वन्दे तं माण्डव्यपुराधिपम् ॥

उपदेशरूपं वचनभूषणशास्त्रमेतत् वेदान्तातिरिक्तमिति तन्नो विषयादिभेदं तद्भेदे चासारमित्यादेः प्रमाणतामङ्गीकृत्य तत्र तदमानतायां भिन्नयोर्विषय-प्रयोजनयोरलाभात् नारम्भणीयं पृथगेतदिति पूर्वपक्षं तस्य नानात्वे च भिन्न-

योस्तयोर्लाभादारम्भणीयत्वसिद्धान्तं च कृतवतः अभिनवमीमांसकस्य प्रथमाधिकाररीतिरियम् ।

विषयस्सारभागोऽस्य वेदान्तात्पर इष्यते ।

* * * *

तस्मादारभ्यतां शास्त्रमिदं सविषयादिकम् ।

इति । सेयमनुपपन्ना उक्तस्सारभागो विषय इति स वेदान्तात्पर इति कोऽर्थः ॥

* * * *

Colophon :

इति दुरूहशिक्षायां लक्ष्म्या शिक्षणीयमीमांसागताणुत्वप्रतिपादकाधिवारभङ्ग एकादशः ॥

इति रहस्यत्रयसारव्याख्याकरणविख्यातवैभवघनगिरिश्रीनिवासाख्यगुरुवरकरुणाविषयेण तन्नामकतत्प्रपौत्रगुरुकरुणालब्धतत्त्वत्रयविवेकेन वरदश्रुत्यञ्चलमुनिवरपदकमलसमाश्रयणसञ्जाततत्त्वहितपुरुषार्थयाथात्म्यविज्ञानेन श्रीमद्वरददेशिककटाक्षलक्ष्यतामुपगतेन कविकथककण्ठीरवचरणयुगलविन्यस्तसमस्तभरेण श्रीनिवासपरकालयतिना वेदान्तयतिराजस्वामिशिष्येण विलिखितायां पूर्वखण्डार्थविषयकदुरूहशिक्षायां श्रीशब्दार्थारोपितपरप्रतितन्त्रार्थप्रतिक्षेपकः प्रथमः परिच्छेदः ॥

End :

इतः परग्रन्थजातनिरासयत्नस्तु निष्फलः । परेषामुपजीव्यप्रतितन्त्रार्थभङ्गस्य इयता ग्रन्थजातेन कृतत्वात्, तदुपजीवकप्रतितन्त्रार्थानामपि तत एव भग्नत्वेन पुनरपि ग्रन्थमुखेन तन्निरास कृतकरताप्रसङ्गात् । अत एव पर प्रतितन्त्रार्थेषु सर्वेष्वपि निरस्तेषु कविकथककण्ठीरवप्रकटितप्रतितन्त्रार्था एव श्रीरहस्यत्रयसारस्थाः तेजिप(ष्ठ)तमा इति सर्वं समञ्जसम् ।

त्रयीशिखरदेशिके त्रिविधतत्त्वनिर्वाहके
गुणत्रयविचित्रितप्रकृतिबन्धविध्वंसके ।
प्रपन्नजनपद्धतिप्रथनकर्तरि ब्रह्मणि
प्रसिद्धविभवे स्वतोऽभिरमतां मनो नः शुभम ॥
सर्वतन्त्रस्वतन्त्राय गुरवे श्रीमते नमः ।
यत्सूक्तयः शठारातिमुनिसूक्तिरसायनम् ॥

अथ जात्यपगमवादफलकं निकृष्टवर्णस्य प्रपन्नस्य उत्कृष्टवर्णं प्रपन्नं प्रत्यपि पावनतीर्थप्रसादत्वमित्यनुष्ठानफलोपहितं यत्परोक्तं पूज्यत्वं तन्निरस्यते ।

* * * *

धर्मविशेषज्ञानभक्त्यष्टकपरिणामप्रयोजकमनोवृत्त्यधिकरणमनस्कत्वं मानसब्राह्मण्यं त्रैवर्णिकेष्विव आधुनिकेष्वपि संभवतीति तमादाय पूज्यताप्रतिपादकप्रमाणानि प्रवृत्तानीति आधुनिकपश्चिमवर्णेषु न कथञ्चिदप्यौत्पत्तिकशारीरजात्यपगम इति ॥

Colophon:

इति दुरूहशिक्षायां द्रमिडब्रह्मसंहितामात्राध्यायिदाक्षिणात्यानामाधुनिकपाश्चिमवर्णभागवतजात्यपगमप्रतिपादकाधिकारभङ्गः पञ्चविंशः ॥

भाषाभावितभूषणेऽपि विदुषामीषत्करं भाषणं
किञ्चित् किञ्चिदपाटवेन भणितं जागर्ति मानासहम् ।
तत्तस्यानुजभाषणेऽपि च तथा तन्मात्रसारे मुधा
श्रौती पद्धतिरद्भुतापि बहुधा बाधा गताऽस्मिन् युगे ॥

R. No. **2133.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 89. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Dhanyamrāju Subbarāyuḍugāru of Śrīrāmapuram, Vizagapatam district.

श्रुतिगीता, सव्याख्या.

ŚRUTIGĪTĀ WITH COMMENTARY.

Same text as that described under No. 2470 of the D.C.S. MSS., Vol. IV, Part II, together with the commentary entitled Vākyārthabōdhinī which is probably by Śaṅkarānanda, disciple of Ānandātma Sarasvatī.

Complete.

Beginning:

सत्यज्ञानमनन्तं यत्केवलानन्दमद्वयम् ।
प्रत्यगेकरसं पूर्णं ब्रह्म तत्समुपास्महे ॥
प्रणम्य साम्बमीशानं गणनाथं सरस्वतीम् ।
क्रियते श्रुतिगीताया व्याख्या वाक्यार्थबोधिनी ॥

इह खलु परमेश्वरः स्वसृष्टमिदं विश्वं सर्वं स्वात्मन्युपहृत्य स्वशक्तिभिः सह आत्मयोगेन निद्रालुमिव स्थितं श्रीमन्नारायणं व्युत्थानसमये ऋगादयः सर्वाः श्रुतयः स्तुतिभिर्बोधयन्त्यः इह अष्टाविंशतिसंख्याकैः श्लोकैः शुद्धात्मनां मुमुक्षूणां ब्रह्मतत्त्वं बोधयन्ति । तत्राद्येन ईश्वरार्पणबुद्ध्या श्रद्धाभक्तिभ्यां बहुजन्मसमनुष्ठितपुण्यकर्मभिः शुद्धबुद्धीनां मोक्षैककामानामनादिसंसारदुःखकारणभूतामविद्यां विनाशयेति ईश्वरं प्रार्थयन्ते—

जय जय जह्यजामजित दोषगृहीतगुणां
त्वमसि यदात्मना समवरुद्धसमस्तभगः ।
अगजगदोकसामखिलशक्त्यवबोधक ते
क्वचिदजयात्मना च चरतोऽनुचरेन्निगमः ॥

हे अजित अविद्यातत्कार्यैः जेतुं स्वरूपेण अन्यथाकर्तुं स्रष्टुं वा न शक्यत इत्यजित, असङ्गचिद्रूप हे परमात्मन् जय जय सर्वोत्तमत्वेन वर्तस्व ।

End:

यत एवमतः सर्वे वेदा यत्पदमामनन्ति इति न्यायेन कर्मब्रह्मप्रतिपादिकानां सर्वासामपि श्रुतीनां साक्षात्परंपरया च निर्विशेषे चिद्घने आनन्दघने परे ब्रह्मणि समन्वय इति सिद्धमिति सर्वमनवद्यम् ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्री . . . . श्रुतिगीताव्याख्या समाप्ता ॥

R. No. 2134.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 33. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Bhagavatī Kāśinātha Sāstri of Kōṭipalli, Godāvari district.

(*a*) व्युत्पत्तिवादखण्डनम्.

VYUTPATTIVĀDAKHAṆḌANAM.

Foll. 1*a*—14*a*.

A refutation of the Vyutpattivāda which has been described under No. 4290 of the D.C.S. MSS., Vol. VIII. The author is Vēṅkāṭācārya.

Incomplete.

Beginning:

श्रीस्तनस्तबकन्यस्तकस्तूर्यध्यस्तकौस्तुभम् ।
निस्तुलोरःस्थलं बिभ्रत् वस्तु स्वस्तिकृदस्तु नः ॥

शाब्दबुद्धौ पदार्थद्वयसंसर्गः संसर्गविधया भासते । स च द्विविधः अभेदो भेदश्च । तत्र अभेदः प्रातिपदिकार्थे स्वसमानविभक्तिकस्वाव्यवहितपूर्ववृत्त्यन्यतरप्रातिपदिकोपस्थापितस्यैव भासते ।

* * * *

इति गदाधरभट्टाचार्योक्तम् । तन्न, श्वेतरक्तकपालद्वयसमवेतघटविषयकस्थले श्वेतरक्तौ घटः रूपवन्तौ घटः इत्यस्य साधुताप्रसंगात्, रूपद्वित्वविवक्षासंभवात् ॥

* * * *

Colophon:

इति वेङ्कटाचार्यकृतगदाधरीयव्युत्पत्तिवादखण्डने नामार्थाभेदान्वयव्युत्पत्तिविचारः समाप्तः ॥

End:

किञ्चैवं घञाद्यन्तसमुदायस्य रूढ्यङ्गीकारे संयोगविभागादिशब्दानां घञन्तानां संयोगत्वविभागत्वादिविशिष्टवाचकतां व्युत्पाद्य नैमित्तिकसंज्ञात्वनिराकरणं दीधितिकृतां विशुद्धमेवेति दिक् ॥

(*b*) व्युत्पत्तिवादटीका.
VYUTPATTIVĀDAṬĪKĀ.

Foll. 14*a*—33*b*.

A brief commentary on the Vyutpattivāda of Gadādhara described under No. 4290 of the D.C.S. MSS., Vol. VIII.

Incomplete.

Beginning:

शाब्दबोध इति । अत्र निरूपितत्वं सप्तम्यर्थः । तच्च सांसर्गिकविषयतारूपायां संसर्गमर्यादायामन्वेति ।

End:

तथा च एकघटानयनकाले घटावानयति चैत्र इत्यादिप्रयोगो नास्ति । पदार्थान्तरानयने उभयाद्यन्वयस्य अबाधितत्वादिति ॥

R. No. **2135.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 46. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 form a MS. of M.R.Ry. A. M. Śrīnivāsācāriyar of Agaram, Chingleput district.

अध्यात्मचिन्ता, सव्याख्या.

ADHYĀTMACINTĀ WITH COMMENTARY.

By Saumyajāmātṛmuni. The commentary is apparently by one of his disciples. Same text as that described under No. 4864 of the D.C.S. MSS, Vol. X.

Complete.

Beginning:

अस्मद्विधपरित्राणप्रेमप्रद्राणमानसम् ।
वादिकेसरिणं वन्दे सौम्यजामातरं मुनिम् ॥
नमस्त्वस्मद्गुरुभ्यः स्यात्तद्गुरुभ्यस्तथा नमः ।
परमेभ्यो गुरुभ्यश्च निखिलेभ्यो नमो नमः ॥
अध्यात्मचिन्तामणिमात्मतत्त्वप्रकाशकं तत्त्वविदां च हृद्यम् ।
अभीष्टभावप्रदमात्मधर्तुः स्वरूपकान्त्यै विदधामि नित्यम् ॥

तत्र तावन्मन्त्रत्रयादिकं व्याख्यातुकामस्सौम्यजामातृमुनिः तदुपदेष्टॄणां गुरूणां परंपरां श्रुतिस्मृतिशिष्टाचारप्राप्तां वेदादौ प्रणवमिव मन्त्रादावनुसन्धातव्यमिति नमस्कारसहितानाधुनिकान् श्रीवैष्णवान् स्वानुसन्धानव्याजेनानुशास्ते—नम इति । स चाचार्यवंशो ज्ञेयः आचार्याणामसावसावित्या भगवत्त इति श्रुतिः ।

End:

परिचिन्वन्निति, अतिमनोहरविषयलाभात् पुनः पुनर्दर्शनेऽप्यतृप्तिवत् पुनः पुनरावृत्तौ सुखातिशयो भवतीत्यर्थः ॥

सुन्दरजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसम्मग्नजन्तुसन्तारपोतकम् ॥

Colophon:

अध्यात्मचिन्ताव्याख्या समाप्तिमगमत् ॥

The date of the original MS:

विरोधिकृत्संवत्सरज्येष्ठबहुलतृतीया.

R. No. 2133.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 35. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Jayanti Jōganna-gāru of Haṁsavaram, Tuni, Gōdāvari district.

(*a*) उपरागदर्पणम्.

UPARĀGADARPAṆAM.

Foll. 1*a*—28*a*.

A treatise giving the time of the eclipses occurring in each year during the period of 1020 years extending from Śālivāhanaśaka 1429 expired (1507 A.D.) to Śaka 2449: by Tippa, son of Gauraṇa. The work consists of 17 sections, each section dealing with one cycle of 60 years. The author's father's name is given in the colophon stanza at the end of the 12th section.

Contains from the Kālayukti year of the sixth cycle of 60 years to the end of the 17th cycle.

Complete.

Beginning:

श्रावण्यां कालयुक्तौ धरणिसुतदिने स्याद्गृहीतोदयोऽयं
पादः शुक्राधिकत्वं सकल इह शनौ चापि सिद्धार्थिवर्षे ।
पादोनो रौद्रिवर्षे ग्रह इह हि तिथौ वाश्विने चाधिकत्वं
न ग्रासो दुर्मतौ सार्धपद इनदिने दुन्दुभौ मार्गदर्शे ॥

* * * *

तिप्पाज्योतिर्विदैवं त्रिभुवनमहिते कल्पितेऽनल्पभासा
षट्षष्टिः सूरिहृद्योऽगमदयमुपरागादि(मे) दर्पणेऽस्मिन् ॥

End:

ज्योतिरागमधुरेण चेतसा तिप्पनाभिधबुधेन कल्पिते ।
अत्र सप्तदशषष्टिरूपिते सोपरागमणिदर्पणे ययौ ॥
वत्सरे निधियुगाम्बुधीक्षणैः (२४४९) शाक एव गणनामिति क्रमात् ।
आश्विनः प्रभववत्सरेऽधिको न ग्रहो विभववत्सरे तथा ॥
खलानां दूषणैर्ग्रन्थमपात्रं समुपैति किम् ।
महार्हता मणेर्धूलिधूसरस्य नु हीयते ॥
खण्डयन्ति खलाः सर्वे ग्रन्थरत्नं मनीषिणाम् ।
खण्डितस्यापि नापैति चन्दनस्य सुगन्धता ॥

Colophon:

इत्युपरागदर्पणं समाप्तम् ॥

The date and the scribe's name of the original MS. are given—

सिद्धार्थिनामसंवत्सराषाढशुक्लचतुर्दशी शिङ्गराजकोण्डय्यगारिपुस्तकं दृष्ट्वा जयन्तिपापय्येन उपरागदर्पणं लिखितम् ॥

(*b*) अधिकक्षयमासनिर्णयः.

ADHIKAKṢAYAMĀSANIRṆAYAḤ.

Foll. 28*b*—35*a*. Fol. 35*b* is left blank.

On the determination of the excess and deficient months in a year. These months are considered to be unsuitable for the performance of certain auspicious ceremonies.

Complete.

Beginning:

एवमुक्तरीत्या कालाधिक्यादधिमासा उक्ताः । तत्र अधिमासा एव मलमासाः ; तेषामपि कालाधिक्यस्यैव निमित्तत्वात् । तथाच गृह्यपरिशिष्टे—मलं वदन्ति कालस्य मासं कालविदोऽधिकम् । इति । कालस्याधिकं मलं मासं कालविदो वदन्तीत्यन्वयः ।

* * * *

अथ क्षयमासस्वरूपं निरूप्यते । द्विसङ्क्रान्तिमासः क्षयाख्यः ।

End:

शार्वरिसंवत्सरादारभ्य गणनायां त्र्युत्तरषष्टिशताधिकैकसहस्रवर्षपरिमितशककालान्तरभाविनः दुर्मतिसंवत्सरस्य एकचत्वारिंशदुत्तरवर्षव्यवधानं संपद्यते । एवमेवोत्तरत्रापि संसर्पांहस्पत्यधिमासागमनं तद्व्यवधानकालपरिमाणञ्च द्रष्टव्यम् ॥

Colophon:

अधिकक्षयमासस्वरूपनिरूपणं समाप्तम् ॥

R. No. **2137.**

Paper. $10\frac{7}{8} \times 9\frac{3}{8}$ inches. Foll. 73. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Nimmaghanta Viśvapati Śāstrigāru of Ālamūru, Gōdāvari district.

आलमूरुक्षेत्रमाहात्म्यम्.

ĀLAMŪRUKṢĒTRAMĀHĀTMYAM.

Deals with the sanctity and religious importance of Ālamūrukṣētra in which there is a shrine dedicated to the worship of Śiva. This place

is eulogised as being of greater importance than Kāśī and other places. It is in the form of a dialogue between Nārada and Brahman.

Complete as found in the Brahmāṇḍapurāṇa

Beginning:

विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्यवाट्
विघ्नव्यालकुलस्य मत्तगरुडो विघ्नेभपञ्चाननः ।
विघ्नोत्तुङ्गगिरिप्रभेदनपविर्विघ्नाब्धिकुम्भोद्भवो
विघ्नाघौघघनप्रचण्डपवनो विघ्नेश्वरः पातु नः ॥

* * * *

वसिष्ठः—

नागपुष्करमाहात्म्यं वक्ष्यामि शृणु नारद ।
मयाद्य सम्यक् कथिता सर्वसंपत्करी शुभा ॥

* * * *

आलमूरुशिवक्षेत्रं श्रवणात्सर्वसिद्धिदम् ।
काश्यादिसर्वक्षेत्रेषु देहान्ते मुक्तिरुच्यते ॥
आलमूरुपुरक्षेत्रे जीवन्मुक्तिस्सदा नृणाम् ।

* * * *

Colophon:

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे आलमूरुक्षेत्रतीर्थक्षेत्रमाहात्म्यं नाम प्रथमोऽध्यायः ॥

End:

कालान्तरे कामितमोक्षदायी पठन्ति ये मुक्तिपथं प्रयान्ति ।
नागारिवैरिजनकेन सुपूजिताङ्घ्रि नागारिवैरिजनकेन सुपूजिताङ्घ्रि ॥
नागारिवैरिजनकेन सुपूजिताङ्घ्रि हे महिषासुरमर्दिनि मम देहि करावलम्बम् ।

Colophon:

आलमूरुक्षेत्रमाहात्म्यं सम्पूर्णम् ॥

R. No. **2138.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 49. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from the MS. of M.R.Ry. Garimalla Sōmayājulugāru of Kōṭipalli, Gōdāvari district.

(*a*) वासवदत्ताव्याख्या.

VĀSAVADATTĀVYĀKHYĀ.

Foll. 1*a*—29*a*. Foll. 29*b* and 30 are left blank.

Same work as that described under No. 12420 of the D.C.S MSS., Vol. XXI; but with slight difference.

Incomplete.

(*b*) रत्नत्रयपरीक्षा, सव्याख्या.

RATNATRAYAPARĪKṢĀ WITH COMMENTARY.

Foll. 31*a*—49*b*.

Transcribed in 1916–17 from the MS. of Vivēkōdaya Library, Mungoṇḍa Agrahāram, Razole taluk, Gōdāvari district.

By Appayadīkṣita. Same work as that described under No. 5098 of the D.C.S. MSS., Vol. X, wherein see for the beginning.

Breaks off in the sixth stanza.

End:

. . . . . तस्राणारामिति जन्मादिसूत्रे चिच्छक्तिपरतया व्याख्यातत्वाच्च ।
तथा धर्मिणः सकलजगत्सर्गरक्षासंहरणतिरोधानानुग्रहभूतपञ्चकृतकारित्वं य . . . .

R. No. **2139.**

Paper. 10¾ × 9⅝ inches. Foll. 80. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. M. V. Vēṅkaṭavaradācāryalu of Vaḍapalli, Gōdāvari district.

श्रीनिवासगुणाकरः, सव्याख्यः.

ŚRĪNIVĀSAGUṆĀKARAḤ WITH COMMENTARY.

A poem in praise of God Śrinivāsa and of the Tirupati Hill, wherein he is worshipped. In a stanza at the beginning it is stated that Varadārya of Vādikēsarin family writes the commentary called Padayōjanī. Whether he is the same as the commentator mentioned under the next number or whether he is merely the scribe is not known. The commentary is however different from the one described under the next number, wherein see for particulars about the author of the text.

Breaks off in the first Sarga.

Beginning:

वादिकण्ठीरवश्रीमद्वरदार्येण धीमता ।
व्याख्या श्रीवासकाव्यस्य लिख्यते पदयोजनी ॥

वेङ्कटेश्वरस्तोत्रमारभते—

श्रीभृत्सद्वृषगोत्रशेखरमणे वेदप्रवक्तः शुचे
लोकास्वाद्यचरित्र सुन्दरतनो धीवारिभिः क्षालिते ।
सत्स्वैतद्वरदक्षिणा शुभगुणा सालङ्कृतिर्विस्फुर-
त्सद्वृत्ता कविता मया तव पदे दासेन भव्यार्प्यते ॥

श्रीभृदिति । श्रियं शोभां सम्पत्तिं पद्मां बिभर्तीति श्रीभृत्, तस्य संबुद्धिः, "शोभासंपत्तिपद्मासु लक्ष्मीः श्रीरिति कथ्यते" इति निघण्टुः । सतो वृषगोत्रस्य वेङ्कटाचलस्य शेखरमणे, सत् वृषं सुकृतं यस्य तादृशस्य गोत्रस्य शेखरमणे, सत्कुलप्रसूतेति चार्थः, वेदप्रवक्तः वेदानां हयग्रीवरूपेण प्रवचनकर्तरित्यर्थः । शुचिः, परिशुद्ध इत्यर्थः ।

End :

ते तव जनाघं जनपापं विना लीला न घटेत चेत् न संभाविनी चेत्, तव कृते त्वदर्थं, त्वं दुःखप्रदः दुःखदायकः भवेः स्याः । सर्वरक्षकश्रुतिविरोधः स्यादिति भावः । अक्षरे वैकुण्ठे कुतो मां न पातयसीत्याह—स्वेति ।

स्वाज्ञाभेदनिजस्वहृत्यपदवीचारस्थिरं प्रायशः
दण्डैरप्यनिवृत्तमेव निधनानर्हं स्वकीयं प्रभुः ।
स्वेच्छाचारनिरोधके दृढतरे धाम्नि स्वके पातय-
त्येवंभूतममुं रमाधव कुतो मा पातयस्यक्षरे ॥

* * * *

नाम्बामम्बेति तातेत्यपि पितरमपि किं वक्ष्यसीशोऽपि याश्वा-
दौत्यं वा सारथित्वं गिरिधृतिमवनेरुद्धतिं वा वनान्ते ।
सञ्चारं दैत्यरक्षोबहुविधनिधनं दावपानं दायालो
मद्रक्षार्थं . . . . ॥

R. No. **2140.**

Paper. 10⅞ × 9⅝ inches. Foll. 143. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. M. V. Vēṅkaṭavaradācaryalu of Vāḍapalli, Gōdāvari district.

श्रीनिवासगुणाकरव्याख्या.

ŚRĪNIVĀSAGUṆĀKARAVYĀKHYĀ.

A commentary on the poem described above. The first five Sargas are commented upon by the author of the text, Abhinavarāmānujācārya, who bore the title Māyāvādimadagajakaṇṭhīravācārya. He belonged to the Naidhruvakāśyapagōtra and was the son and pupil of Vēṅkaṭārya. He is said to have belonged to the family of Vādībhakēsarin who is stated to have been the son of Sudarśanaguru and the disciple of Lakṣmaṇayati. He was also a descendant of Vādikēsari Ramyajāmātṛmuni. The author is perhaps a contemporary of Timmajagatpati. The commentary on the Sargas six and seven was written by Vādikēsari Varadārya, son of Vēṅkaṭācārya, the younger brother of the author of the text. This commentary is called Śahṛdayamanōrañjanī, while that on the first five Sargas is called Siddhāñjana.

The topics contained in the Sargas are—

१. वेङ्कटेशस्तोत्र.
२. कृष्णलीलावर्णनम्.
३. वेङ्कटाचलवर्णनम्.
४. पुरवर्णनम्.
५. पुरवर्णनम् (incomplete, prose).
६. भगवत्प्रार्थना.
७. कृष्णलीला.

Contains the Sargas one to seven, but wants the end in the fifth Sarga. The fifth Sarga is written after the seventh Sarga.

Beginning:

वेङ्कटेशस्तोत्रमारभते—श्रीभृदिति । श्रियः शोभासंपत्तिपद्माः बिभर्तीति श्रीभृत्; तस्य संबुद्धिः । सतो वृषगोत्रस्य वेङ्कटाचलस्य, शेखरमणे सन् वृषः सुकृतं यस्य तादृशस्य गोत्रस्य, शेखरमणे सत्कुलप्रसूतेति चार्थः । वृषाचलवरो व्यापार एवेति पूर्वप्रयोगः । वृषेण सुकृतेन अचलवरोऽत्यन्तनिश्चलो व्यापार इति तस्यार्थः । वेदप्रवक्तः वेदप्रवचनकर्तरित्यर्थः ।

अवशेनाऽपि यन्नाम्नि कीर्तिते सर्वपातकैः ।
पुमान् विमुच्यते सद्यः स शुचिः परिकीर्तितः ॥

इत्युक्तलक्षणः शुचिः, पक्षे परिशुद्ध इति चार्थः ।

* * * *

Colophon:

श्रीमन्नैध्रुवकाश्यपान्वयकुलतिलकवादिकण्ठीरवाचार्यकुलावतंसवेङ्कटाचार्य-सूनुना तच्चरणकमलपरायणेन तत्कृपालब्धमायावादिमदगजकण्ठीरवापरनामधेयेन रामानुजसूरिणा विरचिते श्रीनिवासगुणाकरव्याख्याने सिद्धाञ्जने चतुर्थस्सर्गः ॥

पञ्चमः सर्गः ।

चूर्णिकया पुरं वर्णयति—यत्रेति

* * * *

षष्ठः सर्गः ।

अखण्डरिपुपण्डितप्रकरमत्तशुण्डालक-
प्रकाण्डगिरिखण्डनप्रहिततर्कवाचानखैः ।
श्रुतिप्रकरगर्जितैरतिभयङ्करैरिन्धते
सुवादिहरिवंशजो विमतवादिकण्ठीरवः ॥
नैध्रुवकाश्यपवंशोऽभिनवरामानुजार्य इति प्रथितः ।
वादिमदगजकण्ठीरवो जीयादिनचन्द्रौ यावदिलायाम् ॥
तस्यानुजवरः श्रीमान् वेङ्कटार्य इति श्रुतः ।
तत्पुत्रो वरदार्योऽहं . . . . ॥
श्रीमद्वादिगजेन्द्रसिंहसहजं तल्लब्धवेदाञ्चलं
श्रीमद्वेङ्कट . . . . ।
. . . .
वन्दे वेङ्कटदेशिकं गुरुवरं वेदान्तविद्यानिधिम् ॥

अथ भगवान् अभिनवरामानुजार्याभिधानः मायावादिमदगजकण्ठीरवाचार्यः सर्वलोकजीवनार्थं वेङ्कटाचलमाहात्म्यं काव्यरूपेण "श्रीभृत्सद्भूषगोत्रे" त्यारभ्य 'त्यक्त्वान्यसङ्गं पपौ" इत्यन्तं कृत्वा आदौ श्रीवेङ्कटाचलपतिवर्णनं श्रीनिवासावतारं धेनुक्षीराभिषेकं प्रभुकुलालसमागमं मायावादखण्डनं षोडशदलपद्मबन्धं श्रीकृष्णलीलाविहारमचलवर्णनं पुरवर्णनं चन्द्रिकावर्णनं चन्द्रादिवर्णनं वायुनिन्दा कोकिलनिन्दा चन्द्रनिन्दा मन्मथोपालम्भनं मन्मथस्तुतिं राजानं प्रति शुकप्रेषणं राजमहिषीसमागमं भगवदनुग्रहमित्यादिकं पुनः पुरवर्णनं गिरिवर्णनं च गद्यरूपेण कृत्वा काव्यं परिसमाप्य पुनरपि

* * * *

भगवन्तं प्रार्थयते—त्वद्दासस्येति ।

* * * *

Colophon:

श्रीमन्मायावादिमत्तेभकण्ठीरववेङ्कटाचार्यसूनुना वरदार्येण श्रीनिवासगुणाकरव्याख्या कृता सहृदयमनोरञ्जनी

End:

कृतिं व्याकरोति—श्रीनैध्रुवकाश्यपान्वयतिलकः कश्यपः पश्यको भवतीति श्रुतिप्रसिद्धः कश्यपः तस्यान्वयो वंशः तस्य तिलकः अलंकारभूतः। वादिमत्तेभकण्ठीरवाचार्यः द्राविड्या ஆழ்வார் इति प्रसिद्धः। गुरुपरम्पराप्रभावरामानुजसच्चरितचुलकादिषु—

श्रीमत्सुदर्शनगुरूत्तमपुत्ररत्नं भाषेड्यलक्ष्मणयतीन्द्रदयैकपात्रम्।
श्रीकाश्यपान्वयसुधोदधिपूर्णचन्द्रं वादीभकेसरिगुरुं सततं भजामि॥

इति प्रसिद्धः। तस्य कुलस्यावतंसः शिरोभूषणभूतः। यद्वा अस्मद्विधपरित्राणप्रेमप्रदा . . . मानसंपादके चरणारविन्दे रम्यजामातरं मुनिमिति तस्य वंशस्य वा अवतंसः।

स्वेनैवोक्तम्—

वादिकण्ठीरवाचार्यवंश्यो वरगुणान्वितः।
रम्यजामातृनामासौ वर्धतां यतिशेखरः॥

इति सुबोधिन्याम्। श्रीवेङ्कटाचार्यस्य सूनुना पुत्रेण तत्कृपालब्धवेङ्कटाचार्यकृपालब्धमायावादिमदगजकण्ठीरवापरनामधेयेन मायां वदन्तीति मायावादिनः; वद व्यक्तायां वाचि। जगन्मिथ्यात्ववादिनः। स्वेनैवोक्तं तिम्मजगत्पतिराजकल्पितचरगन्धपञ्चविंशतौ—

श्रीरामानुजयोगिसूक्तिरलसद्वद्धेर्ममाप्युत्तमा .
सन्मध्यस्थसमक्षमुज्ज्वलधियामद्वैतिनां वा शतम्।
वादे जेतुमदात्पटुत्वमुरुधीभाजां तु किं नो दिशे-
दार्याणां हि गिरस्तथा शुकवदित्युक्तिः प्रमाणं तु नः॥

इति। मत्ताश्च ते गजाश्च मदगजाः मायावादिन एव मदगजाः तेषां कण्ठीरवः सिंह इति अपरनामधेयं यस्य सः मायावादिमदगजकण्ठीरवापरनामधेयः। . . . . तेन रामानुजसूरिणा विरचिता(ते) श्रीनिवासगुणाकरे श्रीनिवासस्य श्रीवेङ्कटाचलपतेः गुणाः कल्याणगुणाः तेषामाकरः निधिः; खनिः स्त्रियामाकरः स्यात् इति निघण्टुः। तस्मिन् कृष्णलीलाविहारनामकः सप्तमः सर्गः समाप्तिमगमत्॥

R. No. **2141**.

Paper. 10⅞ × 9⅝ inches. Foll. 92. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Mantha Cannaya Śāstrigāru, Pantulavāri Agrahāram, Gōdāvari district.

(*a*) पदार्थतत्त्वखण्डनव्याख्या.

PADĀRTHATATTVAKHAṆḌANAVYĀKHYA.

Foll. 1*a*—13*a*.

By Nyāyavācaspati Bhaṭṭācārya. Similar to the work described under No. 4265 of the D.C.S. MSS., Vol. VIII.

Complete.

Beginning:

ओं नम इत्यादिश्लोकव्याख्या अस्मदीयानुमानदीधितिपरीक्षायां द्रष्टव्या। तत्र तेषु मध्ये, दिक्कालौ दिक्कालपदवाच्यौ तत्रेतिकरणात् स्पन्दादिरूपखण्डकालस्य . . . . . तथाच दिक्कालपदवाच्यं द्रव्यं नश्वरभिन्नं तद्भिन्नत्वग्राहकं मानाभावादित्यर्थः।

End:

अत्र नञर्थतादृशबोधस्य फलस्य प्रामाणिकत्वे तत्तद्बोधीयतत्तत्प्रकारतातिरिक्तप्रकारतासंबन्धस्यैव कार्यतावच्छेदकत्वात् अन्यथानुपपत्तेर्बलवत्त्वादिति।

Colophon:

इति न्यायवाचस्पतिभट्टाचार्यविरचिता पदार्थतत्त्वखण्डनव्याख्या संपूर्णा॥

(*b*) पदार्थतत्त्वावलोकः.

PADĀRTHATATTVĀVALŌKAḤ.

Foll. 13*b*—91*b*. Fol. 92*a* gives the contents of the work. Fol. 92*b* is left blank.

A commentary on the Padārthatattvakhaṇḍana of Raghunātha Śirōmaṇi Bhaṭṭācārya: by Viśvanāthasiddhāntapañcānana Bhaṭṭācārya, son of Vidyānivāsa.

Complete.

Beginning:

इन्द्रादिबृन्दारकबृन्दवन्द्यं प्रणम्य पादाम्बुरुहं मुरारेः।
शिरोमणिस्वीकृतवर्त्मनैव मतान्यहं तस्य विवेचयामि॥

अथ द्रव्यादयस्तावत्प्राचीनपरिगृहीताः पदार्थाः सप्त । तत्र विचारपुरस्सरं केषांचिदाधिक्यं निराकरिष्यन्नाधिक्यमपि केषांचिद्व्यवस्थापयिष्यन्वस्त्वव्यवस्थापकं सिद्धान्तप्रवाहमात्रमनधिकृत्य प्रतिजानीते अथेति । ईश्वरादिति ।

End:

विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्य ।
विदुषामतिसूक्ष्मधियाममत्सराणां मुदे भविता ॥
त्वच्चिन्तारहितेन तावकमहामायाविमूढात्मना
संसारार्णवदुर्निवारलहरीजालेषु मोमुह्यता ।
विद्योर्जत्सदसद्विवेकरहितेनेदं मया वर्णितं
तेनानेन पदार्पितेन भगवान् प्रीणातु नारायणः ॥

Colophon:

इति सिद्धान्तपञ्चाननभट्टाचार्यकृतः पदार्थतत्त्वावलोकः समाप्तः ॥

R. No. **2142.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 15. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Candranārāyaṇa Bhaṭṭācārya of Mandapēṭa, Gōdāvari district

सामग्रीवादः.

SĀMAGRĪVĀDAḤ.

A discussion on Nyāya dealing with the subject of Anumāna or inference.

Incomplete.

Beginning:

समाने विषये एकदा लौकिकप्रत्यक्षसामग्रीसत्त्वे अनुमितिसामग्रीसत्त्वे च लौकिकप्रत्यक्षमेवोत्पद्यते । तदनन्तरं साक्षात्करोमीत्यनुव्यवसायस्यानुभवसिद्धत्वादिति । तथाचानुमित्यसत्त्वात् तन्निर्वाहार्थं समाने विषये अनुमितिं प्रति लौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वं कल्पनीयम् । अथ अनुमितिलौकिकप्रत्यक्षसामग्र्योः केन रूपेण प्रतिबध्यप्रतिबन्धकभावः ।

End:

अथवा सामान्यतः स्पार्शनत्वावच्छिन्नं प्रति स्वीयस्पार्शनविशेष्यतानिरूपितविषयतासंबन्धावच्छिन्नप्रकारताश्रयसमवेतत्वरूपपरंपरासंबन्धावच्छिन्नप्रतियोगिताकस्पार्शन . . . .

R. No. **2143.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 57. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS of M.R.Ry. M. Pullayagāru of Dulla, Rajahmundry taluk, Gōdāvari district.

जागदीशीक्रोडपत्रम्.
JĀGADĪŚĪKRŌḌAPATRAM.

Similar to the work described under No. 4259 of the D.C.S. MSS, Vol. VIII.

Contains the Pakṣatā, Siddhāntalakṣaṇa, and Avacchēdakatāirukti, all being incomplete.

Beginning:

साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकनिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्संशयः । जगदीशः—अथोक्तसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यत्वनिष्ठावच्छेदकताकप्रतिबन्धकतानिरूपितप्रतिबध्यतानिवेशेनैव सामञ्जस्ये निश्चयत्वनिवेशो व्यर्थः ।

End:

व्यधिकरणधर्मावच्छिन्नाभावग्रन्थे जलादावपि तदभावप्रत्ययप्रसङ्गादिति दीधितिकृत उपरि जगदीशेनोक्तमिति ।

R. No. **2144.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 24. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. N. S. Rāmānujācāriyar of Nāvālpakkam, North Arcot district.

वासोयज्ञोपवीतविचारः

VĀSŌYAJÑŌPAVĪTAVICĀRAḤ.

States the circumstances and occasions in which the upper cloth of a twice-born should be worn on the shoulder in the manner of the sacred string.

Complete.

Beginning:

रामानुजवचस्सिन्धुसोमानघनिबन्धनः ।
क्षेमाय मम जागर्तु श्रीमान् वेदान्तदेशिकः ॥
उत्तरीयपदोक्तीनामुक्तमुद्रिक्तयुक्तिकैः ।
व्यभिचारमपाकर्तुं व्यवस्था वर्ण्यततराम् ॥

यत्तु विखनस्सूत्रे उपनयनप्रकरणे या अकृन्तन्निति वस्त्रम्, इयं दुरुक्तादिति मेखलां परीतमित्युत्तरीयं यज्ञोपवीतमित्युपवीतं मित्रस्य चक्षुरित्यजिनं तस्मै ददातीत्यादिना वैखानसग्रन्थबलेन ब्रह्मचारिणामुत्तरीयवर्णनम्, तच्चिन्त्यम् ।

End:

अतः पूर्वं यथाकथंचिदाच्छादितायाः शाट्याः तदा कट्यां बन्ध एव स्वरसतः प्रतीयते । स चापुरुषार्थत्वादेवेति बोध्यम् ।

R. No. **2145.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 50. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. acquired through the Sub-magistrate, Kovvūr, Kistna district.

कात्यायनश्रौतसूत्रभाष्यम्.

KĀTYĀYANAŚRAUTASŪTRABHĀṢYAM.

A commentary on the Śrautasūtras of Kātyāyana: by Śrīdēvayājñika, son of Prajāpati who is said to have performed thirty sacrifices.

Contains the sixth Adhyāya.

Beginning:

श्रुतिमन्त्रक्रमादाचार्येण चातुर्मास्यान्युक्तानि । तदनन्तरं ज्योतिष्टोमस्यावसरः । तं प्रोत्सार्य हविर्यज्ञत्वसामान्यात् मित्रविन्दोक्ता । अथ हविर्यज्ञत्वसामान्यादेव पाशुकेषु चातुर्मास्येषु च हविर्यज्ञविधपशूनामुक्तत्वादद्यनिरूढोऽपि हविर्यज्ञविधपशुबन्धः अवगतः । अतः तं उपदिदिक्षुः प्रथमं तस्य काल-

माह—पश्विज्या संवत्सरे संवत्सरे प्रावृषि । इज्या यागः । पशुना इज्या पश्विज्या ; पशुयागः ।

End:

वरशब्देन तस्मै दीयते तदभिलषितं यजमाने यद्यत्तु शक्यते धान्यवस्त्र-द्रव्यहिरण्यगवादिरभिधीयते । द्विरभ्यासोऽध्यायपरिसमाप्तिज्ञापनार्थः ॥

Colophon:

इति श्रीसम्राट्स्थपतित्रिंशदग्निचित्त्रिंशत्क्रतुकृन्महायाज्ञिकश्रीप्रजापतिसुत-महायाज्ञिकश्रीदेवकृते कात्यायनश्रौतसूत्रभाष्ये षष्ठोऽध्यायः ॥

R. No. 2146.

Paper. $10\frac{7}{8} \times 9\frac{1}{2}$ inches. Foll. 14. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Tāta Tampanna Śāstrigāru of Indupalli, Gōdāvari district.

योगप्रदीपिका.

YŌGAPRADIPIKĀ.

Foll. $1a$—$12a$. Foll. $12b$—$13b$ contain the first 30 stanzas found in the second Upadēśa of the Haṭhayōgapradīpikā. Fol. $14a$ gives the contents of the work. Fol. $14b$ is left blank.

A treatise on the Yōga system of philosophy: by Jñānānanda.

Contains the Haṭhayōga and the Rājayōga.

Beginning:

अथ पद्मासनविधानमाचष्टे—

वामोरूपरि निक्षिप्य दक्षिणं चरणं तथा ।
याम्योरूपरि पादं च पाणिं कृत्वा ततः परम् ॥
अङ्गुष्ठं हृदये स्थाप्य चुबुके चामृतं पिबेत् ।
नासाग्रे विन्यसेद्दृष्टिं तत्तद्व्याधिविनाशनम् ॥
इदं पद्मासनं ज्ञेयं दुर्लभं येन केन वा ।

वामोर्विति । वामोरूपरि दक्षिणं चरणं पादं निक्षिप्य तथा याम्योरूपरि पादं वामपादं निक्षिप्य ।

* * * *

Colophon:

इति हठयोगः ॥

End:

अथात्मपूजा—

सुखासनं ब्रह्मनिष्ठा प्राणाश्चार्घ्यसमर्पणम् ।

* * * *

आत्मनो जीवस्य सम्यगर्पणं जीवाभिमानाभावः नमस्कारत्रयम् ॥

Colophon:

इति श्रीज्ञानानन्दविरचितायां राजयोगप्रदीपिकायां सर्वमेकोऽध्यायः ॥

R. No. **2147.**

Paper. $10\frac{7}{8} \times 9\frac{4}{8}$ inches. Foll. 12. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. V. S. Narasiṁhācariyar of Villiyambākkam, Chingleput district.

बोधविचारः.

BŌDHAVICĀRAḤ.

A discussion as to whether the agent of an action denoted by the verb in a sentence or the action performed by him may be taken to be the chief significance of a sentence: by Rāmēśvara

Complete.

Beginning:

तातं त्रिभुवनतिलकं नत्वा रामेश्वरः प्रसूं चापि ।

शाब्दे मुख्यविशेष्यं युक्तिकलापैर्विवेचयत्येषः ॥

चैत्रस्तण्डुलं पचतीत्यत्र किंमुख्यविशेष्यको बोधः इति तटस्थप्रश्ने अत्र वैयाकरणाः— तण्डुलाश्रयवृत्त्यवयवशैथिल्यजनिका एकचैत्राभिन्नाश्रयिका पचिक्रियेति क्रियामुख्यविशेष्यको बोधः ।

End:

तस्मात्प्रथमान्तपदसमभिव्याहारे तदर्थमुख्यविशेष्यकः । अन्यत्र क्रियामुख्यविशेष्यक इत्ययमेव पक्षो वरिष्ठ इति प्रतिभातीति संक्षेप इति ॥

R. No. **2148.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 80. Lines, 20 in a page. Grantha. Good.

(*a*) आपस्तम्बश्रौतमन्त्रभाष्यम्.

ĀPASTAMBAŚRAUTAMANTRABHĀṢYAM.

Foll. 1a—45b. Fol. 46 is left blank.

Transcribed in 1916–17 from a MS. of M.R.Ry. Eḍvalli Ramaṇayya Avadhānigāru of Maḍigi, Gōdāvari district.

A commentary on the Mantras used in the sacrifices by the followers of Āpastamba: by Tirumala, son of Mallayajvan of Mādhava Sōmayāji family.

Contains the Ādhāna Mantra and the Nirūḍhapaśubandha Mantra.

Beginning:

पूर्वेद्युः प्रातरौपासनं कृत्वा प्राणानायम्य देशकालौ सङ्कीर्त्य सर्वकर्मभ्यः पूर्वं सोमेन यक्ष्यमाणोऽग्नीनाधास्ये

* * * *

हे अरणे त्वे त्वयि निमित्तभूतायां सत्यां शमीगर्भोऽश्वत्थः स चानया शम्या समेतः आरुरोह भूमिमारुह्य प्रवृद्धः । तं तादृशमश्वत्थं, ते त्वदर्थं ब्रह्मणा मन्त्रेण यज्ञियैः केतुभिः यज्ञार्हैर्लाञ्छनैः अभिमन्त्रणादिवक्ष्यमाणसंस्कारैश्च सह हरामि यज्ञभूमावानयामि ॥

End:

किञ्च, रायो धनसाधनस्य धनेन बृहस्पतिना स्वगाकृतः हे यूप मह्यं यजमानाय तिष्ठ फलदानाय सन्नद्धो भव, यज्ञशं च म इत्यादि गतम् ।

Colophon:

इति श्रीपदवाक्यप्रमाणज्ञमाधवसोमयाजिकुलावतंसचतुर्दशविद्यावल्लभश्रीमल्लयज्वसूनुना तिरुमलसर्वतोमुखयाजिना विरचितं निरूढपशुबन्धमन्त्रभाष्यं समाप्तम् ॥

पश्चाधानेष्टिमन्त्राणां सर्वतोमुखयाजिना ।
अर्थो व्यवेचि तन्मन्त्रं विपश्यन्तु विपश्चितः ॥

(b) द्राह्यायणश्रौतसूत्रभाष्यम्.

DRĀHYĀYAṆAŚRAUTASŪTRABHĀṢYAM.

Foll. 47a—80a. Fol. 80b is left blank.

Transcribed in 1916–17 from a MS. of M R.Ry. Nemāni Appaṇṇa Dīkṣitalugāru of Pērūru, Gōdāvari district.

By Dhanvin of Kāśyapagōtra. Same work as that described under No. 1038 of the D.C.S. MSS, Vol. II, wherein see for the end.

Contains the first two Paṭalās.

Beginning:

ओमिति ब्रह्म परमं प्रपद्य पुरुषोत्तमम् ।
छन्दोगसूत्रं व्याचष्टे धन्वी गूढार्थमञ्जसा ॥

अथ भगवान् सूत्रकारः प्रथमं तावत्परिभाषां करोति—अथातो विध्यव्यपदेशे ऋत्वधिकार इति । आथत इति पदद्वयं वाक्योपक्रमे लोकवेदयोर्दृष्टम्-यथा वाक्यसमाप्ताविति शब्दः । तद्यथा—अथातोऽनन्ताद्यादह इति प्रतिविशन्ति, अथातः सामान्तानाम्, अथातः संहिताया उपनिषदमित्यादि ।

R. No. **2149.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 58. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. M. V. Śrīnivāsa-raṅgācāriyar of Vāḍapalli, Gōdāvari district.

भागवतार्थसारः.

BHĀGAVATĀRTHASĀRAḤ.

A work purporting to give the essence of the Śrī-Bhāgavata. In the introductory portion the author, whose name is not given, states that he comments in this work on the various authoritative passages found scattered in the 12 Skandhas of the Śrī-Bhāgavata and dealing with the doctrine of Prapatti. The author salutes Rāmānujadēśika, son of Vēṅkaṭārya of Naidhravakāśyapagōtra and the author of Śrīnivāsa-kāvya—vide R No. 2139, as well of Subōdhinī which is a commentary on the Śrī-Bhāṣya.

Breaks off in the tenth Skandha.

Beginning:

यो नित्यमच्युतपदाम्बुजयुग्मरुक्मव्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः रामानुजस्य चरणौ शरणं प्रपद्ये ॥

श्रीमन्नैध्रुवकाश्यपान्वयभवः श्रीवेङ्कटार्यात्मजः
तत्पादाब्जमधुव्रतः शुभगुणः श्रीवासकाव्यं महत् ।
श्रीभाष्यस्य सुबोधिनीं च महतीं व्याख्यामतानीद्भजे
तं रामानुजदेशिकं गुरुवरं वादीभकण्ठीरवम् ॥

श्रीमदादिनारायणस्यापरावतारो भगवान् श्रीवेदव्यासमुनिः सर्वलोकोपकारार्थं पूर्वस्मिन् कल्पे सोमकासुरापहरणेनान्योन्यसंमिश्रमाणान्वेदान् ऋग्यजु-

स्सामाथर्वणरूपेण विभागं कृत्वा तद्वेदार्थान् पुराणेतिहासरूपेण प्रकटीकृतवान्

* * * *

तत्प्रपत्तिनिष्ठायाः प्राप्यभगवत्पादारविन्दवैभवं च श्रीवेदव्यासभगवान् ऋषिः तत्र तत्र द्वादशस्कन्धेषु ऋषिवाक्यैश्च भगवद्वाक्यैश्च ब्रह्मरुद्रादिदेववाक्यैश्च विशदीचकार । तानि वाक्यानि व्याख्यास्यामः ।

End:

प्रपन्नोऽस्मि महायोगिन् महापुरुष सत्पते ।
अनुजानीहि मां कृष्ण सर्वलोकेश्वरेश्वर ॥

अनुजानीहीत्यनेन चक्राङ्कितो भूत्वा गुरूपदेशद्वयमन्त्रेण प्रपन्नश्चेत् सैव तुरीया प्रपत्तिः । तुरीयप्रपत्त्यर्थं गुरुमाश्रयामि । तदनुजानीहीत्यर्थः । गुरुशरणागतिं विनास्य शरणागतत्वेन भगवान् परमपदं न ददाति । गुरुं विना प्रपन्नश्चेत् तव सा न भवति । तथा श्रुतयः अस्मिन् स्कन्धे वक्ष्यन्ति ।

R. No. **2150.**

Paper. $10\frac{7}{8} \times 9\frac{1}{8}$ inches. Foll. 34. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Vāḍapalli Padmanābhācāriyar of Timmāpuram, Cocanāda taluk, Godāvari district.

(*a*) कुमारसंहिता.
KUMĀRASAṀHITĀ.

Foll. 1*a*—10*b*.

This forms part of the Skāndapūraṇa which deals chiefly with the greatness of Nārāyaṇa or Viṣṇu and with the sacredness and religious efficacy of Ūrdhvapuṇḍra as explained to Kūmāra or Subrahmaṇya by God Śiva.

Contains the Adhyāyas eight to ten complete and the eleventh incomplete.

Beginning:

कुमार उवाच—

शिव तात महादेव भूतेश परमेश्वर ।
त्रिलोचन महाबाहो नमस्ते लोकशङ्कर ॥

अलङ्कृतेषु सर्वेषु देवेषु मणिकाञ्चनैः ।
आकल्पैर्वसनैः रम्यैः पुष्पमाल्यैस्तु चन्दनैः ॥

* * * *

ईश्वर उवाच—

कुमार श‍ृणु वक्ष्यामि रहस्यं परमाद्भुतम् ।
मनसि स्थापनीयं ते सनातनमिदं मतम् ॥
एकीभूतेषु संवर्ते पारावारेषु सप्तसु ।
नारायणो महातेजाः पुराणपुरुषो हरिः ॥
अशयत्कुहनाभावो नैयग्रोधे महाच्छदे ।

* * * *

Colophon:

इति स्कान्दपुराणे व्यासप्रोक्ते कुमारसंहितायां विष्णुपारम्यं नामाष्टमस्सर्गः ॥

* * * *

इति स्कान्दपुराणे व्यासप्रोक्ते कुमारसंहितायां विष्णुपारम्यं नाम नवमस्सर्गः ॥

End:

ब्रह्मचारी गृहस्थो वा वानप्रस्थो यतीश्वरः ।
मुक्तो भवति पापेभ्यः पुण्ड्रं द्वादशकं दधत् ॥
यदूर्ध्वपुण्ड्रस्य महत्त्वमेतत्कुमार पूतं सकलं मयोक्तम् ।
धृत्वा कृतार्थो भव फालभागे यथाहमाध्यात्मिकमात्मविज्ञः ॥

Colophon:

इति स्कान्दपुराणे व्यासप्रोक्ते कुमारसंहितायामूर्ध्वपुण्ड्रमाहात्म्यं नाम दशमोऽध्यायः ॥

श्वेतमृद्धरणी देवी हरिद्रा कमला स्मृता ।

* * * *

तस्मान्मृत्तिकया धार्यं श्वेतया रजनीरजः ।

(*b*) सीताविजयः.

SĪTĀVIJAYAḤ.

Foll. 10*b*—34*a*. Fol. 34*b* gives the contents of the work Kumārasaṁhitā.

Same work as that described under R. No. 994(*a*) ante, but with a different end.

Complete in seven Sargas (8 to 14) as found in the Vāsiṣṭhōttara-rāmāyaṇa.

End:

भ्रातृभिर्बन्धुभिः पुत्रैः पौत्रैश्च रघुपुङ्गवः ।
गुरुभिस्सचिवैर्भृत्यैरन्वितो बहुसंपदः ॥
भुञ्जन्मनोहरान् भोगान् कुर्वन् यज्ञान्सुदक्षिणान् ।
तोषयन्नखिलान् विप्रान् राज्यं सर्वमपालयत् ॥
आसीत्सुवृष्टिर्विषयाः समृद्धाः सस्यैर्महीजाः सफलाश्च गावः ।
दुग्धप्रदा वीतभया जनास्ते रामे सदा शासति भूतधात्रीम् ॥

Colophon:

इति स्कान्दे वासिष्ठसंहितायां सीताविजये चतुर्दशस्सर्गः ॥

R. No. **2151.**

Paper. $10\frac{7}{8} \times 9\frac{4}{8}$ inches. Foll. 20. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Pulavarti Pāpayya-gāru of Vēlampālam, Gōdāvari district.

(*a*) **कालारिष्टम्.**

KĀLĀRIṢṬAM.

Foll. 1*a*—3*a*.

States by what signs a person can know the time of approaching death. It is said to have been revealed to Kumāra by Paramaśiva and forms part of the Kāśīkhaṇḍa.

Complete.

Beginning:

काशीखण्डोक्तकालारिष्टग्रन्थः—

कथं निकटतः कालो ज्ञायते हरनन्दन ।
तानि चिह्नानि कतिचित् ब्रूहि मे परिपृच्छतः ॥

कुमारः—

वदामि कालचिह्नानि ज्ञायन्ते यानि देहिनाम् ।
मृत्यौ सन्निधिमापन्ने मुने तानि निशामय ॥
वामनासापुटे यस्य वायुर्वाति दिवानिशम् ।
अखण्डमेव तस्यायुः क्षरत्यब्दत्रयेण तु ॥

End :

एतानि कालचिह्नानि सन्त्यन्यानि बहून्यपि ।
ज्ञात्वाभ्यसेन्नरो योगमथवा काशिकां श्रयेत् ॥

Colophon :

इति काशीखण्डोक्तकालारिष्टश्लोकाः समाप्ताः ॥

(*b*) निदानग्रन्थः.

NIDÂNAGRANTHAḤ.

Foll. 3*b*—8*a*.

Deals with the symptoms, diagnosis and treatment of diseases.

Incomplete.

Beginning :

कैलासशिखरे रम्ये पार्वतीपरमेश्वरौ ।
अन्योन्यं सुखवेलायां प्रमथादिमहागणे ॥
* * * *
सर्वभूतहितं गोप्यं प्रोक्तोऽयं शृणु पार्वति ।
आदानं च निदानं च चिकित्सा त्रीणि रूपकम् ॥
कालजं कर्मजं रोगं त्रितयं रूपलक्षणम् ।
सर्वतन्त्रं च विविधं दर्पणे मुखमाकृतिः ॥

रोगसङ्ख्या—

अशीतिर्वातरोगाश्च चतुष्षष्टिज्वराणि च ।

End :

अलाभे वातजित्पत्रकौशेयविकलाकुथैः ।
रात्रौ बद्ध्वा दिवा मुञ्चेत् मुञ्चेद्रात्रौ दिवाकृतम् ॥

(*c*) चन्द्रोदयम्, सव्याख्यानम्.

CANDRŌDAYAM WITH COMMENTARY.

Foll. 8*b*—16*b*.

On the preparation of an aphrodisiac medicine called Candrōdayam which is said to have been prescribed by Pūjyapāda.

Complete.

Beginning :

पलं मृदु स्वर्णदलं रसेन्द्रं पलाष्टकं षोडशगन्धकं च ।
शोणैस्सुकार्पासभवैः प्रसूनैः सर्वं विमर्द्याथ कुमारिकाभिः ॥
* * * *

चन्द्रोदयोऽयं कथितः स माषो भुक्तो हि वल्लीदलमध्यवर्ती ।
मदोत्कटानां प्रमदाशतानां गर्वाधिकत्वं श्लथयत्यकाण्डम् ॥

* * * *

पलमिति मृदु च तत्स्वर्णं च मृदुस्वर्णं, मृदुविशेषणेन कर्षप्रमाणं पटुधातु-युक्तं शरावावरुद्धं सुवर्णपत्रमङ्गारसंस्थं कृत्वा प्रहरार्धमानेन पुटं कुर्यादित्यर्थः ।

End:

नारीणां रक्षयेत्प्राणं नराणां सिद्धिदायकम् ।
जितेन्द्रियस्ततो योगः पूज्यपादेन निर्मितः ॥

Colophon:

चन्द्रोदयग्रन्थस्समाप्तः ॥

(*d*) **स्वप्नाध्यायः.**

SVAPNĀDHYĀYAḤ.

Foll. 17 and 18.

Similar to the work described under No. 14010 of the D.C.S. MSS., Vol. XXIV.

Complete.

Beginning:

स्वप्नाध्यायं प्रवक्ष्यामि यदुक्तमृषिभिः पुरा ।
येन विज्ञातमात्रेण ज्ञायते च शुभाशुभम् ॥
स्वप्ने प्रथमयामे च वत्सरेण फलं लभेत् ।

End:

देवता यत्र गायन्ति नृत्यन्ति प्रहसन्ति च ।
आस्फोटयन्ति धावन्ति व्याधिं तस्य विनिर्दिशेत् ॥
एतद्बृहस्पतिमतं प्रातरुत्थाय यः पठेत् ।
सुस्वप्नं जायते तस्य दुस्स्वप्नं च विनश्यति ॥

Colophon:

स्वप्नाध्यायस्संपूर्णः ॥

(*e*) **स्वप्नविषयः.**

SVAPNAVIṢAYAḤ.

Foll. 18*b*—20*a*.

Similar to the above

Incomplete.

Beginning:

मद्यं पिष्टं च मांसानि स्वप्नान्ते यस्तु भुञ्जते ।
सर्वकामसमृद्धा श्रीः तस्य स्यात्सद्य एव हि ॥

End:

संभोगचामरदिगम्बरपुण्ययात्राप्रासाददीप्तिसुरशोकभयेक्षुयुद्धम् ।
गन्धद्वयं शवसुवर्णभुजङ्गदष्टं स्वप्ने शुभं निगलबन्धनधौतवस्त्रम् ॥

Fol. 20*b* contains a few sentences regarding the preparation of Tāmrabhasma.

R. No. 2152.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 91. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Nimmagaḍḍa Viśvapati Śāstrigāru, Ālamūru, Gōdāvari district.

अलङ्कारमञ्जरी.

ALAṄKĀRAMAÑJARĪ.

Foll. 1*a*—88*b*. Foll. 89*a*—91*a* give the contents of the work. Fol. 91*b* is left blank.

A treatise on poetics and rhetoric. The illustrative stanzas given herein are in praise of Rāmacandra of Kākarlapūḍi family, a Zamindar.

Contains up to the end of the Rasaprakaraṇa.

Beginning:

श्रीकण्ठादिसुरप्रधानपरिषत्प्रह्वीभवन्मस्तक-
श्रीमन्मौलिमणिप्रभाभिरभितः किम्मीरिताङ्घ्रिद्वयः ।
वक्षःपीठनिषण्णकौस्तुभरुचा रक्ताम्बरश्रीरिव
श्रेयो वस्तनुताद्रमासहचरः पीताम्बरोऽपि स्वयम् ॥

लोके कलासु कविता सकलासु हृद्या सारस्यसान्द्रहृदयैकजुषां कवीनाम् ।
तत्रापि सद्गुणलसत्त . . . . मतिरम्यकुलाङ्गनेव ॥

. . . . ।
श्रीरामचन्द्रनृपसद्गुणगुम्भितार्थानन्दं तनोतु सदलङ्कृतिमञ्जरीयम् ॥

पाणिनिप्रमुखैस्तैस्तैः सर्वशास्त्रविशारदैः ।
इह तावत् त्रिधा शास्त्रमभ्यधीयत तत्र च ॥

शब्दप्रधानं वेदाख्यं प्रभुसम्मितमिष्यते ।
ईषदप्यन्यथा पाठे पाठस्य दुरितं यतः ॥
इतिहासपुराणादि सुहृत्संमितमिष्यते ।
तस्यार्थवादरूपत्वात्कथ्यतेऽर्थप्रधानता ॥
ध्वनिप्रधानं काव्यं तु कान्तासंमितमीरितम् ।
शब्दार्थौ गुणतां नीत्वा व्यञ्जनप्रवणं यतः ॥
मया तत्क्रियते तेषु कान्तासंमितलक्षणम् ।
श्रीरामचन्द्रराजस्य चाटुश्लोकानुदाहरन् ॥

तथाहि—

लोके वसन्तु शतशोऽथ सहस्रशो वा भूपा दिवाकरनिरस्तसमस्तदिक्षु ।
काकर्लपूडिकुलपावनरामचन्द्रक्ष्मापालचूडतुलनां न भजन्ति केऽपि ॥

काक . . चन्द्रमुखवक्तृपरम्पराऽपि श्रीरामचन्द्रनृपसद्गुणवर्णनाय ।
नालं भवेदिति(हि) वस्तुगतिस्तथापि कांश्चिद्गुणांस्तु गदितुं सकुतूहलोऽस्मि ॥

तत्र तावन्नायकगुणाः वक्ष्यन्ते—

महाकुलीनतौज्ज्वल्यं माहाभाग्यमुदारता ।
तेजस्वित्वं विदग्धत्वं धार्मिकत्वमपि स्मृतम् ॥

End:

उक्तं चालङ्कारसर्वस्वे—रसभावतदाभासतत्प्रशमनानां निबन्धे रसवत्प्रेय-ऊर्जस्वित्समाहितानि भावोदयभावशान्तिभावशबलताश्च पृथगलङ्कारा इति । एते-षामुदाहरणान्यलङ्कारनिरूपणे द्रष्टव्यानि ॥

इति रसभावा निरूपिताः ॥

Colophon:

इत्यलङ्कारमञ्जर्यां रसप्रकरणं समाप्तम् ॥

R No. **2153.**

Paper. $10\frac{7}{8} \times 9\frac{4}{8}$ inches. Foll. 72. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of Uppalūri Vēṅkaṭanārāyaṇa Siddhāntigāru of Pāṭakōṭa, Gōdāvari district.

दैवज्ञविलासः.

DAIVAJÑAVILĀSAḤ.

Foll. 1*a*—70*b*. Foll. 71*a* and 72*a* give the contents of the MS. Fol. 72*b* is left blank.

By Kañcam Yallayārya. Same work as that described under R. No. 1641 ante.

Contains the 80th Ullāsa of which the beginning and the end are wanting.

R. No. **2154**.

Paper. 10⅜ × 9⅝ inches. Foll. 36. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. N. S. Rāmānujachāriyar of Navalpākkam, North Arcot district.

सत्यभामापरिणयम्.

SATYABHĀMĀPARIṆAYAM.

A drama, the plot of which is the marriage of Satyabhāmā with Lord Kṛṣṇa as narrated in the Śrī Bhāgavata: by Kṛṣṇa.

Breaks off in the third Act.

Beginning:

लक्ष्मीमङ्कुरयत्वसौ शशिकला चूडावचूडायिता
शंभोर्या प्रथमानविभ्रमभृतः प्रोद्दामघोषाश्रियः ।
वक्त्रे सर्वसुरासुरस्य मिषतः स्पर्धावतः कोमला
रूढैश्वर्यमनन्यतुल्यममृतोन्माथोत्सवे शंकरम् ॥

* * * *

अस्ति प्रौढतमाम्ररुद्धतटिनीकूलोपकण्ठान्तरे
क्षेत्रं गर्भपुराभिधं तनुभृतामेकं जनिध्वंसनम् ।
स्वर्धेनुप्रतिपूजिताद्भुतमहालिङ्गात्मना यत्र तत्
स्त्रीपुंव्यञ्जनमिश्रवस्तु पशुपत्याख्यान्वितं राजते ॥

तत्र च—

द्राक्षा वीक्षाप्रतीक्षाकृदथ सरसताभिक्षुरिक्षुश्च साक्षात्
नीचा मोचापि वाचां मधुरिमधुरि सा पादधूलिर्मधूलिः ।
पीयूषं यूषवेषं वहति नवपयो जोषमास्ते स एष
ध्वन्यध्वन्यध्वनीनो भुवि जयतितरां कृष्णनामा कवीन्द्रः ॥

* * * *

आकाशे पुनः कर्णं दत्वा किं ब्रूथ . . किन्नामधेयं तद्रूपकं किं वा तत्र इतिवृत्तमिति । आर्याः, सत्यभामापरिणयं नाम भागवती कथा च ।

End:

सावष्टम्भम्—भवतु स्वयंवरमण्टप एव आत्मीयसकलसाम्राज्यवैभवप्रदर्शनाङ्कुशेन तस्य मनोमत्तगजं परावर्तयिष्यामः । (इत्युत्थाय परिक्रम्य निष्क्रान्तास्सर्वे) ।

Colophon:

इति द्वितीयोऽङ्कः ।

* * * *

दृग्धात्र्या करपत्रकं हृतकरं घण्टावरूढं ततो
भग्नं तत्र गतत्रपं तदतुलश्रीचुञ्चु पादाम्बुजम् ।
बिभ्रत्याः सहजं तु पादचुबुकं सङ्गृह्य हस्तस्तन-
भ्राजद्धारशिरोजचोलगलतां लब्ध्वात्र जेजीयते ॥

R. No. **2155.**

Paper. 10⅞ × 9⅝ inches. Foll. 20. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Vādēpalli Padmanābhāchārya of Timmāpuram, Cocanāda taluk, Gōdāvari district

स्तोत्ररत्नव्याख्या.

STŌTRARATNAVYĀKHYĀ.

A commentary on the Yāmunācārya's Stōtraratna which is described under R. No. 160(*t*) ante.

Complete.

Beginning:

यः योगीन्द्रः आलवन्दार्नामा नारायणभक्तिपरायणः सुदुर्ग्रहं ग्रहीतुमशक्यम्; कृच्छ्रार्थेषु खल् इति खल् प्रत्ययः । त्रय्यन्तार्थं वेदान्तार्थम्; 'इति वेदास्त्रयस्त्रयी' इत्यमरः ।

End:

यस्य पादाम्भोरुहयोः पादकमलयोः ध्यानेन विध्वस्तानि विनाशितानि अशेषाणि कल्मषाणि यस्य स तथोक्तः । अहं वस्तुतामुपादेयतामुपयातोऽस्मि प्राप्तोऽस्मि । यामुनेयं यामुनेयनामधेयं वन्दे ॥

The date and the scribe of the original MS.—

अब्दे विरोधिकृन्नाम्नि मासे भाद्रपदे तिथौ ।
पौर्णम्यामिन्दुवारेऽस्मिन् स्तोत्रमाल्वारुवन्दकम् ॥

व्याख्यानं लिखितं पूर्णं नृसिंहार्येण धीमता
वाडपल्ल्यन्वयाम्भोधिशेषार्यामृतरश्मिना ॥
नाशिताखिलमोहान्धतमसात्तत्प्रसादतः ।

R. No. **2156.**

Paper. $10\frac{7}{8} \times 9\frac{4}{8}$ inches. Foll. 11. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Kanakadaṇḍi Vēṅkaṭaratnaṅgāru of Enukulamahāl, Razole taluk, Godāvari district.

(*a*) आर्यभटवाणी.

ĀRYABHAṬAVĀṆĪ.

Foll. 1*a*—5*b*.

A treatise in stanzas of the Ārya metre dealing with the Advaita-Vēdānta. By Kōdaṇḍarāma of Koṭikulapūḍi family. He states that he adds a fourth Pāda to the three Pādas of Āryabhaṭa, viz., Gaṇita, Kāla and Gōḷa wherein every thing relating to calculation is explained and that in the fourth Pāda called Ānandapāda the nature of the supreme Brahman is explained.

Contains the fourth Pāda complete.

Beginning:

अरुणकमलोपमानं सुरुचिरपद्माङ्कुशादिशुभरेखम् ।
दुरितान्धकारभानुं स्मरामि हरिचरणमार्यजनहृद्यम् ॥
यत्तेजश्चलितः सहस्रकिरणो यद्धैर्यमन्दीकृतो
मैनाकाचलराट् पयोधिरपि यद्गम्भीरताधःकृतः ।
तस्मै रामभटाय रावणमनश्शल्याय सीतामनः-
शोकघ्नाय नमो नमो हनुमते विज्ञानपूर्णात्मने ॥
पादत्रयेण कथितं सिद्धविराट्पुरुषाकृतेश्चरितम् ।
अधुनानन्दपदेन च वक्ष्यामि तदीयतत्त्वविभवादीन् ॥
ओङ्कारगम्यममलं विशुद्धमेकं परात्परं ब्रह्म ।
अद्वयमनन्तमगुणं कूटस्थमुपाधिवर्जितं सूक्ष्मम् ॥

End:

कलनारूपं सर्वं प्रपञ्चितं गणितकालगोलपदैः ।
अधुनानन्दपदेन च सूक्ष्ममधिष्ठानवस्तुपरतत्त्वम् ॥
पादचतुष्टययुक्त्या सकलज्ञानाश्रयार्यभटवाणी ।
सर्वेभ्यो विबुधेभ्यो दधाति सुरधेनुरिव निजेष्टार्थान् ॥

उपनिषदर्थसमेतामकरोत्तुर्याङ्घ्रिणार्यभटवाणीम् ।
कोदण्डरामविबुधः कोटिकुलपुडिसत्कुलोद्भवो धीमान् ॥

Colophon:

आर्यभटवाणी समाप्ता ॥

(*b*) चन्नुभट्टीयकारिका, विवृतिसहिता.

CANNUBHAṬṬĪYAKĀRIKĀ WITH VIVṚTI.

Foll. 6*a*—11*b*.

A short metrical treatise on Nyāya by Cennubhaṭṭa. It is followed by a commentary by Pālaṅgi Brahma Yajvan.

Complete.

Beginning:

मातापितृभ्यां जगतो नमो वामार्धजानये ।
सद्यो दक्षिणदृक्पातसङ्कुचद्वामदृष्टये ॥
अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् ।
तं नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः ॥
नत्वा श्रीदक्षिणामूर्तिं भवानीशङ्करं गुरुम् ।
क्रियते चन्नुभट्टीयकारिकाविवृतिर्मया ॥
दक्षिण . . . पादाब्जमानने कृतमाननः ।
पालङ्गिब्रह्मयज्वाऽहं कारिकाविवृतौ यते ॥
घटतन्नीलनीलत्वशब्दशब्दत्वजातयः ।
अभावसमवायौ च ग्राह्याः संबन्धषट्कतः ॥

घटेति । संयोगसंयुक्तसमवायसंयुक्तसमवेतसमवायसमवायसमवेतसमवाय-विशेषणविशेष्यभावरूपैः षड्विधैः संबन्धैः यथाक्रमं घटस्तद्रूपं रूपत्वं शब्दः शब्दत्वजातिश्चेति पञ्च अभावसमवायाभ्यां मिलित्वा षडपि ग्राह्याः

End:

तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता ।
अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते ॥

अर्थान्यथात्वं च हेतूत्थदोषश्च तयोर्ज्ञानादिति द्वन्द्वगर्भतत्पुरुषः ॥

Colophon:

इति श्रीदक्षिणामूर्तिचरणाम्भोरुहचञ्चरीकमानसेन पालङ्गिब्रह्मयज्वना कृता, चन्नुभट्टीयकारिकाविवृतिस्समाप्ता ॥

R. No. 2157.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 52. Lines, 20 in a page. Telugu. Good

Transcribed in 1916-17 from a MS. of M.R.Ry. Chebrol Veṅkata Sōmayājilugāru of Vallūru, Godāvari district.

सर्वागमरत्नाकरः.

SARVĀGAMARATNĀKARAḤ.

Foll. 1a—51a. Fol. 51b is left blank. Fol. 52 gives the contents of the work.

Slightly different from the work described under R. No. 1982 ante.

This treatise forming part of a big work entitled the Mahātripura-siddhānta deals with the following subjects:—

१. साधकस्वरूपनिरूपण.
२. गुरुशिष्याचारविवरण.
३. रश्मिमालाविवरण.
४. मन्त्रयजनप्रकार.
५. दीक्षाविधान.
६. गायत्र्यनुष्ठान.
७. गायत्रीमाहात्म्य.
८. गायत्रीपूजा.
९. गायत्रीजपमहिमा.
१०. शक्रमन्त्रविवरण.
११. सौरमन्त्रविवरण.
१२. प्रणवमाहात्म्य.
१३. तुरीयगायत्रीस्वरूपकथन.
१४. सदाचारनिरूपण.
१५. चक्षुष्मतीस्वरूपनिरूपण.
१६. गन्धर्वराजमन्त्रनिरूपण.
१७. पथिषद्रुद्रमन्त्रमाहात्म्य
१८. ताराविद्याविधान.
१९. नामत्रयविधान.
२०. महागणपत्यन्तर्यागविवरण.
२१. महागणपतितर्पणविधान.
२२. महागणपतिपूजाविधान.
२३. महागणपतिविद्याप्रयोग.
२४. उमामहेश्वरमन्त्रमाहात्म्य.
२५. मृत्युञ्जयमन्त्रमाहात्म्य.
२६. श्रुतधरीविद्यामाहात्म्य.
२७. मातृकामाहात्म्य.
२८. मातृकामाहात्म्य.
२९. संवित्सरस्वतीमाहात्म्य.

Contains Vilāsās 1—29 as given above

Beginning:

गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥

अनाद्यायाखिलाद्याय मायिने गतमायिने ।
अरूपाय सुरूपाय शिवाय गुरवे नमः ॥

बालसूर्यसहस्राभ . . . बाहुकिरीटिनम् ।

महागणपतिं वन्दे प्रत्यूहध्वान्तभास्करम् ॥

श्रीदेव्युवाच—

भगवन् देवदेवेश वृषभध्वज शङ्कर ।
सर्ववागीश सर्वज्ञ सर्वशास्त्रैकनायक ॥
रहस्यं यत्रिलोकेषु चतुर्वेदेषु यत्परम् ।
चतुर्वर्णेषु यद्गुह्यं चतुर्मूर्तिषु यत्परम् ॥

* * * *

Colophon:

इति श्रीमहात्रिपुरसिद्धान्ते सर्वागमरत्नाकरे प्रथमो विलासः ।

End:

घृतेन जुहुयान्नित्यं चतुस्साहस्रमादरात् ।
अणिमादिमहैश्वर्यं मासादाप्नोति साधकः ॥
संवित्सरस्वतीविद्यामाहात्म्यं सर्वकामदम् ।
इति ते कथितं देवि किं पुनश्श्रोतुमिच्छसि ॥

Colophon:

इति श्रीमहात्रिपुरसिद्धान्ते सर्वागमरत्नाकरे संवित्सरस्वतीमाहात्म्यं नाम एकोनत्रिंशो विलासः ॥

R. No. **2158.**

Paper. $10\frac{7}{8} \times 9\frac{4}{8}$ inches Foll. 51. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Kāśibhaṭla Pedda Kāmēśvara Śāstri of Peddamallapudi, Gōdāvari district.

आपस्तम्बगृह्यप्रयोगवृत्तिः

ĀPASTAMBAGṚHYAPRAYŌGAVṚTTIḤ.

Foll. 1*a*—48*b* Foll. 49*a*—51*b* contain some stanzas regarding Pitṛtarpaṇa.

A treatise giving the procedure relating to the performance of the various domestic rites and ceremonies as laid down in the Āpastamba gṛhyasūtra. The author is Nṛsiṁha who says that he composed it in the year Ānanda of the Sālivāhana Śaka 1537, i.e., 1614 A.D. It is stated in the end that this work consists of 965 stanzas and that the total number of Granthas contained therein is approximately 50 or 100 more.

Complete.

Beginning:

वन्दे कुन्दशशाङ्कशङ्खधवलं पद्माक्षसूत्रान्वितं
विद्यापुस्तकसंयुतं च वरदं वागीश्वरं वाक्प्रदम् ।
विश्वेशं शशिमण्डलान्तरगतं श्वेताब्जसिंहासनं
वेदाद्यागमराशिरूपममलं सद्वाजिवक्त्रं हरिम् ॥
प्रणम्य जगतामीशं सर्वमङ्गलकारणम् ।
सर्वज्ञं सर्वदा ध्येयं सर्वशान्तिकरं हरिम् ॥
आपस्तम्बेन यत्प्रोक्तं गृह्यस्य स्मार्तकर्मणि ।
तस्य प्रयोगवृत्त्याख्यं करिष्ये सारसङ्ग्रहम् ॥
स्मार्तकर्माणि वक्ष्यामीत्यथशब्दं प्रयुक्तवान् ।
अग्निहोत्रं दर्शपूर्णमासावाग्रयणं तथा ॥
चातुर्मास्यानि च तथो निरूढपशुबन्धकः ।
सौत्रामणिपिण्डपितृयज्ञाः संस्थाविधानकाः ॥

End:

इत्यापस्तम्बकृद्गृह्यमित्थमावेदितं मया ।
सभ्यैस्सारं तु वै ग्राह्यमसारं त्यज्यतामिह ॥
मन्त्रप्रश्ने द्वित्वपाठस्तु येषां गृह्यप्रश्नस्यार्थतात्पर्यभाजाम् ।
व्याख्यातॄणां कारिकावृत्तिरेषा साध्या नान्येषां क्वचित्केवलानाम् ॥
अर्थात्सूत्रे श्लोकरूपोपपत्तौ सत्यां छन्दोभङ्गता प्रायशः स्यात् ।
सत्सूत्रार्थौचित्यकर्माभिवीक्ष्य तत्क्षन्तव्यो मेऽपराधो महान्तः(द्भिः) ॥
नमः साम्बशिवाभ्यां च आपस्तम्बाय वै नमः ।
भाष्यकृद्भ्यो नमो मातापितृभ्याञ्च नमो नमः ॥
आनन्दवर्षे यदि शालिवाहके गते चतुष्षष्टिविहीनषोडशे ।
शरच्छते तेऽथ उपेन्द्रतुष्टये श्रीकारिकावृत्तिरकार्यसंशया ॥
नृसिंहनाम्नैव यथामतीत्थं . . . . कर्मभिस्तु ।
पुंसां भवत्येव हि चित्तशुद्धिः ज्ञानं च तस्मात्तत एव मुक्तिः ॥
दुरुक्तमप्युक्तमनुक्तमन्यथा यथावदस्यामखिलं विमृश्य तत् ।
क्षन्तुं क्रियाभिः कृतिनोऽर्हतोत्सवात् समाद्रियध्वं कथितं कृतं मया ॥
अस्या वृत्तेरादितः श्लोकसङ्ख्या पञ्चत्रिंशन्न्यूनसाहस्रमासीत् ।
ग्रन्थस्तावत्स्याच्च तद्वा शतं च पञ्चाशद्वाप्युत्तरं सिद्धमेव ॥

R. No. **2159.**

Paper. $10\frac{7}{8} \times 9\frac{3}{8}$ inches. Foll. 15. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Bhagavati Kāśīnātha Śāstrigāru of Kōṭipalli, Gōdāvari district.

स्वरूपप्रकाशिका, सव्याख्या.

SVARŪPAPRAKĀŚIKĀ WITH COMMENTARY.

This work deals with the leading principles and tenets of Śākta religion. The author is Nāgānanda. It is followed by a commentary called Svarūpa Vimarśinī which was written by Cidānanda, disciple of Prasanna Viśvātmadēśika.

Complete.

Beginning:

लोकनाथमतिरम्यममेयं देशिकेन्द्रमभिवन्द्य तनोमि ।
व्याकृतिं मृदुतरामिह नागानन्ददेशिकनिरूपितसूत्रे ॥
जीयात् प्रसन्नविश्वात्मश्रीदृक्पातसुविस्तृतात् ।
चिदात्मानन्दतो जाता श्रीस्वरूपविमर्शिनी ॥

अत्रभगवान् नागानन्दाचार्यः संविच्छास्त्रसारभूतं स्वरूपप्रकाशिकाख्यं शास्त्रं चिकीर्षुस्तच्छास्त्रे प्रतिपाद्यां परां देवतां समाविशति—

विश्वात्मिकां तदुत्तीर्णां हृदयं परमेशितुः ।
परादिशक्तिरूपेण स्फुरन्तीं संविदं नुम ॥

विश्वात्मिकां प्रमेयत्वकार्यत्वादिना रूपेण वर्णपदमन्त्रकलातत्त्वभुवनानीति षडध्वात्मकजगद्रूपाम् ।

End:

श्रीतन्त्रावलोकरीत्या प्रमेयादिसर्वसमष्टिभूतेश्वरस्वरूपपूरणाय जुहुमः तदेकात्मतया परामृशाम इति शिवम् ॥

नागानन्दमुनीन्द्रेण श्रीस्वरूपप्रकाशिका ।
रचिता सा मयाकारि श्रीस्वरूपविमर्शिनी ॥
अन्तरेव हृदयस्य निगूढोऽप्यातपस्थघटवन्मुनिवर्यैः ।
दृश्यतेऽखिलपरेष्वपि योऽसौ मातृकादिविषयो गुरुरित्थम् ॥

Colophon:

इति श्रीमन्महेश्वरानन्दाचार्यश्रीप्रसन्नविश्वात्मदेशिकपादपद्मान्तेवासिश्री-

चिदानन्दविरचिता श्रीस्वरूपप्रकाशिकाऽव्याख्या संपूर्णा ॥

कदम्बवनशालिका कचभरोल्लसन्मालिका
कुचाञ्चितविपञ्चिका कुटिलनीललोलालका ।
चकच्चकितनासिकाचलविलोलसन्मौक्तिका
विभातु हृदि बालिका विधुकिशोरकोत्तंसका ॥

R. No. **2160.**

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 17. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Tējōmūrtula Rāmamūrtigāru of Śrīrāmapuram, Vizagapatam district.

(*a*) जातकसंस्कारः.

JĀTAKASAṀSKĀRAḤ.

Foll. 1*a*—5*a*.

Similar to the work described under No. 13700 of the D.C.S. MSS., Vol. XXIV. It is said to have been revealed to Umā or Pārvatī by God Mahēśvara.

Complete.

Beginning :

देवदेव महादेव सर्वज्ञ शशिभूषण ।
ज्योतिषार्णवपीयूषं संक्षेपेण वदस्व मे ॥
अनुग्रहार्थं लोकस्य मयि कारुण्यवत्सल ।
दैवज्ञशास्त्रसारं च फलभागं वदस्व मे ॥

ईश्वरः—

शृणु देवि प्रवक्ष्यामि सावधानेन चेतसा ।
सप्तविंशति ऋक्षाणि राशयो द्वादश स्मृताः ॥
सूर्यादीनां ग्रहाणां च नीचोच्चस्थानतः स्मृताः ।
राहुकेत्वोस्तु सर्वेऽपि राशयः स्वग्रहाः स्मृताः ॥

End :

पित्रोर्दोषैर्मृताः केचित् केचिद्बालग्रहैरपि ।
अपरेऽरिष्टयोगाच्च त्रिविधा बालमृत्यवः ॥

Colophon :

इति श्रीउमामहेश्वरसंवादे जातकसंस्कारः संपूर्णः ।

(b) जातकविषयः.

JĀTAKAVIṢAYAḤ.

Foll. 5a—17b.

Similar to the work described under No. 13702 of the D.C.S. MSS, Vol. XXIV.

Beginning:

रविश्च रविपुत्रश्च भुवि(भूमि)पुत्रश्च केन्द्रगः ।
दशाहं दशमासं वा दशवर्षमथाऽपि वा ॥

End:

उच्चफलानि—

दिव्याम्बरो दिव्यवपुः प्रचण्डः परोपकारी पितृदेवभक्तः ।
ख्यातो धनी धर्मपरायणश्च मेषस्थिते चण्डरुचौ प्रसूतः ॥

R. No. **2161.**

Paper. $10\frac{7}{8} \times 8\frac{3}{8}$ inches. Foll. 31. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS of M.R.Ry. Tējōmūrtula Rāmamūrtigāru of Śrīrāmapuram, Vizagapatam district.

जातकयोगामृतम्.

JĀTAKAYŌGĀMṚTAM.

Foll. 1a—30a. Foll 30b and 31a give the contents of the work. Fol. 31b is left blank.

Similar to the work described under No. 13695 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

Beginning:

अस्मिन् जातकयोगामृतग्रन्थे तावद्यत्र कुत्रोदाहरणश्लोकस्त्वागतश्चेत्तत्र तत्र श्लोक इति लिख्यते । श्लोकेतरत्र सर्वत्र ग्रन्थ इति ज्ञेयः । तस्मादस्य जातकयोगामृतग्रन्थस्यादाववतारिकेति ग्रन्थः पूर्वरङ्गः । अवतारिका—श्रीमद्वसिष्ठप्रोक्तदैवज्ञविलासशास्त्राद्यनेकविधजातकग्रन्थानीतविशेषयोगामृतपुटमालिकावतारिकारूपनवविधविशेषरत्नमालिकाशिरोमणिजातकयोगामृतशास्त्ररचितानि सूक्ष्ममार्गविरचितानि

* – * *

द्विवर्गैक्यं पारिजातांशः । त्रिवर्गैक्यमुत्तमांशः । चतुर्वर्गैक्यं गोपुरांशः । पञ्चवर्गैक्यं सिंहासनांशः । षड्वर्गैक्यं पारावतांशः ।

End:

भगवद्ब्रसिष्ठकृतोत्तरप्रबलाष्टविधपदयोगानुसन्धानयोगानां मध्यैकविशेषोत्तरोत्तरप्रबलपदयोगानुसन्धानयोगकारकस्सन्नितरसप्तवि . . . . . . ।

R. No. **2162.**

Paper. $10\frac{3}{8} \times 9\frac{3}{8}$ inches. Foll. 30 Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Bhagavati Kāśīnātha Śāstri of Kōṭipalli, Gōdāvari district.

गोपालतापनीयोपनिषट्टीका.

GŌPĀLATĀPANĪYŌPANIṢAṬṬĪKĀ.

A commentary on the Gōpālatāpanīyōpaniṣad, which work is described under No. 447 of the D.C.S. MSS., Vol. I, Part 3: by Viśvēśvara.

Complete.

Beginning:

स जयति भगवान् कृष्णः कंसारिः केलिवर्धनस्सुहृदाम् ।
बृन्दाविपिनविहारी वनमाली सजलजलदाभः ॥

परमकारुणिकतया सगुणोपासनक्रमेणाधिकारिजनानर्थनिवृत्तये सच्चिदानन्दस्वरूपश्रीकृष्णात्मतावाप्तये च ।

* * * *

मङ्गलं प्रकाशयति सच्चिदानन्दरूपायेति—

सच्चिनान्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥

कृष्णाय नम इति संबन्धः । कृषशब्दः सच्चिद्वाचकः, नशब्दश्चानन्दवाचक इत्यभिप्रेत्य कृष्णशब्दार्थमाह—सच्चिदिति । सच्चिदेव स्वरूपं यस्य सः तस्मै ।

End:

आद्य ब्रह्मण इति पदं पूर्वश्लोके योजितम् । सुपां सुलुगिति सूत्रेण आद्य तथेति पदं यथेत्यर्थः ॥

भवसन्तापसन्तारशातनी कृष्णतापिनी ।
तदर्थबोधिनी टीका जनार्दनविनिर्मिता ॥

Colophon:

इति श्रीमद्विश्वेश्वरविरचितायां गोपालतापिनीटीकायामुत्तरभागः समाप्तः ॥

The scribe of the original MS. writes thus:

श्रीबालमुकुन्दानन्दभगवत्पादपूज्यशिष्यश्रीविश्वनाथानन्दतीर्थलिखितम् ॥

Fol. 30*b* is left blank.

R. No. **2163.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 26. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Bhagavatī Vāsudēvadīkṣitalugāru of Doḍḍampēṭa, Ramachandrapuram taluk, Gōdāvari district.

(*a*) नमकार्थप्रकाशसङ्ग्रहः.

NAMAKĀRTHAPRAKĀŚASAṄGRAHAḤ.

Foll. 1*a*—19*a*. Foll. 19*b*—20*b* are left blank.

A commentary on the Namaka which is the fifth Praśna of the fourth Kāṇḍa of the Kṛṣṇayājurvēdasaṁhitā: by Abhinava Nṛsiṁhāśrama, a pupil of Rāmacandrāśrama.

Breaks off in the eleventh Anuvāka.

Beginning:

कोदण्डदीक्षागुरुमप्रमेयं सलक्ष्मणं दाशरथिं दयालुम् ।
महानुभावं जगदेकवीरमनाथनाथं रघुनाथमीशम् ॥
. . . . . सिंहहयग्रीवमानगुरुं शिवम् ।
सङ्गृह्य बालबोधार्थं नमकार्थः प्रकाश्यते ॥

अथैतस्य सकलस्य रुद्राध्यायस्य यज्ञविशेषे विनियुक्तस्यापि पुनर्नित्यजपादौ वचनाद्विनियोगः । तथाहि—वाजसनेयिनामवान्तरशाखिनो जाबालाः बौद्धीयाः काण्वाः ।

* * * *

हे रुद्र ते मन्यवे क्रोधाय नमोऽस्त्वित्यर्थः । उत अपिच इषवे वेदप्रतिपादिताय शराय नमः ।

* * * *

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्रस्वामिपूज्यपादशिष्याभिनवनृसिंहाश्रमकृते नमकार्थप्रकाशसङ्ग्रहे प्रथमोऽनुवाकः ।

End:

त्वं तासां हेतीनां मुख्यान्यग्राणि पराचीनामुखा कृधि पराङ्मुखानि कुरु। सकललोकमहेश्वरप्रसादात्सकलोपद्रवशान्तिर्भूयादित्यर्थः ॥

Colophon :

इति नमकार्थप्रकाशसङ्ग्रहे दशमोऽनुवाकः ॥

अथ देवस्यानुग्राह्यवशेन तथा सहस्रधात्मानं प्रत्येकं दर्शनाभीष्टप्रदानादिकमनुग्रहं कुर्वतो ये (वि)ग्रहविशेषाः तानधिकृत्य दशभिर्मन्त्रैरभयप्रार्थना। अन्ये तु संहर्तुर्देवस्य तेजोविशेषाद्रुद्रमूर्तय इत्याहुः। ब्रह्मणा प्रार्थितस्य देवस्य स्थावरजङ्गमानां रक्षणपोषणार्थं निर्मिता रश्मिभूतास्ते।

(*b*) व्यासपूजापद्धतिः.

VYĀSAPŪJĀPADDHATIḤ.

Foll. 21*a*—26*b*.

Transcribed in 1916–17 from a MS. of M.R.Ry. V. Kutumbaiya Śāstri of Masulipatam, Kistna district.

Similar to the work described under No. 8703 of the D.C.S. MSS., Vol. XVI.

Complete.

Beginning :

आषाढ्यां पौर्णमास्यां क्षौरस्नानानन्तरं पादप्रक्षालनाचमनप्राणायामत्रयं कृत्वा गुरोरनुज्ञां गृहीत्वा गन्धपुष्पाक्षतादिपूजाद्रव्याणि संपाद्य प्रणवषडङ्गन्यासपूर्वकं व्यासपूजामुपक्रमेत्। अथ उपस्पृश्य।

End :

ततो गुरुज्येष्ठादिवन्दनं कुर्यात्। ततो वेदान्तप्रसङ्गः।

सभासदामक्षतादिप्रदानम्। ब्राह्मणान् भोजयेत्।

* * * *

परेद्युरनुष्ठानानन्तरं स्वगुरुज्येष्ठादिवन्दनं कृत्वा गुरुसन्निधौ मदनुग्रहायोपक्रम्य भुङ्क्ष्व राज्यं समृद्धमित्यन्तं पठित्वा यथासुखं विहरेत्॥

Colophon :

इति चातुर्मास्यप्रयुक्तेन्द्रसंप्रदायमधुरासंप्रदायव्यासपूजापद्धतिस्समाप्ता॥

R. No. **2164**.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 35. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. C. Śēṣagiri Rao Gāru of Kōṭipalli, Gōdāvari district

भागवतव्याख्या—सज्जनाहिता.

BHĀGAVATAVYĀKHYĀ : SAJJANAHITĀ.

A commentary on the Bhāgavata by Caṭṭivēṅkaṭādri, a disciple of Vēṅkaṭācārya. The author salutes in the beginning Ānandatīrtha, Jayatīrtha, Vijayadhvajatīrtha and Narasiṁhācārya (who was his paternal uncle).

Contains the sixth Skandha which breaks off in the fifth Adhyāya.

Beginning :

सुखचित्सुखैर्गुणैर्युतो वियुतश्चाखिलदोषसङ्गतः ।
नृहरिर्हृदयाम्बुजे वसन् मम दद्यादखिलेष्टसञ्चयम् ॥
आनन्दतीर्थगुरुमादरतो भजामि
स्वानन्ददौ स्वचरणौ भजतां जनानाम् ।
यद्वक्त्रनिर्गलितवागमृतप्रपूरा-
त्तापत्रयं शममुपैति विनातियत्नात् ॥
जयतीर्थगुरून् वन्दे सर्वाभीष्टप्रदान् मम ।
विजयध्वजतीर्थादीन् गुरूनन्यांश्च भक्तितः ॥
श्रीमध्वशास्त्रदुग्धाब्धिविक्रीडनविशारदान् ।
नरसिंहाचार्यसंज्ञान् पितृव्याननिशं भजे ॥
नत्वा श्रीमद्वेङ्कटाचार्यसंज्ञान् विद्यागुरूननिशं बुद्धिशुद्ध्यै ।
कुर्वे चट्टिवेङ्कटाद्याह्वयोऽहं सद्भ्यष्षष्ठस्कन्धटीकां हिताय ॥

* * * *

भगवता सर्वज्ञेन त्वया आदौ द्वितीयस्कन्धे निवृत्तिमार्गः निवृत्तिधर्मलक्षणः मोक्षमार्गः यथा यथावत् कथितः ।

End :

अधस्तादर्वाचीनाः प्रजाः मायया स्त्रिया सह मिथुनीभूय मदीयया मायया मत्समर्थ्येन भविष्यन्ति पुत्रादिरूपेण उत्पत्स्यन्ते मे मह्यं हरिष्यन्ति दास्यन्ति । मिषतः पश्यतः ॥

Colophon :

इति श्रीमद्भागवतटीकायां सज्जनहिताख्यायां श्रीमद्वेङ्कटाचार्याणां शिष्येण चट्टिवेङ्कटाद्रिणा विरचितायां षष्ठस्कन्धे चतुर्थोऽध्यायः ॥

* * * *

नन्विति । ननु त्वामृते भागवतास्सर्वे भूतानुग्रहपरवशाः, त्वं तु भूतविप्रियं कुर्वन् कथं न लज्जस इति भावः ॥

R. No. **2165**.

Paper. $10\frac{7}{8} \times 9\frac{1}{4}$ inches. Foll. 29. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Uppalūri Vēṅkaṭanārāyaṇa Siddhāntigāru of Pētakōta, Gōdavari district.

तन्वादिभावफलप्रदीपिका.

TANVĀDIBHĀVAPHALAPRADĪPIKĀ.

Foll. 13*a*—25*a*. Foll. 26*b* and 29*b* are left blank

Similar to the work described under No. 13782 of the D.C.S. MSS , Vol. XXIV. By Ākellapalli Rāmacandra, son of Viṣṇubhaṭṭa of Kauṇḍinyagōtra. In a stanza at the end, the extent in stanzas is given for each of the 12 sections of which the work consists.

Complete.

Beginning:

तनुभावस्य—

सवितरि तनुसंस्थे शैशवे व्याधियुक्तो नयनगतसुदुःखी नीचसेवानुरक्तः।
न भवति गृहमेधी धैर्ययुक्तो मनुष्यः चपलविपुलमूर्तिः पुत्रपत्नीविहीनः ॥

End:

राहुकेतुसमायुक्ता नीचवृत्तिः पतिर्भवेत् ।
षष्ठपेन समायुक्ता तद्भर्ता चोरवृत्तिकः ॥

Colophon:

श्रीविष्णुभट्टतनयेन सुबुद्धसूर्यतन्त्रेण याजुषवरेण सुबुद्धिभाजा ।
आकिल्लपल्लिकुलसिन्धुसुधाकरेण कौण्डिन्यगोत्रकमलावलिभास्करेण ॥
श्रीरामचन्द्रचरणाम्बुजषट्पदेन व्यासादिभाव . . . दिपकं समीक्ष्य ।
तन्वादिभावफलवीक्षणदीपिकेयं श्रीरामचन्द्रविदुषा रचितातिरम्या ॥
खरामाः खवेदाः कुवेदायगाथाः कुवेदः कुमाराः द्विरामश्च षष्टिः ।
बाणाः खवेदाः कलाष्षट्समुद्राः क्रमेणैव तन्वादिषु श्लोकसंख्याः ॥

R. No. **2166**.

Paper. $10\frac{7}{8} \times 9\frac{1}{4}$ inches. Foll. 66. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R Ry. Mantha Chennaya Śāstrigāru of Pantaluvāriagrahāram, Gōdāvari district.

तर्कसारः.

TARKASĀRAḤ.

By Rāvilli (Kompella) Vēṅkaṭādribudha, son of Pēramāmbā and Nṛsiṁhasūri. Same work as that described under No. 4188 of the D.C.S MSS., Vol. III.

Breaks off in the Śabdaparicchēda.

Colophon :

इति श्रीराविल्लिवंशाम्बुधिसुधाकरश्रीनृसिंहसूरिसुतेन पेरमाम्बागर्भशुक्तिमुक्तामणिना वेङ्कटाद्रिबुधेन विरचिते तर्कसारे प्रत्यक्षपरिच्छेदः समाप्तः ॥

R. No. **2167.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 20. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. V. Kutumbaiya Śāstri of Masulipatam, Kistna district.

जातकचन्द्रिका, सव्याख्या.

JĀTAKACANDRIKĀ WITH COMMENTARY.

By Vēṅkaṭēśarya, son of Yajñanārāyana. Same work as that described under No. 13683 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

R. No. **2168.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 31. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Ārāvamudācāriyar of Nāvālpākkam, North Arcot district.

सत्यभामापरिणयम्.

SATYABHĀMĀPARIṆAYAM.

A drama having for its plot the marriage between Lord Kṛṣṇa and Satyabhāma. The author of the work is Mallikārjuna, also called Sphuliṅga Kavi. His genealogy is given thus:

Kanakaśivācārya
(of Bhāradvājagōtra)
|
Ubhayakavi
|
Mārgasahāya
|
Sōmanātha
|
Lakṣmaṇa = Śāvitri
|
Mallikārjuna
(author)

He was the daughter's son of Sphuliṅga Kavi who is said to have been honored by the Pāṇḍya king by means of a shower of pearls, and who was the chief disciple of Diṇḍimakavi Sārvabhauma. The author's father-in-law was Aruṇagirinātha who bore the titles of Ṣaḍbhāṣāsārvabhauma, Kumāradiṇḍima and Kavirajarāja and who quickly and readily composed suitable poems for stone inscriptions. He was a disciple of Sabhāpatidēśika, a Gauḍa Brahman, and was following the poetic traditions of Aruṇācalanātha, also called Yauvanasarasvatī. The drama is said to have been first staged on the occasion of the festival of Svayambhūnātha worshipped in the shrine at Mūlāṇḍa village. The author belonged to the Drāhyāyaṇasūtra and resided in Mūlāṇḍa village.

Complete in five Acts

Beginning :

वेदान्तस्तुतवैभवे त्रिजगतां विस्तारितेजोनिधौ
पित्रा मोहवशं गतेन बहुधा क्रूराभिशापेऽपि च ।
राजीवायतलोचने प्रणमतां रक्षासुदीक्षागुरौ
देवे तत्र दृढानुरक्तहृदया दाक्षायणी पातु वः ॥

नान्द्यन्ते सूत्रधारः ।

सूत्रधारः । समन्तादवलोक्य, सानन्दम् ।

* * * *

मूलाण्डग्रामवासरसावेशमुकुलितकैलासकोलाहलस्य पश्यदलीकस्य संसन्नटेश्वरीसनाथस्य भगवतः स्वयंभूनाथस्य यात्रोत्सवे ।

* * * *

सूत्रधारः विमृश्य, अस्ति खलु प्रौढगौडावनीश्वरचूडामणेः शैवागमार्णवकर्णधारस्य सरसकवितासाम्राज्यसिंहासनाधिरूढस्य पवित्रचारित्रस्य प्रकाशराशिभिः प्रज्वलितः पावकस्यानुकुर्वतः साक्षात्सभापतिदेशिकस्य सानुकम्पावलोकनानुग्रहभाजनेन, साहित्यसौहित्यवतः सरसतरकाव्यनाटककथनघटितमतिपाटवस्य परोपकारपराधीनचेतसो यौवनसरस्वतीतिप्रथितापरनामधेयस्य कनिष्ठपितृव्यस्य श्रीमुख्याचलनामधेयकस्य प्रसन्नपदबन्धप्रबन्धसन्ततपठनपाटवपरिणतमधुरसभणितिसंप्रदायेन, सविलासाधरस्पन्दमात्रनिर्वर्तितसरसतरकाव्यनाटक[स्तर]स्य शिलातललेखनीयाशुकविताप्रवाहस्याप्रतिहतषड्भाषाराज्यप्रतिष्ठितभद्रासनाधिरूढस्य षड्भाषासार्वभौम इति कुमारडिण्डिम इति कविराजराज इति अग्रतस्समुद्घुष्यमाणबिरुदकाहलीविशेषस्य परममाहेश्वरस्य श्वशुरस्य शोणाद्रिनाथस्य

सम्प्रसारचाक्षुषदीक्षालब्धकवितत्त्वेन, विचित्रतरचतुर्वृत्तिकविताचातुर्याचारस्य विरुदकविप्रपितामहस्य विरुद्धकविमस्तककुट्टाकडिण्डिमाडम्बरस्य डिण्डिमकविसार्वभौमस्य प्रथमान्तेवासिनः प्रचण्डतरप्रतापतापितारातिनृपप्रकाण्डेन पाण्ड्येन निर्वर्तितमुक्ताविशेषकव्याजात्सूचितानसिद्धशुद्धकवितासाम्राज्यपट्टाभिषेकमहोत्सवस्य विविधराजन्यविदग्ध विद्वद्गोष्ठीविमर्दवहस्य स्वायत्तेन्द्रियव्रततेः तत्रभवतः स्फुलिङ्गकवेः दौहित्रेण, ललिततरभणितिसुधारत्नाकरस्याक्षीणगुणमणिरोहणक्षितिभृतो लक्ष्मणभट्टस्य चरितचिरकालतपःफलेन सावित्रीगर्भशुक्तिमुक्तामणिना भारद्वाजगोत्रशतपत्रमार्तण्डेन द्राह्यायणसूत्रिणा छन्दोगेन पुरहरचरणपरिणतभक्तिना स्फुलिङ्ग इति कविपुङ्गवैः कलितापरनामधेयेन श्रीमता मल्लिकार्जुनेन प्रणीतमभिनवशृङ्गारनटनरङ्गमभङ्गुरमतिविचित्रं सत्यभामापरिणयं नाम नाटकं सरसकविश्रवणकुतूहलोद्धाटकं नाटकम् । तत्प्रयुञ्जानास्सामाजिकानुपास्महे ।

पारि—तारिसस्स इमस्स कइणो वण . . . क्कमाअणने अद्धि मे कोहि अहिलासो ।

सूत्र—यदि कुतूहलमाकर्ण्यताम्—

तुण्डीरभूमण्डनमस्ति कोऽपि मूलाण्डनामा विपुलोऽग्रहारः ।

* * * *

प्रख्यातस्तेषु भूम्नाजनि कनकशिवाचार्यनामा द्विजेन्द्रः
तस्मात्सौजन्यसीमाभवदुभयकविस्तार्किकाणां पुरोगः ।
तत्पुत्रान्मार्गमित्रात्सरसकविजनस्तूयमानोक्तिबन्धा-
दासीच्छ्रीसोमनाथः कविरमलभरद्वाजवंशावतंसः ॥
तत्सुतो जगति धन्यलक्षणो लक्ष्मणो ललितसूक्तिदक्षिणः ।
अस्य सूनुरयमद्भुतोक्तिभिर्मानितो जगति मल्लिकार्जुनः ॥

End :

तथापीदमस्तु भरतवाक्यम्—

देवी वाचां द्रढयतु मुखे दीर्घकेलिं कवीनां
सर्वोन्मेषं जगति समये वासवः पोपुषीतु ।
सन्तः सर्वोपकृतिनिरताः सन्तु सन्त्यक्तवैराः
पूर्णा भक्तिर्मुरविमथने पूरुषे बोभवीतु ॥

इति परिक्रम्य निष्क्रान्तास्सर्वे ॥

Colophon.

पञ्चमोऽङ्कः ॥

स्फुलिङ्गकविना तेन पुरभित्पूर्णभक्तिना ।
अलेखि नाटकमिदं हरिभक्तिधुरन्धरम् ॥

R. No. 2169.

Paper $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 112. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916 17 from a MS. of M.R.Ry. Sūribhaṭla Lakṣmīnārāyana Śāstrigāru of Pedagatlapalli, Razole taluk, Gōdāvari district.

(*a*) महाभारतटीका.

MAHĀBHĀRATAṬĪKĀ.

Foll. 1*a*—67*a*.

A short commentary on the Mahābhārata : by Nārāyṇasarvajña.

Wants the beginning in the Ādiparvan ; otherwise complete.

Beginning :

शान्तानि स्वदेहरूपाणि स्वदेहानुरूपाणि समुदीर्णे प्रक्षोभे समुद्दिष्टे इत्यपि पाठः ।

* * * *

नरकं पतन्ति न तु ब्रह्मज्ञा इत्यर्थः ॥

Colophon :

इत्यादिपर्वणि श्लोकाः ॥

End :

नाहं सोमं प्रपिबामि । यथा वा अपप्राणि पिपासुः काञ्जिकं पिबति । तथाहं सोमं पिबामि । नापि कलिङ्गो मां पाटलपक्षी यत्र धूमं पश्यति तत्रैव पिबति । तदनुकारी सोममहं न पिबामीत्यर्थः । किं त्वाह . . . . शेषं पूर्ववत् ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीनारायणसर्वज्ञकृता श्रीमहाभारतटीका समाप्ता ॥

(*b*) महाभारतार्थप्रदीपिका

MAHĀBHĀRATĀRTHAPRADĪPIKĀ.

Foll. 67*b*—112*a*. Fol. 112*b* is left blank.

By Arjunamiśra, son of Īśāna, who were apparently engaged in teaching the Mahābhārata. Similar to the work described above.

Contains the Ādiparvan incomplete.

Beginning:

यस्यैकरेणुपरमाणुरपि क्षणेन ध्यातुर्ददाति विपुलं शममीप्सितेषु ।
तन्नो हरेर्हरतु पादसरोजयुग्मं प्रारिप्सितप्रतिहतीरमितश्रिराय ॥

वेदव्यासवैशंपायनदेवबोधविमलबोधसर्वज्ञनारायणभट्टशाण्डिल्यमाधवमान्य - पादेभ्यो नमः ।

श्रीदेवबोधपादादिमतमालोच्य यत्नतः ।
क्रियतेऽर्जुनमिश्रेण भारतार्थप्रदीपिका ॥

तत्र प्रायेण पुस्तकेषु भगवद्वासुदेवादिपञ्चानां नमस्कारो दृश्यते । तत्र श्रीमद्देवबोधपादानां . . . . तत्र श्रीमद्विमलबोधादिमतानुसारेण पञ्चनमस्कारतात्पर्यं यथामति विव्रियते । ओं नमो भगवते वासुदेवाय । ओं नमः पितामहाय । ओं नमः प्रजापतिभ्यः । ओं नमः कृष्णद्वैपायनाय । ओं नमस्सर्वविघ्नविनाशकेभ्यः ।

* * * *

ब्रह्महत्यादिमहापातकोपपातकादिप्रायश्चित्तस्य भारताध्ययनस्याङ्गं विदधाति - नारायणं नमस्कृत्येत्यादिना ।

End:

देशवासिभिः पुरवासिभिश्चेति राज्यं कारयितुं कर्तुं जितेन्द्रियः प्रभुत्ववान्वा ॥

Colophon:

इति भारताचार्यपाठकश्रीमदीशानतनयभारताचार्यमिश्रार्जुनकृतौ भारतार्थसङ्ग्रहदीपिकायां टीकायामादिपर्वणि यायानविवरणम् ॥

* * *

इमं भौमं नरकं तेन पतन्ति । प्रत्यक्षपरिदृश्यमानमेव तन्नरकं पतन्ति ; काककृमिकीटचण्डालादिरूपेण नरकं ते भजन्ति अनुभवन्तीति यावत् । नावेक्षन्ते वर्षभोगाननेकान्न विदन्ति । वर्षसमूहान् गत्या गति . . . . व्याख्यानं पाठश्च ब्रह्मणा जृम्भ . . . .

R. No. 2170.

Paper. 10⅞ × 9⅝ inches. Foll. 257. Lines, 20 in a page. Telugu. Good

Transcribed in 1916-17 from a MS. of M.R.Ry. Vakkalaṅka Rāmabrahmamgāru of Mummiḍivaram, Amalāpuram taluk, Gōdāvari district.

नामलिङ्गानुशासनम्, विशेषशब्दचिन्तामणिसहितम्.

NĀMALIṄGĀNUŚĀSANAM WITH VIŚĒṢAŚABDACINTĀMAṆI.

Same work as that described under R. No. 947 ante. The commentary is in Telugu and is by Māmiḍi Vēṅkaṭācārya.

Contains the second Kāṇḍa complete.

R. No. 2171.

Paper. 10⅞ × 9⅝ inches. Foll. 103. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Cebrōl Veṅkaṭasōmayājulu of Vallūru, Gōdāvari district.

(*a*) भारतसावित्री.

BHĀRATASĀVITRĪ.

Foll. 1*a*—4*a*.

Same work as that described under No. 5779 of the D.C.S. MSS., Vol. XII.

Complete.

(*b*) पाण्डवगीता.

PĀṆḌAVAGĪTĀ.

Foll. 4*b*—12*b*.

Stanzas of praise purported to have been addressed to Lord Kṛṣṇa by the Pāṇḍavas.

Complete.

Beginning:

त्रैलोक्यचैतन्यमयादिदेव श्रीनाथ विष्णो भवदाज्ञयैव ।
प्रातस्समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये ॥
जानामि धर्मं न च मे प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः ।
श्रीवासुदेवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि ॥

* * * *

धर्मो विवर्धति युधिष्ठिरकीर्तनेन पापं प्रणश्यति वृकोदरकीर्तनेन ।
शत्रुर्विनश्यति धनञ्जयकीर्तनेन माद्रीसुतौ कथयतां न भवन्ति रोगाः॥

ब्रह्मोवाच—

ये मानवा विगतरागपरावरज्ञा नारायणं सुरगुरुं सततं स्मरन्ति ।
ध्यानेन तेन हतकिल्बिषचेतनास्ते मातुः पयोधररसं न पुनः पिबन्ति॥

End:

शुक उवाच—

अप्रमेय हरे विष्णो कृष्ण दामोदराच्युत ।
गोविन्दानन्त सर्वेश वासुदेव नमोऽस्तु ते ॥
कृष्ण त्वदीयपदपङ्कजपञ्जरान्तमद्यैव मे विशतु मानसराजहंसः ।
प्राणप्रयाणसमये कफवातपित्तैः कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥
मङ्गलं भगवन् विष्णो मङ्गलं मधुसूदन ।
मङ्गलं पुण्डरीकाक्ष मङ्गलं गरुडध्वज ॥
इदं पवित्रं पापघ्नं पुण्यं पापप्रणाशनम् ।
दुस्स्वप्ननाशनं पुण्यं पाण्डवैः परिकीर्तितम् ॥
एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः ।
कीर्तयन्ति यदुश्रेष्ठं देवं नारायणं हरिम् ॥
य एवं प्रातरुत्थाय वैष्णवः स्तोत्रमुत्तमम् ।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥

Colophon:

इति ब्रह्मादिऋषिप्रोक्तपाण्डवगीतास्तोत्रं सम्पूर्णम् ॥

The date of copying of the original MS. and the name of the scribe—

सर्वजित्संवत्सरं मार्गशिरबहुलसप्तमी चेब्रोलुपद्दिभट्लु लिखितम् ॥

(c) महानारायणोपनिषत्.

MAHĀNĀRĀYAṆŌPANIṢAT

Foll. 13a—29b.

Same work as that described under No. 518 of the D.C.S. MSS., Vol. I, Part 3.

Complete.

(d) गोपालमन्त्रक्रमदीपिका.

GŌPĀLAMANTRAKRAMADĪPIKĀ.

Foll. 30a—53b.

On certain details, such as the Nyāsa, the Hōma, the Pūjā, the Yantra, etc., connected with the repetition of the Gōpālamantra: by Kēśavācārya.

Complete in eight Paṭalas.

Beginning:

कलात्तमाया लवकान्तमूर्तिः कलक्कणद्वेणुनिनादरम्यः ।
श्रितो हृदि व्याकुलयंस्त्रिलोकीं श्रियेऽस्तु गोपीजनवल्लभो नः ॥
गुरुचरणसरोरुहद्वयोत्थान्महितरजःकणकान् प्रणम्य मूर्ध्ना ।

* * * *

स्नातो निर्मलसूक्ष्मशुद्धवसनो धौताङ्घ्रिपाण्याननः
स्वाचान्तः सपवित्रमुद्रितकरः श्वेतोर्ध्वपुण्ड्रोज्ज्वलः ।
प्राचीदिग्वदनो निबध्य सुदृढं पद्मासनं स्वस्तिकं
वासीनः स्वगुरून् गणाधिपमथो वन्देत बद्धाञ्जलिः ॥

* * * *

ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वदेवतात्मासंयोग-पद्मपीठात्मने नमः ।

करयोर्युगलं विधाय मन्त्रात्मकमाख्यामभिधाय(स्य)मानमार्गात् ।
सकलं विदधीत मन्त्रवर्णैः परमं ज्योतिरनुत्तमं हरेस्तत् ॥

Colophon:

इति केशवाचार्यविरचितायां श्रीगोपालमन्त्रक्रमदीपिकायां प्रथमः पटलः ॥

End:

न्यासजपहोमपूजातर्पणयन्त्राभिषेकविनियोगानाम् ।
सन्दर्शितः क्रमोऽयं दीपिकया कृष्णमन्त्रगणकलितानाम् ॥
संशयतिमिरभिदुरा सैषा क्रमदीपिका करेण महद्भिः ।
करदीपिकेव धार्या सन्ततमहर्निशं समस्तसुसुखाप्तयै ॥

Colophon:

इति श्रीकेशवाचार्यविरचितायां श्रीगोपालमन्त्रक्रमदीपिकायामष्टमः पटलः । समाप्ता चेयं क्रमदीपिका ॥

The date of the original MS:—सर्वधारिसंवत्सरपुष्यबहुलचतुर्दशी बुधवारम् ।

(e) गोपालमन्त्रक्रमदीपिकाटीका —भावदीपिका.

GŌPĀLAMANTRAKRAMADĪPIKĀṬĪKĀ: BHĀVADĪPIKĀ.

Foll. 53b—95a.

A short commentary on the Gōpālamantradīpikā described above by Nityaprajña, also called Puruṣōttama, disciple of Pūrṇaprajña.

Complete in ten Paṭalas.

Beginning:

मनस्यजस्रं मम सन्निधत्तां महो मनोज्ञं पुरुषोत्तमाख्यम् ।
जगत्त्रयीलोचनलोभनीयं श्रुतिश्रितं संश्रितनीलशैलम् ॥

* * * *

विद्याकुमुदवनेन्दुं दिगङ्गनागीयमानगुणनिचयम् ।
प्रज्ञानगुणयतीन्द्रं भूयो भूयो नमस्यामः ॥

आलीढवेणुमरुणाधरपल्लवेन गोपाङ्गनाप्रणयिनं प्रणिपत्य कृष्णम् ।
सत्सम्प्रदायसरणीमनुसृत्य कुर्वे व्याख्यां मुकुन्दयजनक्रमदीपिकायाः ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च विशिष्टमन्त्रदेवतास्वरूपानुस्मरणपूर्वकमाशीर्लक्षणं मङ्गलं सम्पादयन्नर्थाच्चिकीर्षितस्य ग्रन्थस्य मन्त्रदेवतारूपं विषयं तेन प्रतिपाद्यप्रतिपादकलक्षणं संबन्धं च दर्शयति । गोपीजनवल्लभो व्रजयुवतीनां दयितो वल्लभः नोऽस्माकं श्रिये विभवायास्त्विति संबन्धः । तस्य देवतात्मनो मन्त्रस्वरूपेणावस्थितिमाचष्टे— कलेति ।

* * * *

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यपूर्णप्रज्ञानशिष्येण नित्यप्रज्ञेन पुरुषोत्तमापरनामधेयेन विरचितायां श्रीगोपालमन्त्रक्रमदीपिकाटीकायां भावदीपिकाय प्रथमः पटलः ॥

End:

कोष्ठेषु वर्णान् द्वन्द्वशो विलिख्य पठेत् । तृतीयार्गलाप्रकोष्ठगतार्णे द्विरावर्तते। अवशिष्टार्गलगतकोष्ठगता वर्णाः एकैकवारमावर्तन्ते । एवं च तृतीयवलये क्रमदीपिकेयमिति ग्रन्थनाम षष्ठवलये केशवेन कृतेति कर्तुः संज्ञोपलभ्यते । शेषं केशवम् ।

क्रमदीपिकागहनभावदीपिकां गुरुसम्प्रदायसरणिप्रकाशिकाम् ।
करदीपिकामिव विधाय सूरयो हृदि सर्वदा भजत गोपवल्लभम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यपूर्णप्रज्ञशिष्येण नित्यप्रज्ञेन पुरुषोत्तमापरनामधेयेन कृतायां भावदीपिकायां दशमः पटलः ॥

The date and the name of the scribe of the original MS :—सर्वधारिसंवत्सरफाल्गुनबहुलदशमी चेन्नोलुपेद्दिभट्टु लिखितम् ॥

(*f*) कृष्णद्वात्रिंशन्नामस्तोत्रम्.

KṚṢṆADVĀTRIṀŚANNĀMASTŌTRAM.

Fol. 95*b*.

Eulogistic stanzas containing 32 significant names of Lord Kṛṣṇa.

Complete.

Beginning:

यादवं बालकृष्णं च नवनीतधरं हरिम् ।
जानुभ्यां सञ्चरन्तं च नृत्यन्तं मातुरग्रतः ॥

End:

द्वात्रिंशत्ख्यातिविख्यातं स्मरणात्पापनाशनम् ।
प्रातःकाले पठेन्नित्यं सर्वाभीष्टफलप्रदम् ॥

Then a few stanzas are written in praise of Kṛṣṇa in the same page.

(*g*) भुवनेश्वरीमन्त्रः.

BHUVANĒŚVARĪMANTRAḤ.

Fol. 96*a*.

Similar to the work described under No. 6828 of the D.C.S. MSS., Vol. XIII.

Complete.

Beginning:

अस्य श्रीभुवनेश्वरीमन्त्रस्य कण्वऋषिः, ब्रह्मा देवता, पङ्क्तिः छन्दः, ह्रां बीजम्, ह्रीं श्रीं क्लीं शक्तिः ।

End:

मनुः—ओं ह्रीं श्रीं ।

श्रीविद्या सिद्धविद्या च मातङ्गी भुवनेश्वरी ।
पञ्चमी इति विख्याताः पञ्च विद्याः प्रकीर्तिताः ॥

लक्ष्मीर्बिल्ववने कदम्बकुसुमे दिव्याङ्गनायां गजे
श्वेताश्वे वृषभे रथे धवलिते छत्रे ध्वजे भासुरे ।
शङ्खे पद्मवने नरेन्द्रभवने गङ्गाजले गोकुले
सत्ये शौचयुते सलक्षणगृहे श्रीविष्णुवक्षःस्थले ॥

(h) अश्वारूढाभुवनेश्वरीमन्त्रः.
AŚVĀRŪḌHĀBHUVANEŚVARĪMANTRAḤ.

Fol. 96*a*.

Same work as that described under No. 5902 of the D.C.S. MSS., Vol. XII.

Complete.

(i) लघुवाराहीमन्त्रः.
LAGHUVĀRĀHĪMANTRAḤ.

Fol. 96*a*.

Same work as that described under No. 7130 of the D.C.S. MSS., Vol. XIV.

Complete.

(j) रामदशाक्षरीमन्त्रः.
RĀMADAŚĀKṢARĪMANTRAḤ.

Fol. 96*b*.

Similar to the work described under No. 7037 of the D.C.S. MSS., Vol. XIV.

Complete.

Beginning:

अस्य श्रीरामदशाक्षरीमन्त्रस्य वसिष्ठ ऋषिः, विराट् छन्दः, श्रीजानकीवल्लभो देवता, हुं बीजम्, स्वाहा शक्तिः, मम भोगमोक्षार्थे विनियोगः ।

End:

मनुः—हुं जानकीवल्लभाय स्वाहा । अयं मन्त्रः ॥

(k) हनुमन्मन्त्रः.
HANUMANMANTRAḤ.

Foll. 96*b*—97*a*.

Similar to the work described under No. 7677 of the D.C.S. MSS., Vol. XIV.

Complete.

Beginning:

अस्य श्रीहनुमन्मन्त्रस्य अनुष्टुप् छन्दः, ईश्वर ऋषिः, हनुमान् देवता,

* * * *

मनुः—ओं हं हरिमर्कटमर्कटाय स्वाहा ।

End:

सर्वकार्याणि मे सर्वार्थसाधनाय हुं फट् स्वाहा ॥

(*l*) कृष्णमन्त्राः.

KRṢṆAMANTRAḤ.

Foll. 97*a*—99*a*.

Same work as that described under Nos. 6098 to 6114 of the D.C.S. MSS., Vol. XII.

Contains the Ēkāksarī, Aṣṭākṣarī, Daśākṣarī and Aṣṭādaśākṣarī.

(*m*) पुत्रगोपालमन्त्रकल्पः.

PUTRAGŌPĀLAMANTRAKALPAḤ.

Foll. 99*a*—101*b*.

Similar to the work described under No. 7471 of the D.C.S. MSS., Vol. XIV.

Complete.

Beginning:

अस्य श्रीपुत्रगोपालमन्त्रस्य सौभरि ऋषिः, अनुष्टुप् छन्दः, पुत्रप्रदः श्रीगोपालकृष्णः परमात्मा देवता, ओं बीजम् ।

* * * *

मन्त्रः—

देवकीसुत गोविन्द देवदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥
अथातः संप्रवक्ष्यामि पुत्रावाप्तिपरं परम् ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये वर्णसङ्कराः ॥

End:

दामोदराय विद्महे वासुदेवाय धीमहि, तन्नः कृष्णः प्रचोदयात्, ग्लौं क्लीं नमो भगवते नन्दपुत्राय बालवपुषे श्यामलाय गोपीजनवल्लभाय स्वाहा । आं क्रों ।

(*n*) पुत्रप्रजापतिमन्त्रकल्पः.
PUTRAPRAJĀPATIMANTRAKALPAḤ.

Foll. 101*b*—102*a*.

Similar to the above, together with Telugu meaning.

Complete.

Beginning:

अस्य श्रीपुत्रप्रजापतिमन्त्रस्य अनष्टुप् छन्दः, सौभरि ऋषिः, पुत्रप्रजापतिर्देवता ।

* * * *

मनुः—ओं नमो भगवते ब्रह्मणे वेधसे अष्टौ मे पुत्रा जायन्तामक्षीण . . स्वाहा । अस्य प्रयोगः ।

End:

ओं क्लीं कृष्ण क्लीं अयं मन्त्रः । धन्वन्तरिध्यानम् ॥

(*o*) सन्तानचिन्तामणिमन्त्रकल्पः.
SANTĀNACINTĀMAṆIMANTRAKALPAḤ.

Fol. 102*a*.

Similar to the above, together with Telugu meaning.

Complete; as found in the Gautamīmāhātmya forming part of the Brahmāṇḍapurāṇa.

Beginning:

भगवानुवाच—

पाहि शङ्कर लोकेश पाहि लोकनमस्कृत ।
पाहि पावन वागीश पाहि पन्नगभूषण ॥

* * * *

स्तोत्रेणाऽनेन यः कश्चित् यत्र स्तुवति तत्तिथौ ।
षण्मासात्पुत्रमाप्नोति अपि वन्ध्या सुपुत्रिका ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे गौतमीमाहात्म्ये सन्तानचिन्तामणिस्तोत्रं सम्पूर्णम् ॥

End:

मनुः—ह्रीं श्रीं लं क्लीं कृष्ण क्लीं । इति सन्तानचिन्तामणिमनुः ॥

* * * *

ग्रहभूतपिशाचविनाशकरं विषमज्वररोगविनाशकरम् ।
अपि चोरनिशाचरवैरिहरं जयकीर्तिकरं भुवि चक्रमिदम् ॥

(*p*) लक्ष्मीमन्त्रः.

LAKṢMĪMANTRAḤ.

Fol. 102*b*.

Similar to the work described under No. 7110 of the D.C.S. MSS., Vol. XIV.

Complete.

Beginning and **End**:

ओं नमो भगवत्यै महालक्ष्म्यै मह्यमर्थधनधान्यं प्रयच्छ स्वाहा । ओं भूः लक्ष्मीः भुवः लक्ष्मीः तन्नो महालक्ष्मीः प्रचोदयात् ॥

(*q*) लक्ष्मीद्वादशनामस्तोत्रम्.

LAKṢMĪDVĀDAŚANĀMASTŌTRAM.

Fol. 102*b*.

Eulogistic stanzas containing 12 significant names of Goddess Lakṣmī.

Complete.

Beginning:

श्रीदेवी प्रथमं चैव द्वितीयममृतोद्भवा ।
तृतीयं कमला प्रोक्ता चतुर्थं सर्वसुन्दरा ॥

End:

एतानि द्वादश नामानि प्रातरुत्थाय यः पठेत् ।
श्रियं शीघ्रमवाप्नोति सर्वपापैः प्रमुच्यते ॥

(*r*) भुवनेश्वरीमन्त्रः.

BHUVANĒŚVARĪMANTRAḤ.

Foll. 102*b* and 103*a*. Fol. 103*b* is left blank.

Similar to the work described under No. 6828 of the D.C.S. MSS., Vol. XIII.

Complete.

Beginning:

अस्य श्रीभुवनेश्वरीमन्त्रस्य दक्षिणामूर्तिऋषिः, देवीगायत्री छन्दः, श्रीलक्ष्मीर्देवता, ह्रीं बीजम् ।

End:

ओं श्रीं ह्रीं क्लीं अयं मन्त्रः ॥

R. No. **2172.**

Paper. $10\frac{3}{4} \times 9\frac{5}{8}$ inches. Foll. 87. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. V. S. Narasiṁhācāriyār of Villiyambākkam, Chingleput district.

चतुर्दशलक्षणीटिप्पणम्.

CATURDAŚALAKṢAṆĪṬIPPAṆAM.

Same work as that described under No. 4240 of the D.C.S. MSS., Vol. VIII, with the following benedictory stanza. The authorship is attributed to Paṭṭābhirāma.

Incomplete.

श्रीदक्षिणामूर्तिरशेषमर्थं व्यबोधयच्चेतसि मे निषण्णः ।
तत्प्रेरिता मां रसनाग्रमेत्य वाग्वादिनी वादयतु प्रसन्ना ॥

R. No. **2173.**

Paper. $10\frac{3}{4} \times 9\frac{5}{8}$ inches. Foll. 30. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Garimalla Sōmayājulugāru of Kōṭipalli, Gōdāvari district.

Fol. 1 gives the contents of the work. Fol. 2 is left blank.

शब्दव्युत्पत्तिकौमुदी.

ŚABDAVYUTPATTIKAUMUDĪ.

An easy treatise investigating how certain sounds (words) are made to connote and denote significance: by Rājārāma Śāstrin.

Complete.

Beginning:

श्रीमद्गुर्वङ्घ्रिकमले कमलेशपदप्रदे ।
नौमि यस्तत्सदेशो स्यात् सदेशे स्यात्परः कृती ॥
शब्दार्थयोर्भिदामाहुराचार्या द्वैतवादिनः ।
ईशजीवमिवाभेदं प्राहुरद्वैतवादिनः ॥

अथ साम्प्रतिकजनानामभ्यासान्तरव्यापृतानामलब्धयावदपेक्षितसंस्कृतविद्याभ्यासावसराणामल्पायासेन संस्कृतशब्दार्थज्ञानप्रकाशाय "शब्दव्युत्पत्तिकौमुदी". ति नामकं प्रकरणं यथामति विरच्यते । तत्र प्रत्यक्षानुमित्युपमितिशाब्दज्ञानेषु

शाब्दज्ञानं संस्कृतघटितवाक्यादेव शब्दशक्तिप्रमया जायते । भाषान्तरीयशब्दे-भ्यस्तु शक्तिभ्रमादेवेति नैयायिकादयः । भाषान्तरीयशब्देभ्योऽपि शब्दशक्ति-प्रमयैवेति वैयाकरणाः ।

End:

अस्मदर्थस्य शेषस्य कर्तृत्वे उत्तम एव; अहं च स च पचावः । युष्मदा-द्यर्थानां कर्मत्वे कर्माख्यातस्थलेऽपि इयमेव व्यवस्थेति कृतमङ्कुरितेन । इति पुरुषव्यवस्था ॥

नव्यप्राचीनसिद्धान्ता दिङ्मात्रेणेह दर्शिताः ।
व्यस्तोपपत्तयस्तत्तद्ग्रन्थकृद्भिः प्रदर्शिताः ॥
अत्रानुक्तं दुरुक्तं वा शोध्यं बुधदयालुभिः ।
भ्रान्तेः पुरुषधर्मत्वादल्पज्ञत्वान्ममेति शम् ॥

Colophon:

इति राजारामशास्त्रिविरचिता शब्दव्युत्पत्तिकौमुदी समाप्ता ॥

The date and the name of the scribe of the original MS. are—

श्रीहरिशास्त्रिगुरुवरशिष्येण गरिमल्लवेङ्कटरमणशास्त्रिणा विलम्बिनामसंवत्सर-श्रावणबहुलद्वितीया गुरुवासरे ऽलेखि ।

R. No. **2174.**

Paper. 10⅞ × 9⅝ inches. Foll. 24. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry Garimalla Sōmayājulugāru of Kōṭipalli, Gōdāvari district.

रामार्चनचन्द्रिका.

RĀMĀRCANACANDRIKĀ.

Same work as that described under No. 8683 of the D.C.S. MSS., Vol. XVI.

Begins in the Mantrōddhāra in the first Paṭala and breaks off in the Śuddhicatuṣṭayaprakaraṇa in the second Paṭala.

R. No. **2175.**

Paper. 10¼ × 9⅝ inches. Foll. 27. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Uppalūri Kṛṣṇamūrti Śāstrigāru of Daṅgēru, Rāmachandrapuram taluk, Gōdāvari district.

(*a*) स्वरविवेकः.

SVARAVIVĒKAḤ.

Foll. 1*a*—13*a*.

A treatise laying down the grammatical rules with illustration in connexion with Vēdic accents: by Annambhaṭṭa, son of Tirumalārya of Rāghava Sōmayāji family.

Complete.

Beginning:

स्वरोत्पत्तौ कारणानि विज्ञातव्यान्यशेषतः ।
लोपागमविकाराणां प्रकृतेः प्रत्ययस्य च ॥
प्लुतसन्धिपदानां च समासानां च भेदतः ।
क्वचिदर्थवशेनाहुर्दशधा तानि शाब्दिकाः ॥

यत्र लोपनिमित्तस्वरो यथा—देवी, पूष्णः, अस्थ्ना । दिवु क्रीडादौ धातोः । धातोरन्त उदात्तः स्यादिति वकारस्योदात्तत्वे प्राप्ते स्वरविधौ व्यञ्जनमविद्यमानवदिति इकार उदात्तः । तस्य पचाद्यचि लघूपधगुणे स्थानिवद्भावादेकारोऽप्युदात्तः ।

End:

तिङि चोदात्तवति । गतिरनुदात्तः । यद्वत्सानपाकरोति । याज्ञमभ्यारोहति । उदात्तवतीति किम्?—भागधेयेनोपधावति । इति तिङन्तस्वरः ॥

Colophon:

इति श्रीमहामहोपाध्यायश्रीमद्राघवसोमयाजिकुलावतंसश्रीमत्तिरुमलार्यसूनोरन्नंभट्टस्य कृतिषु स्वरविवेकाख्यं प्रकरणं संपूर्णम् ॥

Foll. 13*b* and 14*b* are left blank. Fol. 14*a* gives the contents of the work Svaravivēka.

(*b*) दिव्यचूडामणिः (केरलप्रश्नः), आन्ध्रटीकासहितः.

DIVYACŪḌĀMAṆIḤ (KĒRALAPRAŚNAḤ) WITH TELUGU MEANING.

Foll. 15*a*—27*b*.

Transcribed in 1916-17 from a MS. of M.R.Ry. Tējōmūrtula Rāmamūrtigāru of Śrīrāmapuram, Vizagapatam district.

Same work as that described under No. 13937 of the D.C.S. MSS., Vol. XXIV, with Telugu meaning.

Incomplete.

R. No. **2176.**

Paper. 10⅞ × 9⅝ inches. Foll. 159. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. V. R. T. Tātācāriyar of Paṭṭukkōṭṭai, Tanjore district.

गोपालदेशिकाह्निकार्थप्रकाशिका.

GŌPĀLADĒŚIKĀHNIKĀRTHAPRAKĀŚIKĀ.

A commentary, by Pādukāsēvakarāmānujamahādēśika, disciple of Śrīnivāsamuni, on Gōpāladēśika's Āhnika which deals with the daily rites and duties prescribed for the Brahmans (Śrī-Vaiṣṇavas) as laid down in the Pāñcarātrarakṣā of Vēdāntadēśika.

Complete.

Beginning :

श्रीश्रीवासमुनीन्द्ररूपमनघं कल्याणदिव्योदधिं
जन्मोच्छेदकजन्मदायिनमघस्तोमापहं शेषिणम् ।
नित्यं सुस्थितबन्धुताविलसितं नित्यानृशंस्याश्रयं
दिव्यज्ञानदमात्मसाम्यजननं श्रीरङ्गिणं संश्रये ॥

गोपालदेशिकेन्द्रं सेवे यत्सूक्तिशर्करासङ्गात् ।
श्रीनिगममौलिदेशिकसूक्तिसुधा भवति सुमनसां भोग्या ॥

जयत्याश्रितसन्त्रासनिवारणकृतोदयः ।
सर्वतन्त्रस्वतन्त्रश्रीनिगमान्तगुरूत्तमः ॥

श्रीपाञ्चरात्ररक्षानिर्णिता या प्रपन्नदिनचर्या ।
तत्क्रमसङ्ग्रहरूपः श्रीमद्गोपालदेशिकेन्द्रकृतः ॥

आह्निकसंज्ञनिबन्धः श्रीपतितद्भक्तनित्यहृद्यो यः ।
तदुपरि केचिदमर्षाद्दोषानापाततोऽवदन् कांश्चित् ॥

तद्दोषनिरसनार्थं तदाह्निकार्थप्रकाशिका टीका ।
श्रीनिगमान्तगुरूक्त(दित)निबन्धनार्थानुसारिणी क्रियते ॥

इह खलु श्रीनिगमान्तदेशिकावतार इति प्रसिद्धः श्रीगोपालार्यमहादेशिकः श्रीनिगमान्तदेशिककृतप्रपन्नकर्तव्यभगवत्परिचर्याप्रकाशकश्रीपाञ्चरात्ररक्षायाः प्रमाणन्यायोपन्यासविचारबहुलतया पण्डितानामपि दुरधिगमतां पश्यन् तदर्थतत्त्वा-

ध्यवसायपूर्वकानुष्ठानसौकर्याय चिकिर्षितस्य श्रीपाञ्चरात्ररक्षोक्तप्रपन्नकर्तव्यभगवत्परिचर्याक्रमसङ्ग्रहरूपस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनार्थं समाचरितं श्रीनिगमान्तदेशिकभक्तिप्रार्थनात्मकं मङ्गलं शिष्यशिक्षायै स्वकृतसङ्कीर्तनेन तेषां महिष्ठमङ्गलार्थं च ग्रन्थतो निबध्नाति— अखिलेति ।

End:

अथ सायंसन्ध्योपासनप्रभृति रात्रिद्वितीययामान्तं योगकाल इति सायंसन्ध्योपासनादेरपि योगान्तर्भाव इति कैश्चिदुक्तं प्रमाणाचार्यपादश्रीसूक्तिविरुद्धमित्यभिप्रेत्य पूर्वोक्तरीत्या सायंसन्ध्योपासनप्रभृति रात्रिप्रथमप्रहरकर्तव्यकर्मजातस्य स्वाध्यायान्तर्भावाभिसन्ध्या(न्धिना)सायंसन्ध्योपासनादिकमाह—अथ लोहितायति सूर्य इति । स्वाध्यायकालनिर्णयो वक्ष्यते ॥

Colophon:

इति श्रीमद्वेदमार्गेत्यादिविरुदभूषितस्य श्रीपरमहंसपरिव्राजकाचार्यस्य श्रीमुनित्रयसिद्धान्तनिर्धारणसार्वभौमस्य श्रीपादुकासेवकरामानुजमहादेशिकस्य कृतिषु श्रीमद्गोपालदेशिकाह्निकार्थप्रकाशिका सम्पूर्णा ॥

एतावदेवानुगृहीता व्याख्या श्रीमद्गोपालदेशिकाह्निकस्य ग्रन्थकर्तृभिरित्यवगन्तव्यं महाशयैः ।

Fol. 157*a* contains a list of abbreviations used in the work. In fol. 157*b* the scribe gives his name, etc. Foll. 158*a* and 159*a* contain the contents of the work Fol. 159*b* is left blank.

R. No. **2177.**

Paper. 10⅞ × 9⅝ inches. Foll. 46. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of Sarasvatīnilayam Library, Tēki, Rāmachandrapuram taluk, Gōdāvari district..

वनदुर्गाकल्पः.

VANADURGĀKALPAḤ.

Foll. 1*a*—45*a*. Foll. 45*b* and 46*b* are left blank. Fol. 46*a* gives the contents of the work.

Similar to the work described under No. 8067 of the D.C.S. MSS., Vol. XV. The work is said to form part of the Īśānasaṁhitā.

Deals with the following topics :—

१. वनदुर्गापुरश्चर्याविधिः 46th Paṭala.
२. वनदुर्गापूजाविधिः 84th Paṭala.
३. वनदुर्गानुष्ठानविधिः.
४. वनदुर्गाहृदयम्.
५. वनदुर्गाविद्यामालामन्त्रः.
६. वनदुर्गामन्त्रवर्णावलीस्तोत्र.
७. वनदुर्गाकवच.
८. वनदुर्गाष्टोत्तरशतनामावलिस्तोत्र.
९. वनदुर्गासहस्रनामस्तोत्र.

Beginning :

शिव शङ्कर लोकेश पञ्चानन महेश्वर ।
पुरश्चर्याविधिं ब्रूहि वनदुर्गामहामनोः ॥

ईश्वर उवाच—

शृणु पार्वति वक्ष्यामि वनदुर्गामहामनोः ।
पुरश्चर्याविधिं देवि सावधानेन चेतसा ॥
संप्राप्य देशिकं चादौ सर्वमन्त्रविशारदम् ।
स्वदारनिरतं शान्तं सर्वज्ञं नियतव्रतम् ॥

* * * *

Colophon :

इति श्रीवनदुर्गाकल्पे उमामहेश्वरसंवादे वनदुर्गामन्त्रपुरश्चर्याविधिर्नाम षट्चत्वारिंशत्पटलः ॥

End :

चतुष्पथरता चारुमहागोपुरसंस्थिता ।
कैरातकेश्वरमनोहारिणी शुभकारिणी ॥
इति ते कथितं देवि वनदुर्गास्तवं शुभम् ।
दिव्यनामसहस्राख्यं देवीसन्तोषदायकम् ॥

* * * *

तस्य श्रीवनदुर्गाख्या परां निष्ठां ददाति हि ।
सत्यं सत्यं पुनस्सत्यं किं भूयः श्रोतुमिच्छसि ॥

Colophon :

इति श्रीमदीशानसंहितायामुपरिभागे अम्बिकाखण्डे श्रीमहाविद्याप्रस्तावे श्रीवनदुर्गाकल्पे श्रीवनदुर्गादिव्यसहस्रनामस्तोत्रं सम्पूर्णम् ॥

R. No. **2178.**

Paper. 10⅞ × 9⅝ inches. Foll. 86. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of Sarasvatīnilaya Library, Tēki, Rāmachandrapuram taluk, Gōdāvari district.

आपस्तम्बप्रयोगसरणिः.

ĀPASTAMBAPRAYŌGASARAṆIḤ.

Foll 1*a* - 84*a*. Foll. 84*b* and 86*b* are left blank. Foll. 85*a*—86*a* give the contents of the MS.

The author, whose name is not disclosed, states that he consulted the Gṛhyasūtras of Āpastamba, Gāṅgēyakārikās, Kapardi, etc. Similar to the work described under No. 3547 of the D.C.S. MSS., Vol. VII.

Complete.

Beginning:

आपस्तम्बमुनीन्द्राय क्रतूनां निधये नमः ।
वेदोदितफलावाप्त्यै सन्मार्गज्ञानहेतवे ॥
गुरून् कृष्णं गणेशं च वाणीं नत्वाभिधानतः ।
मूलगृह्यश्च गाङ्गेयकारिका अपि यत्नतः ॥
कपर्दिप्रभृतीन् ग्रन्थान् दृष्ट्वा शक्त्यनुसारतः ।
आपस्तम्बानुसारेण प्रयोगसरणी क्रिया ॥
प्रकाश्यते द्विजातीनामिह मन्दधियां किल ।
मूलगृह्यं समाश्रित्य प्रयोगो ह्यतिदुष्करः ॥

अथ पैतृमेधिकप्रकारो वक्ष्यते—मरणसंशये प्राप्ते गृहे गोमयेनोपलिप्य दक्षिणाग्रैः दर्भैरास्तीर्य आस्तरणेषु तिलानवकीर्य मरणोद्युक्तं यज्ञदत्तमद्भिस्स्नापयित्वा ।

End:

पक्षश्राद्धे सपिण्डे च तर्पणं तदनन्तरम् ।
तथैव चाष्टकाश्राद्धे श्राद्धे चैवानुमासिके ॥

* * * *

यजुषा प्रजामायुर्धनं च । ओं शान्तिश्शान्तिश्शान्तिः ॥

Colophon:

आपस्तम्बप्रयोगसरणिः समाप्ता ॥

The date and the name of the scribe of the original MS :

स्वभानुसंवत्सरफाल्गुनबहुलदशमीबुधवारं कालनाथभट्टलवीरण्ण उत्तरसरणिपुस्तकं लिखितम् ॥

R. No. 2179.

Paper. 10⅛ × 9⅜ inches. Foll. 105. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Vemprla Sītārāma Śāstrigāru of Tōṇḍavaram, Gōdāvari district.

बालभास्करः, सव्याख्यः.

BĀLABHĀSKARAḤ WITH COMMENTARY.

A metrical summary of the Pūrva-Mīmāṁsā of Jaimini. The commentary is called Prabhā.

Begins in the second Pāda of the first Adhyāya and breaks off in the sixth Pāda of the third Adhyāya.

Beginning:

श्रुतेर्विध्यतिरिक्तांशास्त्व(क्रि)यार्था ह्यनर्थकाः ।
स्वाध्यायविध्यधीनत्वात्सार्थका एव सर्वशः ॥

प्रथमपादान्ते वेदाधिकरणे काठकादिसमाख्यानां प्रवचननिमित्तत्वेन कृत्स्नस्य वेदस्यापौरुषेयत्वप्रसाधनेन तदवयवानां चोदनानामपौरुषेयत्वेन धर्मे प्रामाण्ये प्रसाधिते चोदनावदेव तदवयवतयावगतानामर्थवादमन्त्रनामधेयानामपि तद्वत्प्रसक्तं प्रामाण्यमस्ति नेत्यत्र सामान्येनादौ विचार्यते ।

* * * *

Colophon:

इति श्रीबालभास्करव्याख्यायां प्रभासमाख्यायां प्रथमस्याध्यायस्य द्वितीयः पादः ॥

End:

राजन्ययजमानसंबन्धिनि फलचमसेऽपि ब्राह्मणा एव भक्षका इति सिद्धम् ॥

Colophon:

इति श्रीबालभास्करव्याख्यायां प्रभासमाख्यायां तृतीयस्याऽध्यायस्य पञ्चमः पादः समाप्तः ॥

मू—साधारणा ह्यनारभ्य विहिताः पर्वतादयः ।
विकृतौ पौनरुक्त्याप्ते प्रकृत्यर्था व्यवस्थिताः ॥

साधारणा इति । एवमनारभ्यवादप्रसङ्गागतशेषविषयविचारं समाप्येदानीं तमेवानारभ्यवादमनुसन्धत्ते ।

* * * *

केषांचिद्धर्माणां दधिसिद्ध्यर्थत्वेन पूर्वेद्युरनुष्ठानेऽपि तावता तावन्मात्रार्थकत्वस्य दुर्वचत्वाच्च महाप्रकरणादुभयार्थो एव दोहधर्मा इति सिद्धान्तः ।

R. No. **2180.**

Paper. 10¼ × 9⅜ inches. Foll. 12. Lines, 20 in a page. Grantha Good

Transcribed in 1916-17 from a MS. of M.R.Ry. V. S. Gōpālācāriyar, Villiyambākkam, Chingleput district.

वाधूलस्मृतिः.

VĀDHŪLASMṚTIḤ

A treatise on the daily religious rites and duties of the Brahmans. It is attributed to the sage Vādhūla.

Complete.

Beginning:

वाधूलं मुनिमासीनमधिगम्य महर्षयः ।
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ॥
भगवन् ब्राह्मणाधीनआ(दीनामा)चारं वद तत्त्वतः ।
तच्छ्रुत्वा मुनिशार्दूलस्तानृषीन्प्राह धर्मवित् ॥
ब्राह्मं मुहूर्तमारभ्य त्रिकाले विहितं तथा ।
नित्यं नैमित्तिकं चैव प्रवक्ष्यामि यथामति ॥
ब्राह्मे मुहूर्ते संप्राप्ते त्यक्तनिद्रः प्रसन्नधीः ।
प्रक्षाल्य पादावाचम्य हरिसङ्कीर्तनं चरेत् ॥

End:

पुनाति वृषलस्यान्नं सायंसन्ध्या बहिः कृता ।
स्नानं सन्ध्यां जपं होमं स्वाध्यायं पितृतर्पणम् ॥
देवताराधनं चैव वैश्वदेवं यथाविधि ।
न कुर्याद्यदि मोहेन स चण्डालो न संशयः ॥

Colophon:

वाधूलस्मृतिस्समाप्ता ॥

R. No. **2181.**

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 29. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. V. S. Gōpālācāriyar, Villiyambākkam, Chingleput district.

लोकचूडामणिः, द्राविडटीकासहितः.

LŌKACŪḌĀMAṆIḤ WITH TAMIL MEANING.

A Jaina treatise on cosmogony explaining according to Jain mythology the position of the three worlds, of the sun, the moon, etc., and of the Siddhas.

Complete.

Beginning:

बलगोविन्दसिहामणिकिरणकलारुणचरणणहकिरणं ।
विमलअरणेमिचंदं तिहुवणचंदं नमस्सामि ॥

* * * *

सव्वागासमणंतं तस्सअ बहुमद्धदेसभागंमि ।
लोगोऽसद्घपदेसो जगसेडिघणप्पमाणो हुं ॥

End:

उत्ताणट्ठिअमंते पत्तव्व तणू तदुवरि तणुवादे ।
अट्ठगुणड्ढा सिद्धा चिट्ठंति अणंतसुहतित्ता ॥

* * * *

कोटीलक्खसहस्सअट्ठयचप्पण्णसत्तणउदीय ।
चयुसअमेगासीदि गेणणगये चेदिये वंदे ॥

* * * *

Colophon:

लोकचूडामणिव्याख्यानं समाप्तम् ॥

R. No. **2182.**

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 39. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Dhanyamrāju Subbarāyuḍugāru of Śrīrāmapuram, Gōdāvari district.

उपनिषत्सारसङ्ग्रहः, सव्याख्यः.

UPANIṢATSĀRASAṄGRAHAḤ WITH COMMENTARY.

A treatise embodying the chief tenets of the Advaita-Vēdānta as expressed in the Upaniṣads. The author is Subrahmaṇya, son of

Sarvēśvara of the Miṇḍi Sōmayāji family, and salutes in the beginning Śōṇādrisūri and his teacher Vēṅkaṭapaṇḍita as well as Śaṅkarabhagavatpāda and Hastāmalaka. The author is apparently a devotee of Rāma to whom the stanzas are addressed. He adds a commentary of his own called Vidvanmanōhara.

Complete.

Beginning:

श्रुतिमकुटतटविभूषणतत्त्वमणिस्फुरणदीप्तचरणयुगम् ।
विघ्नविभेदनदक्षं विघ्नेशं विघ्नशान्तये नौमि ॥
वन्दे शङ्करभगवत्पादं पादानताघनाशकरम् ।
तच्छिष्यानपि हस्तामलकादीनस्तकिल्बिषान् वन्दे ॥
श्रीमुक्तामलवेङ्कटपण्डितममलप्रबोधदातारम् ।
कामादिविजेतारं सेवे सेवकतमोनिहन्तारम् ॥
अशेषविद्वत्सु विशेषितोऽपि निश्शेषशब्दार्थकृतार्थितोऽपि ।
यः शेषवाक्तत्त्वविशेषपोषः शोणाद्रिसूरिं तमहं प्रपद्ये ॥
श्रीमिण्डिसोमयाज्यन्ववायवार्धिसुधाकरः ।
सर्वेश्वर इति ख्यातः सर्वशास्त्रार्थतत्त्ववित् ॥
तस्य पुत्रो विशुद्धात्मा तत्प्रसादप्रभावतः ।
सुब्रह्मण्य इति ख्यातो ब्रह्मण्यायत्तधीः सुधीः ॥
स्वकृतोपनिषत्सारसङ्ग्रहस्य तमोनुदः ।
विद्वन्मनोहराभिख्यां व्याख्यां विरचयाम्यहम् ॥

अथ प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूर्तये संप्रदायाविच्छित्तये च

* * * *

श्रीशङ्करभगवत्पादविरचितस्य वेदान्तप्रस्थानत्रयस्यातिविस्तरत्वेन पण्डिताभिगम्यतया तदवलोकनासमर्थानां मन्दाधिकारिणां मुमुक्षूणां सुखेन स्वरूपावगतये विरचितस्यास्य प्रकरणस्यादौ भक्तिभावनया राममभिष्टौति—

आत्मारामं निजकलितात्मारामादिबन्धमोचकं रामम् ।
कामादिशत्रुभीमं भीमादिनुतं नतिं कुर्मि ॥

आत्माराममिति । आत्मसु निखिलदेहेषु अन्तर्यामित्वेन आसमन्ताद्रमत इति आत्मारामः ॥

End:

ब्रह्मेदं सर्वमतो ब्रह्मान्यन्नास्ति तत्त्वतो राम ।
इति भावना यथा स्यादामरणं मे तथा कुरु क्षिप्रम् ॥

* * * *

अनुगृहाण तथा तव बोधतो विगलिताखिलसंसृतिकारणः ।
परमधाम यथा परमं लभे परमकारुणिकोत्तम ते पदम् ॥

* * * *

एवं च भवतः परमप्राप्यत्वेन परमकारुणिकत्वेन च त्वामहं शरणं गतः । भवत्स्वरूपावबोधदानेन संसृतिमुक्त्यै भवत्परमं पदं प्रापयेति प्रार्थयामि; तथा मामनुगृहाणेति भावः ॥

Colophon:

इति श्रीमुक्तामलवेङ्कटपण्डितकृपालब्धब्रह्मविद्येन सुब्रह्मण्यसूरिणा विरचितोपनिषत्सारसङ्ग्रहव्याख्या विद्वन्मनोहराभिख्या समाप्ता ॥

The date and the name of the scribe of the original MS. are:

धातुनामसंवत्सरफाल्गुनशुद्धद्वितीया गुरुवारे देशराजुकामराजुलिखितम् ॥

R. No. 2183.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 109. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Uppalūri Kṛṣṇamūrti Śāstrigāru of Daṅgēru, Rāmachandrapuram taluk, Gōdāvari district.

कृष्णकर्णामृतव्याख्यानम्—भगवद्भक्तिरसायनम्.
KṚṢṆAKARṆĀMṚTAVYĀKHYĀNAM : BHAGAVAD-BHAKTIRASĀYANAM.

A commentary on the Kṛṣṇakarṇāmṛta of Līlāśuka, described under No. 9893 of the D.C.S. MSS., Vol. XVIII. The commentator is Āvañca Rāmacandra, son of Koṇḍōpaṇḍita and Gaṅgāmbikā of Śāṇḍilyagōtra. He is the same as the commentator on the Campūrāmāyaṇa (vide R. Nos. 1077(*b*) and 1239 ante). It is said that he was an inhabitant of the village of Kāñjalūru on the banks of the Gōdāvari branch (Ātrēya).

Contains the Adhyāyas two and three.

Beginning:

वन्दे वन्दारुमन्दारं बृन्दावनविहारिणम् ।
नन्दव्रजाङ्गनानन्दकन्दलं यदुनन्दनम् ॥

यदुक्तं पूर्वाध्यायान्ते,

यतो यतः प्रसरति मे विलोचनं ततस्ततः स्फुरतु . . वैभवम् ।

यथा यथा स्फुरति तथा तथा वर्णयितुमारभते—अभिनवेत्यादिना । अभिनवेन नूतनेन नवनीतेन दधिमथननिष्पन्नमृष्टांशेन स्निग्धं मसृणम् । अवयवानामाभिरूप्यार्थं मात्रा नूतननवनीतामृष्टमित्यर्थः । जनन्यो हि दधिमथनानन्तरं करसङ्क्रान्तनवनीतेन बालानामङ्गविलेपनं कुर्वन्तीति प्रसिद्धिः ।

End:

शूरस्य वसुदेवस्यापत्यं पुमान् शौरिः श्रीकृष्णः । नः अस्माकम् । कुशलं क्षेमम् । आयातु आगच्छतु; सर्वापन्निवारणपूर्वकमस्मान् रक्षितुं नित्यं सन्निहितो भवत्वित्यर्थः ।

Colophon:

इति श्रीमदात्रेयगोदावरीतीरस्थकाजलूरुग्रामवासिना श्रीमद्रघुनाथपदारविन्दमकरन्दास्वादनलब्धसारस्वतेन नित्यनिर्मलाचारयुक्तेनाखण्डिततपःप्रचण्डमुनिप्रकाण्डमण्डलेश्वरशाण्डिल्यमहामुनिगोत्रावतंसकोण्डोपण्डिततनूजेन सकलकविराजसमाजकल्पभूजेन विविधविद्याप्रवीणसूरिशिरोमणिना गङ्गाम्बिकागर्भशुक्तिकामुक्तामणिना श्रीमदावश्चवंशकुलाब्धिपरिपूर्णचन्द्रेण श्रीरामचन्द्रेण विरचितायां श्रीकृष्णकर्णामृतव्याख्यायां भगवद्भक्तिरसायनसमाख्यायां तृतीयोऽध्यायः ॥

R. No. **2184.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 110. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Chilkamarti Nārāyaṇācāryulugāru of Kottakōṭa, near Kōṭipalli, Gōdāvari district.

शारीरकमीमांसाभाष्यसङ्ग्रहः.

ŚĀRĪRAKAMĪMĀṀSĀBHĀṢYASAṄGRAHAḤ.

A summary of the Śrībhāṣya of Rāmānuja on the Brahmasūtras. **Complete.**

Beginning:

अथातो ब्रह्मजिज्ञासा। अत्रायमथशब्द आनन्तर्ये भवति। अतश्शब्दो वृत्तस्य हेतुभावे। अधीतसाङ्गसशिरस्कवेदस्याधिगताल्पास्थिरफलकेवलकर्मज्ञानतया सञ्जातमोक्षाभिलाषस्यानन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभाविनी। ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा।

End:

न च परमपुरुषस्सत्यसङ्कल्पः . . . . -
ज्ञानिनः . . . . . . शास्त्रपरिसमाप्तिं द्योतयतीति सर्वं समञ्जसम्॥

Colophon:

इति श्रीभगवद्रामानुजविरचितशारीरकमीमांसाभाष्यसङ्ग्रहे चतुर्थस्याध्यायस्य चतुर्थः पादस्समाप्तः॥ शास्त्रं च परिसमाप्तम्॥

R. No. **2185.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 49. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. V. S. Narasiṁhācāriyar of Villiyambākkam, Chingleput district.

Fol. 49 contains the portion left out on page 31.

यतिप्रतिवन्दनखण्डनम्.

YATIPRATIVANDANAKHAṆḌANAM.

A treatise in refutation of the practice of Sannyāsins prostrating in response to the prostration of Gṛhasthas (house-holders), etc., among a section of the Śrī-Vaiṣṇavites: by Vēṅkaṭādhvarin, son of Raghunāthadīkṣita of Araśāṇipālai.

Incomplete.

Beginning:

असदृशमरुणाब्जदृशं प्रस्फीतपयोधरस्फुरन्मूर्तिम्।
मनसि दधीमहि सततं मातारं मातरं च लोकानाम्॥
मुक्तानुषक्तां हृदये धारये गुरुमालिकाम्।
अलङ्कृतमभूत्प्रायः सद्यस्तनयुगं यया॥
रघुनाथगुरुं नत्वा वेङ्कटाचार्ययज्वना।
यतिवन्दनमर्यादा यथाशास्त्रं प्रकाश्यते॥

वटून् गृहस्थानथवा वनस्थान् यतींश्च वृद्धानपि शास्त्रवश्यः ।
नमस्करोतीह न मस्करीति मतेषु सर्वेष्वपि निर्विचारम् ॥
अघटितघटनापाटवमाविष्कर्तुं कुतूहलं दधतः ।
कतिचित्समर्थयन्ते गृहिणां यतिनापि वन्दनीयत्वम् ॥

ते खल्वेवमाहुः—"तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यात्" इति श्रुतिवाक्ये वेदविच्छब्दो ब्रह्मवित्परः । वेदविच्छब्दस्य वेदार्थज्ञपरत्वेन व्याकर्तृभिर्व्याख्याततया "वेदैश्च सर्वैरहमेव वेद्यः" इत्यादिप्रमाणगणानुसारेण भगवत एव वेदार्थतया तज्ज्ञप्रतिपादकस्य वेदविच्छब्दस्य ब्रह्मविद्येव तात्पर्यावधारणात् ।

* * * *

अत्रोच्यते—ब्राह्मणेभ्यो वेदविद्भ्य इति उभयोरपि पदयोः ब्रह्मवित्परत्वेऽन्यतरवैयर्थ्यं स्यात् ।

End :

किञ्च यतिं प्रति गुर्वादिनमस्कारस्य विशिष्य विधानेन तदितरेषां यत्यवन्द्यत्वं प्रत्युत फलितमिति भवदुदाहृतवचांसि भवदभिमतप्रतिकूलान्येव ।

यतयश्शान्तिपरमा यतात्मानो जितेन्द्रियाः ॥

R. No. 2186.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 40. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of the People's Library, Rajahmundry.

Foll. 14*b*, 25*b*, 26, 34 and 40*b* are left blank.

अलङ्कारसङ्ग्रहः.

ALAṄKĀRASAṄGRAHAḤ.

By Amṛtānandayōgin. Same work as that described under No. 12794 of the D.C.S. MSS., Vol. XXII.

Contains the Paricchēdas six to nine as given below :—

६. दोषगुणालङ्कारनिर्णय.	८. वृत्तिनिरूपण.
७. सन्ध्यङ्गनिरूपण.	९. नाट्यालङ्कारनिरूपण.

Beginning :

अथ दोषाः प्रकीर्त्यन्ते पदानां प्रथमं क्रमात् ।

श्रुतिकट्वसमर्थं च च्युतसंस्कृत्यवाचकम् ॥
निरर्थकं चाप्रयुक्तमश्लीलं ग्राम्यमेव च ।
नेयार्थानुचितार्थे च संदिग्धं क्लिष्टमेव च ॥
अविमृष्टविधेयांशं विरुद्धमतिकृत्तथा ।
अप्रतीतमथैतेषां क्रमाल्लक्षणमुच्यते ॥
परुषाक्षरविन्यासं श्रुतिकट्विष्यते यथा ।
अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः ॥
आलिङ्गितस्य तन्वङ्ग्या कार्तार्थ्यं लभ्यते कथम् ।

* * * *

Colophon:

इत्यलङ्कारसङ्ग्रहे दोषगुणालङ्कारनिर्णयो नाम षष्ठः परिच्छेदः ॥

End:

इष्टसिद्धौ गुणानां तु कीर्तनं गुणकीर्तनम् ।

यथा—

शिरोऽर्चितशिवं शौर्यवशीकृतजगत्त्रयः ।
सुरस्त्रीदुर्लभः सोऽहं मनस्वी च दशाननः ॥
नानाविधैरलङ्कारैः नाट्यविद्या विभूषिता ।
मोदाय भवतो भूयान्मनसो मन्वभूपते ॥

Colophon:

इत्यलङ्कारसङ्ग्रहे नाट्यालङ्कारनिरूपणं नाम नवमः परिच्छेदः ॥

The date and the name of the scribe of the original MS—

विश्वावसुनामसंवत्सरे साम्बमूर्तिलिखितम् ॥

R. No. **2187.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 106. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Sūribhaṭla Lakṣmīnārāyaṇa Sōmayājulugāru of Pedagaṭlapalli, Razole taluk, Gōdāvari district.

भेदधिक्कारविवृतिः.

BHĒDADHIKKĀRAVIVṚTIḤ.

A commentary on Nṛsiṁhāśrama's Bhēdadhikkāra, which is described under No. 4696 of the D.C.S. MSS., Vol. IX: by Kalāhastīśayajvan, a disciple of Raghunāthāśramayati.

Complete.

Beginning :

नत्वा श्रीदक्षिणामूर्तिं रघुनाथाश्रमान् गुरून् ।
भेदधिक्कारविवृतिं कुर्वेऽहं कृतिशान्तये ॥

निर्विघ्नपरिसमाप्तये ग्रन्थादौ परदेवतानुस्मरणलक्षणं मङ्गलमाचरति— वेदान्तेति । तस्य नृसिंहरूपेणोपास्यत्वात् प्रसिद्धसिंहसाम्यं दर्शयन् अज्ञानतत्कार्यनिवर्तनयोग्यतामाह । आद्येन विशेषणेन तत्र प्रमाणं सूचितम् ॥

End :

सम्प्रदायलब्धार्थो नास्माभिर्विस्मृत इत्याह—हृद्गतमिति। विगुणमापाततो विगुणम्। तत्समर्थने वैगुण्यं शक्यमित्याह—क्षमात्मेति। समर्थात्मेत्यर्थः। . . . . इममेवार्थं लोकोक्त्या प्रथयति अपि चेति काचमालावमत्या काचमालेति भ्रान्त्या भ्रमासंभवादित्यर्थः। असंभवेहेतुमाह शारदेति।

रघुनाथयतेश्शिष्यः कालहस्ति.

Colophon :

रघुनाथाश्रमयतेश्शिष्यकालहस्तीशयज्वकृतौ भेदधिक्कारविवृतिः समाप्ता ॥

R. No. **2188.**

Paper. 10⅞ × 9⅘ inches. Foll. 16. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Vemparla Subrahmaṇya Śāstrigāru of Tōṇḍavaramu, Gōdāvari district.

(*a*) आत्रेयशिक्षा.

ATRĒYAŚIKṢĀ.

Foll. 1*a*—2*a*. Fol. 2*b* is left blank.

A treatise explaining the compound or simple words which should be divided in the Pada text of the Vēdas It is based on the Ātrēyasūtras.

Complete.

Beginning :

आत्रेयोक्तेषु सूत्रेषु स्थितानीङ्गचपदान्यहम् ।
श्लोकरूपेण वक्ष्यामि सौकर्याय सुपाठिनाम् ॥
निष्केवल्यं च निष्टकर्चे निषादेभ्यो निषङ्गधिः ।
महिमानं च निष्कावमाहवध्यैमदिन्तमः ॥

End :

अमीवाम्बरीषाद्वा अम्बरीषे च दुन्दुभिः ।
* * * *
वैकङ्कती सर्दिगृदीमाशुमाचविहन्तवै ॥

Colophon :

आत्रेयशिक्षा संपूर्णा ॥

The scribe of the original MS :

पोन्नमल्लिसुब्रह्मण्यलिखितम् ॥

(b) अवर्ण्यावर्णिव्याख्यानम्.

AVARṆYĀVARṆIVYĀKHYĀNAM.

Foll. 3a—16b.

Same work as that described under Nos. 860 and 870 of the D.C.S. MSS., Vol. II, with the addition of the following half a stanza at the end.

Complete.

Colophon :

तिन्त्रिणीकुलसंभूतेनाह्राधिपतियज्वना ।

The date and the name of the scribe of the original MS :

नलनामसंवत्सरश्रावणबहुलप्रथमा आदिवारं पोन्नमाल्लि सुब्रह्मण्येन लिखितम् ॥

R. No. **2189.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 25. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Vemparla Subrahmanya Śāstrigāru of Tōṇḍavaramu, Gōdāvari district.

(a) शमानसन्धिविवरणम्.

ŚAMĀNASANDHIVIVARAṆAM.

Foll. 1a—10b

Similar to the work described under No. 983 of the D.C.S. MSS., Vol. II.

Complete.

Beginning .

प्रणम्य सर्वविद्यानामधिष्ठातारमीश्वरम् ।

शमानसन्धिं व्याकुर्मः प्रातिशाख्यानुसारतः ॥

कुतश्शमानसन्धिः । कुत्रोपयुज्यते । तस्याः कोऽर्थः सविसर्जनीयाविसर्जनीयपदयोः शमानसन्धिः । अथ किमस्य प्रयोजनम्, लक्षणान्तरैरेव व्याख्यातत्वात्, प्रातिशाख्यादिभिश्चरितार्थत्वादिति । उच्यते ।

End :

संहितायां यथा—उपह्वता मनुष्याः । मकारपर इति किम्? उपह्वता धेनुः ।

Colophon :

इति शमानसन्धिविवरणं समाप्तम् ॥

(*b*) नपरम्, सव्याख्यानम्.

NAPARAM WITH COMMENTARY.

Foll. 10*b*—15*b*.

Similar to the work described under R. No. 1976(*c*) ante.

Complete.

Beginning :

अथ यजुस्संहितायां च छ ज त थ द ध न म ल पराः तत्तत्सा(त्स्थाना नुनासिकाः पदान्ताः पदकाले नकारा दृश्यन्ते। अथशब्दोऽत्र मङ्गलार्थोऽधिकारार्थश्च। यजुस्संबन्धिन्यां संहितायामेषां पदानां च छ ज त थ द ध न म ल एते वर्णाः पराः पदान्ताः तत्तत्स्थानानुनासिकाः पदान्ताः पदकाले नकारा दृश्यन्ते। एतान्युदाहरिष्यन्ते।

End :

तन्नवनीतमभवत्। तन्न प्रवस्तव्यम्। तान्निर्बाधानाम्। तन्नाकसदाम्।

Colophon :

नपरं संपूर्णम् ॥

(*c*) विलङ्घ्यम्, सव्याख्यानम्.

VILAṄGHYAM WITH COMMENTARY.

Foll. 15*b*—25*a*. Fol. 25*b* is left blank.

By Mallayārya Same work as that described under R. No. 1964(*e*) ante. The commentary is called Padadarpaṇa.

Complete.

The date and the name of the scribe of the original MS:

क्रोधिनामसंवत्सरवैशाखबहुलप्रथमा भृगुवारं पोन्नमलि सुब्रह्मण्यलिखितम्॥

R. No. **2190.**

Paper. 10¾ × 9⅝ inches. Foll. 25. Lines, 20 in a page. Dēvanāgarī. Good.

Tanscribed in 1916-17 from a MS. of the Library at Trivandrum.

कम्परायचरितम्.

KAMPARĀYACARITAM.

A historical poem narrating the chief life-incidents of Kampana, emperor of Vijayanagar, and son of Bukka and Dēpāyī. The work is also called Madhurāvijaya The author is Gaṅgādēvī, a queen of the prince Kampana. She mentions in the introduction Vālmīki, Vyāsa, Kālidāsa, Bhaṭṭabāṇa, Bhāravi, Ācārya Daṇḍin, Bhavabhūti, author of the Karṇāmṛta (Līlāśuka), Tikkaya, Agastya, Gaṅgādhara and Viśvanātha. The work has been printed in Trivandrum with the help of the MS. of which this is a copy.

Incomplete. There is a break after the 51st stanza of the 7th Sarga and again two other breaks occur in such a way that the number of Sargas could not be determined.

Beginning :

कल्याणाय सतां भूयाद्देवो दन्तावलाननः ।
शरणागतसङ्कल्पकल्पनाकल्पपादपः ॥
स्रष्टुः स्त्रीपुरुषनिर्माणमातृकारूपधारिणौ ।
प्रपद्ये प्रतिबोधाय चित्प्रकाशात्मकौ शिवौ ॥
महाकविमुखाम्भोजमणिपञ्जरशारिकाम् ।
चैतन्यजलधिज्योत्स्नां देवीं वन्दे सरस्वतीम् ॥
असाधारणसर्वज्ञं विलसत्सर्वमङ्गलम् ।
क्रियाशक्तिगुरुं वन्दे त्रिलोचनमिवापरम् ॥
चेतसोऽस्तु प्रसादाय सतां प्राचेतसो मुनिः ।
पृथिव्यां पद्यनिर्माणविद्यायां प्रथमं पदम् ॥
वैयासिकी गिरां गुम्भे पुण्ड्रेक्षाविव लभ्यते ।
सद्यः सहृदयाह्लादी सारः पर्वणि पर्वणि ॥
दासतां कालिदासस्य कवयः के न बिभ्रति ।
इदानीमपि तस्यार्थानुपजीवन्त्यमी यतः ॥
वाणीपाणिपरामृष्टवीणानिक्वाणहारिणीम् ।
भावयन्ति कथं वान्ये भट्टबाणस्य भारतीम् ॥
विमर्दव्यक्तसौरभ्या भारती भारवेः कवेः ।
धत्ते वकुलमालेव विदग्धानां चमत्क्रियाम् ॥

आचार्यदण्डिनो वाचामाचान्तामृतसंपदाम् ।
विकासो वेधसः पत्न्या विलासमणिदर्पणम् ॥
सा कापि सुरभिः शङ्के भवभूतेः सरस्वती ।
कर्णेष्वलब्धवर्णानां सूते सुखमयीं सुधाम् ॥
मन्दारमञ्जरीस्यन्दिमकरन्दरसाब्धयः ।
कस्य नाह्लादनायालं कर्णामृतकवेर्गिरः ॥
तिक्कयस्य कवेस्सूक्तिः कौमुदीव कलानिधेः ।
सतृष्णैः कविभिः स्वैरं चकोरैरिव सेव्यते ॥
चतुस्सप्ततिकाव्योक्तिव्यक्तवैदुष्यसम्पदे ।
अगस्त्याय जगत्यस्मिन् स्पृहयेत्को न कोविदः ॥
स्तुमस्तमपरं व्यासं गङ्गाधरमहाकविम् ।
नाटकच्छद्मना दृष्टां यश्चक्रे भारतीं कथाम् ॥
चिरं स विजयी भूयाद्विश्वनाथः कवीश्वरः ।
यस्य प्रसादात्सार्वज्ञ्यं समिन्धे मादृशेष्वपि ॥

* * * *

न प्रार्थनीयस्सत्काव्यश्रुत्यै सहृदयो जनः ।
स्वादुपुष्परसास्वादे कः प्रेरयति षट्पदम् ॥
तन्मदीयमिदं काव्यं विबुधाश्श्रोतुमर्हथ ।
मधुराविजयं नाम चरितं कम्पभूपतेः ॥
आसीत्समस्तसामन्तमस्तकन्यस्तशासनः ।
बुक्कराज इति ख्यातो राजा हरिहरानुजः ॥
यः शेष इव नागानां नगानां हिमवानिव ।
दैत्यारिरिव देवानां प्रथमः पृथिवीभुजाम् ॥

* * * *

देपायी नाम तस्यासीद्देवी वसुमतीपतेः ।
पद्मा पद्मेक्षणस्येव शङ्करस्येव पार्वती ॥
सत्स्वप्यन्येषु दारेषु तामेव मनुजाधिपः ।
बहुमंस्त निशानाथो नक्षत्रेष्विव रोहिणीम् ॥
कर्णाटलोकनयनोत्सवपूर्णचन्द्रः
साकं तया हृदयसंमतया नरेन्द्रः ।

कालोचितान्यनुभवन्क्रमशः सुखानि
वीरश्चिराय विजयापुरमध्यवात्सीत् ॥

Colophon:

इति श्रीगङ्गादेव्या विरचिते मधुराविजयनामनि वीरकम्परायचरिते प्रथमः सर्गः ॥

End:

ततः सैरन्ध्रीभिः कृतसमुचिताकल्परचनः
पुरन्ध्रीभिस्सार्धं समधिगतशुद्धान्तवसतिः ।
त्रयीगीतं तेजस्त्रिपुरहरमाराध्य विधिवत्
यथार्हैर्व्यापारैर्नरपतिरहश्शेषमनयत् ॥

Colophon:

इति षष्ठः सर्गः ॥

अथ कम्पनरेन्द्रसुभ्रुवां मुखपद्मान्यनुहार्य पङ्कजैः ।
अपराधभियेव भानुमानपरक्ष्माधरकन्दरामगात् ॥

* * * *

कलिन्दजा मर्दितकालियेव दिग्दक्षिणासीत्क्षतपारसीका ।
अथावशिष्टानथ वैरियोधान् संलक्ष्य पादप्रगतान् . . . ॥

R. No. 2191.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 264. Lines, 20 in a page. Grantha Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Karra Simhādri Śāstrigāru of Enukulamahāl, Gōdāvari district.

भागवतव्याख्या—भागवतार्थतत्त्वदीपिका.

BHĀGAVATAVYĀKHYĀ: BHĀGAVATĀRTHATATTVA-DĪPIKĀ.

By Bhāṣyakārasūri. Same work as that described under R. Nos. 1525(*b*), 1572, 1755 and 2131 ante.

Contains the Skandhas three and four. It is stated at the end that the extent of the commentary of the third Skandha is 5,000 Ślōkas and that of the fourth Skandha is 3,000 Ślōkas.

Beginning:

गुरुं मत्पितरं वन्दे रामानुजगुरोः सुतम् ।
वेङ्कटार्यं बुधवरं मम भागवतप्रदम् ॥

वन्देऽस्मन्मातुलं साक्षान्मम सर्वोपकारकम् ।
श्रीमत्संपत्कुमारस्य पुत्रं वेङ्कटदेशिकम् ॥
भवन्ति ज्ञानिनस्सर्वे यं नमस्कृत्य सर्वदा ।
शशिमण्डलमध्यस्थं हयग्रीवं तमाश्रये ॥

द्वितीयस्कन्धान्ते—

परिमाणं च कालस्य कल्पलक्षणविग्रहम् ।
यथा परस्ताद्याख्यास्ये पाद्मं कल्पमथो शृणु ॥

इति प्रतिज्ञातमर्थमस्मिन् स्कन्धे विस्तरेण निरूपयितुमादावितिहासं प्रस्तौति—एवमित्यादिश्लोकद्वयेन । ऋ(द्धिमत्) संपद्भिस्संपूर्णं स्वगृहं त्यक्त्वा वनं प्रविष्टेन क्षत्रा विदुरेण भगवान् जगदुत्पत्त्यादिज्ञानवान् । तदुक्तम्—

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

मैत्रेयः पुरा पूर्वम् । एवं त्वत्कृतप्रतिज्ञानुसारेण एतत् त्वत्पृष्टं सर्वं पृष्टः किल ।

End:

सोऽयमिति । हे महायोगिन् मैत्रेय करुणात्मना दयास्वभावेन भवता यत्र पारे अकिञ्चनगः निष्किञ्चनजनप्राप्यो हरिः । सोऽयं तमसः संसारस्य पारो दर्शितः । इतीति । स्वानां ज्ञातीनाम् । स्वान् ज्ञातीन् दिदृक्षुः गजसाह्वयं हास्तिनपुरं ययौ । एतदिति । हे राजन् हे परीक्षित् । राज्ञां प्रचेतसाम् । एतच्चरितं यः शृणुयात् । सः आयुरादिकमाप्नुयात् ॥

Colophon:

इति चतुर्थस्कन्धव्याख्यायां भागवतार्थतत्त्वदीपिकासमाख्यायामेकोनत्रिंशोऽध्यायः ॥

तृतीयस्कन्धव्याख्या पञ्चसहस्रग्रन्थपरिमिता । चतुर्थस्कन्धव्याख्या सहस्रत्रयग्रन्थपरिमिता ॥

R. No. **2192.**

Paper. $10\frac{7}{8} \times 9\frac{3}{8}$ inches. Foll. 48. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. M. V. Śrīnivāsarangācāriyar of Vāḍapalli, Gōdāvari district.

श्रृङ्गारचन्द्रिका.

ŚṚṄGĀRACANDRIKĀ.

A Bhāṇa dealing with love-topics: by Śrīnivāsakavi, son of Varada of Śrīvatsagōtra. The name of the author's maternal grandfather is given as Vīrarāghava who is said to have been skilled in Vēda, Vēdānta, logic and grammar.

Incomplete.

Beginning:

श्रीपादान्तिकमेयुषामुरसि यत्सेवासु देवासुर-
स्तोमानामवभाति हारतरलालम्बानुबिम्बाकृतिः ।
लीलार्थं प्रकटीकृतश्रुतिशिरोभाषाविभूषायित-
स्वान्तर्भाव इवाच्युतः स दिशतु श्रेयांसि भूयांसि नः ॥

* * * *

अस्ति किल श्रीवत्सकुलकलशजलधिकलानिधिः कलानिधिः कमलासहचर-चरणपरिचरणरसानुभावप्रभवभवश्रीनिरासः श्रीनिवासार्यनामा विद्वत्कविवर्यः ॥

यत्सूक्तिश्श्रुतिसम्मर्ति वितरति स्वादुत्वसाधुत्वयो-
र्भूम्ना नीरसतां तथा नवसुधासारस्य सारस्वतः ।
व्याचष्टे विदितागमान्तसरणीसिद्धान्तसिद्धान्तरो
यस्संभूतमनेकलोकनिकरक्षेमाय रामानुजम् ॥

संप्राप्तसद्गुरुकृपाघनराजिसृष्टषड्धर्मनीरसुझरीकृतचित्तवप्रम् ।
सुज्ञानसस्यमनुभूय जयन्ति लोका हस्त्यद्रिनायकगुरोर्जनकस्य यस्य ॥

औरस्यः प्रतिभाति तस्य कविताकान्तैककेलीभृतो
नाम्ना चाग्र्यधिया पितामहसमः स्वस्यैष लोकस्य च ।
वेदान्तद्वयतन्त्रतर्कपदवीशब्दत्रयीपारगो
विख्यातोऽजनि वीरराघवगुरुर्यस्येह मातामहः ॥

यस्य च सकलागमान्तनिष्पन्नफलप्रायोऽयमभिप्रायः ।
साधारणीषु विलसत्तमवृत्तिभाजां साधारणी तदभिधागुणधारणासीत् ।
बोधायनोपचितवृत्तिपथानुसारी बोधायनो यद्भवद्यतिसार्वभौमः ॥

इति ॥

आम्नातस्तेन विदुषा नाम्ना श्रृङ्गारचन्द्रिका ।
भाणो विजयते पुष्पबाणोदाहृतविक्रमः ॥

तदेतद्रसिकसन्तोषसंपोषकं रूपकमभिनेष्यतो मम भवता प्रत्यनन्तरेण भवितव्यम् ।

End:

वरसहितगणिकागणमपि नवरसहितगणिकागणमिदं सदनवनं ममानन्दघमनीकन्दलनमाचरति ।

तनोति तरुणाश्लेषं लता मञ्जुलता भृना ।
सुतनुश्वसनालोलदलका तनुमालिका ॥

R. No. **2193.**

Paper. $10\frac{7}{8} \times 9\frac{4}{8}$ inches. Foll. 134. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Ivaṭūri Bhujaṅga Raogāru of Irusamanda, Gōdāvari district.

Bound in two volumes.

लक्ष्यमाला.

LAKṢYAMĀLĀ.

Explains with illustrative examples the Sūtras of Pāṇini in the order in which they are found in the Aṣṭādhyāyī. The author is Ēlēśvarāgnihōtra, son of Rāma and grandson of Vēṅkaṭādvaitin. He is stated to have consulted the Kaustubha (Śabdakaustubha of Bhaṭṭōjidīkṣita).

Conta ns from the 77th Sūtra of the first Pāda of the fourth Adhyāya to the end of the eighth Adhyāya.

Beginning:

गणानां पतिमानम्य गुणानां निधिमादितः ।
मेरुभे कौस्तुभे वीक्ष्य लक्ष्यमाला वितन्यते ॥
मालाष्टमान्तलक्ष्याणां मालासूत्राश्रया रघोः ।
रामस्योपास्यदेवस्य सैष कौस्तुभमेरुभा ॥
तेजोभिन्नानि चेष्टन्ते यत्तुष्ट्यै स्त्रिविशोधने ।
जलस्योत्तरणे सेतौ अग्न्यठ्ध्यचलरूपकः ॥
विशुद्धिवचनग्राहबाधोक्त्यप्लवनैः क्रमात् ।
तं वन्दे राघवं रामं भक्तवत्सलमल्पवाक् ॥

* * * *

एलेश्वराग्निहोत्रोऽत्र चान्द्रमाने समाश्रितः ।
शब्दाः किलकिलायन्ते यत्र पूगान्धुषूदये ।

तेन दासेन रामस्य वेङ्कटाद्वैतिसूरिणः ।
पौत्रेण पितुरादेशात् बिध्याव(?)स्तुष्यतां हरिः ॥

यूनस्तिः । युवन्शब्दात्तिप्रत्ययः स्यात् । युवतिः । अत्र तद्धिताधिकार उत्तरार्थः । इह करणं लिङ्गविशिष्टपरिभाषाया अनित्यत्वं ज्ञापयितुम् । यौतेः शत्रन्तात् ङीपि युवती । अत्र युवतीनां समूहो यौवतमेव । त्यन्तात्तु यौवनम् । भिक्षादिपाठसामर्थ्यादत्र न पुंवदिति वृत्तिश्चिन्त्येत्याहुः । अत्रानुपसर्जनाधिकारात् बहवो युवानो यस्यां सा बहुयुवा शाला ॥

* * * *

Colophon:

इति चतुर्थस्याऽध्यायस्य प्रथमः पादः ॥

End:

अ अ । दीर्घप्लुतयोरवर्णयोः विवृतत्वं, संवृतत्वं ह्रस्वस्य ॥

* * * *

यश्शास्त्रादौ विवृतः प्रतिज्ञातः स संवृतो ज्ञेयः । प्रयोगे सर्वत्र संवृत एव प्रयोक्तव्य इत्यर्थः ॥

Colophon:

इत्यष्टमस्याध्यायस्य चतुर्थः पादः ॥

शब्दाः किरकिरायन्ते यत्र पूगान्धुपूदये ।
पूलेश्वराग्निहोत्रोऽत्र चान्द्रमाने समाश्रितः ॥

R. No. 2194.

Paper. 10¼ × 9⅜ inches. Foll. 127. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Vāḍapalli Kēśavācārlugāru of Ramaṇakapēṭa, Gōdāvari district.

सिद्धान्तचन्द्रिका.

SIDDHĀNTACANDRIKĀ.

A treatise justifying with authorities from the Vēdas, Smṛtis, Āgamas, etc., the practice of bearing on one's arm the mark of the Sudarśana (wheel) emblem of Viṣṇu: by Paravastu Vēdāntācārya, disciple of Ādivarāhārya who was the son of Paravastuguru. The author's paternal uncle was Vēdāntārya who was a disciple of Paravastuguru.

Breaks off in the second Pariccheda and deals with the following subjects :—

१ परिच्छेदः—

पवित्रश्रुतेः सुदर्शनधारणपरत्वसमर्थनम्.
चरणश्रुतेः सुदर्शनधारणपरत्वसमर्थनम्.
चमूषन्मन्त्रस्य सुदर्शनधारणपरत्वसमर्थनम्.
सर्वमन्त्राणां विधायकत्वसमर्थनप्रकारः.
खिलानामपि वाक्यानां चक्रधारणे प्रामाण्यम्.

२ परिच्छेदः—

भगवच्छास्त्रप्रामाण्यम्.

Beginning :

श्रीशे यस्मिन् प्रलयसमये लीनमासीत्पुरेदं
यस्माज्जातं भुवनमखिलं यश्च विश्वं बिभर्ति ।
यत्सङ्कल्पाद्दुरितनिकरैर्मुच्यते कोऽपि जन्तुः
सानुक्रोशः स मम हृदये संनिधत्तां मुकुन्दः ॥
विष्वक्सेनो भवतु शरणं स्यात्प्रसन्नः शठारि-
र्नाथो नाथः स भवतु भजे पुण्डरीकाक्षसूरिम् ।
वन्दे रामं प्रथितविभवं यामुनार्यं च पूर्णं
चित्तेऽस्माकं शमितकलुषः सन्निधत्तां यतीन्द्रः ॥
द्वितीयं लक्ष्मणं नैमि यस्य वागमृतैर्जगत् ।
कुमतक्ष्वेलविध्वस्तजीवितं जीवितं पुनः ॥
अन्तस्तमिस्रपरिषच्छतपत्रबन्धोराम्नायमस्तकगुरोश्चरणारविन्दे ।
ये संश्रिता भुवि जनाः प्रणतेन मूर्ध्ना तेषां मदीक्षणपदाम्बुजमुद्वहामः ॥
पुण्याय तस्मै परवस्तुनाम्ने प्रणामवाचं परिशीलयामः ।
वसुन्धरायां यदुपज्ञमिन्धे वेदान्तविद्यागुरुवाक्प्रबन्धः ॥
त्रय्यन्तार्यो वसति हृदये यस्य नित्यं प्रयुक्तो
यस्याचार्यो जयति परवस्त्वाख्यया मुख्यवृत्त्या ।
यस्मादन्यो निगमशिरसां वेत्ति भावं न कश्चि-
द्वेदान्तार्यो जयति भगवान् सोऽयमस्मत्पितृव्यः ॥
श्रीमदादिवराहार्यान् परवस्तुगुरोस्सुतान् ।
वन्दे येषां पदाम्भोजं शरणं मम निस्समम् ॥

श्रुतिस्मृतिसदाचारैर्भगवच्चक्रधारणम् ।
न्यायैश्च विविधैरत्र धर्म्यमित्यभिदध्महे ॥
आम्नायशिखराचार्यः कुदृष्टीन्मे जिगीषतः ।
जिह्वाभद्रासनमिदमारोहतु दयाम्बुधिः ॥
न्यायरूपैः प्रहरणैः भेत्स्यामि कुमतीन् परान् ।
अनुसृत्यागमान्तार्यसूक्तिं कामपि साधवः ॥

स्थितं तावच्चोदनालक्षणोऽर्थो धर्म इति । अस्ति च सुदर्शनादिधारणे चोदना । तथाहि शतपथे श्रूयते—अथ कात्यायनः पप्रच्छ याज्ञवल्क्येति होवाच परं ब्रह्मेत्येको देवो विश्वतश्चक्षुरुत विश्वात्मा विश्वतोबाहुरुत एष पुरुषोऽन्तर्यामोऽन्तर्यामः स विश्वतोमुखस्सर्वात्मा विश्वतोहस्तो नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायत इति

* * * *

तदयं सङ्ग्रहः ।

श्रुत्यन्तरेण व्याख्यानादियं सौदर्शनी श्रुतिः ।
श्रुतेः सौदर्शनत्वस्य सात्वते प्रतिपादनात् ॥
सुदर्शनप्रतिष्ठायां विनियोगश्च सात्वते ।
पाद्मोपबृंहणाच्चैषा श्रुतिः सौदर्शनी मता ॥
अर्थान्तरपरत्वं तु पदवाक्यविरोधतः ।
अपास्तं भगवच्छास्त्रविरोधाच्च परेरितम् ॥

Colophon:

इति श्रीवेदान्ताचार्यस्य कृतौ सिद्धान्तचन्द्रिकायां पवित्रश्रुतेः सुदर्शनधारणपरत्वसमर्थनप्रकारः ॥

End:

तस्मात् प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यादेव । तथाच पर्युदासपक्ष एव श्रेयान् । अत एव प्रदेशे अनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यात् । इति दाशमिकाधिकरणे ।

R. No. **2195.**

Paper. $10\frac{7}{8} \times 9\frac{3}{8}$ inches. Foll. 239. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Tiru Śrīnivāsavarada Tātācārya of Villiyambākam, Chingleput district.

जयाख्यसंहिता.

JAYĀKHYASAṀHITĀ.

A Saṁhitā of the Pāñcarātrāgama. The topics dealt with herein are given below. It was taught by Śāṇḍilya to Saṁvartaka. The sacredness of the Hastigiri at Conjeeveram is mentioned herein.

Complete in the following 33 Paṭalas :—

१. हस्तिशैलवैभव.
२. ब्रह्मसर्गपटल.
३. प्रधानसर्ग.
४. शुद्धसर्गब्रह्मतत्त्वाख्य.
५. Do.
६. मुख्यमन्त्रोद्धार.
७. उपकरणमन्त्रोद्धार.
८. मुद्राबन्ध.
९. स्नानविधि.
१०. समाधिख्यापन.
११. मन्त्रन्यासविधि.
१२ मानसयोग.
१३. बाह्ययोग.
१४. जपविधान.
१५. अग्निकार्यविधि.
१६. दीक्षाविधान.
१७. शिष्यादिभेदाख्यान.
१८. अभिषेकाख्यान.
१९. मन्त्रसिद्धिचिह्नाख्यान.
२०. प्रतिष्ठाविधि.
२१. पवित्रकविधान.
२२. वैष्णवाचारलक्षण.
२३. श्राद्धविधान.
२४. संस्कार.
२५. प्रायश्चित्तविधि.
२६. काम्यमन्त्रसाधन.
२७. मन्त्रसाधन.
२८. अङ्गमन्त्रसाधन.
२९. मन्त्रसाधन.
३०. परिकरसाधन.
३१. उपाङ्गसाधन.
३२. साधनविधि.
३३. योगाख्यान.

Beginning :

नमः सकलकल्याणदायिने चक्रपाणये ।
विषयार्णवमग्नानां समुद्धरणहेतवे ॥
स सिद्धपूजिते स्थाने देवब्रह्मर्षिसेविते ।
तपस्विजनसङ्कीर्णे पुण्यकृद्भिर्निषेविते ॥
तीर्थोत्तमे प्रभासे च यत्र संनिहितः सदा ।
विश्वात्मा भगवान् विष्णुर्लोकानुग्रहकृत्प्रभुः ॥

तत्र शुश्रूषणपरः पित्रादिगुरुसन्ततेः ।
नित्यमेवापवर्गार्थी विरागी वीतमत्सरः ॥
संवर्तकः कान्तिनिधिः दृष्ट्वा मग्नं स्वकं वपुः ।
प्राञ्जलिः प्रणतो भूत्वा चैवं पितरमब्रवीत् ॥

संवर्तकः—

संसारार्णवमग्नस्य ममोपायादि कथ्यताम् ।
यं ज्ञात्वा न पुनर्जन्म स्यान्ममान्यस्य कस्यचित् ॥

*   *   *   *

शाण्डिल्यः—

शृणुध्वं संयतास्सर्वे विष्णोरमिततेजसः ।
सारभूतमिदं शास्त्रं ज्ञानोपनिषदं महत् ॥
रहस्यमप्रकाशश्च ब्रह्मगर्भश्च शाश्वतम् ।
अनुग्रहार्थे च पुरा कथितं नारदेन तत् ॥

*   *   *   *

एवमेतत्समाख्यातं हस्तिशैलस्य वैभवम् ।
देवस्य तन्त्रसारस्य पूजकस्य च संग्रहात् ॥
यथा वै नारदमुनेः मुखात्पूर्वं श्रुतं मया ।
तथैव सर्वमाख्यातं प्रसङ्गात्प्रीतिपूर्वकम् ॥
अथ प्रकृतमेवाद्य तन्त्रमारभ्यते मया ।
श्रूयतामवधानेन श्रद्धाभक्तिमहीयसा ॥

Colophon:

इति श्रीपाञ्चरात्रे जयाख्यसंहितायां प्रथमः पटलः ॥

End:

इत्येतत्कथितं सर्वं पञ्चरात्रार्थमुत्तमम् ।
सर्वस्वमिव विप्रेन्द्र रक्षणीयं प्रयत्नतः ॥
सर्वोत्तमा संहितैषा सर्वविज्ञानदीपिका ।
नाख्येया दुष्टबुद्धीनां नराणां कलुषात्मनाम् ॥

*   *   *   *

शास्त्रार्थमनुवक्तव्यं शास्त्रमादौ प्रपूज्य च ।
येनाशु विविधा सिद्धिः द्वयोर्भवति शाश्वती ॥

Colophon:

इति श्रीपाञ्चरात्रे श्रीजयाख्यसंहितायां योगाख्यानं नाम त्रयस्त्रिंशः पटलः ॥

R. No. **2196.**

Paper. $10\frac{7}{8} \times 9\frac{3}{8}$ inches. Foll. 24. Lines, 20 in a page. Telugu. Good.

(*a*) **चण्डीविधानम्.**

CAṆḌĪVIDHĀNAM.

Foll. 1*a*—12*b*.

Transcribed in 1916-17 from a MS. of M.R.Ry. Kūtumbayya Śāstrigāru of Masulipatam.

Similar to the work described under No. 6276 of the D.C.S. MSS., Vol. XIII.

Contains the Caṇḍīmantrōddhāra and the Pūjā.

Beginning:

अथ वक्ष्ये महाविद्यां चण्डिकां चण्डविक्रमाम् ।
वाङ्माया मदनो दीर्घः लक्ष्मी तन्द्री श्रुतं युयुक् ॥
गायै सद्दग्जलं कूर्मद्वयं पिङ्गेशसंज्ञकम् ।
नवाक्षरोस्य ऋषयो ब्रह्मविष्णुमहेश्वराः ॥
छन्दांस्युक्तानि देवेशि गायत्र्युष्णिगनुष्टुभः ।

End:

कालिका चण्डिका चैव तथा शाकम्बरीति च ।
दुर्गा सुभद्रा एतासां नाममन्त्रैः क्रमाद्यजेत् ॥
एवं चण्डीं भजेद्यस्तु स श्रीपतिसमो भवेत् ।
प्रसङ्गात्सर्वमप्युक्तं चण्डीविधिरनुत्तमा ॥
दुःखदारिद्र्यशमनी स्मरणादिष्टदायिनी ।

Colophon:

इति श्रीचण्डीविधानं सम्पूर्णम् ॥

(*b*) **रामायणमहिमादर्शः.**

RĀMĀYAṆAMAHIMĀDARŚAḤ.

Foll. 13*a*—16*a*. Foll. 16*b* and 24*b* are left blank.

Transcribed in 1916-17 from a MS. of M.R.Ry. Chelukuri Śēṣagiri Raogāru of Kotipalli, Godavari district.

Same work as that described under R. No. 1796(*a*) ante; by Purāṇam Hayagrīva Śāstrin.

Contains the fourth Bimba.

(c) पाण्डवगीता.

PĀṆḌAVAGĪTĀ.

Foll. 17a—24a.

Transcribed in 1916-17 from a MS. of M.R.Ry. Nāgam Veṅkaṇṇadoragāru of Isamavaram, Godavari district.

Same work as that described under R. No. 2171(b) ante.

Complete.

R. No. 2197.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 160. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Tiru Śrīnivāsavaradatātācāriyār of Villiyambākkam, Chingleput district.

वेदान्तकन्टकोद्धारः.

VĒDĀNTAKAṆṬAKŌDDHĀRAḤ.

Same work as that described under No. 5004 of the D.C.S. MSS., Vol. X ; by Campakēśācārya.

Contains the portion of the Prathama Sūtraśōdhana in continuation of that contained in the MS. referred to above and up to the beginning contained in the MS. described under R. No. 771 ante.

Beginning:

प्रत्यक्षानुमानयोर्विरोधे तावत् प्रत्यक्षं बलीय इत्यत्र न कथञ्चिदपि विप्रतिपत्तिः शक्यते । अन्यथा आदित्यो यूप इत्यादावप्यागमेन आदित्ययूपाभेदप्रत्ययप्रसङ्गाच्च । आम्नायस्याज्ञातप्रयोजनवदर्थप्रत्यायकत्वाद्यूपाञ्जनविधिविशेषार्थवादस्य च यूपादित्याभेदप्रतिपादने प्रयोजनाभावात् ।

End:

भगवानिति शब्दोऽयं तथा पुरुष इत्यपि ।
निरुपाधी च वर्तेते वासुदेवे सनातने ॥

इत्यादिप्रमाणशतावगतभगवदैकान्त्येन पुरुषपदेनोपसंहारात् । तस्मिन्नयं पुरुषो मनोमयः । सत्यं ज्ञानमनन्तं ब्रह्म । अनन्तरूपं विश्वं पुराणं तमसः परस्तात् । विद्युतः पुरुषादधि । इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते ।

R. No. 2198.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 66 Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. V. S. Gōpālāchar of Villiyambākkam, Chingleput district.

तैत्तिरीयारण्यकभाष्यम्.

TAITTIRĪYĀRAṆYAKABHĀṢYAM.

Same work as that described under No. 182 of the D.C.S. MSS., Vol. I, Part 2.

Contains the commentary of Bhaṭṭabhāskara on the sixth Praśna (wants the beginning) and of Varadarāja on the Praśnās seven and eight.

R. No. **2199.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 122. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Kāśībhaṭla Pedda Kāmēśvara Śāstri of Betamallipūdīsavaram, Razole taluk, Godavari district.

बालभारतम्.

BĀLABHĀRATAM.

A compilation from the Mahābhārata which is intended to narrate the main thread of the story for the benefit of beginners. The 78 Adhyāyas of the Virāṭaparvan are thus summarized in eight Adhyāyas.

Contains the Virāṭaparvan complete in eight Adhyāyas and the Udyōgaparvan breaking off in the 15th Adhyāya.

Beginning:

. . . युधिष्ठिरो राजा कुन्तीपुत्रो य . . कः ।
समाहूयानुजान्सर्वानिदं वचनमब्रवीत् ॥
द्वादशेमानि वर्षाणि राष्ट्राद्विप्रोषिता वयम् ।
छद्मना हृतराष्ट्राश्च निस्वाश्च बहुशः कृताः ॥
उषिताश्च वने कृच्छ्रं यथा द्वादश वत्सरान् ।
तेऽज्ञातचर्यां वत्स्यामश्छन्ना वर्षं त्रयोदशम् ॥

* * * *

Colophon:

इति श्रीमदीये बालभारते विराटपर्वणि प्रथमोऽध्यायः ॥

End:

पुनः स मन्त्रयामास मन्त्रिभिः स महीपतिः ।
द्रुपदस्य विनाशाय सामात्यस्य शिखण्डिनः ॥

Colophon:

इति श्रीमदीये बालभारते उद्योगपर्वणि चतुर्दशोऽध्यायः ॥

* * * *

द्रौणिस्तु दशरात्रेण कर्णः पञ्चदिनैस्तथा ।

तस्मादहम . . . . ॥

R. No. 2200.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 41. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Karra Simhādri Śāstrigāru of Enukulamahāl, Razolo taluk, Godavari district.

The matter written on foll. 33*a*—37*a* is struck out.

चतुर्वेदतात्पर्यसङ्ग्रहः—सव्याख्यः.

CATURVĒDATĀTPARYASANGRAHAḤ WITH COMMENTARY.

Same work as that described under No 5078 of the D.C.S. MSS., Vol. X.

Contains about 73 stanzas.

End:

कर्मैकमेव न परं पशुबन्धनं ते

कर्तव्यमाहुरुपलभ्य तवाभ्यनुज्ञाम् ।

* * * *

सामगैराम्नायते—तपश्च तेजस्त इत्युपक्रम्य कर्माधिपतये नमः इत्यन्तः । तत्र विरूपाक्षोऽसीति प्रस्तुत्य त्वां प्रपद्ये त्वया सूतपदम्.

R. No. 2201.

Paper. $10\frac{3}{8} \times 9\frac{4}{8}$ inches. Foll. 41. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Bamiḍipāṭi Acyutarāma Sōmayājulu of Iruśumanḍa, Godavari district.

ब्रह्मसूत्रभाष्यव्याख्या—सुबोधिनी.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ : SUBŌDHINĪ.

A gloss on Śaṅkarācārya's commentary on the Brahmasūtras: by Śivanārāyaṇānandatīrtha.

Begins in the course of the 11th Sūtra of the first Pāda of the first Adhyāya and breaks off in the 22nd Sūtra of the fourth Pāda of the same Adhyāya.

Beginning :

त्वादिति भावः । उपासनाभेदप्रयुक्तफलभेदे श्रुतिमुदाहरति— तं यथेति । यथा यथा येन येन प्रकारेण यद्यद्गुणविशिष्टतया उपासते जनाः तस्य तस्य तत्तदा . . . तीति श्रुत्यर्थः । तत्रैव श्रुत्यन्तरमुदाहरति—यथाकर्तु(क्रतु)रिति । यद्गुणविशिष्टोपासको भवति पुरुषोऽस्मिन् लोके स इतः प्रेत्य तद्विशिष्ट फलं प्राप्नोतीति श्रुतिभावः ॥

* * * *

Colophon :

इति श्रीगोविन्दभगवत्पादशिष्यश्रीमत्परमहंसपरिव्राजकाचार्यश्रीशङ्कराचार्यविरचितशारीरकमीमांसाभाष्यसुबोधिन्यां श्रीशिवनारायणानन्दतीर्थविरचितायां प्रथमस्याध्यायस्य प्रथमः पादः ॥

End :

श्रीशङ्कराचार्यमुखारविन्दनिष्यन्दिभाष्यामृतवर्षधाराः ।
. . . . . सुधीभावगभीरसिन्धुं तरङ्गयन्त्यो नितरां जयन्ति ॥

Colophon :

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्य श्रीमत्परमहंसपरिव्राजकाचार्यशिष्यश्रीशङ्कराचार्यविरचितशारीरकमीमांसाभाष्यसुबोधिन्यां श्रीशिवनारायणानन्दतीर्थविरचितायां प्रथमस्याध्यायस्य . . तृतीयः पादः सम्पूर्णः ॥

* * * *

सू । अवस्थितेरिति काशकृत्स्नः । व्याचष्टे—अस्यैवेति । इदमविक्रमाशङ्कते—नन्विति ॥

* * * *

परमात्मनोऽन्यो विज्ञानात्मा कर्तृत्वादिलक्षणो नास्तीति परिहरणीयमिति भावः । अविद्या ।

Foll. 37*b*—41*b* contain the portion which was left out in the end of the second Pāda and in the beginning of the third Pāda of the first Adhyāya.

R. No. 2202.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 21. Lines, 20 in a page. Grantha. Good.

(*a*) श्रुतिमतानुमानोपपत्तिः.

ŚRUTIMATĀNUMĀNŌPAPATTIḤ.

Foll 1*a*—15*a*. Foll. 15*b*—16*b* are left blank.

Transcribed in 1916-17 from a MS. of M.R.Ry. Bommagaṇṭi Sītārāma Sāstrigāru of Kali, Razole taluk, Godavari district.

A treatise on Advaita Vedanta proving by means of logical reasoning the correctness of the Advaitin's inference of unreality. By Bhaṭṭa-Tryambaka, a disciple of Brahmānanda Sarasvatī.

Complete.

Beginning:

सत्यज्ञानानन्दलक्ष्मपरिच्छेदविवर्जितम् ।
अस्पृष्टान(र्थ)मनिशमाश्रये नृहरेः पदम् ॥

विमतं मिथ्या, दृश्यत्वात् । यदित्थं तत्तथा, यथा संप्रतिपन्नम् । न च जगतोऽभावादाश्रयासिद्धः पक्षः, तस्य पारमार्थिकत्वाभावेऽपि तत्र विमतत्वरूपपक्षतावच्छेदकत्वस्योभयवादिसिद्धतया तत्राश्रयासिद्धेरसम्भवात्। परमार्थसद्भेदविशिष्टपक्षादेराश्रयासिद्धत्वे शशे प्रतीतं शृङ्गं न पारमार्थिकम् । प्रमाणाविषयत्वादित्यादेरपि त्वन्मते आश्रयासिद्धत्वप्रसङ्गात् ।

End:

एवं च गुणादावतीतादौ च संयोगासंभवात् साक्षात्संबन्धस्याविप्रकृष्टसंबन्धिकत्वनैयत्याच्च संभवतोऽपि तस्यानिर्वाच्यत्वमावश्यकम् । परम्परासंबन्धनिरासश्चान्यत्र प्रपञ्चित इति सर्वं चतुरश्रम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पूज्यपादचरणानुग्रहलब्धब्रह्मविद्यावैशद्यस्य ब्रह्मानन्दसरस्वतीसारस्वतसाम्राज्यानुभवसमेधमानयुक्तिशतधारोत्सारितविपक्षपक्षदुरुक्तागिरिनिचयस्य भट्टत्र्यम्बकस्य कृतिषु श्रुतिमतानुमानोपपत्तिः संपूर्णा ॥

(*b*) यमयज्ञप्रयोगः.

YAMAYAJÑAPRAYŌGAḤ.

Foll. 17*a*—21*b*.

Transcribed in 1916-17 from a MS. of M.R.Ry. Uppalūri Kṛṣṇa mūrti Śāstrigāru of Dangeru, Rāmachandrapuram taluk, Gōdāvari district.

Gives the ritualistic procedure relating to the performance of the fire oblations with a view to appease the God of Death.

Complete.

Beginning:

अथातो यमयज्ञं व्याख्यास्यामः । संवत्सरमध्येऽन्यस्मिन् संवत्सरे वा कार्तिक्यां पौर्णमास्यां मासि मासि पौर्णमास्यां वा भरणीनक्षत्रयुक्तेऽहनि वा प्रातः काले नित्यकर्म कृत्वा अग्न्यगारे वेदिकासंनिधावाचम्य प्राणानायम्य ममोपात्त- दुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं यमयज्ञाख्यं कर्म करिष्यमाणः तदङ्गत्वेन चादौ शुद्ध्यर्थं वृद्ध्यर्थं शान्त्यर्थमभ्युदयार्थं च महाजनैः सह स्वस्तिपुण्याह- वाचनं करिष्ये

* * * *

ततो महास्थण्डिलगतासु पञ्चसु वेदिकासु त्रींस्त्रीन् विष्टरान् प्रस्तरमेकैकं च निधाय तासु वेदिकासु पञ्चसु प्रत्येकं यममावाहयेत् ।

End:

वृष्टिरसि वृश्च मे पाप्मानममृतात्सत्यमुपागाम् । अप उपस्पृश्य ब्राह्म- णान् तर्पय वै । अनेन यमयज्ञाख्येन कर्मणा भगवान् सर्वात्मकः श्रीमान् यमः सुप्रीतो वरदो भवतु ओं तत्सत् । ओं अग्ने नय—मङ्गलानि भवन्तु । अथ यजमानास्सर्वे भक्षितशेषं हविर्नीत्वा तूष्णीं ग्रामं प्रविश्य पुत्रादिभ्यः तत्पत्नीभ्यश्च प्रयच्छन्ति पुत्रवन्तो भवन्तीत्येवं ज्ञायन्ते इत्याह भगवान् भार- द्वाजो महामुनिः ॥

The name of the scribe of the original MS. is Bhāgavata Rāma-chandra Dīkṣitulugāru.

R. No. **2203.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches Foll. 24. Lines, 20 in a page. Telugu. Good.

(*a*) **अश्विनीकुमारस्तुतिव्याख्या.**

AŚVINĪKUMĀRASTUTIVYĀKHYĀ.

Foll. 1*a*—5*b*. Fol. 6 is left blank.

Transcribed in 1916–17 from a MS. of M.R.Ry. Bamiḍipaṭi Acyutarāma Sōmayājulugāru of Iruśumaṇḍa, Amalapuram taluk, Godavari district.

A commentary on the Āśvinīkumārastuti which is a eulogy on the twin brothers Āśvinas, the reputed founders of Indian medicine. The text occurs in the third Adhyāya of the Ādiparvan of the Mahābhārata where Upamanyu, disciple of Dhaumya is said to have made this eulogy for reviving his lost eyesight. The commentator is Sadāśiva.

Complete.

Beginning :

सिन्दूरारुणशुण्डमन्दचलनव्याजान्निजानां भयं
भक्तानां विनिवारयन्तमधुना वन्दे गणेशं मुदा ।
देव्या पीनकुचद्वयेन विजितौ स्वस्याथ कुम्भौ गिरां
संसक्ताश्रुमदोदकौ निजकरस्पर्शेन सन्तोषयन् ॥
चरीकर्ति बरीभर्ति सञ्जरीहर्ति लीलया ।
तमहं परमानन्दं वन्दे पूर्णं सनातनम् ॥
तत्र सङ्क्षिप्तशब्दैश्चाधिकार्यसमन्विता ।
दस्रयोश्च स्तुतेर्व्याख्या शिवेन परिकीर्त्यते ॥

अत्र सर्वोऽप्यर्थः श्रुतिमूलक एवास्ति । तथापि ग्रन्थभूयस्त्वभयेन श्रुतिरत्र न लिख्यते । अत्र कैश्चित् सूर्यचन्द्रपरैवं स्तुतिरुच्यते ।

* * * *

स एवमुक्त उपाध्यायेनोपमन्युः स्तोतुमुपचक्रमे देवावश्विनौ वाग्भिः ऋग्भिः—

प्रपूर्वगौ पूर्वजौ चित्रभानू
गिरा वां शंसामि तपसा ह्यनन्तौ ।
श्लोकद्वयस्यान्वयादुत्तरश्लोकस्थं क्रियापदमिह बोध्यम्
हे नासत्य दस्रौ गिरा वाण्या वां शंसामि स्तौमि ।

End :

हे अश्विनौ कुमारे गर्भे दशमासान् मातरमधिशयानः मातुस्सकाशात् अक्षतो विरैतु जीवतामिति प्रतिपाद्यम् ॥

Colophon :

इति सदाशिवविराचिता अश्विनीकुमारस्तुतिव्याख्या समाप्ता ॥

(*b*) भगवन्माणिक्यमालिका.

BHAGAVANMĀṆIKYAMĀLIKĀ.

Foll. 7*a*—18*b*.

Transcribed in 1916-17 from a MS. of M.R.Ry. Chilukamarti Raṅgācāryalugāru of Kottakōṭa, Gōdāvari district.

This work explains the characteristics of the Supreme Brahman, Nārāyaṇa and of the chief means of realizing him, viz., Bhakti, by means of copious quotations from the Purāṇas, Gītā, etc. A few passages relating to the Ēkādaśī and Dvādaśī are added at the end.

Incomplete.

Beginning:

भगवद्धर्ममाणिक्यमालिकेयं मयोच्यते ।
अज्ञानपटलध्वान्तसहस्रकिरणप्रभा ॥

सर्वजीवनियन्ता सर्वेश्वरः शुद्धसत्त्वस्वरूपः सर्वव्यापको भगवान् जन्मादिविकाररहितः चतुर्मुखरुद्रादिकारणभूतो भक्तविधेयः परमकारुणिको मोक्षेश्वरः श्रीमन्नारायण एव नान्यो देवः । एतद्भगवतः श्रीमन्नारायणस्य सर्वजीवनियन्तृत्वादिकं यथाक्रमं निरूप्यते । तत्र तावत् सर्वजीवनियन्तृत्वमुच्यते ।

तथाच श्रुतिः "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

End:

स वाग्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि ।
नामान्यनन्तस्य यशोऽङ्कितानि शृण्वन्ति गायन्ति गृणन्ति साधवः ॥
यस्यामलं नृप सदःसु यशोऽधुनापि गायन्त्यघघ्नमृषयो दिगिभेन्द्रवन्द्यम् ।
तन्नाकपालपशुपालकिरीटजुष्टं पादाम्बुजं रघुपतेः शरणं प्रपद्ये ॥

* * * *

कलाप्येकादशी यत्र द्वादश्यामुदिते रवौ ।
पूर्वामेकादशीं त्यक्त्वा तत्रवापवेसेद्द्विजः ॥

(*c*) रामघट्टक्षेत्रमाहात्म्यम्.

RĀMAGHAṬṬAKṢĒTRAMĀHĀTMYAM.

Foll. 19*a*—24*b*.

Transcribed in 1916-17 from a MS. of Chilakamarti Raṅgācāryulugāru of Kottakōta, Godavari district.

An account of the sacredness of the place called Rāmaghaṭṭakṣētra on the northern banks of the Godavari. Rāma is said to have performed a sacrifice in this place and to have arranged for the consecration of a

shrine with God Rājagōpāla therein along with his consorts Rukminī and Satyabhāmā. This work is stated to form part of the Brahmāṇḍa-purāṇa.

Complete.

Beginning:

श्रीसूतं प्रति शौनक उवाच—

धर्मा बहुविधाः प्रोक्तास्त्वयानन्तफलप्रदाः ।
इदानीं श्रोतुमिच्छामि क्षेत्रमाहात्म्यमुत्तमम् ॥

श्रीसूतः—

क्षेत्रस्य रामघट्टस्य गोपालस्य हरेस्तथा ।
पुण्यं पापहरं नित्यं माहात्म्यं भृगुनन्दन ॥

* * *

प्रणम्य पार्वती मूर्ध्ना परमेश्वरमब्रवीत् ।
पुण्यं पुण्यतमं चैव माहात्म्यन्तु शृणोम्यहम् ॥
भवान्मयि दयां कृत्वा वदस्व महदद्भुतम् ।
ततः प्रोवाच भगवान् शङ्करः शरणागताम् ॥
शृणु देवि प्रवक्ष्यामि रामयज्ञमनुत्तमम् ।
भक्तिश्रद्धासमायुक्ता प्रिये त्वं च मनोरमे ॥
गौतम्याश्चोत्तरे तीरे रामघट्टमिति श्रुतम् ।
तत्क्षेत्रस्य प्रभावं च निश्चलैकमनाश्शृणु ॥
भूलोके यानि पुण्यानि क्षेत्राणि सुबहून्यपि ।
समालोक्य महातेजा रामः कमललोचनः ॥
कदाचिदपि गौतम्यास्तीरमासाद्य पावनम् ।
सर्वोत्कृष्टतरं मेने भगवान् भूतभावनः ॥
तस्यास्तीरे यष्टुकामो दिनानि सुबहून्यपि ।

End:

एतदाख्यानमायुष्यं सम्पत्करमिदं नृणाम् ।
इति चाभाष्य भगवान् शङ्करः प्रियवल्लभाम् ॥
देव्या सह समासीनः प्रमुमोदासने शुभे ।

पार्वत्युवाच—

रघुनाथस्य चरितं साधूक्तं हि त्वया प्रभो ।
श्रुत्वा धन्यास्मि देवेश त्वत्प्रसादान्महेश्वर ॥

इति चाभाष्य सूतश्च शौनकादिऋषीन् मुदा ।
शुभां कथां श्रावयित्वा विरराम महाद्युतिः ॥

Colophon:

इति ब्रह्माण्डपुराणे सूतशौनकसंवादे गौतमीतीरक्षेत्रमाहात्म्ये श्रीरामयज्ञकृतरामघट्टक्षेत्रमाहात्म्यं सम्पूर्णम् ॥

The date and the name of the scribe of the original MS:

धातुसंवत्सर आश्विजशुद्धपौर्णमी जयवारम् चिलकमर्ति वेङ्कटाचार्यलुगारुपुत्रेण मङ्गाम्बागर्भसम्भवेन नारायणाचार्येण लिखितम् ॥

R. No. **2204.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 67. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Bhagavati Kāśīnātha Śāstri of Kotipalli, Gōdavari district.

Fol. 67*b* is left blank.

शब्देन्दुशेखरटीका.

ŚABDĒNDUŚEKHARAṬĪKĀ.

A gloss on the Śabdēnduśekhara of Nāgōjibhaṭṭa described under No. 1414 of the D.C.S. MSS., Vol. III The commentator is Gōpāla, son of Kēśava and Jaggamāmbā.

Contains the Saṁjñāprakaraṇa (incomplete), Halantaśabdādhikāra (without beginning) and the Avyaya incomple'e

Beginning:

गोपालः केशवं वन्दे तन्नामपितरं वरम् ।
जग्गमाम्बासुतः कुर्वे टीकां शब्देन्दुशेखरे ॥

प्रारिप्सितग्रन्थपरिसमाप्तये तत्प्रतिबन्धकविघ्नध्वंसद्वारा शिष्यशिक्षायै मङ्गलमातनोति—पातञ्जले इति । महाभाष्य इत्यस्य विशिष्टस्य नामत्वात् योगशारीरकादिभाष्यव्यावर्तकत्वात पातञ्जलें योगभाष्ये महाभाष्ये चेत्यर्थ इति भावः । विना चं समुच्चयार्थस्य अहर्नयन्ति गामश्वं पुरुषं पशुमित्यादौ दृष्टत्वात् ।

End:

उच्चैरावेति । अकारो वासुदेवः । तस्मादौप्रत्ययः परादिवत्त्वेनास . . . न च समासे उपसर्जनत्वमेवेति वाच्यम् ॥

R. No. 2205.

Paper. 10⅞ × 9⅝ inches. Foll. 181. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Danyam Raju Subbarāyudugaru of Śrirāmapuram, Vizagapatam district.

Foll. 1*a*—6*b* give the contents of the work.

ब्रह्ममीमांसासूत्रव्याख्या.

BRAHMAMĪMĀṀSĀSŪTRAVYĀKHYĀ.

A brief commentary on the Brahmasūtras in accordance with the principles of the Advaita Vēdānta taught by Śaṅkarācārya. The commentator's name is not given. In the beginning a brief summary in verses of the topics dealt with in the Brahmasūtras, the contents of each Pāda being mentioned separately. At the end of this summary the Nyāsavidhi for the due repetition of the Sūtras is given.

Complete.

Beginning:

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥
आत्मावबोधविधुरं प्रसमीक्ष्य लोक-
मुद्धर्तुमादृतमना निगमार्थसारम् ।
निश्चित्य सूत्रनिचयं रचयांचकार
श्रीबादरायणमुनिर्भुवनैकमान्यः ॥
नमः श्रुतिशिरःपद्मषण्डमार्ताण्डमूर्तये ।
बादरायणसंज्ञाय मुनये शिववेश्मने ॥
ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे ।
ज्ञानशक्त्यवताराय नमो भगवते हरेः ॥
व्यासाय यतिवर्याय विद्याविग्रहधारिणे ।
नमस्ते परमानन्ददायिने परमात्मने ॥
श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥
सर्वं खल्विदं ब्रह्म जगज्जन्मादिकारणम् ।
तज्ज्ञात्वा मुक्तिमाप्नोतीत्येवं सूत्रैर्निरूप्यते ॥
सर्ववेदान्तवाक्यानां प्रथमे प्रतिपाद्यते ।
ब्रह्मण्येव हि तात्पर्यं पर्यवस्यत् द्वितीयके ॥

संभावितविरोधो यः स परिह्रियते ततः ।
तृतीये क्रियते विद्यासाधनस्य विनिर्णयः ॥

End :

उक्ता पादे चतुर्थे कैवल्यमुक्तिर्द्वि(र्वि)देहिका ।
पूर्वतो निर्गुणब्रह्मविदोऽथोत्तरभागतः ।
सगुणब्रह्मविद्ब्रह्मलोकस्थितिरुदाहृता ॥
इत्येवमध्यायचतुष्टयान्तर्गताः पदार्था निखिलाश्च षोडश ।
स्पष्टीकृताः संग्रहतोऽत्र सन्तः तान्वीक्ष्य गृह्णन्तु सदा सदादरात् ॥

Colophon :

इति ब्रह्ममीमांसासूत्रसंक्षेपकारिकाः ॥

ब्रह्मसूत्रस्य भगवान् वेदव्यासो महानृषिः ।
नानाच्छन्दांसि च तथा परं ब्रह्मास्य देवता ॥
विनियोगोऽत्र मोक्षार्थे वन्दे नित्यं यतीश्वरम् ।
एवं न्यासविधिं कृत्वा ब्रह्मसूत्रं पठेत्तु यः ।
सर्वपापविनिर्मुक्तो याति विष्णोः परं पदम् ॥
बीजशक्त्यादिरहितं सूत्रं कैवल्यसाधनम् ।
पठतां शृण्वतां नित्यं सत्यं सत्यं मुनीश्वराः ॥

इति ब्रह्मसूत्राणां न्यासविधिः ॥

Beginning :

सू । अथातो ब्रह्मजिज्ञासा ॥

अथ साधनचतुष्टयसम्पत्त्यनन्तरम् । अतः अधिकारस्य पूर्णत्वात् । ब्रह्मजिज्ञासा कर्तव्या । ब्रह्मविचारः कर्तव्य इत्यर्थः । अत्र अथशब्द आनन्तर्यार्थः । तस्माद्यदनन्तरं ब्रह्मजिज्ञासोपपद्यते इत्युक्ते नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कसंपत्, मुमुक्षुत्वं चेति साधनचतुष्टयसंपत्त्यनन्तरमेवेति सिद्धम् । अत्र अथशब्दस्य हेत्वर्थत्वात् साधनचतुष्टयसंपत्तेः पूर्णहेतोरित्यवगन्तव्यम् ।

End :

सू । अनावृत्तिः शब्दात् अनावृत्तिः शब्दात् ॥

ये उपासकाः ब्रह्मलोकं गच्छन्ति ते तं प्राप्य नावर्तन्त इति सम्बन्धः । कुतः? तयोर्ध्वमायन्नमृतत्वमेति, तेषां न पुनरावृत्तिः एतेन प्रतिपद्यमानाः इमं

मानवमावर्तं नावर्तन्ते, ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तत इत्यादिशब्देभ्यः । अनावृत्तिः शब्दादनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं दर्शयति ॥

Colophon :

इति ब्रह्ममीमांसासूत्रव्याख्यायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

R. No. **2206.**

Paper. 10¼ × 9⅝ inches. Foll. 10. Lines, 20 in a page. **Grantha.** Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. V. S. Narasimhācāriyār of Villiyambākkam, Chingleput district.

णत्वोपपत्तिभङ्गवादः.

NATVŌPAPATTIBHAṄGAVĀDAḤ.

Similar to the work described under No. 4887 of the D.C.S. MSS., Vol. X. By Tirumalācārya, son and disciple of Alagasiṅgrācārya of Bhāradvājagōtra.

Complete.

Beginning:

वन्दे रामानुजार्यं सकलपरमतध्वान्तसन्तानसूर्यं
शान्तं त्रय्यन्तविद्यावरयुवतिवरस्वान्तसं . . . . ।
त्रायन्तं सर्वलोकान् प्रकृतिजडमतींस्तत्त्वमार्गप्रदाना-
त्पारम्यं स्थापयन्तं सकलगुणनिधेः श्रीनिधेर्लोकभर्तुः ॥
सर्वं वाचां कदम्बं मनसिजजननीप्राणनाथाभिधेयं
भाषन्ते वेदवाचः कतिचन कवयः पञ्चवक्त्राभिधेयम् ।
तत्प्राहुस्तन्मतेऽन्ये विबुधजनवराः कारणत्वाभिधाने
शब्दे नारायणाख्ये जगदुरतितरां णत्वबाधामबाधाम् ॥

अथ सर्वेषां शब्दानां श्रीशपरत्वं दृढीकुर्वन् तेषां देवतान्तरपरत्वं कैश्चिदुक्तं निराकर्तुं श्लोकमारचयति—सर्वमित्यादि । वेदवाचः सर्वे वेदा यत्पदमामनन्ति । सर्वे वेदा यत्रैकं भवन्ति । सर्वैश्च वेदैरहमेव वेद्यः इत्यादिकाः । सर्वं निखिलम् । वाचां कदम्बं शब्दसमूहः ।

* * * *

अयं भावः—निखिलशब्दनिकरस्य शिवप्रतिपादकत्वे नारायणशब्दस्यापि तदन्तर्वर्तित्वेन तद्वाचकत्वस्याप्यवश्यं वाच्यत्वेनास्य शब्दस्य विष्णावेव संज्ञितत्वेन रूढ्या शिववाचकत्वासंभवात् ।

End:

एतेन नारायणो बोधिवृक्षः इत्यादिना अन्यत्रापि शक्तिर्नारायणशब्दस्यास्ति इत्यपि प्रत्युक्तम्, उपबृंहणविरोधे कोशस्याप्रमाणत्वात् । अन्यथा "पीलुः काण्डे द्रुमे गजे" इत्यादिना पीलुशब्दस्य गजार्थकत्वमपि स्यादिति सङ्क्षेपः ॥

Colophon:

इति भरद्वाजकुलतिलकश्रीमदलगशिङ्गराचार्यप्रसादलब्धविद्यावैभवतद्वेकदैवततत्पुत्रतिरुमलाचार्यकृतौ देवतान्तरस्य नारायणशब्दवाच्यत्वे णत्वोपपत्तिभङ्गवादः समाप्तः ॥

R. No. **2207**.

Paper. $10\frac{1}{8} \times 9\frac{3}{8}$ inches. Foll. 139. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. V. S. Narasimhācāriyār of Villiyambākkam, Chingleput district.

Foll. 139*b* gives the contents of the work.

तत्त्वचिन्तामणिव्याख्या.

TATTVACINTĀMAṆIVYĀKHYĀ.

In the heading of the MS. the name of the work is given as Śabdagadādharīya.

But it is not known whether this is a correct statement. The printed portion of Gadādhara's commentary on the Śabdakhaṇḍa of the Tattvacintāmaṇi is not complete and does not contain this part of the work.

Contains the Śabdakhaṇḍa from the Ākāṅkṣāvāda to the Śabdānityatvavāda incomplete.

Beginning:

तस्याकाङ्क्षादिकं सहकारीति पूर्वग्रन्थेन स्मारिताया आकाङ्क्षाया. प्रसङ्गतो निरूपणमारभते—अथेति । इच्छारूपाया आकाङ्क्षायाः प्रसिद्धत्वादियमिति । शाब्दबोधोपयोगिनीत्यर्थः । अविनाभाव इति ।

Colophon:

इत्याकाङ्क्षाग्रन्थः ॥

End:

न च एकावच्छिन्नत्वमेकदेशवृत्तित्वं च पृथग्विशेषणम्। तथाच ककारखकारादीनां . . . . . . विरहेऽपि काले अव्याप्यवृत्तित्वे स्वाधिकरणाकाशरूपदेशावच्छिन्नतया व्याप्यवृत्तेरवच्छेदकत्वानुपगमेऽपि न हेत्वसिद्धिरिति वाच्यम्, एकावच्छेदेन समानदेश . . . वतीत्यत्र एकावच्छेदकावच्छिन्नैकदेशनिष्ठाधिकरणताकत्वस्यैव लाभात् ॥

R. No. **2208.**

Paper. $10\frac{1}{8} \times 9\frac{1}{8}$ inches. Foll. 156. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Chebrōl Veṅkaṭasōmayājulugāru of Vallūru, Gōdāvari district.

कृष्णभट्टीयम्.

KṚṢṆABHAṬṬĪYAM.

Foll. 1a—153a.

A manual of ritualistic procedure for the performance of the ceremonies connected with the household fire of the followers of the Āpastambasūtra. The author is Kṛṣṇabhaṭṭa, son of Sūryasūri and grandson of Harēśvara of Bhāradvājagōtra. Versified summaries of the procedure are given in support of what is explained, as also quotations from the Smṛtis of Parāśara, Manu, etc.

Contains the Pūrvaprayōga incomplete.

Beginning:

पीताम्बरं करविराजितशङ्खचक्र-
कौमोदकीसरसिजं सरसीरुहाक्षम्।
विश्वम्भराम्बुधिसुतापरिरभ्यमाणं
नारायणं सुरमणिं प्रणतोऽस्मि विष्णुम् ॥
नीहारसन्दोहशरीरकान्तिं मुक्तावलीराजितचारुकण्ठीम्।
विपञ्चिकावादनघूर्णिताक्षीं नमामि वाणीं जगदीशकान्ताम् ॥

* * * *

कुले भरद्वाजमुनेः प्रसूतो हरेश्वराख्यो गुणगुम्भितश्च।
श्रीसूर्यसूरी तनयस्तदीयो यो वेदसिद्धान्तनिरङ्कुशश्च ॥
सूनुस्तदीयः सुकृती कृतज्ञः श्रीकृष्णनामा स्मृतिधर्मदर्शी।
आलोक्य गृह्याणि पुरातनानां तत्सारमादाय नवं विधास्ये ॥

कर्मणामपि सर्वेषां मन्त्रं तन्त्रवतां वरम् ।
ग्राह्यं श्रीकृष्णभट्टीयं यथाज्ञानं यथामति ॥
तत्रादौ शुभकर्मणामङ्गभूतमङ्कुरार्पणं लिख्यते ।

तत्र कारिकाकारः—

अङ्कुरार्पणमादौ तु वक्ष्यते मङ्गलात्मकम् ।

* * * *

तत्तत्कर्माङ्गत्वेनाङ्कुरार्पणाख्यं कर्म करिष्ये इति सङ्कल्प्य आशिषो वाचयित्वा तिलमाषादिचतुर्दशौषधीनाहृत्य ।

End:

द्विस्तूष्णीं सम्बुद्ध्या नामग्रहणम् । द्वितीयातृतीययोरपि त्वौषधीनामित्यादेरनुषङ्गः । तैत्तिरीयेण मांसेनेत्येके । तित्तिरीति पक्षिविशेषः । तैत्तिरीयेण तित्तिरिसम्बन्धिना मांसेन सह अन्नप्राशनमित्येके आचार्या मन्यन्त इति विशेषः । आपस्तम्बेन दध्यादिचतुष्टयेनेति ॥

Colophon:

इत्यन्नप्राशनविधिः समाप्तः ॥

आधानतन्त्रमेतेषु . . . . . कर्मसु ।
श्रीमता कृष्णभट्टेन बहुग्रन्थावलोकिना ॥
व्यक्तं पञ्चदशोक्तानि कर्मणां कृतबुद्धिना ।
वन्दे मुकुन्दमरविन्ददलायताक्षं कुन्देन्दुदन्तवदनं शितगोपवेषम् ।
ब्रह्मादिदेवगणवन्दितपादपद्मं बृन्दावनालयहरिं वसुदेवसूनुम् ॥

The date of the original MS.: प्रजोत्पत्तिनामसंवत्सरमाघशुक्रवार ॥

Foll. 153*b*—154*b* contain some stanzas in praise of Kṛṣṇa. Foll. 155*a*—156*a* give the contents of the work. Fol. 156*b* is left blank.

R. No. **2209.**

Paper. $10\frac{5}{8} \times 9\frac{3}{4}$ inches. Foll. 223. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Eḍavalli Ramaṇayyāvādhanulu Gāru of Madigi, Rāmachandrapuram taluk, Gōdāvari district.

प्रायश्चित्तपद्धतिः.

PRĀYAŚCITTAPADDHATIḤ.

Foll. 1*a*—214*a* Fol. 214*b* is left blank.

A collection of authoritative passages from the Smṛtis, etc., in relation to the funeral rites and Śrāddhas connected therewith. The name Prāyaścittapaddhati is found in the first leaf of this MS.; but Prāyaścittas are not treated except incidentally.

Wants the beginning and the end.

Beginning:

बलाद्वा प्रेरिता वापि बलवत्या रुषा तथा ।
रजस्वला गर्भिणी च न विशेच्च हुताशनम् ॥
स्वैरिणीनां गर्भिणीनां पतितानां च योषिताम् ।
नास्ति पत्याग्निसंवेशः पतितौ वा तथाप्युभौ ॥
पत्युरेवाग्निसंस्कारे पत्न्या अनुगमो मतः ।
अन्यथा त्वात्मघातः स्यादिति वेदविदो विदुः ॥

End:

निर्णयसिन्धौ—

अभ्यङ्गे सूतके चैव विवाहे पुत्रजन्मनि ।
माङ्गल्येषु च सर्वेषु न धार्यं गोपिचन्दनम् ॥

Foll. 215*a*—223*a* contain the contents of the MS. work. 223*b* is left blank.

R. No. **2210.**

Paper. 10⅛ × 9¼ inches. Foll. 60. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Dēvara Koṇḍaya Śāstri Gāru of Kapilēśvarapuram, Amalapuram taluk, Gōdāvari district.

लक्ष्मीसहस्रव्याख्या—सुरभिः.

LAKṢMĪSAHASRAVYĀKHYĀ SURABHIḤ.

A commentary on Vēṅkaṭācārya's Lakṣmīsahasra described under R. No. 733 ante; by Vīrēśvarasūri, son of Maṅgamāmbā and Vēṅkaṭasūri of Dēvarakoṇḍa family.

Contains the Stabakās 1, 2 (almost complete), 7 and 8.

Beginning:

नत्वा गणपतिं देवीं श्रीमद्गुरुपदाम्बुजम् ।
वीरेश्वरसुधीर्लक्ष्मीसहस्रं व्याकरोत्यलम् ॥

अथ तत्र भवान् सकलविद्यापारदृश्वा वेङ्कटाध्वरिनामा महाकविः सर्वपुरुषार्थसाधकं महालक्ष्मीस्तवरूपं लक्ष्मीसहस्रनामकं महाप्रबन्धं चिकीर्षुरादौ लक्ष्मीशब्दपूर्वकमिष्टदेवतानमस्काररूपं मङ्गलं निबध्नाति—लक्ष्मीति । लक्ष्मीदेव्याश्चरणे राजीवे इव ॥

* * * *

Colophon :

इति श्रीदेव्रकोण्डवंशाब्धिसुधाकरवेङ्कटसूरिसुतेन मङ्गमाम्बागर्भशुक्तिमुक्तामणिना वीरेश्वरसूरिणा विरचितायां लक्ष्मीसहस्रकल्पतरुव्याख्यायां सुरभिसमाख्यायां प्रथमः स्तबकः समाप्तः ॥

End :

हंसस्य सूर्यस्य हारिणी परिसमाप्तिकारिणी गतिः सञ्चारः यस्याः सा-सूर्यास्तमयकारिणीत्यर्थः ॥

Colophon :

इति श्रीलक्ष्मीसहस्रव्याख्याने सुरभिसमाख्याने सौन्दर्यस्तबकोऽष्टमः ॥

Fol. 60*b* is left blank.

R. No. **2211.**

Paper. $10\frac{7}{8} \times 9\frac{3}{4}$ inches. Foll. 27. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Addaṅki Śrīrāmamūrtigāru, Jōgurupāḍa, Rājahmundry taluk, Gōdāvari district.

Foll. 27*b* is left blank.

लक्ष्मीसहस्रव्याख्या—सुरभिः.

LAKṢMĪSAHASRAVYĀKHYĀ : SURABHIḤ.

Same work as the above.

Contains Stabakās 3 to 5.

Beginning :

कविरेवं भगवत्या उत्पत्तिमुक्त्वा भगवदुरोवासं वर्णयति श्रेय इति । शेषाचलः शेषगिरिः तस्य मणेः प्रकाशस्य, शार्ङ्गिणः वेङ्कटस्वामिनः । हृदयङ्गमां हृदयगताम् । अकम्पां स्थिराम् । अम्बुजलोचनां पद्मनयनाम् । अम्बां देवीम् । अनुकम्पामिव । श्रये आश्रये । अनुकम्पापि हरिहृदयगता स्थिरा, अम्बुजमिति लोच्यते आलोच्यते अतिशेते इत्यर्थः ।

* * * *

Colophon :

इति श्रीलक्ष्मीसहस्रकल्पतरुव्याख्यायां सुरभिसमाख्यायां तृतीयस्तबकः॥

End :

मुखरुचीति—हे जगदम्ब । मुखस्य तावकवक्त्रस्यैव सरितः नद्याः तरङ्गः, तरङ्गभूताः । स्मितमेव सितशतपत्रं श्वेतपद्मम् तत्र लोलाः सतृष्णाः । अत एव कलाः अव्यक्तमधुरध्वनयः मदकला वा, भृङ्गाः भ्रमराः, संपदां नर्तने रङ्गाः रङ्गभूमयः निरन्तरसंपत्करा इत्यर्थः । तावकापाङ्गाः । जयन्ति सर्वोत्कर्षेण वर्तन्त इत्यर्थः ॥

Colophon :

इति श्रीलक्ष्मीसहस्रकल्पतरुव्याख्यायां सुरभिसमाख्यायां कटाक्षस्तबकः पञ्चमः ॥

R. No. **2212.**

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 55. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. V. S. Narasiṁhācāriyar of Villiyambākkam, Chingleput district.

(*a*) णत्वतत्त्वपरित्राणम्.

ṆATVATATTVAPARITRĀṆAM.

Foll. 1*a*—34*b*.

Similar to the work described under No. 4887 of the D.C.S. MSS., Vol. X. By Śrīnivāsadāsa, son of Śrīśaila of Āṇḍān family.

Breaks off in the second Paricchēda.

Beginning :

श्रीमन्महाश्वशिरसे कमलालंकृतोरसे ।
वेदाहरणकार्याय परस्मै ब्रह्मणे नमः ॥
यस्यान्तस्थमशेषतत्त्वमविदुर्येद्वाच्यवत्सूरयो
येनैवोपनिषद्गणः शुभगुणं ध्येयं परं कारणम् ।
निश्चित्यैव सहेत यत्कथमपि श्रीजानितो . . . र्यतां
तस्मै व्यापकमुख्यमन्त्रमहिमस्थेयाय धाम्ने नमः॥
भवधन्वपरिश्रान्तश्रमसर्वंकषामृताम् ।
गुरुपङ्क्तिमयीं गाहे करुणारसवाहिनीम् ॥
श्रीमच्छ्रीशैलसूरीन्द्रपदपङ्कजपांसवः ।

भूयासुर्भूरिभूमानः श्रेयसे भूयसे मम ॥
तत्कृपैकोदितज्ञानस्तदवाप्तजनिद्वयः ।
णत्वतत्त्वपरित्राणं वितनोमि सतां मुदे ॥
फणिपतिभाषितभाष्यं विशदमजानान(नोऽ)पि प्रगल्भेऽहम् ।
यत्स्वयमन्तर्यन्ता वाजिमुखो मां प्रवर्तयत्यत्र ॥
अत एव प्रमोदाय न स्याच्चेदपि साधवः ।
क्षन्तुमर्हन्त्यसत्पक्षनिरासं मम कुर्वतः ॥

एको ह वै नारायण आसीन्न ब्रह्मा नेशानः । एको ह वै नारायण आसीन्न ब्रह्मा न च शङ्करः इति परत्वेन शङ्कास्पदं देवतान्तरं प्रतिषिध्य नारायणशब्दवाच्यस्य श्रियः पत्युरेव निखिलजगत्कारणतारूपां सर्वकार्यापेक्षया पूर्वकालस्थितिमुक्त्वैव सर्वविद्यावेद्यत्वमाविष्करोति ।

* * * *

परं तु नारायणशब्दः श्रियः पत्युरन्यत्र न प्रवर्तत इत्येवात्र व्यवस्थाप्यते ।

* * * *

नाट्कुप्वाङ्ङिति सूत्रेण णत्वं संजाघटीत्यतः ।
अतः सामानपद्यस्य स्वरूपं वार्तिकस्य च ॥
अविज्ञायाशयं सम्यक् कल्पितोऽयं मुधाग्रहात् ।
पक्षः परीक्षकैः सद्भिरुपेक्ष्य इति निश्चितम् ॥

Colophon:

इति श्रीमदाण्डानन्वयकलशजलधिकौस्तुभश्रीशैलतनूजस्य तदेकदैवतस्य श्रीनिवासदासस्य कृतिषु णत्वतत्त्वपरित्राणे परोक्तणत्वनिर्वाहनिराकरणं नाम प्रथमः परिच्छेदः ॥

End:

एवं सति हि पूर्वसूत्रस्य नियमविधित्वं स्वीकृत्यैव प्रनिरन्तरित्यस्यापूर्वविधित्वमेष्टव्यं स्यात् । तच्च विपरिवृत्तिप्रसङ्गात् दूषितमेव । एतत्सूत्रस्य नियमविधित्वेऽपि पूर्वस्य नियमापोदित.

Foll. 35, 36 and 55*b* are left blank.

(*b*) समानबलविचारः,

SAMĀNABALAVICĀRAḤ.

Foll. 37*a*—55*a*.

Same work as that described under No. 4313 of the D.C.S. MSS., Vol. VIII; by Sōkattūr Vijayarāghavācāriyār.

Incomplete.

R. No. **2213.**

Paper. 10 × 9⅝ inches. Foll. 31. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Jagannāthaśāstrigāru of Indupalli, Gōdāvari district.

(*a*) भगवद्भक्तिरसायनम्.

BHAGAVADBHAKTIRASĀYANAM.

Foll. 1*a*—22*a*. Foll. 8 and 10 are left blank and hence the MS. wants some portions in the middle.

A treatise explaining with authorities the nature, the method and the importance of devotion to God Viṣṇu especially Lord Kṛṣṇa; by Madhusūdana Sarasvatī. The first Ullāsa of the work has been printed.

Contains the first Ullāsa only.

Beginning:

पदनखनिविष्टमूर्तिभिरेकादशरूपतामिवावहन्निष्टाम् ।
यं समुपास्ते गिरिशः तं वन्दे नन्दमन्दिरे कञ्चित् ॥

ग्रन्थारम्भे संभावितविघ्ननिवारणबुद्ध्या भगवदनुध्यानरूपं मङ्गलमङ्गीकुर्वन् आदौ प्रेक्षापूर्व(काधि)कारिप्रवृत्त्यङ्गतया अभिधेयप्रयोजनसम्बन्धानाचष्टे शिष्टाग्रणीर्ग्रन्थकारः—

नवरसमिलितं वा केवलं वा पुमर्थं परममिह मुकुन्दे भक्तियोगं वदन्ति ।
निरुपमसुखसंविद्रूपमस्पृष्टदुःखं तमहमखिलतुष्ट्यै शास्त्रदृष्ट्या व्यनज्मि ॥

कर्मयोगोऽष्टाङ्गयोगो ज्ञानयोगो भक्तियोग इति चत्वारः पुमर्थत्वेन प्रसिद्धाः ।

योगास्त्रयो मया प्रोक्ताः नृणां श्रेयोविधित्सया ।
ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ॥

इति भगवद्वचनेन अष्टाङ्गयोगोऽपि ज्ञानयोगान्तर्द्रष्टव्यः ।

End:

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ।
क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥

. . . . . गुणमयं देहं सद्यः प्रक्षीणबन्धनाः । इत्यादि । अनन्त-रोल्लासे तु सप्रपञ्चमुदाहरिष्यते प्रेमेत्युपरम्यते ॥

लक्षणं भगवद्भक्तेः साधनं सोपपत्तिकम् ।
सभूमिकं स्वरूपं च यथावदिह वर्णितम् ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमधुसूदनसरस्वतीविरचिते भगवद्भक्तिरसायने साधनभक्तिसामान्यनिरूपणं नाम प्रथमोल्लासः समाप्तः ॥

(*b*) पञ्चरत्नम्—सव्याख्यानम्.

PAÑCARATNAM WITH COMMENTARY.

Foll. 23*a*—26*b*.

Transcribed in 1916–17 from a MS. of M.R.Ry. Mañchirāju Rāmasvāmigāru of Tēṭaguṇṭa, Gōdāvari district.

Same work as that described under No. 4630 of the D.C.S. MSS., Vol. IX; by Śaṅkarācārya with the same commentary as that described under No. 4632 of the D.C.S. MSS., Vol. IX; by Nārāyaṇēndrayati with the following colophon.

Complete.

इति श्रीमच्छङ्कराचार्यविरचितपञ्चरत्नानां श्रीनारायणेन्द्रयतिना विरचितपञ्चरत्नव्याख्यानसङ्ग्रहः समाप्तः ॥

(*c*) वेदान्तसङ्ग्रहः.

VĒDĀNTASAṄGRAHAḤ.

Foll. 27*a*—31*b*.

Transcribed in 1916–17 from a MS. of M.R.Ry. Mañcirāju Rāmasvāmigāru of Tēṭaguṇṭa, Gōdāvari district.

A treatise containing briefly the principles of the Advaita Vēdānta; by Acyutāśramin.

Incomplete.

Beginning:

अनन्तमखिलाधारं प्रत्यक्छब्दैकगोचरम् ।
साम्बमूर्तिधरं देवं वन्दे विष्ण्वादिसेवितम् ॥
अधीत्य निखिलं शास्त्रमधिगत्य च वैभवम् ।
करोति बालबोधाय सङ्ग्रहं चाऽच्युताश्रमी ॥

दृग्दृश्यं चेति द्वौ पदार्थौ। दृक् त्रिविधा— जीवेश्वरशुद्धचिद्भेदात्। तत्र जीवोऽपि त्रिविधः—प्राज्ञतैजसविश्वभेदात्। एवमीश्वरोऽपि अन्तर्यामिहिरण्यगर्भविराड्भेदात्।

End:

तत्र विषयचैतन्यं यदा असत्त्वाभानापादकशक्तिद्वयविशिष्टा ज्ञानेन आवृतं भवति तदाऽस्त्यपि घटः नास्ति नाभातीत्युच्यते। यथा घटास्तित्वज्ञानमन्तः म . . . .

R. No. 2214.

Paper. 10⅞ × 9⅝ inches. Foll. 33. Lines, 20 in a page. Grantha. Good.

(*a*) अभिनवषडशीतिव्याख्या—धर्मप्रदीपिका.

ABHINAVAṢAḌAŚĪTIVYĀKHYĀ: DHARMAPRADĪPIKĀ.

Foll. 1*a*—16*b*.

Same work as that described under No. 3011 of the D.C.S. MSS., Vol. V; by Subrahmaṇyasudhī.

Wants the beginning in the Pātāśaucanirṇaya and extends up to the end of Āśaucāpavādanirṇaya.

The date of the original MS.—Āṣāḍha month in the year Plavaṅga.

(*b*) आशौचनिर्णयः.

ĀŚAUCANIRṆAYAḤ.

Foll. 16*b*—20*b*.

This and the work described above were transcribed in 1916-17 from a MS. of M.R.Ry. Vadrevu Vīraṇṇagāru of Pātakōṭa, Rāmachandrapuram taluk, Gōdāvari district

By Bhaṭṭōjidīkṣita. Same work as that described under No. 3029 of the D.C.S. MSS., Vol. V.

Complete.

Foll. 21*a*—23*b* contain some miscellaneous stanzas treating about Āśauca (pollution). Fol. 24*a* gives the contents of about two works. Fol. 24*b* is left blank.

(c) षट्कर्मचन्द्रिका.

ṢAṬKARMACANDRIKĀ.

Foll. 25*a*—33*a*. Fol. 33*b* is left blank.

Transcribed in 1916-17 from a MS. of Erramalli Sītārāmaśāstrigāru of Ontimāmidi, Gōdāvari district.

By Timmayajvan. Same work as that described under No. 2977 of the D.C.S. MSS., Vol. V.

Wants the beginning and the end.

R. No. 2215.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 31. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Mantravādi Vēṅkaṭaśāstrulugāru of Manjuvarapukōta, Gōdāvari district.

आख्यातवादटिप्पणी.

ĀKHYĀTAVĀDAṬIPPAṆĪ.

A commentary on the Ākhyātavāda of Śirōmaṇibhaṭṭācārya; by Jayarāma, well known as Nyāyapañcānana. The text has been described under No. 3921 of the D.C.S. MSS., Vol. VIII.

Incomplete.

Beginning:

न्यायपञ्चाननः श्रीमान् जयरामः समासतः ।
आख्यातवादव्याख्यानमातनोति मनोरमम् ॥

अनुकूलव्यापारत्वमाख्यातशक्यतावच्छेदकम् आख्यातस्य शक्तत्वात् व्यापारमात्रं तथेत्येके । अनुकूलत्वमात्रं तथेत्यन्ये ; धातोरर्थः फलम् । अनुकूलव्यापारादिकमाख्यातस्येति मण्डनः । तत्तत्फलावच्छिन्नव्यापारविशेषः तत्तद्धात्वर्थः । संख्यावत्त्वमाख्यातत्वं चेति आश्रयत्वादिकं वा आख्यातार्थ इति गुरवः ! तत् सर्वं निराचिकीर्षुः प्रतिजानीते—आख्यातस्य यत्नो वाच्य इति ।

End:

क्रिया च परंपरया प्राप्त्यनुकूलचैत्रादिनिष्ठा ग्राह्या न तु भारादिनिष्ठा, परसमवेतत्वाभावात् ।

* * * *

तथाच चैत्रो भारं ग्रामं नयतीति प्रयोगः संगच्छते ।

R. No. 2216.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 74. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Pullala Subbayyagāru of Indupalli, Gōdāvari district.

Fol. 74*b* is left blank.

रामकथासारः.

RĀMAKATHĀSĀRAḤ.

A poem narrating briefly the story of the Rāmāyaṇa. The work under notice is also divided into seven Kāṇḍās; and the Bāla, the Āraṇya, the Kiṣkindhā and the Sundara Kāṇḍās consisting of hundred stanzas each while the Ayōdhyā, the Yuddha and the Uttara Kāṇḍās containing two hundred stanzas each. The names of the metres used in these Kāṇḍas are given in a stanza in the introduction: by Subbayaśāstrin, son of Yajñēśasūrin of Pulyāla family, and disciple of Rāmāśāstri of Gōrti family. The author's maternal grandfather was Vēṅkaṭa Sarvatōmukha Makhin of Kōmpēlla family.

The date of the work is given as Sunday, the 10th day of the dark fortnight in the year Yuva.

Contains from the Bālakāṇḍa to the Yuddhakāṇḍa which is incomplete.

Beginning:

ब्रह्मेन्द्राद्यमरार्चितोऽङ्घ्रिनिभतद्विभ्रान् जरीहर्ति यो
यत्पादाभिजितं सरोजपटलं भूत्वा तदाऽधोमुखम् ।
स्पृष्टं मित्रकरैरथोन्मुखमभूत्सिहायते मारणे
यः स्वध्यानपरान्तरायकरिणां तं विघ्नराजं भजे ॥
श्रीरामशास्त्रिणमशेषमनीषिशीर्ष-
भूषायितं भुवि विधाय यशः स्वसूते. ।
गोर्त्यन्वयेऽद्य दिवि शक्रगुरार्च्यमान-
मस्मद्गुरुं हृदि भजामि मदिष्टसिद्ध्यै ॥

* * * *

श्रीमद्वेङ्कटसर्वतोमुखमखी मुख्यो मखीन्द्रोत्करे
कोंपेल्लान्वयशेखरोऽजनयत श्रीमातरं यां मम ।
वन्दे तां भुवि लब्धकीर्तिमिह मत्पित्रेन्द्रलोके युतां
मत्प्रेम्णा क्षणमीक्षितुं सुतमहं यामीति संभाषिणीम् ॥

* * * *

वंशस्थव्याघ्रविक्रीडितमधुतिलका श्लिणीस्राग्विणीभिः
मालिन्युर्वीन्द्रवज्राभुजगनिपतनस्रग्धराभिः क्रमेण ।
युद्धायोध्योत्तराख्यान् द्विगुणितश(त)कैर्द्वत्तरत्नैस्तनिष्ये
काण्डानेकैकशस्त्रीनहमिह चतुरश्शेषकाण्डान् शतेन ॥
तपश्चरन्नारदमेकदागतं समीक्ष्य वाल्मीकिरथोक्तवान् भुवि ।
गुणाधिकः को न्विति विस्मितोऽभवत्तदुक्तरामोरुकथासुधां पिबन् ॥

* * * *

ग्रन्थे रामकथासरस्समभिधां प्राप्ते स्वधीकल्पितां
कृत्वा द्रागथ बालकाण्डमलिखच्छ्रीपुल्यलाख्ये कुले ।
जातस्सुब्वयशास्त्र्यसौ युवशरद्वैशाखशुद्धत्रयो-
दश्यां भूमिसुरोत्तमो हिममहोवारान्वितायां द्रुतम् ॥

Colophon:

इति रामायणसारे बालकाण्डः समाप्तः ॥

End:

श्रीमत्पुल्यलवंशशेखरमणेर्यज्ञेशसूरेस्सुतः
श्रीमान् सुब्वयशास्त्र्यसौ स्वरचिते सत्पद्यपङ्क्त्यन्विते ।
ग्रन्थे रामकथासरस्समभिधे व्यालीलिखत्सुन्दरं
काण्डं द्राग्युवसाहसासितदशम्यादित्यवारेऽखिलम् ॥

Colophon:

इति श्रीरामायणसारे सुन्दरकाण्डः समाप्तः ॥

युद्धकाण्डः ॥

श्रितामृतास्वादहनूमदुद्गिरद्गिरः ककुत्स्थान्वयराट्छिरोमणेः ।
मणेश्च सीताप्रहितस्य वीक्षणात् क्षणान्मनस्तप्तमभूज्जगद्विभोः ।

* * * *

बलैरुत्तरज्ञो बली चोत्तरं गोपुरं प्राप्य रामः परेषां विरामः ।
कृतापरक्षो निनायाथ रक्षोबलं शार्ङ्गधन्वा भयं तीव्रधन्वा ॥

R. No. **2217.**

Paper. 10¼ × 9¾ inches. Foll. 62. Lines, 20 in a page. Grantha. Good. Transcribed in 1916–17 from a MS of M.R.Ry. Erramalli Sītā-rāmaswāmigāru of Ontimāmidi, Gōdāvari district.

स्मृतिसारः.

SMṚTISĀRAḤ.

Foll. 1a—61a. Foll. 61b—62b give the contents of the MS.

A compilation containing extracts from several Smṛtīs, and dealing with various kinds of domestic rites and observances.

Wants the beginning and the end.

Beginning:

स्मृतिसारः। अथाशौचविधिरभिधीयते—

जातकं मृतकं चैव सूतकं द्विविधं स्मृतम्।
स्रावः पातः प्रसूतिश्च त्रिविधं जातकस्य तु॥
मासत्रये चतुर्थे च गर्भस्य स्राव इष्यते।
पातः स्यात्पञ्चमे षष्ठे प्रसूतिः सप्तमादिषु॥

End:

त्रैपक्षिकोनषाण्मासौ न्यूनाब्दिकमथाचरेत्।
एतेषामन्यकाले तु न पुनः करणं स्मृतम्॥

R. No. **2218.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 686. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Dhanyamrāju Subbarāyuḍugāru of Śrīrāmapuram, Gōdāvari district.

Bound in three volumes. Foll. 1a—16b give the contents of the first volume.

पञ्चदशी, सव्याख्या.

PAÑCADAŚĪ WITH COMMENTARY.

Foll. 17a—686b.

Same text as that described under No. 4613 of the D.C.S. MSS., Vol. IX; but with a commentary. The commentator's name is not given. The text is by Vidyāraṇya.

Complete.

Beginning:

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिप्राप्तमिष्टदेवतागुरुनमस्कारलक्षणं मङ्गलाचरणं स्वेनानुष्ठितं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति—

नमः श्रीशङ्करानन्दगुरुपादाम्बुजन्मने।
सविलासमहामोहग्राहग्रासैककर्मणे॥

नम इति। सविलासमहामोहग्राहग्रासैककर्मणे। विलासः कार्यवर्गः तेन सह वर्तत इति सविलासः कार्यवर्गसहितो यो महामोहो मूलाज्ञानं स एव ग्राहः तद्ग्रसनमेव एकं मुख्यं कर्म व्यापारो यस्य तस्मै।

End :

प्रीयाद्धरिहरोऽनेन ब्रह्मानन्देन सर्वदा।
पायाच्च प्राणिनस्सर्वान् स्वाश्रितान् शुद्धमानसान्॥

प्रीयादिति। हरिहरः हरिहररूपः परमेश्वरः प्रीयात्। प्रीतेस्स्वाश्रितान शुद्धमानसान् सर्वान् प्राणिनः सर्वदा पायात्॥

Colophon :

इति श्रीपञ्चदश्यां विषयानन्दः समाप्तः॥

R. No. **2219.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 208. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. K. Rangarāmānuja Chakravartyāchāriyar of Pallakacheri, South Arcot district.

Foll. 1*a*—11*a* give the contents of the work. Fol. 11*b* contains the portion to be read on fol. 122*b*. Fol. 12 is left blank.

आगमप्रदीपः.

ĀGAMAPRADĪPAḤ.

Foll. 13*a*—208*b*.

A treatise dealing with the various details connected with temple festivals. It is based on the Pādmasaṁhitā of the Pāñcarātrāgama. The author is Sundaravīrarāghava of Śiruvalur (in the South Arcot district.)

Contains the Pūrvabhāga which is divided into five Prakaraṇas.

Beginning :

श्रीशं शङ्खगदारिपङ्कजधरं ब्रह्माणमब्जासनं
योगीन्द्रं कपिलं द्विजिह्वनृपतिं पद्मं ससंवर्तकम्।
कण्वं सर्वमुनीन्द्रसंस्तुतपदाम्भोजं समस्तान् गुरून्
श्रीविष्ण्वागमसारसिन्धुकलशीडिम्भानदम्भान् भजे॥
वन्दे लक्ष्मीपतिं देवं शङ्खचक्रगदाधरम्।
विद्यामूर्तिं हयग्रीवं शब्दार्थज्ञानलब्धये॥

अमृताध्मातमेघाभममृताहरणं विभुम् ।
पाञ्चरात्रागमाचार्यं वन्दे वैकुण्ठमन्दिरम् ॥
नमः सकलकल्याणदायिने शेषशायिने ।
निर्मलानन्तकल्याणनिधये विष्णवे नमः ॥

अथ तावत् सकलपाञ्चरात्रिणामत्यन्तोपकाराय ब्रह्मोत्सवादिप्रयोगं समूलं सप्रयोगं पाद्मसंहितामनुसृत्य सकलमन्त्रोद्धारणरूपं बालकिंगृहपुरीनिवासभूत-सुन्दरवीररघूद्वहाचार्येण लिखितेषु आगमग्रन्थेषु अत्यन्तमुख्यभूततया एष प्रयोगः सर्वैरप्यादरणीयः। ब्रह्मोत्सवप्रयोग आरभ्यते—

उत्सवारम्भदिवसात् सप्तमे पञ्चमेऽह्नि वा।
गुरुर्व्रतेषु वपने प्रायश्चित्ताख्यकर्मसु ॥

* * * *

इत्युक्तप्रकारेणाचार्यः गरुडप्रतिष्ठाकर्मणः पूर्वं सप्ताहे पञ्चाहे सद्यो वा सुमुहूर्ते वपनं कृत्वा ततः मृत्संग्रहणं कुर्यात् ।

End:

ஆகையால் ஸகலதேவதை, ருஷிகள, மனுஷ்யாள் முதலானவர்கள் யாவருக்கும் உத்ஸவஸேவாஸௌக்யமும் தீர்த்தப்ரஸாதஸௌக்யமும் தக்தோம் தக்தோம். தங்கள் தங்கள் இருப்பிடத்தை யடைந்து கல்யாணோத்ஸவத்திற்கு வரவேணும்.

स्वस्ति प्रजाभ्यः परिपालयन्तां न्याय्येन मार्गेण महीं महीशाः।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु ॥

* * * *

राजा धार्मिको विजयी भवतु। देशोऽयं निरुपद्रवोऽस्तु सर्वे जनाः सुखिनो भवन्तु। समस्तसन्मङ्गलानि सन्तु। नवो नवो भवति जायमानो . . प्रतितिष्ठति इत्यन्तमुक्त्वा भक्तानां भागवतानां चाऽक्षतान् दद्यात् ॥

Colophon:

इत्यागमप्रदीपे पञ्चमप्रकरणम्। पूर्वार्धं समाप्तम् ॥

R. No. 2220.

Paper. $10\frac{7}{8} \times 9\frac{3}{8}$ inches. Foll. 26. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Karra Siṁhādri-Śāstrigāru of Ennkulamahāl, Razole taluk, Gōdāvari district.

वैदिकाचारनिर्णयः.

VAIDIKĀCĀRANIRṆAYAḤ.

By Saccidānanda. Same work as that described under No. 5506 of the D.C.S. MSS., Vol. XI.

Incomplete.

R. No. **2221.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 101. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Pulavarti Pāpayya-gāru of Vēlampālem, Ramachandrapuram taluk, Gōdāvari district.

Foll. 1*a*—10*b* and 91*a*—97*a* contain some miscellaneous stanzas taken from various medical works. Foll. 97*a*—101*b* give the contents of the work.

सद्वैद्यजीवनम्, सव्याख्यानम्.

SADVAIDYAJĪVANAM WITH COMMENTARY.

Same text as that described under No. 13245 of the D.C.S. MSS., Vol. XXIII; by Lōlambarāja. It is followed by a commentary. The name of the commentator is not found.

Complete.

Beginning:

नत्वा मुकुन्दचरणौ बालापदयुगश्च तत् ।
लोलम्बराजपद्यानि विवृणोमि दुरन्वयात् ॥
इह गद्यपदेषु संशयान् बहुवैद्यागमवाक्यमुन्नयन् ।
न करोमि समग्रमन्वयं तमृते बोध्यपदाश्रयान्वयम् ॥
प्रकृतिसुभगगात्रं प्रीतिपात्रं रमायाः
दिशतु किमपि धाम श्यामलं मङ्गलं वः ।
अमलकमललीलां यस्य पादौ दधाते
प्रणतहरजटालीगाङ्गरिङ्गत्तरङ्गैः ॥

सद्वैद्यजीवनाख्यं ग्रन्थं चिकीर्षुः लोलम्बराजः प्रत्यूहव्यूहोपशमनाय सर्वेष्टदेवताभूतं विष्णुं सङ्कीर्त्यात्ममङ्गलं प्रार्थयते—प्रकृतीति । श्यामलं तत्किमप्यनिर्वाच्यं धाम तेजः अस्मभ्यं मङ्गलं दिशतु ददातु ।

End:

अमृतममृतजं सितासमेतं गुणवति पित्तमपाकरोति सद्यः ।
तरुण इव नितम्बिनीनितम्बंप(म्बाम्ब)रमतनुज्वरजर्जरीकृताङ्गः ॥

अमृतजं गुडूचीभवम् अमृतं जलं सिता शर्करा पित्तमपाकरोति दूरीकरोति ॥

* * * *

आयुर्वेदविचार्यमाणसमये धन्वन्तरिः केवलं
सीमा गानविदां दिवाकरकुलाम्भोधिक्षपानायकः ।
उत्तंसः कविताकृतां मतिमतां भूभृत्सभाभूषणं
कान्तोऽयं कृतवैद्यजीवनामिदं लोलम्बराजः कविः ॥

Colophon:

इति श्रीमद्दिवाकरपण्डितसूनुलोलम्बराजविरचिते सद्वैद्यजीवने सकलरोगप्रतीकारो नाम पञ्चमोल्लासः ॥

The date of the original MS. and the name of its scribe—

पिङ्गलसंवत्सरभाद्रपदबहुलदशमी आदिवारं पुलवर्तिवेङ्कटरामलिखितम् ॥

R. No. 2222.

Paper. $10\frac{1}{8} \times 9\frac{4}{8}$ inches. Foll. 124. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Cebrole Vēṅkaṭa Sōmayājulugāru of Vallūr, Amalāpuram taluk, Gōdāvari district.

Foll. 122*a*—124*a* give the contents of the work. Fol. 124*b* is left blank.

(*a*) आचारदीपिका.

ĀCĀRADĪPIKĀ.

Foll. 1*a*—112*a*

A treatise purporting to deal with the religious rites and ceremonies of the twice-born beginning with Garbhādāna: by Miḍḍipalli Nṛsiṁhasūri.

Contains the Āśaucakhaṇḍa (the third Khaṇḍa).

Beginning:

वागीशाद्यास्सुमनसः . . तन्नमामि गजाननम् ॥
यश्शिवो नामरूपाभ्यां या देवी सर्वमङ्गला ।
तयोः संस्मरणात्पुंसां सर्वतो जयमङ्गलम् ॥

* * * *

गर्भादानादयः प्रोक्ताः संस्काराश्चाह्निकाश्च ये ।
विषयश्च तथा वक्ष्यमाणश्राद्धक्रियाविधिः ॥

तन्निषेधकृदाशौचं प्रोच्यते शास्त्रतोऽधुना ।
अनुग्रहस्त्वया कार्यो लक्ष्मीश करुणानिधे ॥
आशौचं द्विविधं प्रोक्तं सूतकं मृतकं तथा ।

इति षडशीत्यामाशौचस्य द्वैविध्यमुक्तम् । सूतिनिमित्तमाशौचं सूतकम् । मृतिनिमित्तं मृतकमित्यर्थः । तत्रादौ पूर्वत्वेन जननाशौचमुच्यते । तच्च स्रावपातप्रसूतिभेदेन त्रिविधम् ।

* * * *

Colophon :

इति श्रीमिङ्कपल्लिनृसिंहसूरिविरचितायामाचारदीपिकायामाशौचखण्डे जननाशौचम् ।

End :

अन्नोदने च सोमे च सीमन्तोन्नयने तथा ।
जातश्राद्धे नवश्राद्धे द्विजश्चान्द्रायणं चरेत् ॥

Colophon :

इति श्रीमिङ्कपल्लिनृसिंहसूरिविरचितायामाचारदीपिकायामाशौचखण्डे श्राद्धमोक्तृशुद्धिनिर्णयः ॥

आशौचखण्डस्समाप्तः ॥

खण्डे तृतीये आशौचं शास्त्रं सर्वं प्रचोदितम् ॥

The date of the original MS. and the name of its scribe—

प्लवङ्गनामसंवत्सर अधिकज्येष्ठशुद्धपौर्णमी आदिवारं चन्नोलुहनुमत्सोमयाजिना एलमंचिलियज्ञेश्वरदीक्षितपुस्तकं दृष्ट्वा लिखितम् ॥

(*b*) यत्याह्निकम्.

YATYĀHNIKAM.

Foll. 112*b*—121*a*.

Similar to the work described under R. No. 1634(*b*) ante. The work purports to be a summary of the Viśvēśasmṛti and is apparently intended for Advaitic ascetics.

Complete.

Beginning :

नत्वा गुरुं यतीनाञ्च संप्रदायानुवर्तिनाम् ।
आह्निकं लिख्यते सम्यक् विश्वेशस्मृतिसङ्ग्रहम् ॥

आदौ परमहंसोऽयमुत्थायापररात्रिषु ।
कौपीनादीन् विसृज्यैव नवीनं संप्रधार्य च ॥
पादौ प्रक्षाल्य चाचम्य प्राणानायम्य वै त्रिधा ।
स्वासनस्थः प्रकुर्वीत भस्मस्नानं समाहितः ॥

* * * *

नारायणं पद्मभुवं वसिष्ठं शक्तिञ्च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥

End:

क्षौरकाले यतीनां यः सम्यक् परिचरेद्विजः ।
सोऽपि कारयिता क्षौरं गयाश्राद्धफलं लभेत् ॥

The date of the original MS. and the name of its scribe—

सौम्यनामसंवत्सरकार्तिकशुद्धचतुर्दशीजयवारे यत्याह्निकं चेन्नोलुहनूमत्सोमयाजिना लिखितम् ॥

Foll. 121*a* and 121*b* contain a few lines from Malamāsābdikanirṇaya of Ācāradīpikā.

R. No. 2223.

Paper. 10⅝ × 9⅜ inches. Foll. 93. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Erramilli Sītārāmasvāmigāru of Oṇṭimāmidi, Tuni taluk, Gōdāvari district.

चिदानन्ददर्पणम्.

CIDĀNANDADARPAṆAM.

A work dealing with the duties and religious rites, etc., of the devotees of Rājarājēśvarī, Tripurā and other manifestations of Śakti. The work is divided into two parts, the Pūrvabhāga and the Uttarabhāga, and the contents of each part are indicated in the beginning which is extracted below; by Saccidānandāvadhūta, disciple of Cidānandanātha.

Contains the Prābhātikavidhi (complete in two Udrēkas) and Nyāsavidhi, which breaks off in the fourth Udrēka in the Pūrvabhāga.

Beginning:

श्रीराजत् षोडशान्ते दशशतदलसम्फुल्लपद्मान्तराले
पञ्चाशद्वर्णरेखालसदकथहलक्ष्वावृते हंसपार्श्वे ।
पीठे बिन्दुत्रयोद्यत्स्फुरणचरणकैरोघनाथैर्युगेन्द्रैः
पीठैराधिष्ठितं श्रीनरहरिमभिधानन्दनं नन्दयामः ॥

*　*　*　*

नत्वा गुरुपदाम्भोजं सच्चिदानन्दधीमता ।
क्रियते राजराजेश्याः त्रिपुराया महौजसः ॥
विद्यानुष्ठानमखिलं साङ्गोपाङ्गविधानतः ।
श्रीविद्याक्रमभेदाश्च कल्पेषु विविधेष्वपि ॥
वर्तन्ते भुवि तत्सर्वं लिखितुं नैव शक्यते ।

*　*　*　*

तस्मादेतन्महाशास्त्रं सच्चिदानन्ददर्पणम् ॥
उद्धारपूर्वकं न्यासमन्त्रमुद्रादिलक्षणैः ।
विविधग्रन्थसन्दर्भैर्नात्यल्पं नातिविस्तरम् ॥
प्राभातिकविधिर्न्यासविधिः पूजाविधिस्तथा ।
साङ्गोपाङ्गेन तत्सर्वं पूर्वभागे प्रदर्श्यते ॥
दीक्षाभिषेकादिविधिः पुरश्चरणलक्षणम् ।
काम्यप्रयोगभेदाश्च अम्नायोत्पत्तिलक्षणम् ॥
षड्विधैक्यानुसन्धानविधिश्चाचारलक्षणम् ।
श्रीचक्रोद्धारभेदश्च चक्रसंप्रोक्षणक्रमम् ॥
पारायणक्रमश्चैव संस्कारक्रमभेदतः ।
अन्त्येष्टिमोक्षदीपादिकौलश्राद्धादिलक्षणम् ॥
एतान्युत्तरभागेऽस्मिन् ग्रन्थे तु परिदृश्यते ।
नत्वा श्रीमच्चिदानन्दनाथश्रीगुरुपादुकाम् ॥
प्राभातिकविधिं वक्ष्ये कौलाचमनपूर्वकम् ।
श्रीमद्गुरुपदद्वन्द्वप्रणामं पादुकाक्रमम् ॥
ध्यानयोगक्रमं चैव ह्यजपाजपलक्षणम् ।
स्नानसन्ध्याविधिश्चैव साङ्गोपाङ्गविधिः क्रमात् ॥
उद्रेकद्वयसंयुक्तं गुरुनाथप्रसादतः ।
ब्राह्मे मुहूर्ते चोत्थाय कृत्वा श्रीगुरुवन्दनम् ॥
षट्सङ्ख्या घटिका सूर्योदयात्पूर्वे भवेद्यदि ।
ब्रह्मो मुहूर्त इत्येतत्कथितं मन्त्रविद्बुधैः ॥

*　*　*　*

Colophon:

श्रीमच्चिदानन्दनाथश्रीगुरुचरणारविन्दनिष्यन्दमरन्दबिन्दुसन्दोहपानानन्द - मदवत्तुन्दिलेन्दिन्दिरायमाणमनस्विना सच्चिदानन्दावधूतेन विरचिते चिदानन्द- दर्पणे पूर्वभागे प्राभातिकविधौ प्रथमोद्रेकः ॥

End:

पुनरुक्तरषडङ्गप्रभृतिदिग्बन्धविसर्जनान्तं सर्वं निर्वर्त्य जपं देवतायै निवेद- येत् इति जपविधिः ॥

Colophon:

इति श्रीमच्चिदानन्दनाथगुरुचरणारविन्दनिष्यन्दबिन्दुसन्दोहपानपर - मानन्दमदवत्तुन्दिलेन्दिन्दिरायमाणमनस्विना सच्चिदानन्दावधूतेन विरचिते चिदा- नन्ददर्पणे पूर्वभागे न्यासखण्डे तृतीयोद्रेकः ॥

* * * *

थं सरसम्मोहनायै मनोरूपायै कामेश्वरीपुण्ड्रेक्षुधनुषे नम इति वामभ्रूरेखा- याम् । अं सर्ववशीकरबाण ।

R. No. 2224.

Paper. $10\frac{7}{8} \times 9\frac{4}{8}$ inches. Foll. 119. Lines, 20 in a page. Grantha. Good.

(*a*) तारकब्रह्ममाहात्म्यम्.

TĀRAKABRAHMAMĀHĀTMYAM.

Foll. 1*a*—71*b*.

Transcribed in 1916–17 from a MS. of M.R.Ry. Pulavarti Pāpayya-gāru of Vēlampālem, Rāmachandrapuram taluk, Gōdāvari district.

On the greatness of the Tāraka-Brahmamantra which is capable of bestowing salvation on a person.

Complete in 22 Adhyāyās as found in the Mantrakhaṇḍa of the Brahmāṇḍapurāṇa.

Beginning:

श्रीशौनकः—

आख्यातं भवता सूत माहात्म्यानि बहूनि च ।
मन्त्राणां देवतानां च माहात्म्यानि श्रुतानि मे ॥
नारायणं नारसिंहं गोपालं सर्वसिद्धिदम् ।
वासुदेवं महामन्त्रं वाराहं ज्ञानदं नृणाम् ॥
हयग्रीवं मन्त्रवरं श्रुतं तव मुखाम्बुजात् ।
तारकब्रह्ममाहात्म्यं वद सर्वाघनाशनम् ॥

*   *   *   *

सूतः—

श्रृणुष्व मुनिशार्दूल संवदिष्ये न संशयः ।
तारकब्रह्ममन्त्रस्य माहात्म्यं पापनाशनम् ॥
रणे हत्वा धर्मसुतः सुयोधनपुरोगमान् ।
शशास भूमिं धर्मेण दिवं देवपतिर्यथा ॥
स एकदा समासीनः सचिवैर्भ्रातृभिस्सह ।
वृष्णिभिस्सह कृष्णेन व्यासधौम्यपुरस्सरैः ॥
ददर्श मुनिमायान्तं नारदं भगवत्प्रियम् ।

*   *   *   *

Colophon:

इति श्रीब्रह्माण्डपुराणे मन्त्रखण्डे तारकब्रह्ममाहात्म्ये प्रथमोऽध्यायः ॥

End:

एतत्ते कथितं ब्रह्मन् रहस्यं परमं महत् ।
यः श्रृणोति नरो नित्यं सर्वपापैः प्रमुच्यते ॥
आयुष्यं पुण्यमारोग्यं पुत्रपौत्रप्रवर्धनम् ।

*   *   *   *

यः श्रृणोति नरो भक्त्या रामसायुज्यमाप्नुयात् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे मन्त्रखण्डे तारकब्रह्ममाहात्म्ये त्रयोविंशोऽध्यायः ॥

The date of the original MS. and the name of its scribe—

विजयनामसंवत्सर अधिकभाद्रपदबहुल एकादशी जयवारं पुलवर्ति वेङ्कटरायुडु विशम्बरोपाख्यानं लिखितम् ॥

Fol. 72 gives the contents of the work.

(*b*) कार्तिकमाहात्म्यम्.

KĀRTIKAMĀHĀTMYAM.

Foll. 73*a*—107*b*.

Transcribed in 1916-17 from a MS. of M.R.Ry. Vāḍapalli Sāmbaśiva Dikṣitulugāru of Vēlampālem, Rāmachandrapuram taluk, Gōdāvari district.

Deals with the religious importance of the month of Kārttikai (November-December). The different topics dealt with in this work will be apparent from the headings of the Adhyāyas given below.

Contains the following eleven Adhyāyas :—

१. कार्तिकमासप्रशंसा.
२. अन्नदानमहिमा.
३. भक्तिवर्णनम्.
४. दीपदानप्रशंसा.
५. आकाशदीपमहिमवर्णनम्.
६. तुलसीमहिमवर्णनम्.
७. गुरुपूजावर्णनम्.
८. हरिमहिमवर्णनम्.
९. गीतापाठहरिकथाश्रवणमहिम-वर्णनम्.
१०. त्रयोदशीचतुर्दशीप्रतिपत्तिथिमहिमवर्णनम्.
११. यमद्वितीयामहिमवर्णनम्.

Beginning:

शौनकाद्या महात्मान ऋषयो ब्रह्मवादिनः ।
नैमिशाख्ये महारण्ये तपस्तेपुर्मुमुक्षवः ॥
जितेन्द्रिया जिताहाराः सन्तः सत्यपरायणाः ।
यजन्तः परया भक्त्या विष्णुमाद्यं जगत्पतिम् ॥
अनीहास्सर्वधर्मज्ञाः लोकानुग्रहतत्पराः ।
निर्ममा निरहङ्काराः पद्मेशकृतमानसाः ॥

* * * *

ऋषय ऊचुः—

सूत नः कथितं पुण्यं माहात्म्यं माधवस्य च ।
भूयोऽन्यच्छ्रोतुमिच्छामः कार्तिकस्य च वैभवम् ॥
कलौ कलुषचित्तानां नराणां पापकारिणाम् ।
संसाराब्धौ निमग्नानामनायासेन का गतिः ॥

* * * *

Colophon:

इति श्रीवैष्णवामृतसारोद्धारे कार्तिकमाहात्म्ये प्रथमोऽध्यायः ॥

End:

तस्माद्भ्रातर्हि मद्गेहे कुरु भोजनमादरात् ॥
तस्माद्भ्राता स्वसुर्गेहे कुर्याद्भोजनमादरात् ।

एह्येहि मार्ताण्डज पाशहस्त यमान्तकालोकधरामरेश्वर ॥
भ्रातृद्वितीयाकृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते ।
यो ह्येवं कुरुते पुत्र द्वितीयां यमनामिकाम् ॥
अपमृत्युविनिर्मुक्तः पुत्रपौत्रादिभिर्वृतः ।
इह सौख्यमवाप्नोति मृतो मोक्षं च विन्दति ॥

Colophon :

इति श्रीकार्तिकमाहात्म्ये सारोद्धारे यमद्वितीयामहिमवर्णनं नाम एकादशोऽध्यायः ॥

Fol. 108 gives the contents of the above work.

(c) वेङ्कटेश्वरशतकम्.

VĒṄKAṬĒŚVARAŚATAKAM.

Foll. 109*a*—119*a*. Fol. 119*b* is left blank.

Transcribed in 1916-17 from a MS. of M.R.Ry. Vādapalli Kēśavācārlugāru of Ramaṇakapēṭā, Piṭhapuram taluk, Gōdāvari district.

A centum of stanzas in praise of God Vēṅkaṭēśa of Citrāḍa (in the Gōdāvari district). The author is Narasiṁha, disciple and fourth brother of Anantācārya, and son of Padmanābha of Gautamagōtra, Vaikhānasasūtra and Taittirīyaśākhā.

Complete.

Beginning :

विधाय गुरुवन्दनं महितविघ्नराड्नन्दनं
मदिष्टसुरवन्दनं तदनु भारतीवन्दनम् ।
अमन्दबुधवन्दनं निखिलविद्वदानन्दनं
वदामि शतकं बुधा वृषगिरीश्वरानन्दनम् ॥

* * * *

पूर्वं व्यासपतञ्जलिप्रभृतिभिर्यच्छास्त्रषट्कं कृतं
धात्रा वेदचतुष्टयं विखनसा सूत्रं च यद्यत्कृतम् ।
तेषां तत्त्वपदार्थवेदिनमहं वेदान्तवंशाम्बुधे-
राकाचन्द्रमनन्तदीक्षितगुरुं वन्दे श्रितज्ञानदम् ॥
श्रीमद्वेङ्कटनायकक्षितिपतेरक्षीणलक्ष्मीवतः
क्षोणीं काङ्क्षय चित्रवाटनगरे तस्रै(स्मै) सुपुत्रं दिशेत् ।

क्षोणीरक्षणदक्षमक्षयकृपावीक्षासुसंरक्षित-
क्षोणीनिर्जरदक्षमक्षयसुखापेक्षावतामिष्टदम् ॥

End:

सप्तप्राकारभूतावनिधरवरशेषाद्रिकूटाधिरूढः
श्रीदेवीमन्तरा भूरमणिमपि लसन्नीलमेघोज्ज्वलाङ्गः ।
श्रीमन्नीलाद्रिरामप्रभुवरनगरप्रान्तदेशे विराज-
च्चित्राटग्रामवासी मम भवतु मुदे वेङ्कटेशो मुकुन्दः ॥

* * * *

शाखा यस्य तु तैत्तिरीयविदिता सूत्रञ्च वैखानसं
गोत्रं गौतम(पूर्व)मासहविषां यागाः श्रुतिर्याजुषी ।
कालोऽयं निगमागमप्रवचनैर्विद्यार्थिनां यापितः
स्वाचार्यस्तु पिता पितामहनिभः श्रीपद्मनाभाह्वयः ॥
श्रीमद्गौतमगोत्रजस्य विदुषोऽनन्तार्यनाम्नो गुरो-
स्तस्याहं नरसिंहनामविदितः शिष्यस्तुरीयोऽनुजः ।
श्रीमद्वेङ्कटनायकास्पदमिदं हृद्यं सतां शृण्वतां
पद्यानां शतकं चकार विदुषां विद्यानवद्यात्मनाम् ॥
श्रीभूदेवीसमेताय भक्ताभीष्टप्रदायिने ।
चित्राटाख्यपुरेशाय वेङ्कटेशाय मङ्गलम् ॥

Colophon:

वेङ्कटेश्वरशतकं संपूर्णम् ॥

R. No. **2225.**

Paper. 10¼ × 9⅝ inches. Foll. 465. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Tiru Śrīnivāsavaradatātācāriyār of Villiyambākkam, Chingleput district.

Bound in two volumes.

अथर्वशिखाविलासः.

ATHARVAŚIKHĀVILĀSAḤ.

A treatise interpreting the various expressions denoting God Śiva in the Atharvaśikhōpaniṣad as really denoting God Viṣṇu. The author is Kauśika Rāmānujācārya, disciple of Śuddhasattvācārya.

The work is said to have been written in response to the request made by Anantarāya, son of Vīrarāya and brother of Dēvarāya, the Commander-in-Chief of Śrī Kṛṣṇarāja of Śrīraṅgapaṭṭana.

Breaks off in the 24th Kakṣyā in the second Khaṇḍa.

Beginning:

श्रीशुद्धसत्त्वगुरुणा कलितात्यद्भुताकृतिम् ।
वेङ्कटेशं कुलधनं श्रीभूगुरुयुतं भजे ॥
श्रीमान् रामानुजाचार्यः कौशिको देशिकोत्तमात् ।
शुद्धसत्त्वाचार्यनाम्नो लब्धभाग्यफलोदयः ॥
श्रीमतानन्तराजेन वीरराजतनूभुवा ।
श्रीकृष्णराजसेनानीः देवराजानुजन्मना ॥
प्राक्तनानेकजन्मासभाग्यपाकानुपातिना ।
तत्त्वज्ञानाभिलाषेण सन्तताक्रान्तचेतसा ॥
सर्वसद्ब्रह्मसम्मान्यबहुमानपुरस्सरम् ।
समूहतः स्थापितश्च सुखं श्रीरङ्गपट्टणे ॥
सत्यपूर्वं तेन पृष्टः तत्त्वं वक्तव्यमित्यथ ।
श्रीकृष्णराजभूपाल . . . . पुनः पुनः ॥
विदुषां वावदूकानां विशदप्रतिपत्तये ।
ब्रूतेऽथर्वशिखान्यायान्विष्णुध्येयत्वसाधकान् ॥
विस्तारयाम्यहमथर्वशिखाविलासं
प्रस्तावितं विजयकौस्तुभयोः क्रमेण ।
ग्रस्तान्यदेवपरताभ्रमगन्धगन्धं
ध्वस्तैः प्रतारितमहाप्रभुमोहशान्त्यै ॥

तत्र तावत् वाक्यतर्करूपमीमांसा वेदेम श्रवणरूपशब्दज्ञाने जननीये परिकर इति साध्यते ।

* * * *

अथर्वशिखायां तावत् किमादौ प्रयुक्तं ध्यानं ध्यायितव्यं किं तद्ध्यानं को वा ध्याता कश्च ध्येय इति प्रश्नवाक्यसिद्धाः विष्णुध्येयत्वसाधिकाः कक्ष्याः प्रदर्श्यन्ते । तत्र तावदियं प्रथमा कक्ष्या—किं तद्ध्यानमिति न ध्यानगतधर्मविशेषः प्रश्नः । ध्यानं विष्णुरिति उत्तरानुपपत्तेः ।

* * * *

अतः अथर्वशिखायां एतदक्षरं परं ब्रह्म इति प्रणवप्रतिपाद्यत्वेन उक्तं परं ब्रह्म प्रत्यभिज्ञानबलान्नारायण एव इति स एव अथर्वशिखायां प्रणवकरणकध्यानविषयत्वेन विवक्षित इति सिद्धम् ॥

Colophon:

इति अथर्वशिखाविलासे प्रथमखण्डस्समाप्तः ॥

End:

अथ चतुर्विंशतितमी कक्ष्या। यदुक्तं बृहदारण्यके "यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते। कस्मिन् तदोतश्च प्रोतश्चेति प्रश्नस्य आकाश एव तदोतश्च प्रोतश्चेत्युत्तरे कृते कस्मिन् खल्वाकाश ओतश्च प्रोतश्च एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः" इत्याद्युत्तरस्य दहराकाशान्तर्वर्तिनो ब्रह्मत्व एव सङ्गच्छते॥

* * * *

पूर्वपक्षस्य आकाशधृतेरित्येतावतापि निवृत्तेः। आकाशशब्दस्याकाशादेव समुत्पद्यन्त इत्याद्या.

R. No. **2226.**

Paper. 10½ × 9¾ inches. Foll. 104. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Śikha Pullayagāru of Viśvēśvara Agrahāram, Amalāpuram taluk, Gōdāvari district.

कवितावतारः.

KAVITĀVATĀRAḤ.

A work on poetics and rhetoric. The illustrative stanzas are in praise of Nāgabhūpāla. The author is Puruṣōttamasudhī.

Contains the Kāvyaprakaraṇa (without the beginning and the end), the Nāyakaprakaraṇa (without the beginning) the fifth Vihāra, the Rasaprakaraṇa the sixth Vihāra (with the end), the Dōṣaprakaraṇa the eigth Vihāra (without the beginning), the Śabdālaṅkāraprakaraṇa the ninth Vihāra and the Arthālaṅkāraprakaraṇa incomplete.

Beginning:

यदाहुः—

यस्य प्रतीतिमवदाय . . . . प्रसारं
यायास्पदं प्रसृतवत्यपि हास्यतायाः ।

व्युत्पत्तिमान्द्यविहितानपि सर्वदोषान्
पापानि हन्ति बहुभङ्गिभिरुन्मिषन्ति ॥

शास्त्रानालोचनकाव्यापरिशीलनादिष्वपि यन्न्यूनत्वं तत्प्रयुक्तानप्यखिलान् दोषान् नवनवोन्मेषशालीनि . . . . सात्प्राधान्यम् । अथ लक्ष्यमाणस्य काव्यस्य साङ्गसामग्रीं निर्दिशति ।

शब्दार्थौ मूर्तिरात्मा ध्वनिरयमुपमाद्यादि भूषागुणाः स्युः
श्लेषाद्या रीतयस्तु प्रकृतिरिह दधुर्वृत्ततां वृत्तयोऽपि ।
शय्या विश्रान्तिरूपा पदनिचयगता स्याद्रसा . . . .
. . . . वर्णदोषा विलसति नितरां लोकवत्काव्यसंपत् ॥

काव्यसंपदपि लोकवल्लोकस्येव विलसति । यथा अस्य काव्यस्य शब्दार्थौ मूर्तिः शरीरं तस्य शरीरस्य आत्मा शरीरी । अयं ध्वनिरेव अत्रास्यैव प्रधानतया अयमिति वृद्धव्यपदेशः । तथाविधस्य तस्य शरीरिणः उपमाद्यलङ्काराः . . . . भूषा इव श्लेषाद्या एव गुणाः शौर्यादय इव रीतयो वैदर्भ्यादय एव प्रकृतिः स्वभाव इव वृत्तयः कैशिक्यादयोऽपि वृत्ततां शीलमिव पदगता शय्या च विश्रान्तिरिव पाकस्तु रसास्वादहेतुः एवमप्येषा सामग्री दोषरहिता चेत् विलसति ।

अथ सामान्येन काव्यं निरूपयति--

शब्दार्थौ स्तः सहृदयहृदयाह्लादिनौ तु यौ ।
तत्काव्यमिति निर्दिष्टं काव्यसामान्यलक्षणम् ॥

* * * *

अयमर्थान्तरसंक्रमितवाच्यध्वनिरित्युच्यते ।

स च द्विविधः पदगतो वाक्यगतश्चेति । आद्यो यथा --

स्वामिन्नागमहेश्वराय तरसा भूयोऽर्पणीयः करः
कालक्षेपसहिष्णुता मतिमतामेषा परं नोचिता ।
अन्यासौ न हि किन्तु नागनृपतिं नान्यत्पुनश्चिन्तये-
त्येकान्ते सचिवा वदन्ति बहुशः सामन्तभूमीभुजः ॥

* * * *

स्मरमन्दीकृतलज्जा ख्याता संपूर्णयौवना प्रौढा--

किसलयितविलासान् किञ्चिदाविष्कृताशान्
नयनगतिविशेषान्नागभूपे किरन्ति ।

अतितरतरुणिम्ना पूर्णलावण्यसीम्ना
मदनमतरहस्यं मानिनी व्याकरोति ॥

भेदान्तराणि यथासंभवमूहनीयानि ।

Colophon:

इति पुरुषोत्तमसुधीविरचिते नागभूपालगुणोदाहरणोपचिते कविजनाभिमतार्थविस्तारे कवितावतारे अलङ्कारशास्त्रे पञ्चमो विहारः ॥

End:

बन्धचित्रवदेव निरोष्ठ्यनिष्कण्ठ्यनिस्तालव्यादीन्यपि स्थानचित्राणि । यथा—

नागाधीशयशश्श्रीस्ते जितचन्दनचन्द्रिका ।
अङ्गरागायते हन्त त्रिजगत्याश्च निश्चला ॥

* * * *

Colophon:

इति श्रीपुरुषोत्तमसुधीविरचिते नागभूपालगुणोदाहरणोपचिते कविजनाभिमतार्थविस्तारे कवितावतारे अलङ्कारशास्त्रे शब्दालङ्कारनिरूपणं नाम नवमो विहारः ॥

अथ अर्थालङ्कारा निरूप्यन्ते—

यदि वाच्यं साधर्म्यं संमतमन्येन लोकसिद्धेन ।
प्रकृतस्य चैकवाक्ये स्यादुपमा पूर्णलुप्तभेदवती ॥

* * * *

हेतोर्वाक्यगतत्वे पदगतत्वे काव्यलिङ्गं द्विधा ।

अत्र ज्ञाप्यज्ञापकभावस्य परस्परसापेक्षत्वस्य केवलसामान्ययोरेव वा परस्परनैरपेक्ष्येण हेतुत्वस्य चाभावादनु . . . . . . द्वेधा वाक्यगतं पदगतं चेति।

क्रमेण यथा—

श्रीनागक्षितिपाल तावकरिपुक्ष्माभृद्भटानामति-
श्लाघ्यं स्वामिसमीहितार्थघटनाप्रावीण्यमेते यतः ।
त्वद्ग्रग्राग्रगसैन्यचर्वणकृतोऽनर्घीतृणो . . . . .
. . . . ॥

R. No. **2227.**

Paper. 10⅝ × 9⅝ inches. Foll. 53 Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Ayyagāri Sītārāmayyagāru of Sākurru, Amalāpuram taluk, Gōdāvari district.

तत्त्वविवेकटिप्पणी—अद्वैतरत्नकोशपूरणी.

TATTVAVIVĒKAṬIPPAṆĪ : ADVAITARATNAKŌŚA-PŪRAṆĪ.

Same work as that described under No. 4591 of the D.C.S. MSS., Vol. IX; by Agnihōtrabhaṭṭa of Rāmānvaya family. The commentary is also called Tattvavivēcanī.

Contains the second Paricchēda.

End:

यद्वा यदीक्षणसहायेन सन्नुन्ना सदधिष्ठिता माया जगदात्मना परिणमतीत्यर्थः । परमतसिद्धमायास्वातन्त्र्यनिरासाय सदधिष्ठानत्वोक्तिरिति सर्वं सुस्थम् ॥

गम्भीरभावा टीकेयं व्याख्याता बालभावतः ।
किञ्चिद्विजृम्भितं चात्र तद्गृह्णन्तु विमत्सराः ॥
मत्कृतिर्दोषकीर्णापि ज्ञानेन्द्रानतिपूर्विका ।
महन्निबन्धसम्बद्धा प्राप्स्यति प्रचयं भुवि ॥
कृत्यानया रघुपतिः परात्मा कुलदैवतम् ।
सन्तुष्यतु शुकालापे सम्पोषकजनो यथा ॥

Colophon:

इति श्रीज्ञानेन्द्रसरस्वतीश्रीचरणारविन्दनिरन्तरनिषेविणा श्रीरामान्वयप्रसूत द्वादशाहेज्यसूनुना अग्निहोत्रेण विरचितायां तत्त्वविवेकटिप्पण्यामद्वैतरत्नकोशपूरण्यां द्वितीयः परिच्छेदः ॥

R. No. **2228.**

Paper. 10⅝ × 9⅝ inches. Foll. 97. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Erramilli Sītārāmaswāmigāru of Ontimāmidi, Tuni taluk, Gōdāvari district.

दैवज्ञविलासः.

DAIVAJÑAVILĀSAḤ.

Foll. 1*a*—95*a*. Fol. 95*b* is left blank. Foll. 96 and 97 give the contents of the work.

Same work as that described under No. 13434 of the D.C.S. MSS., Vol. XXIV; by Lolla Lakṣmīdhara.

Contains the Ullāsas 60 to 63 in the Utpātakhaṇḍa.

R. No. **2229.**

Paper. 10⅝ × 9⅜ inches. Foll. 50. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry Māḍabhūsi Śrīnivāsaraṅgācāryulugāru of Vādapalli, Gōdāvari district.

शृङ्गारसञ्जीवनभाणः.

ŚṚṄGĀRASAÑJĪVANABHĀṆAḤ.

Foll. 1*b*—50*a*.

A Bhāṇa by Śaṭhajitkavi, son of Vēṅkaṭapaṇḍita, grandson of Vīrarāghava, and great grandson of Rāmānujārya who is said to have been well versed in many Śāstras. The author belongs to the Bhāradvājagōtra and Sāmaśākhā and lived when the chief Vēṅkaṭanarasiṁha was ruling. The author's grandfather lived, it is stated, at Conjeeveram and the author's father migrated to Gūṭāḷa situated on the western bank of the Gōdāvari and on the southern side of the hill Paṭṭaśācala. The drama is said to have been enacted on the occasion of the Caitra festival of God Santānagōpāla worshipped at Ēlāpura (Ellore).

Complete.

Beginning:

यद्वक्षस्सद्मदाराणां यन्नाभिः सूतिकागृहम् ।
पुत्राज्ञयाभवत्किञ्चित्तत्तेजोऽस्तु सतां मुदे ॥

* * * *

श्रीमदेलापुरीजरीजृम्भत्सुन्दरीदरीदृश्यमानसमस्तमहोत्सवपरंपरालतोपघ्नस्य सदर्चकनिघ्नस्य भक्तजनमीनग्रहणार्थं प्रपञ्चितप्रपञ्चजालस्य श्रीसन्तानगोपालस्य चैत्रोत्सवायातानां निखिलकलाकलापतर्कातर्किवियातानां परश्शतसङ्ख्यावतां सङ्ख्यावताम् । कथमिव,

शृङ्गाररसपूरान्तर्मज्जदुन्मज्जदब्जजम् ।
रूपकं कोविदानन्ददीपकं दीप्यतामिति ॥

किं वा भवेदेतादृशं रूपकम् । स्मृत्यभिनयं कृत्वा आः तत्तादृगेव । तत्किम्

श्रीरङ्गधामाश्रितकल्पशाखी रामानुजार्योऽद्भुतशक्तिरासीत् ।
स एव रामानुजदेशिकेन्द्र एषोऽभवद्धेति हि किंवदन्त्याम् ॥

व्यासो व्यासो जैमिनिस्तस्य दासः किं वा वक्ष्ये गौतमो गौतमोऽभूत्।
तच्छेषत्वादेव शेषस्स तूक्तः तस्मादेतत्तुल्यतां ते न यान्ति ॥
श्रीकाञ्चीपुरवासी तत्सूनुः पण्डिताग्रगण्यश्रीः ।
श्रीवीरराघवार्यो मध्यमवेदद्वयीरहस्यज्ञः ॥
तत्सूनुर्वेङ्कटार्यो बुधमकुटतटीलालनीयप्रभावो
मीमांसाचन्द्रशालाद्वयविहृतिकलाचातुरीनीतकालः ।
शब्दाशब्दिप्रवीणः फणिपतिवचने गौतमीयोक्तिजाले
तर्कातर्क्यध्वशूरो जयति खलु भरद्वाजवंशाब्धिचन्द्रः ॥
स तु वेङ्कटपण्डितराण्णिवासमकरोदखण्डगौतम्याः ।
पश्चिमतीरे पट्टसगिरिदक्षिणतः पुरे हि गूटाले ॥
तद्वेङ्कटबुधहंसः शिष्यसुतस्वान्तपद्मसंचारात् ।
मृतजीवीति प्रथितश्चकास्ति समये स आत्मजद्वारा ॥
आत्मा वै पुत्रनामासीत्याम्नायं सार्थयन् सुतः ।
छन्दोगश्शठजिन्नाम तस्य दीपप्रदीपवत् ॥
श्रीवेङ्कटनरसिंहप्रभुणा राजन्वति स्थिरे नगरे ।
न्यवसद्विद्वत्कविमणिगणितश्शठजित्कविर्मुदा तस्मिन् ॥
शृङ्गारसञ्जीवनमेष भाणं बभाण पद्मेशलसन्मनोऽब्जः ।
स्वबुद्धिवैचित्र्यबलात्कवित्वविद्यानिधिश्श्रीशठजित्कवीन्द्रः ॥

सोऽयं भाणः सकलरसिकजनानन्दकरः सुललितः। तमेतमभिनयन् समास्तारानुपास्ये ।

End:

तथापीदमस्तु भरतवाक्यम्—

श्रीमानेलापुरीशो विजयतु भुवि सन्तानगोपालदेवः
तद्भक्तास्सर्ववर्णाः स्थिरतरविभवाः दीर्घमायुर्भजन्तु ।
सन्तश्चैते नरेन्द्राः कविरयमपि सन्तूर्जिता एष वाणी
जीयादाचन्द्रतारं वयमपि रसिकाह्लादिनस्तेन साकम् ॥

इति निष्क्रान्तास्सर्वे ॥

Colophon:

इति श्रीसामवेदवंशकलशाम्बुधिराकासुधाकरश्रीवेङ्कटाचार्यकोविदस्य सूनोः शठजित्कवेः कृतिः शृङ्गारसञ्जीवनं नाम भाणस्समाप्तः ॥

श्रीसामवेदशठजित्कविना प्रणीतं शृङ्गारजीवनमहाभिधभाणमेतम् ।
सन्तानगोपमधुमासमहोत्सवादिवैचित्र्यवृत्तपरिपूर्णरसाधिनाथम् ॥

Foll. 1*a* gives the date of the original MS. and the name of its scribe Fol. 50*b* is left blank.

वर्षे पिङ्गलनामके विलिखितुं शृङ्गारसञ्जीवनं
भारद्वाजकुलावतंसशठजित्सङ्ख्यावता संस्कृतम् ।
भाणं श्रीविधुवासरेऽर्कदिवसे पूर्वे नभःकर्कटे
प्रारेभे स तु काश्यपो गुरुवरः श्रीरङ्गनाथाह्वयः ॥

R. No. **2230**.

Paper. 10¼ × 9¾ inches. Foll. 163. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Bommakanthi Sītārāmaśāstrulugāru of Ralli, Gōdāvari district.

तत्त्वविवेकदीपनव्याख्या.
TATTVAVIVĒKADĪPANAVYĀKHYĀ.

A commentary on Nṛsiṁhāśrama's Tattvavivēkadīpana which is described under No. 4589 of the D.C.S. MSS., Vol. IX. The authorship is attributed to Annambhaṭṭa in the heading of the MS.

Incomplete.

Beginning :

शिवं साम्बमहं वन्दे सत्यानन्दचिदात्मकम् ।
नामरूपात्मकस्यास्य जन्मस्थित्यादिकारणम् ॥
श्रीब्रह्मेन्द्रसरस्वत्या . . . . . . ।
श्रीनृसिंहप्रसूक्तीनां गम्भीरार्थमजानताम् ।
कुव्याख्यादोषसंदोहः क्षिप्यते तत्प्रकाशतः ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमा . . . . . वाक्यार्थानुसन्धान-पूर्वकं निबध्नाति—यदिति । नृहरिं वन्द इत्यन्वयः । यद्यपि ईश्वररूपं बिम्ब-चैतन्यमेकं तथापि तल्लीलाविग्रहोपहिततया . . . मन्त्रोपासकतया नृहरिमिति शरीरविशेषविशिष्टतयेश्वरनिर्देशः ।

End :

मौलतथाचपदं गृहीत्वा व्याकुर्वन्नेवावतारयति—तथाचेति । शुक्त्याद्यवच्छि-न्नामिति । तदनुस्यूतं शुद्धचैतन्यमित्यर्थः । अन्यथा पारमार्थिकत्वानुपपत्तेरिति

भावः श्रुतिः अद्वैतश्रुतिः । अत्र कश्चित्—अतिरिक्तपारमार्थिकाभावकल्पोऽपि युक्तः । नच तद्विरहात्मत्वधर्मे पारमार्थिकत्वादिविकल्पः, तस्य व्यावहारिकत्वात् ।

R. No. **2231.**

Paper. $11\frac{3}{8} \times 8\frac{1}{8}$ inches. Foll. 76 Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. S. P. V. Ranganāthasvāmi Ayyāvayyaṅgārlugāru of Vizagapaṭam.

वैखानसश्रौतसूत्रव्याख्या.

VAIKHĀNASAŚRAUTASŪTRAVYĀKHYĀ.

Same work as that described under R. No. 1606(*a*) ante.

Breaks off in the eighth Praśna.

R. No. **2232.**

Paper. $10\frac{1}{8} \times 9\frac{5}{8}$ inches. Foll. 9. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Mallampalli Mallikārjuna Śāstrigāru of Masulipatam, Gōdāvari district.

वेदान्तसारसङ्ग्रहः.

VĒDĀNTASĀRASAṄGRAHAḤ.

Similar to the work described under No. 4559 of the *D.O.S.* MSS., Vol. IX ; by Pāpayārādhya of Vēmanārādhya family.

Complete.

Beginning:

श्रीशिवं परमानन्दं जगज्जन्मादिकारणम् ।
सत्यज्ञानानन्दरूपं प्रणमामि जगद्गुरुम् ॥

अस्मिन् लोके तापत्रयार्कसन्तप्ताः जननमरणप्रवाहरूपसंसारे पतिताः तन्निवृत्त्युपायाभावेन दुःखानन्तरं दुःखमेव प्राप्नुवन्ति । तेषां विवेकार्थं श्रीसाम्बशिवानुग्रहवशात् आत्मानात्मविवेकरूपं सर्ववेदान्तसिद्धान्तसारसङ्ग्रहं कथयिष्यामः । अस्मिन् ग्रन्थे आवरविचारः क्रियते । प्राणिनां दुःखं केन भवति । शरीरपरिग्रहवशाद्भवति ।

End:

सर्वकल्पनाधिष्ठानभूतं ब्रह्मात्मनानुभूय श्रुत्याचार्येश्वरप्रसादात् कृतकृत्यः जीवन्मुक्तो भवति ॥

Colophon:

इति श्रीविमनाराध्यवंशोद्भवपापयाराध्यविरचितोऽयं वेदान्तसारसङ्ग्रहः समाप्तः ॥

Fol. 9*a* gives the contents of the work. Fol. 9*b* is left blank.

R. No. **2233.**

Paper. $10\frac{7}{8} \times 9\frac{4}{8}$ inches. Foll. 42. Lines, 20 in a page Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Vāḍapalli Padmanābhācāriyār of Timmapuram, Cōcanāḍa taluk, Gōdāvari district.

सन्न्यासक्रमः.

SANNYĀSAKRAMAḤ.

Foll. 1*a*—41*a*. Fol. 41*b* is left blank. Fol. 42 gives the contents of the book.

This work deals with the characteristics of the four kinds of Sannyāsins, the particular ceremonies to be observed before they take the holy orders, their duties and conduct and the funeral ceremonies to be performed in relation to them after death.

Complete as found in the Viṣṇudharmōttara.

Beginning:

शुकं भागवते व्यासं वेदे तत्त्वे च तद्गुरुम् ।

तत्पितामहमाचारे वन्दे श्रीकृष्णदेशिकम् ॥

अथ भिक्षुका मोक्षार्थिनः कुटीचकाः बहूदकाः हंसाः परमहंसाश्चेति चतुर्विधा भवन्ति ।

* * * *

एतेषां चतुर्णां सन्न्यासक्रम उच्यते—

सप्तत्यूर्ध्वं वृद्धोऽनपत्यो विधुरो वा जन्ममृत्युजरादीन् विचिन्त्य योगार्थं यदा स्यात्तदा अथवा पुत्रे भार्यादीनि निक्षिप्य परमात्मनि बुद्धिं निवेश्य वनात्सन्न्यासं कुर्यात् ।

End:

परितो व्रजते नित्यं परं व्राजयते पुनः ।

हित्वा चैव परं जन्म परिव्राजक उच्यते ॥

Colophon:

इति विष्णुधर्मोत्तरोक्तसन्न्यासक्रमः समाप्तः ॥

R. No. **2234.**

Paper. $10\frac{1}{8} \times 9\frac{3}{8}$ inches. Foll. 66. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. N. S. Rāmānujācāriyār of Nāvalpākkam, North Arcot district.

(*a*) ராமாயண விசேஷார்த்தங்கள்.

RĀMĀYAṆA VIŚĒṢĀRTHAṄGAḶ.

Foll. 1*a*—51*b*.

See the Tamil part of the III volume of this catalogue.

(*b*) रामायणसङ्ग्रहः.

RĀMĀYAṆASAṄGRAHAḤ.

Foll. 52*a*—66*a*. Fol. 66*b* is left blank.

This work purports to give a summary of the Rāmāyaṇa noting the time when the leading incidents occurred; by Śrīnivāsarāghava, son of Śrīnivāsārya of Oraṭṭi village. The author was the disciple of Aṇṇayācārya of Nāvalpākkam.

Complete.

Beginning:

नावल्पाक्काण्णयाचार्यमहादेशिकवीक्षणात् ।
श्रीमद्रामायणं सम्यक् समालोक्य मुहुर्मुहुः ॥
तत्प्रबन्धानुसारेण संप्रदायानुसारतः ।
क्षोणीतलावतारस्य रामस्य परमात्मनः ॥
मन्वन्तरयुगाब्दोच्चमासपक्षादिनिर्णयः ।
ओरत्तिग्रामवास्तव्यश्रीनिवासार्यसूनुना ॥
श्रीवासराघवेणाद्य क्रियते विदुषां मुदे ।
मनोर्वैवस्वतस्यादौ अन्तरे विषये शुभे ॥
कोसलाख्ये ह्ययोध्याह्वे पत्तने परमाद्भुते ।
त्रेतायुगे पञ्चमे तु तुर्यपादे खलैर्युते ॥१
इन्द्रादीनां हृते स्थाने रावणेन बलीयसा ।
त्रिंशद्वर्षसहस्राणि शोभने नृपमन्दिरे ॥
ब्रह्मेशानेन्द्रदेवादिप्रार्थितः श्रीहरिः स्वयम् ।
विलम्ब्यब्दे चैत्रशुक्लनवम्यां बुधवासरे ॥
पुनर्वस्वाख्यनक्षत्रे मध्याह्ने कर्कटे शुभे

End:

नाकलोकं गता साध्वी रामाश्रयतपोबलात् ।
रामस्यागमनं क्षिप्रं काङ्क्षमाणावतिष्ठत ॥

भूत्वा रमा जनकराजसुता धरित्र्या कृत्वा सुखं पिशितभुक्जनराजनाशात् ।
एकोनविंशशरदूनसहस्रसङ्ख्यमब्दं स्थिता रघुवरेण ययौ स्वलोकम् ॥

Colophon:

मितज्ञेन मया प्रोक्तं श्रीरामायणसङ्ग्रहम् ।
अनुगृह्णन्तु मां सन्तः समीक्ष्य कृपया बुधाः ॥

R. No. **2235.**

Paper. $10\frac{1}{8} \times 9\frac{4}{8}$ inches. Foll. 64. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. N. S. Rāmānujācariyār of Nāvalpākkam, North Arcot district.

सिद्धान्तचिन्तामणिः.

SIDDHĀNTACINTĀMAṆIḤ.

By Śrīnivāsācārya. Same work as that described under R. No. 2120 ante.

Complete.

R. No. **2236.**

Paper. $10\frac{1}{8} \times 9\frac{4}{8}$ inches. Foll. 11. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Yajñanārāyaṇagāru of Sākurru, Gōdāvari district.

कणादन्यायसिद्धान्तसङ्ग्रहः.

KAṆĀDANYĀYASIDDHĀNTASAṄGRAHAḤ.

A short treatise in Kaṇāda's system of logic. The authorship is attributed to Yādavajī Vyāsa in the heading of the MS.

Incomplete and wants many portions in the middle.

Beginning:

कणादन्यायसिद्धान्तसङ्ग्रहः यादवजीव्यासविरचितः ॥

प्रणम्य दक्षिणामूर्तिं मेधाप्रज्ञाप्रदायकम् ।
कणादन्यायसिद्धान्तसङ्ग्रहः प्रवितन्यते ॥

विविधप्रत्यूहविध्वंसनाय विहितमिदं मङ्गलमन्तेवास्यनुशासनाय वचनतया विनिबद्धम् । नन्विदं न प्रत्यूहविध्वंसनाय, नापि समाप्तये हेतुः । अन्तरापि मङ्गलं प्रमत्तविरचितप्रबन्धपरिसमाप्तेः ॥

* * * *

अथ धर्मार्थकाममोक्षेषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः। स चात्मनः तत्त्वज्ञानाधीनः। तच्च आत्मतत्त्वज्ञानं पदार्थविवेकाधीनमिति पदार्था निरूप्यन्ते।

End:

अत एव दीधितौ साकल्यघटितलक्षणे साध्याभावपदेन तदवच्छिन्नप्रतियोगिताकाभावो विवक्षितः।

अन्यथा तादृशविवक्षाया असङ्गत्यापत्तेरित्याहुः.

R. No. **2237.**

Paper. $10\frac{1}{8} \times 9\frac{3}{8}$ inches. Foll. 203. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Murikutla Purusōttama Śāstrigāru of Chellūru, Gōdāvari district.

आश्वलायनप्रयोगमुक्तावलिः.

ĀŚVALĀYANAPRAYŌGAMUKTĀVALIḤ.

A treatise laying down with authoritative quotations from various works, the details of procedure relating to the rites and ceremonies observed by the followers of Āśvalāyana or the Ṛgvēdins; by Kāśī Tirumalasūrin who says that he wrote this work at the command of Muktīśvara of Piṅgaḷa family who composed a poem named Kālindīpariṇaya.

Breaks off in the Vivāhaprakaraṇa of the Pūrvaprayōga.

Beginning:

नत्वा गणेशं हृदि पार्वतीशं ध्यात्वा च कृत्वा दृशि जानकीशम्।
मोदाय सद्योऽखिलबह्वृचानां प्रयोगमुक्तावलिमातनोमि॥
कालिन्दीपरिणेतृनामकमहाकाव्यप्रणेतुः प्रभोः
श्रीमत्पिङ्गलवंशवारिधिविधोर्मुक्तीश्वरस्याज्ञया।
काशीतिर्मलसूरिणा विरचिता भूषा प्रयोगोज्ज्वला
स्यान्मुक्तावलिराश्वलायनमुनिप्रोक्ताग्रशाखाविदाम्॥

तत्र तावत्—

स्नानं सन्ध्या जपो होमः स्वाध्यायो देवतार्चनम्।
आतिथ्यं वैश्वदेवं च षट् कर्माणि दिने दिने॥

इति व्यासवचनेन स्नानादीनां नित्यतया विहितत्वात् आदौ स्नानादीनां प्रयोगो लिख्यते।

End:

नन्वेवं गुरुशिष्यादेरपि श्राद्धदेवतात्वेनान्वयात्सापिण्ड्यमिति प्रसक्तम् । अवयवानुस्यूतिलक्षणमपि अतिप्रसक्तम् । सर्वत्र विधातृशरीरानुवृत्तेर्दुष्परिहरत्वादिति । अत्राह याज्ञवल्क्यः ।

R. No. **2238.**

Paper. $10\frac{1}{8} \times 9\frac{5}{8}$ inches. Foll. 37. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Musunuri Pullayagāru of Dulla, Rājahmundry taluk.

जागदीशीक्रोडपत्रम्.

JĀGADĪŚĪKRŌḌAPATRAM.

Similar to the work described under No. 4259 of the D.C.S. MSS., Vol. VIII.

Contains the Pakṣatā portion incomplete.

Beginning:

अथ साध्यवत्तानिश्चयनिवर्त्यत्वे सति संशयत्वमित्यत्र साध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यत्वमित्युक्तावपि निर्वह्निः पर्वतो रूपवान् नवेति संशय्य(यस्य) वह्निसाध्यकस्थले पक्षतात्वापत्तिः ।

* * * *

विषयताशून्यज्ञानत्वमिति जगदीशेन निवेशः कृतः ।

End:

तथाच साध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकविशेष्यताभिन्नबाधप्रतिबध्यतावच्छेदकविशेष्यताशालिज्ञानत्वं यन्मते संशयत्वमिति फलितोऽर्थः । संशयकोटिद्वय.

R. No. **2239.**

Paper. $10\frac{1}{8} \times 9\frac{4}{8}$ inches. Foll. 34. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Vādi Mattēbha Kaṇṭhīrava Vēṅkaṭavaradācāryalugāru of Vāḍēpalli, Razole taluk, Gōdāvari district.

(*a*) मुद्गलस्मृतिः, सव्याख्या.

MUDGALASMṚTIḤ WITH COMMENTARY.

Foll. 1*a*—21*b*.

An original treatise on Dharmaśāstra. It is attributed to Mudgala, son of Viśvāmitra.

Complete.

Beginning:

विश्वामित्रात्मजो विद्वान्मुद्गलो नाम नामतः ।
आलोच्य स्मृतिसंकेतान् विलिखे स्मृतिसंग्रहम् ॥

मुद्गलः लोके सर्वजनव्यवहारार्थं स्मृतिमार्गेण विविच्य स्मृतिसंग्रहाख्यं ग्रन्थं विलिखितवानित्यर्थः ।

मौनादिविधयः प्रोक्ता दायाद्याशौचनिर्णयाः ।
प्रायश्चित्तानि ग्रन्थेऽस्मिन्नुक्तानि परमर्षिणा ॥

विधयः विधिप्रकाराः शास्त्रोक्तरीत्या द्विजैराचरितव्याः । दायाद्याशौचनिर्णयाः दायविभागादीनां निर्णयाः प्रायश्चित्तानि च प्रमादवशादागतपापानां प्रायश्चित्तप्रकाराणि चास्मिन् ग्रन्थे परमर्षिणा मुद्गलेन निर्णितानीति भावः ।

End:

तासां घृतशौचपूर्वकब्रह्मकूर्चविधानेन तस्मात्पापान्मुक्तिः स्यात् । अन्यथा न । एवं ग्रन्थेषु दृष्टम् ॥

विना मूलप्रमाणानि न कोऽप्यर्थोऽत्र दर्शितः ।
निर्विशङ्कमयं ग्रन्थस्तस्माद्ग्राह्यो बुभुत्सुभिः ॥

इति ।

त्रियामायास्तृतीयांशे यदि जन्मतु॒मृत्यवः ।
प्रभातादि यदि ध्यंशे पूर्वाह्नाद्यघमिष्यते ॥

Colophon:

इति मुद्गलस्मृतिः समाप्ता ॥

(*b*) प्रपन्नविजयः.

PRAPANNAVIJAYAḤ.

Foll. 22*a*—25*a*.

This and the following three works have been transcribed in 1916-17 from a MS. of M.R.Ry. Kandāla Appalācāryalugāru of Guṭāla, Gōdāvari district.

A work on the greatness and superiority of the Prapannas. Quotations are cited from authoritative works. The author Ācci Raṅgācārya is said to have written this work in reply to Bāburāya's question.

Complete.

Beginning :

प्रपन्नविजयः श्रीमान् प्रणतार्तिविभञ्जनः ।
जयतां जयतां लोके साधुबृन्दैरभिष्टुतः ॥
. . . . ।
यथासुधां सुमनसो ब्रह्मेशानपुरोगमाः ॥
प्रपन्नविजयं मूढा विनिन्दन्त्यविपाश्रिताः ।
सुकश्चु . . . . ॥

भगवतैवोक्तम्—

अनेनैव तु मन्त्रेण स्वात्मानं मयि निक्षिपेत् ।
मयि निक्षिप्तकर्तव्यः कृतकृत्यो भविष्यति ॥

End :

चरमश्लोके—

निर्वाणकाले संप्राप्ते काष्ठपाषाणसंनिभम ।
अहं स्मरामि मद्भक्तं नयामि परमां गतिम् ॥
परित्यक्त्वा(ज्य)हरौ भक्तिं कर्म यस्तु निषेवते ।
विहाय जाह्नवीं मूढः कूपं खनति दुर्मतिः ॥
हित्वा ज्ञानं हरौ भक्तिं कर्म यस्तु निषेवते ।
त्यक्त्वा सौधं यथा वृक्षे सुप्तः पतति तत्क्षणात् ॥
विज्ञानममलं त्यक्त्वा धर्मानन्यांस्तु सेवते ।
हित्वा शतह्रदं मोहात् भजते स मरीचिकाम् ॥
आचिश्रीरङ्गवर्येण विजयः सर्वसंमतः ।
बाबुरायकृते प्रश्ने प्रपन्नानां कृतः क्षणात् ॥

Colophon :

इति आचिश्रीरङ्गाचार्यकृतः प्रपन्नविजयः समाप्तः ॥

(*c*) रामानुजचरित्रम्.

RĀMĀNUJACARITRAM.

Foll. 25*b*—29*b*.

A poem dealing with the leading incidents in the life of Rāmānuja. Contains the 60th Adhyāya.

Beginning:

श्रीरङ्गे वसतो महाविभवतो लोकोत्तरात्सन्ततं
श्रीमल्लक्ष्मणयोगिनो यतिपतेः श्रीशेषमूर्त्यात्मनः ।
तस्यासन् शरदां च . . विदितं सम्यग्गता विंशतिः
सर्वं विष्णुमयं प्रदर्शितवतः सत्यं वचो नैगमम् ॥
श्रीरङ्गवासेन यतीश्वरस्य षष्टिः समानामभवत्सुखेन ।
षष्टिस्तथान्या निगमाद्रिकाञ्चीप्रभूतपुर्यादिनिवासतोऽन्याम् ॥

* * * *

ततः कदाचिद्योगीन्द्रो मनस्येवमचिन्तयत् ।
वैकुण्ठनाथसेवार्थं तद्विष्णोः परमं पदम् ॥
लीलाविभूतिं संत्यज्य गन्तव्यमधुना मया ।

End:

श्रीमद्भागवतार्चनं भगवतः पूजाविधेरुत्तमं
श्रीविष्णोरवमाननाद्गुरुतरं श्रीवैष्णवोल्लङ्घनम् ।
तीर्थादच्युतपादजाद्गुरुतरं तीर्थं तदीयाङ्घ्रिजं
तस्मान्नित्यमतन्द्रितो भव सतां तेषां समाराधने ॥

Colophon:

इति श्रीरामानुजचरित्रे चरमदशायां शिष्यजनाय द्विसप्ततिवाक्योपदेशो नाम षष्टितमोऽध्यायः ॥

(*d*) दिव्यप्रबन्धनिगमनवचनानि.

DIVYAPRABANDHANIGAMANAVACANĀNI.

Foll. 30*a*—33*b*.

Authoritative stanzas based on the Pāñcarātra and Vaikhānasa Āgamas stating when the formal repetition of the Divyaprabandha should be temporarily stopped. Incidently explains at the end the three kinds of Bhakti.

Complete.

Beginning:

श्रीवैखानसपाञ्चरात्रशास्त्रमनुसृत्य श्रीमन्नाथमुनिकारिकाविशेषाः—

वृश्चिके मासि सन्ध्यायामपरस्यां तु पर्वणि ।
आचरेद्भक्तितो विष्णोर्दीपारोपणमुत्तमम् ॥

तत्र दिव्यप्रबन्धानां समापनमथाचरेत् ।
रोहिण्यां वासुदेवस्य वृश्चिके मासि पर्वणि ॥
अर्धमण्डलवेलायां दीपाराधनमाचरेत् ।
तत्रैव शेंठंकोपादिसूक्तीनां शान्तिमाचरेत् ॥

अयमर्थः कलियन्रहस्ये द्रष्टव्यः ।

End:

भक्तिः प्राप्यरुचिः । सा त्रिविधा—परभक्तिपरज्ञानपरमभक्तिभेदात् ।

दर्शनं परभक्तिः स्यात्परज्ञानं तु संगमः ।
पुनर्विश्लेषभीरुत्वं परमा भक्तिरुच्यते ॥
भागवतार्चनं नाम तदीयाराधनान्तानि ज्ञानादीनि ।
सौम्यजामातृयोगीन्द्रकृपया वर्धतां तव ॥

Colophon:

दिव्यप्रबन्धनिगमनसिद्धान्तवचनानि संपूर्णानि ॥

(e) प्रपन्नभोजननियमः.

PRAPANNABHŌJANANIYAMAḤ.

Fol. 34.

States the formalities to be observed both before and after a Prapanna takes his meals.

Incomplete.

Beginning:

प्रपन्नस्य भोजननियमप्रमाणानि—

मङ्गलाशासनं कृत्वा स्वाचार्यान्तं विचक्षणः ।
द्राविडाम्नायशान्तिं च कृत्वा सह विलक्षणैः ॥
तत्पादतीर्थं स्वीकृत्य बहिरागत्य वाग्यतः ।
स्थलशुद्धिं कारयित्वा पात्राणां च पृथक् पृथक् ॥
दक्षिणे तीर्थपात्रस्य पात्राण्यासाद्य सर्वशः ।
सर्वैः सह स भुञ्जीत शास्त्रोक्तविधिना सुधीः ॥

End:

पुनर्गोमयनीरेण ह्यविच्छिन्नं प्रकारयेत् ।
नमो नारायणायेति प्रोक्षणं च ततः परम् ॥

R. No. **2240.**

Paper. 10¼ × 9⅝ inches. Foll. 12. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. V. S. Gōpālācāriyar of Villiyambākkam, Chingleput district.

ब्रह्मदेवाष्टमूलमन्त्रः.

BRAHMADĒVĀṢṬAMŪLAMANTRAḤ.

A Jaina treatise dealing with the conduct of the worship of Brahmadēva by means of eight Mantras.

Complete.

Beginning:

कान्तालकान्तकरवीज्यकरादिमानचन्द्रातपस्फुरितचामरचारुवक्षम् ।
इन्द्रागजेन्द्रमहितामृतसत्यवाचं वन्दे गजेन्द्रधृतमष्टगुणार्थियुक्तम् ॥

ओं नमोऽर्हते भगवते हरिहरपुत्राय पुत्रलाभाय शत्रुविनाशनाय मदगजवाहनाय महाशस्त्वरदाय श्रीगन्धवेणुगिरिनिलयाय श्रीवीरब्रह्मयक्षदेवहादिव्य (?) अर्घ्यं यजामि नमः स्वाहा । पुष्पाञ्जलिः ।

शृङ्गाररूपमनघं जितशत्रुवर्गं श्रीशीलनाथपदपङ्कजभक्तियुक्तम् ।
पञ्चाननासननिवासिनमच्युताङ्गं वन्दे गजेन्द्रधृतमष्टगुणार्थियुक्तम् ॥

ओं ह्रीं ईशित्वदेशिकाय नमः स्वाहा । ईश्वराहारप्रलयान्तकाय नमः स्वाहा ।

* * * *

श्रीमच्छीतलशेखरं गुणनिधिं चापेषुसंधारिणं
वाणीदत्तनिरीक्षणं धवलितं शेषांशमाद्यं गजम् ।
रूढं कुण्डलहारकङ्कणलसद्यज्ञोपवीतान्वितं
मिथ्याध्वान्तदिवाकरं सुरवरं श्रीब्रह्मयक्षं भजे ॥

End:

ओं ह्रीं ऐं क्लीं ब्लूं ब्रह्मणे सं वौषट् नमः स्वाहा ।

कनकझषसुहस्तं पञ्च(ञ्ज)रञ्चाभिमन्यै(न्ये)वरदद(म)भिनवाङ्गं श्यामलं शान्तमूर्तिम् ।
मदगजपरिवाहं रक्तवस्त्राभिरामं हरिहरसुतमिष्टे लाञ्छितार्थप्रसिद्धे ॥

Colophon:

ब्रह्मदेवाष्टमूलमन्त्रं संपूर्णम् ॥

R. No. **2241.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 28. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Chebrole Rāmasvāmi Siddhāntigāru of Vallūru, Mandapēṭa, Gōdāvari district.

रसकलिका.

RASAKALIKĀ.

Foll. 1*a*—26*b*.

A work on poetics dealing with the nine kinds of Rasas (poetic sentiments) and treating of the following topics :—

१. नायिकानिरूपणम्.
२. भावाः.
३. स्थायिनः.
४. विभावाः.
५. अनुभावाः.
६. व्यभिचारिणः.
७. रसाः.
८. शृङ्गारः.
९. करुणः.
१०. सङ्करः.
११. रसाभासाः.
१२. रौद्रः.
१३. वीरः
१४. भयानकः.
१५. बीभत्सः.
१६. अद्भुतम्.
१७. शान्तिः.
१८. निरोधः.

Wants the beginning ; otherwise complete.

Beginning :

सा तथापि रतये पिनाकिनः ॥

मृदुनिष्फलमानित्वं यथा—

श्रुत्वा सखीभिः कान्तस्य शाठ्यं कोपकषायिता ।
आलिङ्गिता हठात्तेन नास्मरत्साध्वसाविला ॥

मध्यायाः संलक्ष्ययौवनत्वं यथा—

उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम् ।
बभूव तस्याश्चतुरश्रशोभि वपुर्विभक्तं नवयौवनेन ॥

End:

रसाः नायकाश्रिता एव सामाजिकैर्नटचेष्टया काव्यश्रवणेन च साक्षाद्भाव्यन्ते । समनुभाव्यमानास्तं तमनुभवं जनयन्ति । परगतरससम्यग्भावनया अन्वयव्यतिरेकाभ्यां निरतिशयानन्दजनकत्वमिति तत्र प्रवृत्तिरपि घटत इति सर्वं रमणीयमिति ॥

Colophon :

इति रसकालिका समाप्ता ॥

Fol. 27*a* gives the information regarding the transcription of the MS. Fol. 28*a* gives the contents of the work. Foll. 27*b* and 28*b* are left blank.

R. No. **2242.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 18. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. V. S. Kr̥ṣṇamācāriyar of Villiyambākkam, Chingleput district.

प्रतापराघवम्.

PRATĀPARĀGHAVAM.

Foll. 1*a*—17*a*. Foll. 17*b*—18*b* are left blank.

A drama based on the story of the Rāmāyaṇa. This drama is said to have been staged on the occasion of the festival of God Raṅganātha of Srirangam (?) celebrated in the month of Caitra. By Gōpālārya, adopted son of Vēṇugōpālasūrī and grandson of Rāghavārya. The author belongs to the Cakravarti family of Billipura, i.e., Villiyambākkam in the Chingleput district.

Breaks off in the second Act.

Beginning:

मुरारिश्रीदेव्योरुपरिसुरते सम्यगुदिते
विभोर्नाभीपद्मावसथमजमालोक्य कमला ।
दरं लज्जाक्रान्तास्थगयदथ नेत्रं निजविभो-
रवामं तत्कालप्रणयललितं पातु सुरतम् ॥

अपिच ।

सृष्टिस्थित्यन्तकर्तुर्दनुजकुलरिपोः शार्ङ्गिणः कैटभारेः
वक्षःपीठीविहारप्रमुदितमनसो लोकमातुः कटाक्षाः ।
ईषत्प्रोत्फुल्लनीलोत्पलवरकलिकाकान्तिचौर्यप्रवीणाः
पूर्णेन्दुस्निग्धदृष्टिव्यतिकरमसृणाः संश्रयन्तां मुदे वः ।

नान्द्यन्ते सूत्रधारः ॥

सू—

आदिष्टोऽस्मि निखिलभुवनपरिरक्षणजागरूकस्य भगवतीभ्यां प्रश्रयानन्द-निर्भरितमृदुहृदयाभ्यां लक्ष्मीवसुन्धराभ्यां परिचरितपदकमलयुगलस्य मणिपर्य-

ङ्कायमाणानन्तभोगसुखसुप्तस्य भगवतो रङ्गनाथस्य चैत्रसमययात्रायां नानादिगन्तरेभ्यस्समागतैरार्यमिश्रैः ।

यत्र प्रोद्धतवीररौद्रललितं (वाचः)कवेर्युञ्जते
यत्राप्राकृतपात्रनिर्गममरं सारस्वन्ती कथा ।
धीरोदात्तगुणोत्तरो विजयते यस्मिन् कथानायक-
स्सन्दर्भः खलु तादृशोऽभिनयतामन्तःप्रवृत्तादराः ॥ इति ॥

* * * *

अस्ति तुण्डीरमण्डले भिल्लिपुरनामा महानग्रहारः । तत्र केचन गरिष्ठानुष्ठानपटिष्ठाः तन्त्रचतुष्टयाधिकारिणः परवादिमत्तमातङ्गकण्ठीरवाः आहिताग्नयः आचार्यपुंस्त्वेन प्रसिद्धाः यतिपतिमतोद्धारणैकनिपुणाः चक्रवर्तिकुलकलशजलधिसमुद्भूताः श्रीवैष्णवाः प्रतिवसन्ति । तदीयवंशोदितस्य शुभशीलस्य राघवार्यस्य पौत्रः विद्वच्छिरोमणेः वेणुगोपालसूरेः स्वीकृतःपुत्रः गोपालार्यनामा कविर्वरीवर्त्ति । तेनैव विदुषा ग्रथितमनुगणघटितपदाक्षरमालिकं प्रतापराघवं नाम नाटकम् । तत्परिचितमेव हि पात्रवर्गेण ।

End:

द—विश्वामित्रमवलोक्य—

वत्सौ निरामयत्वेन पाल्यौ पोष्यौ च सर्वदा ।
पुनरागमनायाद्य गम्यतां निजमास्पदम् ॥

इति निष्क्रान्तास्सर्वे ॥

Colophon:

इति श्रीचक्रवर्तिकुलतिलकस्य श्रीगोपालाचार्यस्य कृतिषु प्रतापराघवनाटके प्रथमोऽङ्कः ॥

ततः प्रविशति विश्वामित्रशिष्यो डार्भ्यायनः ।

डा—निशास्वापकलुषे प्रमृज्याङ्गुलित्रितयेन चक्षुषी ॥

अधुनैवाज्ञप्तोऽस्मि भगवता गाधिनन्दनेन सवनकर्मोपकरणानि समिद्धर्हीष्यानेतव्यानीति ।

* * * *

नैशाटव्यस्ततयोऽधिपुष्करमरं घूत्कारमुद्घोषय-
न्त्यात्यन्ती जगतां मनस्यति जवाद्भीतिस्समुज्जृम्भते ।

श्रौत्रश्चैकमितः परं विजयते षट्स्विन्द्रियेष्वप्यतो
मन्ये हन्त जगद्वथैव परिषस्वजेत मःकञ्चुलिम् ॥

नेपथ्ये कलकलः ।

रामः ससंभ्रममाकर्णयति ।

पुनर्नेपथ्ये ।

R. No. **2243**,

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foli. 83. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Kutumbayya Śāstrigāru of Masulipatam.

नित्योत्सवः, रामानन्दीयभाष्यसहितः.

NITYŌTSAVAḤ WITH THE COMMENTARY RĀMĀNANDĪYA.

Foll. 83*b* is left blank.

On certain details of procedure relating to the conduct of the daily worship of the Goddess Lalitā. The author of the text is made out to be a disciple of Bhāskararāya. The author of the commentary is probably Rāmānanda.

Incomplete.

Beginning:

सू—एवं गणपतिमिष्ट्वा विधूतसमस्तविघ्नव्यतिकरः
शक्तिचक्रैकनायिकायाः श्रीललितायाः क्रममारभेत ।

भा—नित्यौघत्रयमिलिता(न्देवी)मष्टाङ्गषट्कसंवीताम् ।
चिन्तयतां तत्कृपया वाचो निर्यान्त्ययत्नतो वदनात् ॥

एवमिति—एवं पूर्वखण्डेन ललितोपास्त्यङ्गभूतं गणपत्युपासनमुक्त्वा श्रीपरदेवतायाः ललितायाः क्रमं वक्तुमुपचक्रमे एवमित्यादिना [एवमिति] विघ्नव्यतिकरमित्यन्तेन ग्रन्थेन । पूर्वं गणपत्याराधनं कृत्वा पश्चाल्ललितोपास्त्यारम्भ इति सूचितम् ।

End:

दिव्यौघमिति—दिव्यौघ सिद्धौघ मानवौघानामर्चनमावरणदेवताश्च नवाद्विशेषार्घ्यद्रव्येण स्वहृदय एव कार्यम् । दिव्यौघान्याह—परेति । परा, भट्टारिका, अघोरः श्रीकण्ठः इति दिव्यौघः । शक्तिधरः क्रोधः त्र्यम्बकः इति सिद्धौघः । आनन्दप्रतिमादेव्यम्बा, वीरः संवित् मधुरादेव्यम्बा, ज्ञानश्रीरामो योग इति मानवौघः ।

तत इति। कलामनुना सौः इत्यनेन पातु मां परमा कलेवेत्यत्र परायाः कलापरवाच्यत्वं निर्णीतम् । अतः तन्मनुना रसावेव भवितुमर्हति। बन्धा नेघराः (?) श्रीक्रमोक्ता ग्राह्याः.

R. No. 2244.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 28. Lines, 20 in a page. Grantha Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Vāḍapalli Padmanābhācāriyar of Timmāpuram, Cocanada taluk.

(a) वेदान्तदेशिकचरित्रम्.
VĒDĀNTADĒŚIKACARITRAM.

Foll. 1*a*—25*a*.

A poem giving with leading incidents a sketch of the life of Vēdāntadēśika who is spoken of here as the author of 108 works.

Complete in eight Adhyāyas, the topics dealt with in them being—

१. अवतारवर्णनम्.
२. श्रीरङ्गप्रवेशवर्णनम्.
३. तीर्थयात्रावर्णनम्.
४. वैराग्यवर्णनम्.
५. पादुकासहस्रनिर्माणाहितुण्डिकविजयवर्णनम्.
६. पुत्रोत्पत्तिवर्णनम्.
७. रङ्गवियोगयादवाचलनिवासवर्णनम्.
८. चरमदशावर्णनम्.

Beginning:

घण्टावतारो दिविजारिशत्रोरष्टोत्तरग्रन्थशतस्य कर्ता।
अभीष्टसिद्धिं मम सन्दधातु वेदान्तयुग्मार्थविचारदक्षः॥
त्वद्दासवाक्यरचनासु भवत्कृपाया
लब्धासु देशिक भवत्कृति गौरवं त्वम्।
व्यक्तं करोषि नहि ते करुणाक्षमादि-
माहात्म्यवर्णनमहं प्रभवामि कर्तुम्॥

* * * *

वेदान्ताचार्यचरितं न श्रुतं च यथाक्रमम्।
तथापि साहसं मेऽद्य पश्यन्तु गतमत्सराः॥
वेदान्ताचार्यचरितं ग्रन्थमिच्छामि मूढधीः।

कर्तुं सन्तो महात्मानः कृपया क्षन्तुमर्हथ ॥
निर्लज्जेन मया किञ्चिद्वक्ष्यतेऽत्र यथामति ।
वारिपूर्णतटाके हि यथा किञ्चित्प्रपीयते॥
अस्ति काञ्चीपुरी काचित्कमलापतिकामिता ।
सर्वसंपत्सुसंपूर्णा वेगवत्युत्तरे तटे ॥

End:

श्रीभाष्यं यतिशेखरेण रचितं संवर्धयन् भूतले
श्रीमद्द्राविडवेदभाष्यमपि तद्विख्यापयन्नच्युतम् ।
तद्भाष्यद्वयसूक्तियुक्त्यनुगुणश्रद्धांश्च कुर्वन् बहून्
जीयाद्वेङ्कटनाथनामभगवद्घण्टावतारो बुधः ॥
वेदान्तदेशिकचरित्रमिदं पवित्रं
तद्भक्तपातकलवित्रमहो विचित्रम् ।
श्रीलक्ष्मणार्य(गुरु)मैत्रवितीर्णपुत्रं
यो वा पठेत्स हरिमैत्रकटाक्षपात्रम् ॥
अथासौ कार्त्तिके मासे पौर्णमास्यां शुभे दिने ।
ध्यायन्विष्णुपदद्वन्द्वं जहौ लीलां स देशिकः ॥

Colophon:

इति श्रीवेदान्तदेशिकचरित्रे चरमदशावर्णनं नाम अष्टमोऽध्यायः ॥

(*b*) वरदराजस्तोत्रम्.

VARADARĀJASTŌTRAM.

Foll. 25*b*—26*b*. Fol. 27*a* gives the information regarding the transcription of the MS. Foll. 27*b* and 28 are left blank.

A eulogy on God Varadarāja, a form of Viṣṇu, worshipped in Conjeeveram : by Anantavidvat.

Complete.

Beginning:

श्रीश केशवाशम(सिता)म्बुजाक्षरक्ष. रक्षमा
माकुरुष्व नाशयाशु बुद्धिजाड्यमद्य मे ।
मेघभासुराङ्ग पश्य दासदासमद्य मां
आ(नो)नमामि देवतान्तरं गतिस्त्वमेव मे ॥

शान्तं श्रीरुद्रमुख्यामरमकुटतटस्फूर्जितोदार्चि(र्चि)ताङ्घ्रि
रत्नार्चिर्बृन्दकेन द्रुरधिकधियो विश्वमर्हं ससर्ज ।
हृद्योऽनन्तां बिभर्त्यर्चितजलजपदध्यानतो मुक्तिवित्तं
मन्ये सद्यो ददद्यो भजगजवरदं भव्यदस्यादरन्तम्(?) ॥

End:

प्रसादगुणगुम्भितं नवविधात्मसम्बन्धिनं
सुवृत्तमणिभिस्ततं नवभिरात्मदीप्तिप्रदम् ।
अनन्तविदुषार्पितं द्विविधदेवदीक्षावता
गलेन वचसा स्तवं वहतु हारवत्सज्जनः ॥

Colophon:

इत्यनन्तविदुषा कृतं वरदराजस्तोत्रं संपूर्णम् ॥

R. No. **2245.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 162. Lines, 20 on a page. Grantha Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Dhanyam Rāju Vengappagāru of Pōlavaram, Gōdāvari district.

In foll. 1*a* to 2*a* the contents of the work are given. Fol. 2*b* is left blank.

(*a*) राजसौभाग्यमहालक्ष्मीतन्त्रम्.

RĀJASAUBHĀGYAMAHĀLAKṢMĪTANTRAM.

Foll. 3*a*—155*a*.

An elaborate treatise giving details of information on several matters connected with the worship of Goddess Rājaśyāmalā, a manifestation of Śakti. It is said to have been taught by Viṣṇu to Lakṣmī. The different subjects dealt with herein will be apparent from the headings of the 101 Kalpas given below :—

१. श्रीराजश्यामलामन्त्रमाहात्म्यकथनम्.
२. गुरुपूजाविधानम्.
३. नित्यजपविधानम्.
४. चैत्रे काम्यपूजाविधानम्.
५. काम्यजपविधानम्.
६, ७. वैशाखे नित्यकाम्यजपविधिः.

Complete.

Beginning:

श्रीमहालक्ष्मीरुवाच—

श्रीपते सर्वलोकेश भक्तप्रिय जनार्दन ।
सनकादिमहायोगिमुनिबृन्दानिषेवित ॥

रत्नसिंहासनारूढ लक्ष्मीकान्त नमोऽस्तु ते ।
नानारत्नविभूषाङ्ग मुक्ताहारविभूषित ॥
कस्तूरीतिलकोपेत कौस्तुभेन विराजित ।
कोटिमन्मथसङ्काश भक्तानां मङ्गलप्रद ॥
लक्ष्मीतन्त्रं समाचक्ष्व सर्वसौभाग्यदायकम् ।
रहस्यं सर्वतन्त्रेषु देवानामपि दुर्लभम् ॥
भक्तानां मोक्षदं चैव मन्त्रानुष्ठानशालिनाम् ।
श्रीराजश्यामलादेव्या मन्त्रमाहात्म्यमुत्तमम् ॥
श्रोतुमिच्छामि देवेश तन्मे कारुण्यतो वद ।

श्रीभगवानुवाच—

महालक्ष्मी महादेवी सर्वमङ्गलशोभने ।
मयूरपक्षसङ्काशधम्मिल्लश्रीविराजिते ॥

* * *

श्रीराजश्यामलादेव्यास्तन्त्रं लक्ष्मीकरं शुभम् ।
लक्ष्मीतन्त्रं प्रवक्ष्यामि भक्तानां मङ्गलप्रदम् ॥
भोगमोक्षप्रदं चैव देवानामपि दुर्लभम् ।
रहस्यं सर्वतन्त्रेषु गोपनीयं शुभप्रदम् ॥
जपखण्डं प्रवक्ष्यामि नित्यं काम्यं शुभप्रदम् ।

* * * *

Colophon:

इति श्रीसौभाग्यमहालक्ष्मीतन्त्रे लक्ष्मीनारायणसंवादे श्रीराजश्यामलामन्त्रमाहात्म्यकथनं नाम प्रथमः कल्पः ॥

End:

स्तोत्रखण्डं मया प्रोक्तं श्यामलानन्दवर्धनम् ॥
विस्तरस्तु यथाशास्त्रं तत्र कामेश्वरी शुभे ।
कालाचाररहस्यं च गोपनीयं मनोरमे ॥
रहस्येनैव कर्तव्यं रहस्यं परमं शुभम् ।
भोगमोक्षमवाप्नोति श्यामलामन्त्रजापकः ॥
गोपनीयं गोपनीयं रहस्यं कमलालये ।
इति प्रोक्तं मया लक्ष्मी सर्वतन्त्रं शुभप्रदम् ॥

कोटिजन्मतपः प्राप्तं जीवचक्रार्चनं शुभम् ।
स एव देवतां श्यामां जानीहि कमलालये ॥

Colophon:

इति राजसौभाग्यमहालक्ष्मीतन्त्रे नित्यमुद्राविधानं नाम एकशततमः कल्पः ॥

(*b*) राजश्यामलारहस्योपनिषद्.

RĀJAŚYĀMALĀRAHASYŌPANIṢAD.

Foll. 155*a*—158*a*.

An Upaniṣad explaining the greatness of Rāja Śyāmalā and the means of obtaining bliss and salvation. It is said to have been revealed by the sage Mataṅgēśvara to Kūcimāra.

Complete.

Beginning:

ओम् स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्वदेवाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ओं शान्तिश्शान्तिश्शान्तिः ।

ओं रत्नसानुशिखरेष्वासीनं श्रीराजश्यामलारहस्योपनिषद्वेत्तारं मतङ्गऋषिं गुरुं कूचिमारः प्रोवाच—

मतङ्ग भगवन् गुरो राजश्यामलारहस्योपनिषदं मेऽनुब्रूहि—मतङ्गभगवान् कूचिमारं सहोवाच । कूचिमार भगवन् ते राजश्यामलारहस्योपनिषदमुपदिशामि ।

End:

एवं कान्तया पूजिता स्वर्णचक्रे श्यामला मङ्गलप्रदा भवति । द्रोहिणां नोपदेशः । क्षपणकानां पश्चाधिकरणैः । परो मोक्षः नान्यथेति य एवं वेदेत्युपनिषत् ।

इति श्रीमहालक्ष्मीतन्त्रे मतङ्गेश्वरः कूचिमाराय शिष्यायोपदिष्टवान् ॥

Colophon:

इति राजश्यामलारहस्योपनिषत् ॥

सन्त्वा सिञ्चामि यजुषा प्रजामायुर्धनं च । ओं शान्तिः शान्तिः शान्तिः ॥

(c) श्यामलादीक्षा.

ŚYĀMALĀDĪKṢĀ.

Foll. 158a—162b.

On the initiation, required for the conduct of the worship of the Goddess Śyāmalā and thereby attaining salvation.

Complete.

Beginning:

अथातः श्यामलादीक्षां व्याख्यास्यामः । श्रीमान् साधकेन्द्रः आचार्य परिचर्यया सन्तोष्य, तदनुज्ञां लब्ध्वा, भो आचार्य मां भवार्णवात् तारयेति संप्रार्थ्य, नमस्कृत्य, श्वो भूते श्रीश्यामलाम्नाया(ख्य)विद्याभिस्त्वां दीक्षयेति कृतानुज्ञः रात्रिशेषे सुस्नातः रङ्गवल्ल्याद्यलङ्कृतमङ्गलमण्टपे सपूजोपस्कर उपविशेत् ।

End:

लक्षसङ्ख्यया देवतासायुज्यमाप्नोति, जनविरोधं न कुर्यात्, जनविरुद्धजापी न भूयात्, य एवमेतां महोपनिषदं व्याख्याता वेद, स ब्रह्महत्यां तरति, इत्युपनिषत्, सह नाववतु शान्तिः ३.

R. No. **2246.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 33. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Chebrole Rāmasvāmi Siddhāntulugāru of Vallūru, Amalapuram taluk, Gōdāvari district.

(a) गौतमसंहिता.

GAUTAMASAṀHITĀ.

Foll. 1a—20a.

A treatise in astrology dealing with the fortune of a person as may be predicted from the relative position occupied by the planets in his horoscope. The topics contained herein are apparent from the headings of the Adhyāyas given below.

Contains the following chapters:—

१. विप्रपूजाध्यायः.
२. खिलाध्यायः.
३. सन्धानाध्यायः.
४. द्वात्रिंशद्राजयोगाध्यायः.
५. विशेषराजयोगाध्यायः.
६. सामान्यराजयोगाध्यायः.
७. धनवाहनभाग्ययोगाध्यायः.
८. विशेषधनयोगाध्यायः.

Beginning:

सारावल्यां वयः—

तन्वादिभावेषु शुभस्थितेषु भावाधिपेनेक्षितसंयुतेषु ।
तदुक्तभावस्य समृद्धिरुक्ता न पापखे(टे)क्षितसंयुतेषु ॥
नीचर्क्षरिपुराशिस्थो ग्रहो भावविनाशकृत् ।
मूलस्वर्क्षोच्चमित्रस्थो भाववृद्धिकरः स्मृतः ॥

भावः—

तनुर्धनं सहोत्थं च बन्धुः पुत्रो रिपुस्तथा ।
पत्नीनिधनधर्माश्च कर्म चायुर्व्ययौ तथा ॥

* * * *

श्लोकद्वयेन यात्राप्रश्नलग्नगतग्रहफलमाह-
षष्ठाष्टव्ययगः शशी शुभखगैर्न प्रेक्षितो भङ्गकृत्
क्रूरो लग्नगतोऽष्टगोऽप्यशुभकृत्तत्प्रश्नलग्नाद्बली ।
एको लग्नगतः शुभस्तु धनदो द्वौ लग्नगौ चेच्छुभे
रत्नस्त्रीपशुभूमियानसुखदौ यातुर्बलिष्ठौ यदि ॥

* * * *

Colophon:

इति श्रीगौतमविरचितायां संहितायां राजयोगपद्धतौ विप्रपूजाध्यायः प्रथमः ॥

End:

आरूढात् पञ्चमेशस्य कोशे वित्तपलाभपौ ।
लग्नाधिपेन सम्बन्धात् धनवान् बहुनायकः ॥
मूर्तिप्रतापधनवाहनसीमयानसिंहासनादिमणिसौधविहारविद्या ।
मन्त्रप्रभाववलभाग्यबहुप्रकारैः प्रोक्ता भवन्ति ननु कालविदावतंसे ॥

Colophon:

इति गौतमसंहितायां कालविदावतंसे महाशास्त्रे जातककर्मपद्धतौ विशेषधनयोगाध्यायोऽष्टमः ॥

Foll. 20*a* to 23*b* contain some astrological passages with Telugu meaning. On fol. 24*a* the contents of the work are given. Fol. 24*b* is left blank.

(b) जातकसरलिः, आन्ध्रटीकासहितः.

JĀTAKASARALIḤ WITH TELUGU MEANING.

Foll. 25a—33a.

Transcribed in 1916-17 from a MS. of M.R.Ry. Tējōmūrtulu Rāmamūrtiliṅgam of Śrīrāmapuram, Vizagapatam district.

Gives details connected with the casting of horoscopes as well as the fortune of persons as can be made out from the relative position of the planets calculated from the Lagna.

Apparently incomplete.

Beginning:

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्यास्स्युस्तं नमामि गजाननम् ॥

जननी जन्मसौख्यानां वर्धनी कुलसम्पदाम् ।
पदवी पूर्वपुण्यानां लिख्यते जन्मपत्रिका ॥

बलमारोग्यसन्तानं सुखमायुर्विवर्धनम् ।
तिथिभग्रहलग्नादि जातकं लिख्यते मया ॥

विधात्रा लिखिता या वै ललाटाक्षरमालिका ।
दैवज्ञस्तां वदेन्नित्यं होरान्निर्मलचक्षुषा ॥

श्रीमत्पङ्कजिनीपतिः कुमुदिनीप्राणेश्वरो भूमिभूः
शशाङ्किः त्रिदशाधिनाथसचिवो दैत्येन्द्रमन्त्री शनिः ।
स्वर्भानुश्च शिखी गुहो गणपतिर्ब्रह्मेशलक्ष्मीश्वरा-
स्तं रक्षन्तु सदैव यस्य विमला पत्री मया लिख्यते ॥

* * * *

स्वस्ति श्रीशुभजातकाभ्युदयशालिवाहनशकाब्दाः कलियुगादि लिखेत् । तत्संख्याप्रवर्तमानसंवत्सरायनर्तुमासपक्षतिथिवारनक्षत्रयोगकरणविषघटिकादिवार्ध-निश्यर्धघटिकादि लिखेत् ।

* * * *

सिद्धान्तोक्तप्रकारेण रव्यादिमध्यशुभजन्मकालतात्कालिकग्रहकृत्यादि लिखेत् । तदुपरि श्रीपतिजातकोक्तषड्बलानि कुर्यात् । बृहज्जातकोक्तबलानि सर्वार्थचिन्तामणिबलानि च लिखेत् । आदौ ग्रहाणां बलाबलविचारार्थमुच्चादि-श्रेष्ठबलानि वक्ष्यन्ते—

बृहज्जातके—

अजवृषभमृगाङ्गनाकुलीरझषवणिजौ च दिवाकरादि तुङ्गाः ।
दश १० शिखि ३ मनुयुक् १४ तिथि १५ इन्द्रियांशैः ५
त्रिनवक ९३ विंशतिभिस्तु २० तेऽस्तनीचाः ॥

End:

पुत्रेशलग्नेश्वरजीवयोगः केन्द्रत्रिकोणेषु यदा गुरुस्स्यात् ।
व्यासां तथा सन्तांतेराशतायुस्त्रणास्वकाकद्भगणात्(?) प्रयुञ्चयात ॥

*　　*　　*　　*

जन्मेशजायाधिपशुक्रयोगाः केन्द्रत्रिकोणेषु यदा गुरुस्स्यात् ।
तदा विवाहे प्रबलिष्ठराशौ ज्ञात्वा त्रिकालं भगणात्प्रयुंज्यात् ॥

*　　*　　*　　*

Fol. 33*b* contains the name of the owner of the MS. from which this was copied.

R. No. **2247.**

Paper. 10⅞ × 9⅝ inches. Foll. 9. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 rrom a MS. of M.R.Ry. Tiru Śrinivāsavarada Tātācāriyār of Villiyambakkam, Chingleput district.

उपयुक्तांशसङ्ग्रहः.

UPAYUKTĀṀŚAŚANGRAHAḤ.

A brief compilation of important and relevent matters, especially from the point of view of a Śrī-Vaiṣṇava, from authoritative works, such as Āgamās, etc. The portion contained herein gives the characteristics of a Śrī-Vaiṣṇava. The author was a disciple of Vātsya Vēdāntadēśika.

Incomplete.

Beginning:

निगमान्तार्यसूक्तीनां प्रमाणमिव मूर्तिमत् ।
आविर्भूतमहं वन्दे वात्स्यं वेदान्तदेशिकम् ॥
नत्वा कुलधनं श्रीमद्वेदान्तार्यपदाम्बुजम् ।
क्रियते सद्विवेकार्थमुपयुक्तांशसंग्रहः ॥

श्रीजयाख्यसंहितायाम्—

भगवन् श्रोतुमिच्छामि वैष्णवानां च लक्षणम् ।

श्रीभगवान्—

भगवत्कर्मतन्त्राणां पञ्चकालनिषेविणाम् ।
अप्रतिग्राहकाणां च कणभक्षाभिवर्तिनाम् ॥
बाह्याभ्यन्तरतुल्यानां श्रद्धासंयुतसेविनाम् ।
नारायणैकनिष्ठानां ये हि जाता महाकुले ॥
ऊनाधिकेन विप्रेन्द्र कर्मणानुष्ठितेन च ।
कालह्रासवशाच्चैव वैषम्यमुपयान्ति च ॥
संस्कृताश्च निषेकाद्यैः पित्रा वा गुरुणा त्वनु ।
स्वयं विवेकभावस्था ब्रह्मचारिगुणैर्युताः ॥
सर्वभूतस्थितं विष्णुं पश्यन्त्यमलया धिया ।
सर्वभूतान्तरात्मानं भावयन्ति च सर्वदा ॥
कर्मणा मनसा वाचा यजन्त्येकमधोक्षजम् ।
आद्यं द्विजेन्द्रमुख्येभ्यः तदभावान्महामते ॥
षट्कर्मरतविप्रेभ्यो नित्यं चायाचितेन तु ।
सिद्धान्तेन तु वर्तन्ते मुण्डितश्मश्रुमस्तकाः ॥
काषायवासोधर्तारो दण्डमात्रपरिग्रहाः ।
ते विप्रा यतयश्शुद्धास्सत्त्वस्था वैष्णवाः स्मृताः ॥

End:

भक्तिमान् पुण्डरीकाक्षे श्रीवैष्णव उदाहृतः ॥
शब्दादीन् विषयांश्चैव देहोपाधिकबान्धवान् ।
त्यक्त्वा भरन्यस्तभरः स प्रपन्न उदाहृतः ॥
हरेराज्ञानुरूपेण कर्मज्ञानादि यो नरः ।
स एकान्ती भवेद्विप्रः स हि भागवतस्स्मृतः ॥
प्रीत्यर्थं वासुदेवस्य कर्मज्ञानादिकृन्नरः ।
स विप्रः परमैकान्ती महाभागवतस्स्मृतः ॥

इति वचनं च निर्व्यूढं वेदितव्यम् । शिष्टं स्पष्टमिति दिक् ॥

Colophon:

इत्युपयुक्तांशसङ्ग्रहे वैष्णवलक्षणं संपूर्णम् ॥

R. No. **2248.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Fol. 557. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R Ry. Pullaya Vīrarāma Śāstrigāru of Mungoṇḍagrahāram, Razole taluk, Gōdāvari district.

Bound in three volumes.

महाभाष्यप्रदीपोद्योतनम्.

MAHĀBHĀṢYAPRADĪPŌDYŌTANAM.

Same work as that described under R. No. 271 ante, wherein see for the beginning. By Annambhaṭṭa, son of Tirumalācārya, a descendant of Rāghavasōmayājin.

Contains from the first Āhnika of the second Pāda in the first Adhyāya to the end of the eighth Adhyāya, but wants the portion from the 110th Sūtra of the second Pāda in the fifth Adhyāya to the end of the 12th Sūtra of the first Pāda in the sixth Adhyāya and some portion of the first Sūtra of the first Pāda in the seventh Adhyāya.

End:

अ अ ॥

संवृतस्यैव संवृतोऽकार आदेश इत्यभिप्रायेण प्रश्न इत्याह—अकारस्येति ।

* * * *

ननु आदेशस्य भाव्यमानत्वेन सवर्णग्राहकत्वाभावेऽपि स्थानिनोऽग्राहकत्वात् दीर्घप्लुतयोरपि सर्वत्र ह्रस्वादेशप्रसङ्गः तपरत्वाभावे निवारयितुं न शक्यते; अत आह—तत्र षण्णामिति । जातिपक्षे स्थानिन्येकशेषाभावेऽपि आन्तरतम्यादेव षण्णामादेशानां षट् स्थानिनो व्यवस्थया भविष्यन्तीति स्थान्येकशेषो भिन्नकालनिवृत्त्यर्थ एवेति भावः ॥

Colophon:

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यश्रीमद्राघवसोमयाजिकुलावतंसश्रीतिरुमलाचार्यवर्यस्य सूनोः अन्नंभट्टस्य कृतौ श्रीमन्महाभाष्यप्रदीपोद्योतने अष्टमस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम् । पादश्च समाप्तोऽध्यायश्च ॥

The scribe adds—

मुक्कामलान्ववायज्ञो लक्ष्मीपतिबुधः स्फुटम् ।
प्रदीपोद्योतनं सम्यक् लिलेख विदुषां मुदे ॥

Foll. 107b, 108, 228b, 248b, 249, 349b and 350 are left blank.

R. No. 2249.

Paper. 13¼ × 8⅜ inches. Foll. 48. Lines, 24 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Mantha Cannaya Śāstrigāru of Pantulavārāgrahāram, Gōdāvari district.

Fol. 48*b* is left blank.

रामायणव्याख्या.

RĀMĀYAṆAVYĀKHYĀ.

A commentary on the Vālmīki Rāmāyaṇa: by Nṛsiṁha.

Contains the Sargas 48 to 54 complete and the 55th incomplete in the Ayōdhyākāṇḍa

Beginning:

तेषामिति । अभिगम्येति । एवं पूर्वोक्तप्रकारेण । अत एव । अतीव च अत्यन्तं पीडितानां दुःखेन पीडितानां बाष्पविह्वलनेत्राणां रुदतामित्यर्थः ।

* * * *

Colophon:

इति श्रीनृसिंहीये अयोध्याकाण्डे अष्टचत्वारिंशः सर्गः ॥

End:

यद्वा समाः कतिचित्संवत्सरानित्यर्थः । आश्रमं वस आश्रमे वसेत्यर्थः ॥

Colophon:

इति श्रीनृसिंहीये अयोध्याकाण्डे चतुष्पञ्चाशः सर्गः ॥

उषित्वेति । अरिंदमौ शत्रुनाशकौ राजपुत्रौ रामलक्ष्मणौ । तत्र भरद्वाजाश्रमे रजनीमुषित्वा ।

* * * *

विचित्रवालुकजलां विचित्रं वालुकं [चापः] यस्य तत् तादृशं जलम्.

R. No. 2250.

Paper. 13¼ × 8⅜ inches. Foll. 57. Lines, 24 in a page. Telugu. Good.

(*a*) संहितासारसंग्रहः.

SAṀHITĀSĀRASAṄGRAHAḤ.

Foll. 1*a*—16*b*.

Transcribed in 1916–17 from a MS. of M.R.Ry. Dēvarakoṇḍa Veṅkaṭarāmayagāru of Kapilēśvarapuram, Ramachandrapuram taluk, Gōdāvari district.

A treatise on horoscopy dealing with the fortune of a person as made out from the relative position of the planets in his horoscope.

Contains the Lagnajātaphalanirṇayādhyāya.

Beginning:

लग्नादष्टमगे चन्द्रे गुरौ केन्द्रस्थिते यदि ।
शुक्रक्षेत्रे यदा जातः सार्वभौमः क्षितीश्वरः ॥
लग्ने गुरौ भृगौ यस्य केन्द्रस्थाने रवौ यदि ।
दशमाङ्गारकौ यस्य सुपुत्र कुलगोपकः ॥

End:

पञ्चवर्षे जलाद्भीतिर्दशाब्देन जलाद्भयम् ।
यथा पुण्यग्रहैर्दृष्टं शतवर्षाणि जीवति ॥
पुष्यमासे शुक्लपक्षे पौर्णमास्यां भृगोर्दिने ।
पुष्यनक्षत्रतारायां मध्याह्ने मरणं ध्रुवम् ॥

Colophon:

इति श्रीसंहितासारसंग्रहे लग्नजातफलनिर्याणाध्यायः समाप्तः ॥

(*b*) जातककलानिधिः.

JĀTAKAKALĀNIDHIḤ.

Foll. 17*a*—57*a*. Fol. 57*b* is left blank.

Transcribed in 1916–17 from a MS. of M.R.Ry. Kuṭambaya Śāstri of Mylapore.

Same work as that described under R. No. 1091(*c*) ante and under No. 13669 of the D.C.S. MSS., Vol. XXIV.

Contains 1—14 Kalāvilāsas complete.

R. No. **2251.**

Paper. 13¼ × 8⅜ inches. Foll. 80. Lines, 24 in page. Grantha. Good.

Transcribed in 1916-17 from a paper MS. of M.R.Ry. Bommakanṭhi Sītārāma Śāstri of Ralli, Razole taluk, Gōdāvari district.

(*a*) वाचारम्भणप्रकरणम्.

VĀCĀRAMBHAṆAPRAKARAṆAM.

Foll. 1*a*—27*b*. Fol. 28 is left blank.

The author, Nṛsiṁhāśrama, disciple of Jagannāthāśrama, refutes the Bhēda (i.e., duality in the universe) school of Vēdāntins by interpreting

certain passages (sixth Adhyāya, first Khaṇḍa) of the Chāndōgyōpaniṣad which form the subject of controversy in the Brahmasūtras (2—1—6 Ārambhaṇādhikaraṇa).

Complete.

Beginning:

वाचारम्भणवाक्येन वारिता भेदसत्यता ।
युक्तितोऽपि निवार्यैनामद्वयं सदुपास्महे ॥

यद्यप्यत्र श्रीहर्षादिभिः पराक्रान्तमेवं, तथापि तत्खण्डनविधया न प्रमाणकारणपरीक्षयेति केचिन्न श्रद्दधते । विस्तृतत्वाच्च न तन्निदिध्यासनाङ्गमिति संक्षिप्य प्रमाणकारणस्वरूपनिरूपणमुखेन यथाशक्त्यद्वैतश्रुत्यर्थमिदं मननमालोचनीयं महद्भिः । अस्ति छान्दोग्ये—

येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्युद्दालकस्य श्वेतकेतुं प्रत्येकविज्ञानात सर्वविज्ञानसंकीर्तनव्याजेनाद्वैतं प्रतिज्ञाय तदनन्तरं च कथन्नु भगवतस्समुद्देश इति श्वेतकेतोस्तदाक्षेपः । नह्येकस्मिन् विदिते सर्वं विदितं भवति । तत्रोद्दालको नहि ब्रह्मव्यतिरिक्तमपरमस्ति । यत्तस्मिन् विज्ञातेऽप्यज्ञातं स्यात् । यतो ब्रह्मैव सर्वप्रपञ्चस्याधिष्ठानतयोपादानम् ।

End:

तदुक्तं भगवता भाष्यकारेण । न निरवयव(ता)न सावयवतोभयमिति । तस्मात् तत्त्वमस्यादिवाक्यादुत्पन्नसाक्षात्कारादावरणशक्तिमदज्ञानांशमत्कार्ययोः जन्मान्तरप्रापकप्रारब्धेतरकर्मानित्याप्रारब्धानुसारेण किञ्चित्कालं शरीरोऽपि मुक्तिमनुभूय भोगात् तन्निवृत्तौ कैवल्यं प्रतिपद्यत इति सिद्धम् ॥

Colophon:

इति परिव्राजकाचार्यश्रीजगन्नाथाश्रमपूज्यपादशिष्यश्रीनृसिंहाश्रमविरचितं वाचारम्भणप्रकरणं संपूर्णम् ॥

(*b*) उपाधिमण्डनम्.

UPĀDHIMAṆḌANAM.

Foll. 29*a*—33*a*. Foll. 33*b* and 34 are left blank.

A treatise maintaining that the apparent difference between Jīvātman and Paramātman is due to certain conditions operating on the Brahman.

Incomplete. A small fragment of Mīmāṁsānyāyaprakāśa by Āpōdēva is found copied at the end.

Beginning :

पूर्णज्ञानाय निर्भेदपरमानन्दमूर्तये ।
व्यासशङ्कररूपाय श्रीपरब्रह्मणे नमः ॥

ननु वेदान्तशास्त्रमनारम्भणीयम् आश्रयानुपपत्त्या अज्ञानासंभवेनाज्ञातस्याज्ञानिनोऽधिकारिणश्चासंभवादिति चेत् मैवम्—शुद्धचित एवाज्ञानाश्रयत्वविषयत्वसंभवात् । तदुक्तम्—"आश्रयत्वविषयत्वभागिनी निर्विकारचितिरेव केवलम्" इति ।

End :

विरोधिप्रमाणानवतारे धर्मसांकर्यमा . . . .

(*c*) प्रमाणतत्त्वम्.

PRAMĀṆATATTVAM.

Foll. 35*a*—64*a*. Fol. 64*a* contains the name of the owner of the MS. from which this was copied. Fol. 64*b* is left blank.

A treatise setting forth the correct means of true knowledge in accordance with the Advaita-Vēdānta.

Breaks off in the Śabdakhaṇḍa.

Beginning :

पूर्णानन्दाय निर्भेदपरमानन्दमूर्तये ।
व्यासशङ्कररूपाय श्रीपरब्रह्मणे नमः ॥

कल्याणगुणपूर्णश्रीकरुणावरुणालयः ।
कल्याणानि विधत्तां नः कमलाकामुकः पुमान् ॥

पदार्थो द्विविधः, स्वतस्सिद्धः परतस्सिद्धश्चेति । अत्र स्वतस्सिद्ध आत्मा, तदन्यः परतस्सिद्धः । परतस्सिद्धो द्विविधः, केवलसाक्षिबाध्यः, स्वस्वाकारवृत्तिमपेक्ष्यैव साक्षिभास्यश्चेति । आद्यो मनस्तत्परिणामसुखदुःखादिः, द्वितीयो द्विविधः, अविद्यावृत्तिमपेक्ष्य साक्षिभास्यो मनोवृत्तिमपेक्ष्य साक्षिभास्यश्चेति । आद्यः सुषुप्त्यादिः । द्वितीयो घटादिः । तत्र ज्ञानरूपवृत्तिस्तावत् षड्विधा । प्रत्यक्षानुमित्युपमितिशाब्दार्थापत्त्यनुपलब्धिभेदात् । तत्करण-

मपि षड्विधम् । तच्चाग्रे निरूपयिष्यते । तत्र मनोभिन्नेन्द्रियजन्या मनोवृत्तिः प्रत्यक्षमुच्यते । अनावृतचैतन्यरूपप्रत्यक्षगतावरणाभावप्रयोजकत्वेनोपचारात् ।

* * * *

तदेव व्याख्यातं प्रत्यक्षम् ।

Colophon:

इति प्रत्यक्षखण्डस्समाप्तः ॥

End:

अथ शब्दो निरूप्यते— शाब्दप्रमितिकरणं शब्दः । तच्च पदज्ञानम् । नचैवं घटादिपदेष्वगृहीतवृत्तिकस्य घटमानयेति वाक्याच्छाब्दबोधापत्तिरिति वाच्यम् । यन्निरूपितवृत्तिज्ञानजन्यपदार्थोपस्थितेरपि शाब्दबोधहेतुत्वात् ।

* * * *

इदन्ताविशिष्टे तत्ताभावस्य त्वयाप्यनुपगमाद्विशिष्टविशेष्यकज्ञाने विशेष्यतावच्छेदकावच्छिन्नानुयोगिताकत्वविशिष्टविशेषणसम्बन्धभानस्य त्वयोपगमात् तस्य च प्रकृते बाधात् ·

(*d*) ज्ञानद्वयवादार्थः.

JÑĀNADVAYAVĀDĀRTHAḤ.

Foll. 65*a*—72*b*.

Same work as that described under R. No. 792(*b*) ante.

Complete.

Colophon:

इति हरिरामतर्कालङ्कारविरचितः ज्ञानद्वयवादार्थः समाप्तः ॥

(*e*) विषयतावादः.

VIṢAYATĀVĀDAḤ.

Foll. 73*a*—80*a*. Fol. 80*b* contains the name of the owner of the MS. from which this was copied.

By Harirāma Tarkālaṅkāra. Same work as that described under No. 4287 of the D.O.S. MSS., Vol. VIII, wherein see for the beginning.

Complete.

End:

एतेनानुमित्यसाधारणविषयतायाः आपत्त्यादिसाधारण्ये तत्स्थलीयप्रतिबन्धकतायां प्रतिबध्यतावच्छेदककोटौ प्रत्यक्षान्यत्वमापत्त्यन्यत्वं निवेशनीयमिति गौरवमित्यपि परास्तमिति कृतं पल्लवितेन ॥

Colophon:

इति हरिरामतर्कालङ्कारविरचितः विषयतावादरसमाप्तिमगमत् ॥

R. No. **2252.**

Paper. 13¼ × 8⅜ inches. Foll. 31. Lines, 24 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Dovvūri Rāmacyavanulu of Kapilēśvarapuram, Ramachandrapuram taluk, Gōdāvari district.

Fol. 31*a* contains the contents of the work and 31*b* contains the name of the scribe and that of the owner of the MS. from which this was copied.

लीलावती (शैवागमः).

LĪLĀVATĪ (ŚAIVĀGAMAḤ).

A Śaivāgama work dealing with the details of ceremonials connected with the performance of festivals in temples.

Contains the 90th, 125th, 200th, 321st and 9th Paṭalas in the Kriyāpāda. The subjects dealt with herein are :—

Page.		Page.	
१.	वास्तुहोमः.	३९.	प्रवेशहोमः.
५.	भेरीताडनम्.	४१.	नित्यौपासनम्.
९.	ध्वजपूजा.	४२	नित्याग्निहोत्रम्.
	वृषभाष्टकम्.	४३.	नित्यबलिः.
१०.	सर्वावरणदेवताह्वानम्.		ग्रामबलिः.
२६.	अङ्कुरार्पणम्.	४५.	शेषहोमः.
२८.	इडावचनम्.	४६.	त्रिशूलस्नानम्.
	शिवविवाहः	४७.	नाकबलिः.
३२.	कन्यादानम्.	५०.	हरचोरसंवादः.
३७.	प्रधानहोमः.	५५.	शैवाग्निमुखम्.

Beginning:

अथाचार्यो ब्रह्मासनस्थ आचम्य, शिवनामरूपकीर्तनान्ते देशकालौ सङ्कीर्त्य, एवङ्गुणतिथौ तत्तद्गोत्रः तत्तन्नामधेयः श्रीमतस्सकुटुम्बस्य धर्मार्थकाममोक्षचतुर्विधफलसिद्ध्यर्थम् ।

* * * *

आदौ निर्विघ्नपरिसमाप्त्यर्थं गणपतिपूजां करिष्ये। स्वस्तिसम्बाधेस्वभयं नो अस्तु शुभगं शुभम्। प्राणानायम्य, शुभतिथौ वास्तुपूजां करिष्ये। अथ वास्तुपूजाविधिं व्याख्यास्यामः। पादस्याग्रभागे बालास्थाने यागमण्टपे वास्तुस्थानं सङ्कल्प्य।

* * * *

Colophon:

इति लीलावत्यां क्रियापादे उत्सवतन्त्रे कल्याणोत्सवप्रकरणं नाम नवतितमः पटलः ॥

End:

आज्यशेषं नैर्ऋत्यां भूमौ विसृजेत्। प्रणीतोदकं प्रोक्षणपात्रे निक्षिप्य, तदुदकं प्रागाद्यूर्ध्वान्तं विसृजेत्, उत्तरपरिषेचनं कृत्वा विष्णुकूर्चं विसर्जयेत्।

अयं समस्तहोमेषु प्रतिष्ठादिषु कर्मसु।
क्रमस्समानो ज्ञात्वैवं सर्वदा होममाचरेत् ॥

Colophon:

इति लीलावत्यां क्रियापादे शैवाग्निमुखलक्षणं नाम नवमः पटलः ॥

R. No. **2253.**

Paper. 13¼ × 8⅝ inches. Foll. 36. Lines, 24 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Bommakanṭhi Sītārāmaśāstri of Ralli, Gōdāvari district.

(*a*) कणादन्यायसिद्धान्तसङ्ग्रहः.

KAṆĀDANYĀYASIDDHĀNTASAṄGRAHAḤ.

Foll. 1*a*—10*b*.

Same work as that described under R. No. 2236 ante.

Incomplete.

(*b*) बाधविषयः.

BĀDHAVICĀRAḤ.

Foll. 11*a*—36*b*.

By Harirāma Tarkālaṅkāra. Similar to the work described under R. No. 1345 ante.

Complete.

Beginning:

तद्धर्मावच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकाले तद्धर्मावच्छिन्नविशेष्यताकताद्विशिष्टबुद्धेरनुदयात् पर्वतत्वावाच्छिन्नविशेष्यताकसंयोगादिसंसर्गकवह्नित्वाद्यवच्छिन्नप्रकारताकालौकिकज्ञानत्वावच्छिन्नं प्रति पर्वतत्वाद्यवच्छिन्नविशेष्यताकदैशिकविशेषणतासंसर्गकसंयोगादिसम्बन्धावच्छिन्नवह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रकारकानाहार्याप्रामाण्यज्ञानानास्कन्दितनिर्णयत्वेन प्रतिबन्धकत्वं कल्प्यते। पर्वतत्वाद्यवच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकालेऽन्यधर्मावच्छिन्न-[वह्नि]विशेष्यताकताद्विशिष्टबुद्ध्युदयात् प्रतिबध्यतावच्छेदककोटौ पर्वतत्वावच्छिन्नविशेष्यताकत्वनिवेशः।

End:

कायव्यूहस्थले चान्यशरीरावच्छेदेन तत्रात्मनि बाधादिसत्त्वे अन्यशरीरावच्छेदेनापि न तद्विशिष्टबुद्धिरुत्पद्यते। तदुत्पादे प्रमाणाविरहात्। तादृशफलस्याप्रामाणिकत्वे त्वगत्या चैत्रादिशरीरावच्छिन्नत्वं बाधबुद्धौ विशिष्टबुद्धौ च विशेषणीयम्॥

The scribe of the original MS. adds—

भाद्रपदशुद्धचतुर्थ्यां लिखितोऽयम्।

R. No. **2254.**

Paper. 13¼ × 8¼ inches. Foll. 28. Lines, 24 in a page. Telugu. Good.

Transcribed in 1916-17 from a paper MS. of M.R.Ry. Bhagavati Kāśīnātha Śāstri of Koṭipalli, Ramachandrapuram taluk, Gōdāvari district.

(*a*) नियोगिमतसिद्धान्तदीपिका.

NIYŌGIMATASIDDHĀNTADĪPIKĀ.

Foll. 1*a*—5*a*. Fol. 5*b* is left blank. Foll. 6*a*—7*a* contain in Telugu language the preface giving an account of the origin of the work.

A treatise explaining the principles and the accepted doctrines of the Niyōgi Brahmins: by Lakṣmīnārāyaṇadīkṣita, disciple of Śaṅkarabhagavatpūjyapāda.

Complete.

Beginning:

नित्ययुक्तत्वं च नियतयोगनिष्ठावत्त्वम् । तच्च यथाशक्ति विमर्शपूर्वकभक्तियुक्तसमन्वयाविरोधसहकृतशास्त्रप्रतिपादितसाङ्कर्यहेतुपरधर्मपरित्यागोत्तरकालिकयथाशक्तिनियमविशिष्टस्वकर्मानुष्ठानात्मकसदाचारप्रवर्तकत्वम् ।

श्रेयान्स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥

इति भगवदुक्तेः ।

* * *

नियोगत्वं च मतरूपम् । तच्च जातिरूपं वा गुणरूपं वा, क्रियारूपं वा, शब्दरूपं वा । योगस्य ब्रह्मस्वरूपत्वपक्षे ब्राह्मणत्वरूपमिति, स्वरूपविशेषत्वपक्षे ब्राह्मणत्वव्याप्यरूपमित्याद्ये विवेकः ।

End:

आचारबोधकवेदप्रामाण्यवादेन सकलमतसामान्यधर्माङ्गीकारपूर्वकविशेषधर्मनिराकरणेन तत्तद्धर्मप्रतिपादकतत्तद्वचननिरूपितेनातिव्याप्त्यादिदोषरहितत्वेन समन्वितमित्युक्तव्यवस्थानभ्युपगमे सर्वत्र लक्षणसमन्वयानुपपत्तिश्चेति सुधीभिराकलनीयम् ॥

Colophon:

इति श्रीमन्नियोगमतप्रवर्तकाद्वैतसिद्धान्तस्थापकश्रीमच्छङ्करभगवत्पादपूज्यशिष्यलक्ष्मीनारायणदीक्षितविरचिता नियोगमतसिद्धान्तदीपिका समाप्ता ॥

(*b*) सङ्ग्रहः.

SAṄGRAHAḤ.

Fol. 7.

A brief summary of what is stated in the work described above. This treatise arrives at the conclusion that the Niyōgis are Brahmins and that they are entitled to perform Brahminical rites and duties.

Complete.

Beginning:

ब्राह्मणाः द्विविधाः प्रोक्ताः पामराः पण्डिता इति ।
पामरा द्विविधा नामधारका ब्राह्मणब्रुवाः ॥
ब्रह्मबीजसमुत्पन्नो मन्त्रसंस्कारवर्जितः ।
जातिमात्रोपजीवी यस्स ब्राह्मण इति स्मृतः ॥
गर्भाधानादिसंस्कारैर्वेदोपनयनैर्युतः ।
नाध्यापयति नाधीतस्स भवेत् ब्राह्मणब्रुवः ॥

पण्डिता द्विविधाः प्रोक्ता नियोगा वैदिका इति ।
नित्ययुक्ता नियोगास्स्युर्योगश्चित्तस्य शुद्धता ॥

End:

निरूपितास्तथा तेषामनुष्ठानं च संमतम् ।
मतसाङ्कर्यदोषस्तु सर्वभाष्येषु बाधितः ॥
यथा स्मृतिषु वर्णादिसाङ्कर्यं बाधितं तथा ।
उपेक्षितस्तारतम्यविचारोऽप्रकृतत्वतः ॥

Fol. 8*a* contains particulars of the transcription of the MS and of the owner.

(*c*) आम्नायव्याख्यानम्.

ĀMNĀYAVYĀKHYĀNAM.

Foll. 8*b*—27*b*. Fol. 28*a* is left blank and 28*b* contains particulars of the transcription of the MS. and owner.

A commentary on the Śrīvidyāratnasūtra which has been describe under No. 5737 of the D.C.S. MSS., Vol. XII.

Complete.

Beginning:

सच्चिदानन्दरूपस्य गुरोः पादाम्बुजद्वयम् ।
प्रणम्य शिरसा भक्त्या ग्रन्थानालोक्य यत्नतः ॥
आम्नायलक्षणं वक्ष्ये सङ्क्षेपेण यथाक्रमम् ।
उद्रेकत्रयसंयुक्तं मन्त्रयन्त्रादिलक्षणैः ॥

मूलविद्याप्रतिपादनद्वारा आम्नायलक्षणं विवृणोमि। ब्रह्मविद्या षोडशिनी सकलतन्त्रसिद्धत्वात् तदितरविद्या परब्रह्मविद्या न भवति। किमित्युक्ते तच्छङ्का-निरासार्थं सुन्दरीतापनीयोक्तगौडपादीयमन्त्ररत्नाकरसूत्राणि विवृणोमि। ग्रन्थादौ मङ्गलार्थं निरूपणम्—

अकारो मङ्गलार्थश्च थकारो धर्मदायकः ।
तस्माच्छ्रेष्ठतरः प्रोक्तो मुनिभिः ब्रह्मवादिभिः ॥ इति ॥

अथ शाक्तमन्त्रागमजिज्ञासेति प्रथमसूत्रेणोक्तमन्त्राणां निबोधनार्थं जिज्ञासूनां मन्त्रसमुदायविवरणार्थं सूत्रकारैर्निरूपितम् ।

End:

अथ श्रीविद्योपासकानां त्रिकूटविद्यायाः षोडश्याः श्रीकामेशमात्मानमात्मना सर्वदेहस्थितः श्रीगुरोः दिव्यदृष्ट्यावगत्यात्मना नीतमोहः निरस्तप्रपञ्च(:) सदा तत्त्वमस्यद्वयं ब्रह्म संविज्ञानं भवतीति ॥

Colophon:

इत्याम्नायव्याख्यानं संपूर्णम् ॥

R. No. **2255.**

Paper. 13¼ × 8⅝ inches. Foll. 25. Lines, 24 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Uppalūri Kṛṣṇa mūrti Śāstrulugāru of Dangēru, Gōdāvari district.

गौरीपरिणयचम्पूः.

GAURĪPARIṆAYACAMPŪḤ.

Foll. 1*a*—25*a*. Fol. 25*b* contains the name of the owner of the MS. from which this was copied.

A work in prose and verse dealing with the marriage between Gaurī, i.e., Pārvatī, and Paramaśiva: by Pēnniṇṭa Vēṅkaṭasūri of Ārāmadrāviḍa sect of Telugu Brahmins.

Breaks off in the Uttarabhāga.

Beginning:

वन्दे वारणवदनं कुन्दार्जुनमन्तरायतिमिरप्राव(रवि)म् ।
तुन्दिरमन्दुरतुरगं चन्दिरनिटिलं गणेश(श्वर)मुदारम् ॥

नामरूपात्मकं ब्रह्म यतो(जगद)भूदिदम् ।
प्रकृतिप्रत्ययाकारं स्त्रीपुंसं तमुपास्महे ॥

पेन्निण्टवेङ्कटाख्येन कविना पार्वतीपतेः ।
प्रीतये क्रियते ग्रन्थः गौरीपरिणयाभिधः ॥

कविर्वेङ्कटोऽहं करोमि प्रबन्धं लसत्पद्यगद्याभिरामं निकामम् ।
कविश्चेद्रसं सम्यगापीय तुष्येद्रसालं यथेमं कपिश्चेद्धि कुर्यात् ॥

गौरीपरिणयः पूर्वं सतां सन्तुष्टये यथा ।
गौरीपरिणयस्सोऽयं सतां सन्तुष्टये भवेत् ॥

अस्ति किलास्तोकप्रशस्तास्तोदयान्तरवास्तव्यसमस्तप्रस्तराश्रयमस्तकन्यस्तनिजगुणः, अदभ्रशुभ्रतरहिमानीविभ्राजिताभ्रङ्कषशिखरसुखासीनलेखाङ्गनागणः,

* * * *

पुङ्ग(व) इवोन्नतशृङ्गः, भगवानिव वनमालालङ्कृतः सर्वोर्वीधरसार्वभौमो हिमवान् ।

* * * *

तस्यासीदचलाधिपस्य महिता मेनेति काचिद्वधू-
राकाशस्य धरेव तुल्यगुणयोरासीत्तयोरात्मजः ।
मैनाको मनुजातलोकवदनो मान्यो महाभूभृता-
मातेने स तयोः प्रमोदमतुलं तैस्तैरनूनैर्गुणैः ॥

* * * *

अथासौ सह धर्मिण्या सुतामाप्तुं महागिरिः ।
प्रसिसादयिषुर्देवीमतपद्बहुनेहसम् ॥

* * * *

ततः कतिपयानेहसां महसामवसतिं त्रयीव क्रियां प्राचीव(चीव) मरीचिमत्कलीं प्रतीचीव सन्ध्यां द्वारिव्यवष्टि(!) मन्वीक्ष्य शिवयुक्तिं उपनिषदिव मुक्तिं प्रासूत सुतां त्रिलोकमहितां पतिव्रता गिरीशवनिता ।

* * * *

स चकार सुतां गौरीं नाम पर्वतनायकः ।
तामेव पार्वतीं केचित् केचित्कालीं चचक्षिरे ॥

* *

Colophon:

इति श्रीमदारामद्राविडपिन्नण्टवेङ्कटसूरिविरचिते गौरीपरिणये पूर्वभागस्समाप्तः ॥

वन्दे वृन्दारकाधीशवन्दनीयपदाम्बुजौ ।
परस्परासक्तहृदौ पार्वतीपरमेश्वरौ ॥

अथाधिगतवत्यां यामवत्यामम्बरमणिररुणतरः किमयं प्राज्यभूधरसाम्राज्यप्रतिदयमहीधरमहाराजकिरीटमणिः

* * * *

अथमरुणसारथिरुदयधराधरशिखरमधिरुरोह ।

ततः प्रभाते गिरिशं समागतं गणाश्च देवा ऋषयस्समेत्य ।
प्रणम्य तुष्टाः परिषेदुरादरादपूजयंश्चागमवाग्भिरीशम् ॥

End:

चकार वेधा विधिवत्तदानीं विवाहतन्त्रं विविधागमज्ञः ।
हरिस्तदालोकविधिं प्रचक्रे श्रिया समेतो नितरामभिज्ञः ॥

रेजाते शिवयोर्मूर्ती रत्नपीठे निषेदुषोः ।
तमिस्राघस्रयोर्यद्वद्रत्नपीठे निषण्णयोः ॥
लक्ष्म्याद्याः पुण्ययोषा हरिमुखविबुधा मेरुमुख्या महीध्राः
भृग्वाद्या ब्रह्मनिष्ठा अपि शिरसि तयोरक्षताश्चिक्षिपुस्ते ।
माङ्गल्यैस्स्वस्तिवाद्यैस्सह मणिफलके सुस्थयोरष्टमूर्त्यो-
रन्योन्यापाङ्गवीक्षाशबरमुखरुचो पार्वतीशूलपाण्योः ॥
मदारुणविलोचनामलिकलोलनीलालका-
मुदारगतिचातुरीजितमरालिका कालिकाम् ।
दधार परमेश्वरस्सपदि मारनाराचका-
विदारणपटीयसीमिव महौषधीमात्मनः ॥

R. No. **2256.**

Paper. 18⅜ × 8⅝ inches. Foll. 118. Lines, 24 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of Sarasvatīnilaya Library of Tēkī, Ramachandrapuram taluk, Gōdāvari district.

दुर्गापूजाविधिः.

DURGĀPŪJĀVIDHIḤ.

Similar to the work described under No. 5734 of the D.C.S. MSS., Vol. XII. By Śaṅkarācārya who is apparently a disciple of Aghōrānandanātha. The author proposes to follow Mantramahōdadhi and Jñānārṇava in his treatment of the subject.

Complete.

Beginning:

संहृतसुररिपुबृन्दं पुरतः स्थातुं स्थिता . . बृन्दम् ।
गिरिवरतनयं बालं निशिपतिफालं नमामि शुभलीलम् ॥
यस्याः पदयुगमनिशं सेवितममरैर्विधातृहरिमुख्यैः ।
सा पायादनपायं पतिरसिका गिरिशतनया नः ॥
अघोरानन्दनाथानां पदयुग्मप्रसादतः ।
यथामति समादाय मतं मन्त्रमहोदधेः ॥
रहस्यस्यास्य वाक्यानां तथा ज्ञानार्णवस्य च ।
अतिसङ्क्षेपतो वक्ष्ये दुर्गापूजाविधिक्रमम् ॥

तत्र श्रीमान् साधकेन्द्रो ब्राह्मे मुहूर्ते चोत्थाय ;

समुद्रमेखले देवि पर्वतस्तनमण्डले ।

विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

इति भूमिं प्रार्थ्य, श्वासानुसारेण भूमौ पदं दद्यादिति प्रातरुत्थानविधिः । तत आवश्यकं कृत्वा त्यक्त्वा रात्रीयवाससी, शुद्धवाससी परिधाय, मनसा शुचिर्भूत्वा, मृद्वासन उपविश्य, शिरसि सहस्रदलकमलपीठोपरि निजेष्टगुरुं ध्यायेत् ।

* * * * *

अथेत्थं प्रयोगो निरूप्यते—

अथातो चण्डिकार्चनविधिं व्याख्यास्यामः—शुभेऽह्नि कर्ता सपत्नीको मङ्गलस्नानं विधाय, शुद्धे वाससी परिधाय, विभूतिभूषिताङ्गो नित्यकर्माणि निर्वर्त्य, सूर्याभिमुखो भूत्वा, रक्तचन्दनदूर्वाक्षतमिश्रितमुदकमस्त्रमन्त्रक्षालित-ताम्रपात्रस्थं विधाय, इदं मन्त्रमुदीरयेत् ।

End:

ओं नमो भगवते भास्वते विश्वतेजसे पवित्रकर्मसाक्षिणे विवस्वते प्रकाश-शक्तिसहिताय ह्रां ह्रीं हं सः श्रीमन्मार्ताण्डभैरवायैषोऽर्घ्यः स्वाहा इति पुरः कल्पितवज्रशिलायां तदुदकमुत्सृजेत् ।

यज्ञच्छिद्रं तपच्छिद्रं यच्छिद्रं पूजने मम ।

सर्वं तदच्छिद्रमस्तु भास्करस्य प्रसादतः ॥

ततो यथाविभवं ब्राह्मणसन्तर्पणं कुर्यात् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभगवत्पादशङ्कराचार्यविरचिते श्रीदुर्गापूजाविधिस्समाप्तिमगमत् ॥

ततः स्वकलत्रेण साकं भुक्त्वा यथाकामं विहरेदिति सर्वस्मृतीतिहास-पुराणनिगमागमचोदितसर्वशास्त्रसम्मती श्रीदुर्गापूजाविधिरिति सर्वं समञ्जसम् ॥

अन्तर्यागस्समाप्तः ॥

R. No. **2257**.

Paper. 13¼ × 8½ inches. Foll. 28. Lines, 24 in a page. Telugu. Good.

(*a*) **स्वर्णदीपिका.**

SVARṆADĪPIKĀ.

Foll. 1*a*—7*a*. Foll. 7*a*—12*a* contain Vēmanapadya and Rasavādaviṣayapadya in Telugu language.

Transcribed in 1916-17 from a MS. of Bommakanṭhi Sītārāma Śāstrigāru of Ralli, Razole taluk, Gōdāvari district.

A treatise on alchemy describing the process of converting baser metals into gold or silver. Nīlakaṇṭha is stated to have written some works on this subject.

Incomplete.

Beginning:

प्रणम्य श्रीगणेशाय सर्वविघ्नोपशान्तये ।
तथैव गुरवे तस्मै प्राहेहं (ब्रुवेऽहं) स्वर्णदीपिकाम् ॥
ब्रह्मा हरिहराः प्रोक्ता ऋषयः कश्यपादयः ।
महायोगीश्वरैस्सिद्धैर्बहुभिश्चानुभूतिकाः(भाविताः) ॥
संमतेन श्रुतिस्मृत्या नीलकण्ठेन निर्मिताः ।
सत्यवानुद्धरेत् तासु शुचिमान् निर्जितेन्द्रियः ॥
तन्त्रक्रियासु कुशलो दयालुर्विजितेन्द्रियः ।
न द्वेषणपरः शान्तो निस्स्पृहोऽमृतहस्तकः ॥
ताम्रस्य क्रियते स्वर्णं तथा वङ्गस्य राजतम् ।
स्वर्णरौप्यद्वयं धातु भवति तस्य पाणिना ॥

अथ पारदशुद्धिस्तदुपरि क्रियाकरणम्---

राजकापरिसेनश्च सम्यक् कुप्याद्विमूषके ।
तन्मूषयेस्तु सङ्क्षिप्ता सन्धिर्बन्धेन रोधयेत् ॥
वस्त्रेण डोलायन्त्रे(तु) स्वेदयेत् काञ्जिकैस्त्र्यहम् ।
तदथोद्धृतदीपाग्निः त्रिदिनान्ते समुद्धरेत् ॥

*   *   *   *

इति पारदभस्मे वेधाधिकारे स्वर्णरौप्यादिकरणम् ।

रुदन्त्या रसमादाय सूतादष्टगुणं भवेत् ॥
ताम्रपात्रे विनिक्षिप्य रौप्यदर्व्या विचालयेत् ।
दीपवत्तदधोऽग्निस्तु दिनमेकं तु भस्मयेत् ॥

इति पारदभस्मवेधाधिकारि ।

End:

मूषामध्ये विनिक्षिप्य तद्रसं सहसंयुतम् ।
जारयेद्वालुकायन्त्रे भावितं गन्धकं पुनः ॥

घृते घृते प्रदातव्यं गन्धकं च पुनः पुनः ।
अनेन क्रमयोगेण जायते गन्धपिष्टिका ॥

(b) स्वर्णतन्त्रम्.

SVARṆATANTRAM.

Foll. 12b—14a. Fol. 14b gives the contents of the Svarṇadīpikā and of the Svarṇatantra.

Similar to the work described above.

Contains the Kākarīkalpa, the Aṅgārakalpa and the Śvētabṛhatīkalpa complete

Beginning:

देवेश शृणु यत्नेन काकरीकल्पमुत्तमम् ।
काकरी काकतुम्बी च द्वौ वै पर्यायवाचकौ ॥
पुष्यार्के तत्फलं ग्राह्यं सुपक्कं सुमनोहरम् ।
तत्फलस्य रसेनैव पारदं सुदृढं भवेत् ॥
दिनमात्रं खले देव बद्धो भवति पारदः ।
एवं त्रिंशद्दिनेनैव तद्रसेनैव मेलयेत् ॥

* * * *

एवं तु धातुमात्रे तु तत्फलस्य रसं सुत ।
तत्क्षणाद्वेधतां याति स्वर्णं स्वर्णत्वमाप्नुयात् ॥
रौप्यं रौप्यत्वमाप्नोति शतवेधी भवेत् सुत ।

Colophon:

इति स्वर्णतन्त्रे काकरीकल्पः ॥

End:

तं पारदं भक्षयेद्यस्तन्मूत्रं धातुवेधकृत् ॥
तस्य संभक्षणात् पुत्र सर्वभक्षो भवेद्ध्रुवम् ।
रौप्यमात्रे विनिक्षिप्य रौप्यतां याति निश्चयम् ॥

Colophon:

इति स्वर्णतन्त्रे श्वेतबृहतीकल्पस्समाप्त ॥

(c) बालापूजाविधानम्.

BĀLĀPŪJĀVIDHĀNAM.

Foll. 15a—16a.

Transcribed in 1916-17 from a MS. of Sarasvatīnilaya Library of Tēkī, Ramachandrapuram taluk, Gōdāvari district.

On certain details of procedure connected with the worship of Goddess Bālā.

Complete, but wants the beginning.

Beginning:

. . . . मुखाः क्षेत्राधिपा भैरवाः
योगिन्यो वटुकाश्च यक्षपितरो भूताः पिशाचा ग्रहाः ।
अन्ये भूचरदिक्चराश्च खचरा भेतालकाश्चेटका-
स्तृप्तास्सुः कुलपुत्रकाश्च पिबता पानं सदीपं चरुम् ॥

* * * *

अकारादि क्षकारान्तं पञ्चाशन्मणिसूत्रकम् ॥
मेरुं क्षकारं संस्थाप्य लकारादि विलोमतः ।
वर्णाष्टकविभेदेन शतमष्टोत्तरं जपेत् ॥

* * * *

जगत्क्षोभकरी ह्रां ह्रीं ह्रः द्रां द्रीं क्लीं ब्लूं सः स्सौं क्लीं ऐं कामेश्वरी-समयदेवताश्रीपादुकां तर्पयामि नमः ।

End:

उद्वासनानन्तरं श्रीचक्रस्योत्तरे भागे उच्छिष्टमातङ्गीमन्त्रेण मण्डलं कृत्वा तेनैव मण्डले पूजाः कृत्वा तेनैव मन्त्रेणोच्छिष्टमातङ्ग्यै बलिं निवेदयामीति मातङ्गीबलिं दद्यादिति पूजाविधानम् ॥

The scribe of the original MS. adds—

भैजेवंशाब्धिचन्द्रेण रामचन्द्रेण सूरिणा ।
बालापूजाविधिः सम्यगालेख्यखिलधीमते ॥

(*d*) परमानन्दतन्त्रम्.

PARAMĀNANDATANTRAM.

Foll. 16*a*—28*a*. Fol. 28*b* is left blank.

Same work as that described under No. 5570 of the D.C.S. MSS., Vol. XII, wherein see for the beginning; but wants the preliminary Pūjā in the beginnnig.

Contains Udrēkas 15 to 19 as given below :—

१५. द्वात्रिंशद्दीक्षासंपुटितान्नायक्रमः.
१६. पूर्णदीक्षाक्रमः.
१७. पादुकाभ्यासक्रमः.
१८. चरणोपदेशक्रमः.
१९. पूर्णदीक्षामाहात्म्यकथनम्.

End:

इति ते कथितं देवि संक्षेपेण मयाधुना ।
पूर्णाभिषेकमाहात्म्यं सर्वदेवैः प्रकाशितम् ॥
पूर्णाभिषेकमाहात्म्यं सर्वज्ञोऽप्यहमम्बिके ।
कृत्स्नं न वेद्मि सुश्रोणि मदन्यः को विचक्षणः ॥

Colophon:

इति श्रीपरानन्दतन्त्रे सपादलक्षग्रन्थे मन्त्रखण्डे द्वितीयपादे पूर्णाभिषेकमाहात्म्यकथनं नाम एकोनविंशोद्रेकः ॥

R. No. **2258.**

Paper. $13\frac{1}{4} \times 8\frac{5}{8}$ inches. Foll. 129. Lines, 24 in a page. Grantha Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Eḍavalli Rāmayyāvadhānulu of Madigi, Ramachandrapuram taluk, Gōdāvari district.

Foll. 1*a*—3*a* give the contents of this work. Fol. 3*b* is left blank.

(*a*) स्मृतिसारसंग्रहः.

SMṚTISĀRASAṄGRAHAḤ.

Foll. 4*a*—95*a*. Fol. 95*b* is left blank.

By Paramānandaghanayati. Same work as that described under R. No. 1213(*b*) ante, wherein see for the beginning.

Contains the Ācāra, the Śrāddha and the Āśauca portions only.

End:

नरसिंहहयग्रीवदक्षिणामूर्तिनामकान् ।
सर्वान् देवान् नमस्कृत्य गुरुं चापि स्वकीयकम् ॥
यतिभिः परमानन्दघनेन्द्रैर्लिख्यतेऽधुना ।
आशौचनिर्णयस्सम्यक् सन्देहानां निवृत्तये ॥

पराशरः—

आचतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं प्रसूतिः स्यात् दशाहं सूतकं भवेत् ॥ इति ॥

* * * *

यत्तु यमवचनम्—

अदन्तजाते तनये शिशौ गर्भच्युते तथा ।
सपिण्डानां च सर्वेषामहोरात्रमशौचकम् ॥ इति ॥

* * * *

प्राणाहुतिलक्षणम्—

तर्जनीमध्यमाङ्गुष्ठैः प्राणस्यैवाहुतिर्भवेत् ।
मध्यमानामिकाङ्गुष्ठैरपाने चाहुतिं क्षिपेत् ॥
कनिष्ठानामिकाङ्गुष्ठैर्व्यानाय जुहुयात् बुधः ।
कनिष्ठतर्जन्यङ्गुष्ठैरुदानाय हुनेद् बुधः ॥
सर्वाङ्गुलिभिरादाय समानायाहुतिं दिशेत् ॥

(*b*) सन्ध्यावन्दनभाष्यम्.

SANDHYĀVANDANABHĀṢYAM.

Transcribed in 1916-17 from a MS. of M.R.Ry. Bulusu Pārvatīśvara Sōmayājulu of Vyāghrēśvarapuram, Razole taluk, Gōdāvari district.

Foll. 96*a*—115*b*.

A commentary on the Sandhyāvandanamantras of the Kṛṣṇa Yajurvēda : by Tirumalayajvan, son of Mallayajvan, of Mādhava Sōmayāji family. The commentator says that there are three big commentaries on them written respectively by Śaṅkara, Kṛṣṇapaṇḍita and Śrīdhara, and that his, viz., the commentary under notice, is the easiest.

The date of the original MS. is given thus : Saturday of Phālguna Śukla in Krōdhana.

Complete.

Beginning:

सन्ध्यावन्दनमन्त्राणां वेदभाष्यानुसारतः ।
क्रियते बालबोधार्थं भाष्यं तिरुमलयज्वना ॥

प्राणायाममन्त्रमाह—ओं भूरिति । भूर्लोकाद्यभिमानिन्यो देवताः प्रणवार्थब्रह्मैक्येन स्तूयन्ते । एता देवता मया कृतमाह्निकमनुजानन्तु इत्यत्र वा तात्पर्यम् । उत्तिष्ठन्तु भूतपिशाचाः, एते भूमिभारकाः, एतेषामविरोधेन ब्रह्मकर्म समारभे, भूमिभारकास्सर्वे भूताश्च पिशाचाश्च उत्तिष्ठन्तु सर्वोत्कर्षेण च वर्तन्तु ।

* * * *

Colophon:

इति श्रीमाधवसोमयाजिकुलावतंसमल्लुयज्वतनयेन तिरुमलसर्वतोमुखयाजिना विरचितं सन्ध्यावन्दनमन्त्रभाष्यं संपूर्णम् ॥

यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि ।
तृतीयमुत्तरीयार्थे वस्त्राभावे तदिष्यते ॥

End:

अनन्तरं ब्रह्मणे स्वाहेति ब्रह्माहुतिः। सर्वं ब्रह्ममयमिति ज्ञातव्यम्। सन्ध्यावन्दनस्य शङ्करभाष्यमेकं कृष्णपण्डितीयमेकं श्रीधरीयमेकं त्रीणि महाभाष्याणि सन्तीति ज्ञातव्यम्। तिरुमलयज्वकृतभाष्यं लघुप्रकारम्।

Some stray stanzas are found at the end, like the following:—

मरणं कन्यकायाश्चेद्यावद्वर्षत्रयं भवेत्।
सद्यः शुद्धिस्सपिण्डानां तदूर्ध्वमहरेव तु॥

* * * *

चतुर्विंशो विंशतिश्च षोडशद्वादशस्तथा।
एकादश दशाष्टौ च कुलमेकोत्तरं शतम्॥

(c) आशौचनिर्णयः.

ĀŚAUCANIRṆAYAḤ.

Transcribed in 1916–17 from a MS. of M.R.Ry. D. Rāmacayanulu of Kapilēśvarapuram, Ramachandrapuram taluk, Gōdāvari district.

Foll. 116*a*—128*a*. Foll. 128*b* and 129 are left blank.

Similar to the work described under No. 3028 of the D.C.S. MSS., Vol. V.

Complete.

Beginning:

आदौ नत्वा सूत्रकारमापस्तम्बं महामुनिम्।
विविच्यते यथाशास्त्रमधुनाशौचनिर्णयः॥

द्वे सन्ध्ये सद्य इत्युक्तं त्रिसन्ध्यमहरुच्यते।
अहोरात्रं नैशिथी स्यात् पक्षिणी सद्यहर्निशा॥

त्रिरात्रं रात्रयस्तिस्रो दशरात्रं दशाहकम्।
परिभाषां विदित्वैवं वदेदाशौचनिर्णयम्॥

इति परिभाषानिर्णयः।

सगोत्राशौचनिर्णयः—तत्रादौ शिशुमरणे त्यागादिनिर्णयः—

जाताशौचस्य मध्ये चेत् कन्याबालकयोर्मृतिः।
त्यागस्तयोस्तदूर्ध्वं तु यावद्वर्षत्रयावधि॥

खननं स्यात्तदूर्ध्वं तु दाह एवेति निर्णयः॥

End:

कनिष्ठाङ्गुष्ठयोगेन नाभिस्थानमुपस्पृशेत्।
करमध्यं हृदि स्थाप्य कराग्रं शिरसि न्यसेत्॥

मुकुलेन तु हस्तेन बाहुमूलद्वयं स्पृशेत् ।
एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् ॥

Colophon:

इत्याशौचनिर्णयस्समाप्तिमगमत् ॥

R. No. **2259.**

Paper. 13¼ × 8¾ inches. Foll. 30. Lines, 24 in a page. Telugu. Good

Transcribed in 1916-17 from a paper MS. of M.R.Ry. Yajñanārāyaṇgāru of Sakurru, Gōdāvari district.

गङ्गासहस्रनामस्तोत्रम्, सटीकम्.

GAṄGĀSAHASRANĀMASTŌTRAM WITH COMMENTARY.

A commentary on the Gaṅgāsahasranāmastōtra which is described under No. 9103 of the D.C.S. MSS., Vol. XVII.

Contains stanzas 1 to 24 of the first Śataka, and from the 56th stanza of the third Śataka to the end of the tenth Śataka and breaks off in the Phalaśruti.

Beginning:

(व्या) यथा वा बदरिकाश्रमे श्रीनारायणस्योत । नच ताह साङ्गाभावात् फलाभावः।

अग्निहोत्रादिकर्माणि सापायानि कलौ युगे ।
गङ्गास्नानं हरेर्नाम निरपायमिदं द्वयम् ॥
नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥

इति स्मृतेः, यथाकथञ्चित् कृतस्यापि गङ्गास्नानस्य हरिहरगङ्गादिनामोच्चारणस्य च फलावश्यम्भावात् ।

* * * *

(मू) ओङ्काररूपिण्यजरा तुलानन्तामृतस्रवा ।
अत्युदाराभयाशोकालकनन्दामृतामला ॥

(व्या) तत्रोङ्कारस्याकारोकारमकारात्मकत्वादोङ्काररूपिणीत्यस्याकारादित्वं बोद्धव्यम् । यद्वा ओङ्कारस्य सर्ववर्णात्मकत्वान्माङ्गलिकत्वाच्चादावुपादातुं युक्तमिति तदादित्वम् ।

तदुक्तम्—

ओङ्कारप्रभवा वेदा ओङ्कारप्रभवास्सुराः ।
ओङ्कारप्रभवं सर्वं त्रैलोक्यं सचराचरम् ॥

* * * *

Colophon:

गङ्गानामसाहस्रे(स्मिन्) तृतीये विवृते शते ।
यददृष्टमभूदस्मिन् तद्विश्वेशे समर्पितम् ॥

End:

गङ्गानामसहस्रेऽस्मिन् . . . . . ।
यददृष्टमभूदत्र तद्विश्वेशे समर्पितम् ॥
इति नामसहस्रं हि गङ्गायाः कलशोद्भव ।
कीर्तयित्वा नरः . . . . . गङ्गास्नानफलं लभेत् ॥
सर्वपापप्रशमनं सर्वविघ्नविनाशनम् ।
सर्वस्तोत्रजपाच्छ्रेष्ठं सर्वपावनपावनम् ॥

* * * *

भुञ्ज(ज्य)मानेषु विप्रेषु श्राद्धकाले विशेषतः ।
जपान्निदं महा . . . . पितणां तृप्तिकारकम् ॥
यावन्ति तत्र सिद्धानि यावन्तोऽम्बुकणाः स्थिताः ।
तावन्त्येव हि वर्षाणि मो.

R. No. **2260.**

Paper. 13¼ × 8⅜ inches. Foll. 35. Lines, 24 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. P. Dakṣiṇāmūrti Śāstrulu of Mailavaram, Guntur district.

(*a*) **कङ्कणबन्धरामायणम्.**

KAṄKAṆABANDHARĀMĀYAṆAM.

Foll. 1*a*—26*a*. Foll. 26*b*—28 are left blank.

By Kṛṣṇamūrti. Same work as that described under R. No. 2116 ante.

Complete.

(*b*) **अन्यायपञ्चकम्.**

ANYĀYAPAÑCAKAM.

Fol. 29*a*.

Transcribed in 1916–17 from a MS. of M.R.Ry. Kāśibhaṭla Cenna Kāmēśvara Śāstri of Savaram, Razole taluk, Gōdāvari district.

A collection of five witty stanzas involving short stories of injustice suffered by certain persons.

Complete.

Beginning:

विप्रास्मिन् नगरे महान् कथय कः तालद्रुमाणां गणः
को दाता रजको ददाति वसनं प्रातर्गृहीत्वा निशि ।

को विद्वान् परदारवित्तहरणे सर्वेऽपि विद्वज्जनाः
कस्माज्जीवसि हे सखे विषकृमिन्यायेन जीवाम्यहम् ॥

End:

भित्तिश्चोरं सुरङ्गं विदधतमवधीच्चोरभार्या तदाग-
स्तद्गृहस्ते(स्थे)सभित्ति कलयति स च दम्भोगपण्याङ्गनायाम् ।
सा भू(योषा स्वर्ण) गेहे(कारे) स च कृशतनुतश्चात्मनः स्थूलशूला-
दारोपं नैच्छदुर्वीपतिरपि वणिजं स्थूलकायं न्ययुङ्क्त ॥

(c) चतुःषष्टिस्तवः.

CATUṢṢAṢṬISTAVAḤ

Foll. 29*a*—35*a*. Fol. 35*b* is left blank.

Same work as that described under No. 10746 of the D.C.S. MSS., Vol. XIX.

Complete.

R. No. **2261.**

Paper. 13¼ × 8⅝ inches. Foll. 63. Lines, 24 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Uppalūri Kṛṣṇamūrti Śāstrigāru of Dangēru, Ramachandrapuram taluk, Gōdāvari district.

नृसिंहकारिकावृत्तिः.

NṚSIṀHAKĀRIKĀVṚTTIḤ.

By Nṛsiṁha. Same work as that described under R. No. 2158 ante. This is also called Āpastambaprayōgasārasaṅgraha.

Complete.

R. No. **2262.**

Paper. 13¼ × 8⅜ inches. Foll. 50. Lines, 20 or 24 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Pēri Veṅkaṭaratna Dīkṣitalu of Palagummi, Amalapuram taluk, Gōdāvari district.

(*a*) भवानन्दीयव्याख्या— सर्वोपकारिणी.

BHAVĀNANDĪYAVYĀKHYĀ: SARVŌPAKĀRIṆĪ.

Foll. 1*b*—43*b*. Fol. 1*a* contains the names of the work and of the author and the date of the original MS.

By Mahādēva. Same work as that described under R. Nos. 1023 and 1686 ante.

Contains the Anumāna incomplete.

(*b*) भवानन्दीयटिप्पणी.

BHAVĀNANDĪYAṬIPPAṆĪ.

Foll. 44*a*—50*b*.

A short gloss on Bhavānanda's commentary on the Dīdhiti of Raghunāthaśirōmaṇi.

Contains the Siṁhavyāghrī without beginning and the Vyadhikaraṇadharmāvacchinnābhāva incomplete in the Anumāna.

Beginning:

लक्षणयोरिति। वक्ष्यमाणत्वादि (तिभावः।) समानाधिकरणयोरेव व्याप्त्यङ्गीकारे प्रसिद्धानुमानेऽव्याप्त्यसम्भवादाह—सत्तावानिति।

आहेति। द्वितीय . . . मित्यादि। अविवक्षितं चेति; अत एवेत्यादि। अधिकरण एव यत्पदार्थसम्बन्धस्याकाङ्क्षालभ्यत्वं न साध्य इत्यस्वरसादाह—कश्चिदिति। असामानाधिकरण्यप्रतियोगित्वस्य सामानाधिकरण्य एव सत्त्वेनातिप्रसङ्गादाह—साध्यनिष्ठाभावेति।

End:

पारिभाषिकत्वं च आधुनिकसङ्केतशालित्वम्। स च सङ्केतः शास्त्रकृतामितरेषां च। तत्र सिध्यभावादौ पक्षतादिपदस्याद्यः, चैत्रादौ चैत्रादिपदस्य द्वितीयः, प्रकृते च स्वाभिमतवक्ष्यमाणव्याप्तिस्वरूप अव्यभिचरितत्वपदसङ्केतस्याधुनिकत्वेन पारि.

R. No. **2263.**

Paper. 13¼ × 8⅝ inches. Foll. 34. Lines, 24 in a page. Telugu. Good.

(*a*) वनदुर्गानुष्ठानविधिः.

VANADURGĀNUṢṬHĀNAVIDHIḤ.

Foll. 1*a*—22*a*. Fol. 22*b* is left blank.

Transcribed in 1916–17 from a MS. of Sarasvatīnilaya Library of Tēkī, Gōdāvari district.

Contains details relating to the repetition of the Vanadurgāmantra.

Complete.

Beginning:

गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम्।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये॥
सुरासुरशिरोरत्नमरीचिखचिताङ्घ्रये।
विघ्नान्धकारसूर्याय विघ्नेशाय नमो नमः॥

या देवी मधुकैटभप्रमथिनी या चण्डमुण्डार्थिनी
या माया महिषासुरक्षयकरी या रक्तबीजास्रपा ।
या वै शुम्भनिशुम्भदैत्यदलिनी या सर्वदेवार्चिता
सा पायात् परदेवता भगवती दुर्गापरा देवता ॥

अस्य श्रीवनदुर्गामहाविद्यामन्त्रराजमहामन्त्रस्य अरण्येश्वर ऋषिः, अनुष्टुप् छन्दः, अन्तर्यामिनारायणकिरातरूपधारिणी महाविद्या वनदुर्गेश्वरी देवता, दुं बीजम्, ह्रीं शक्तिः, क्रों कीलकम्, मम श्रीमहाविद्यावनदुर्गाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

ध्यानम्—

अरिशङ्खकृपाणखेटबाणान् सधनुःशूलकपालिकान् दधाना ।
भजतां महिषोत्तमाङ्गसंस्था नवदूर्वासदृशी श्रियेऽस्तु दुर्गा ॥

इति ध्यात्वा, ओं नमो भगवति महाविद्या महादेवीष्टं वशं कुरु कुरु मे देहि, तन्नः शक्तिः प्रचोदयात् ।

End:

उद्यद्भास्वत्समाभां विजितनवजपामिन्दुखण्डावतंसा-
मुद्यन्मौलिं त्रिनेत्रां विविधमणिलसत्कुण्डलां पद्मकान्तिम् ।
हारैर्ग्रैवेयकाञ्चीमणिगणवलयाद्यैर्विचित्राम्बराढ्या-
मम्बां पाशाङ्कुशेष्टामभयवरकरामम्बिकां तां नमामि ॥

Colophon:

इति श्रीवनदुर्गानुष्ठानविधिस्समाप्तः ॥

(*b*) मध्वतन्त्रचपेटिकाव्याख्यानम्.

MADHVATANTRACAPĒṬIKĀVYĀKHYĀNAM.

Foll. 23*a*—34*b*.

Transcribed in 1916-17 from a MS. of M.R.Ry. Bommakanṭhi Sitārāma Śāstri of Ralli, Razole taluk, Gōdāvari district.

A commentary on the Madhvatantracapēṭikā which is a refutation of the Dvaita Vēdānta. Both the commentary and the treatise commented upon are by Rāmakṛṣṇa, son of Tirumalārya of Vēṅkaṭādri family.

Incomplete.

Beginning:

त्रिमूर्तिभिन्नं शिवमद्वयं च श्रुत्यन्तवेद्यं निखिलप्रपञ्चे ।
सृष्ट्यादिहेतुं सततं नमामो विघ्नौघशान्त्यै सफलं शरण्यम् ॥
वेङ्कटाद्रिकुलोत्तंसतिर्मलार्यस्य सूनुना ।
चपेटायाः प्रदीपोऽयं रामकृष्णेन तन्यते ॥

निर्विघ्नपरिसमाप्तिकामः शिष्यशिक्षायै वाग्देवीनमस्काररूपं मङ्गलं ग्रन्थत उपनिबध्नाति—

रसनारङ्गभूमौ मे या नरीनर्त्ति भारती ।
लीलयेदं बरीभर्ति सा चरीकर्तु शं सिवा(सदा) ॥

नृत्यतेर्यङ्लुगन्ताल्लट् । रुग्रिकौ चेत्यभ्यासस्य रीगागमः । यङो वेति विकल्पादीडभावः । बरीभर्ति यङ्लुकि ऋतश्चेति रीक् । जगदिति शेषः ।

रामकृष्णाख्यभद्रोऽहं तातं तिरुमलाभिधम् ।
नत्वा सयुक्तिभिः कुर्वे मध्वतन्त्रचपेटिकाम् ॥

तत्र तावन्नित्यशुद्धबद्धमुक्तानन्दानन्ताद्वयपरब्रह्मतया अथातो ब्रह्मजिज्ञासेत्यादिचतुर्लक्षणीं व्याचिख्यासवः प्रथमसूत्रे

* * * *

ब्रह्मपरत्वं प्रत्यपीति(त्य)वदन्नाचार्या भगवत्पादाः । तैस्सार्धं स्पर्धमानः सिंहगर्जनमसहमानः कूपस्थमण्डूक इव कश्चिदानन्दतीर्थाख्यो मध्वः,

प्रथमो हनुमान्नाम द्वितीयो भीमसेनकः ।
पूर्णप्रज्ञस्तृतीयस्तु भगवत्कार्यसाधकः ॥ इति ।

End:

अतोऽवश्यं षष्ठीतत्पुरुष एवाभ्युपगन्तव्यः । अत एव विष्णोः सम्बेत्येव तदर्थः । "वल्लभो दयितः प्रेयान् विभुश्च रमणो रम" इति धनञ्जयकोशादित्यपि निरस्तम्, वल्लभशब्दश.

R. No. **2264.**

Paper. 13¼ × 8⅜ inches. **Foll.** 30. **Lines,** 24 in a page. **Grantha. Good.**

Transcribed in 1916–17 from a MS. of M.R.Ry. Bommakanṭhi Sītārāma-Śāstrigāru of Ralli, Razole taluk, Gōdāvari district.

अद्वैतनिर्णयः.

ADVAITANIRṆAYAḤ.

A treatise in support of the Advaita Vēdānta : by Acyutamuni. Complete.

Beginning:

प्रणम्य परमेशानं सृष्टिस्थितिविधायकम् ।
उमासहितमानन्दं प्रकुर्वेऽद्वैतनिर्णयम् ॥

अत्रायमद्वैतवादिनो राद्धान्तः—सर्वदृश्यप्रकाशकं स्वप्रकाशमनन्तमानन्दरूपं ज्ञानमेव किञ्चिदुपाधिवशेन जीवेश्वरदेवब्रह्मविष्णुरुद्रादिशब्दशब्दितं नानारूपेण विवर्तं(वृत्तं) सत्(?) मूर्धानमन्यथावभासनयोग्यं न ततोऽन्यत्किञ्चिद्वास्तवमस्तीति । अत्र केचित्—अपटुनिपुणः नाद्वैतमनुभवसरणिमध्यास्ते, प्रत्यक्षादिप्रमाणैरननुभूयमानत्वादित्याहुः ।

End:

केषाञ्चित् बलवत्तरप्रतिबन्धकवतां विचारितमहावाक्यात् ज्ञानं नोत्पन्नमप्यस्मिन् जन्मनि जन्मान्तं(न्तरे) प्रतिबन्धक्षयमनु जानिष्यत्येवेति न साधनत्वव्याघातः । प्रतिबन्धकशून्यास्त्वस्मिन्नेव जन्मनि कृतसाक्षात्कारा आनन्दमनुभवन्तः कृतकृत्या भवन्तीति शिवम् ।

यः स्वात्मवित्तयेऽद्वैतं नास्तिकानां च शिक्षणे ।
स्फोरयामास भगवान् स भूयादघशान्तये ॥
तुष्यतु भगवान् शम्भुः कृपया निर्ण(र्णे)यपूजया नित्यम् ।
अच्युतमुनि(वर)कृतया (सद्)युक्ति(क)जालकुसुमसङ्गतया ॥

Colophon:

इत्यद्वैतनिर्णयः ॥

R. No. **2265.**

Paper. $10\frac{1}{4} \times 9\frac{3}{4}$ inches. Foll. 12. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Mañcirāju Rāmasvāmigāru of Tētagunta, Gōdāvari district.

आत्मबोधव्याख्या.

ĀTMABŌDHAVYĀKHYĀ.

Same work as that described under No. 4558 of the D.C.S. MSS., Vol. IX, but with difference in the beginning and colophon. By Raghunātha Sarasvatī.

Complete.

Beginning:

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादं शङ्करं लोकशङ्करम् ॥

Colophon:

(इति) श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितात्मबोधप्रकरणस्य श्रीरघुकुलतिलकपादपद्मोपजीवितश्रीरघुनाथसरस्वतीयोगिना कृतात्मबोधव्याख्या समाप्ता ॥

R. No. **2266.**

Paper. 13¼ × 8⅜ inches. Foll. 45. Lines, 24 in a page. Grantha. Good

Transcribed in 1916-17 from a MS. of M.R.Ry. Karra Siṁhādri Śāstri of Enukulamahal, Razole taluk, Gōdāvari district.

आख्यातवादटिप्पणी.
ĀKHYĀTAVĀDAṬIPPAṆĪ.

A short commentary on the Ākhyātavāda, which work has been described under No. 3921 of the D.C.S. MSS., Vol. VIII: by Madhurānātha Tarkavāgīśa.

Complete.

Beginning:

किंविषयकत्वप्रकारकप्रवृत्तित्वविशिष्टविशेष्यकप्रश्ने सतीत्यर्थः । किंविषयकत्वं जिज्ञासितविषयकत्वम्, किंशब्दस्य जिज्ञासितवाचकत्वात् । यन्नार्थकत्वं विना आख्यातस्य प्रवृत्तित्वविशिष्टार्थकत्वं विना, अनुपपत्तेरिति । जिज्ञासितस्यानिवर्तकत्वानुपपत्तेरित्यर्थः । यद्रूपविशिष्टे जिज्ञासितस्य यत्सम्बन्धः प्रश्नवाक्येन प्रतीयते तद्रूपविशिष्टे तत्सम्बन्धभानेनैव जिज्ञासानिवृत्तिरिति भावः । तथाचाख्यातं प्रवृत्तित्वावच्छिन्नशक्तं प्रवृत्तित्वविशिष्टजिज्ञासाया निवर्तकस्य ज्ञानस्य जनकत्वादित्यनुमानप्रकारोऽवसेयः ।

End:

इदमुपलक्षणम्, यन्नत्वापेक्षया आश्रयत्वादेर्गुरुत्वादित्यपि बोध्यमिति दिक् ॥

Colophon:

इति श्रीमहामहोपाध्यायमथुरानाथतर्कवागीशभट्टाचार्यकृता आख्यातवादटिप्पणी समाप्ता ॥

R. No. **2267.**

Paper. 13¾ × 8⅛ inches. Foll. 38. Lines, 24 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Jayanti Rāmacandrulu of Manepalli, Razole taluk, Gōdāvari district.

(*a*) गायत्रीन्यासः.

GĀYATRĪNYĀSAḤ.

Foll. 1*a*—5*b*. Fol. 6 is left blank.

Similar to the work described under No. 6196 of the D.C.S. MSS., Vol. XII.

Complete.

Beginning:

पादौ—ओं भूर्नमः । जङ्घे—ओं भुवर्नमः । कट्याम्—ओं सुवर्नमः । नाभौ—ओं महर्नमः । कण्ठे—ओं जनर्नमः । वक्त्रे—ओं तपो नमः । शिरः—ओं सत्यं नमः । [य] इदं(ति) न्यासस्थानानि । ओं आपः हृदयाय नमः । ओं ज्योतिः शिरसे स्वाहा । ओं रसः शिखायै वषट् । ओं अमृतं कवचाय हुम् । ओं ब्रह्म नेत्रत्रयाय वौषट् । ओं भूर्भुवः सुवरों अस्त्राय फट् ।

End:

ओं यात्काराय नमः इति शिरसि न्यसेत् ।

एवं ध्यात्वा तु मेधावी जपहोमं करोति चेत् ।
न भवेत्सूतकं तस्य मृतकं च न विद्यते ॥
साक्षाद्भवेदसौ ब्रह्मा स्वयंभूः परमेश्वरः ।
यस्यैतां च विजानन्ति गायत्रीं च यथामति ।
कथितं सूतकं तस्य मृतकं च समं भवेत् ॥

Colophon:

ओमिदं चम्पकन्यासं संपूर्णम् ॥

(*b*) वसिष्ठकल्पः.

VASIṢṬHAKALPAḤ.

Foll. 7*a*—8*b*.

A treatise on Dharmaśāstra attributed to Vasiṣṭha.

Contains the Adhyāyas nine and ten complete.

Beginning:

चतुःपञ्चघटीमानं मुहूर्तं ब्राह्मसंज्ञकम् ।
पञ्चपञ्चघटीमानमुषःकालमिति स्मृतम् ॥
अष्टपञ्चघटी प्रोक्तं प्रातःकालमिति स्मृतम् ।
एवं ज्ञात्वा प्रभातायां नित्यकर्म समाचरेत् ॥
नित्यनैमित्तिकाम्यादि ह्यकाले कृतनिष्फलम् ।
ब्राह्मे मुहूर्ते चोत्थाय कृत्वा शौचं समाहितः ॥
स्नानं कुर्यादुषःकाले आह्निकं त्वरुणोदये ।
प्रातःकाले जपं कुर्यान्नित्यं नित्यविदो विदुः ॥

* * * *

ओं तत्सदिति श्रीविश्वामित्र(वसिष्ठ)कल्पे स्मृतिनिर्णययोगो नाम नवमोऽध्यायः ।

निशि शेषघटी पञ्च स्नानं कुर्यात्समाहितः ।
सार्धत्रिनाडीमारभ्य सन्ध्यावन्दनमाचरेत् ॥
आसूर्यदर्शनात्तिष्ठेत् त्रिपादजपमुच्चरन् ।
पूर्णबिम्बं समालोक्य उपस्थानं ततो वदेत् ॥

End:

चतुर्वेदमधीतानि षट्छास्त्राणि तथैव च ।
स्नानं सन्ध्या विना येन स वै दुर्ब्राह्मणो विदुः ॥
आदितस्त्रिपदामात्रं युक्तकाले त्रिरुच्चरन् ।
स याति ब्रह्मतेजोऽयं सर्वश्रेष्ठोत्तमोत्तमः ॥

Colophon:

ओं तत्सत्, इति वसिष्ठकल्पे कालनिर्णययोगो नाम दशमोऽध्यायः ॥

(c) विश्वामित्रकल्पः.

VIŚVĀMITRAKALPAḤ.

Foll. 8b—18a. Fol. 18b contains the name of the owner of the MS. from which this was copied.

Same work as that described under No. 359 ante.

Contains one to nine Adhyāyas as given below: —

१. आह्निकविधियोगः.
२. आचमनयोगः.
३. प्राणायामनिरूपणम्.
४. मार्जनविनियोगः.
५. अर्घ्यप्रदानयोगः.
६. आवाहनादिन्यासयोगः.
७. त्रिकालजपयोगः.
८. जपयोगः.
९. शापविमोचनमालिकानिरूपणम्.

(*d*) कामकला, सव्याख्या.

KĀMAKALĀ WITH COMMENTARY.

Foll. 19*a*—38*b*.

By Puṇyānanda. Same work as that described under No. 5577 of the D.C.S. MSS., Vol. XII.

Complete.

R. No. **2268.**

Paper. 13½ × 8½ inches. Foll. 158. Lines, 24 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. T. A. Gōpīnātha Rao Avargal, M.A., Archæological Superintendent, Travancore State

बालरामभरतम्.

BĀLARĀMABHARATAM.

Foll. 1*a*—157*a*. Foll. 157*b*—158 are left blank.

A treatise on music, Tāla and dancing accompanied with gesticulation. It is chiefly based on the Bharatanāṭyaśāstra. The author is Bālarāmakulaśēkhara of Vañci family and king of Travancore. The name of the author's brother is given as Ravivarman and that of his maternal uncle as Mārtāṇḍavarman. Both these persons are stated to have made a gift of their kingdom to God Padmanābha of Trivandrum. Mention is made herein of one of the author's ancestors by name Cēranṛpati who is said to have given money at the behest of Sundarēśasvāmin of Madura. The author is said to be a great devotee of Rāma and to have become a worshipper of Raṅganātha.

Incomplete.

Beginning:

यस्याः स्मरणमात्रेण वाग्विभूतिर्विजृम्भते ।
सा भारती सुखं नित्यं रमतां मन्मुखाम्बुजे ॥
मदजलमण्डितगात्रो मधुकरमालापरिष्कृतो नित्यम् ।
पन्नगभूषणशाली सोन्नतनृत्तो विनायकः पायात् ॥

मङ्गलं मम तनोतु गजास्यो मन्दभावहरणे वरखड्गः ।
पण्डितो मधुरमोदकहस्तो मण्डिताश्रितजनाखिलभाग्यः ॥

* * * *

श्रीमद्भानुसहस्रकोटिसदृशः पीताम्बरालङ्कृतः
चञ्चत्कुण्डलशोभिगण्डयुगलः श्रीवत्सवक्षा हरिः ।
लक्ष्मीभूमिकटाक्षवीक्षणलसच्छृङ्गारभावोज्ज्वलः
पायात् पन्नगराजभोगशयनः श्रीपद्मनाभस्सदा ॥
योगीन्द्रभक्तिपरिशोधनकारणेन पूजान्तरे नटनमातनुतातिहृष्टः ।
यो बालवेषमुपगम्य स पद्मनाभो नृत्तप्रियो जयतु तुङ्गफणीन्द्रशायी ॥
यस्याः शिरोनयनवक्त्रकराङ्घ्रिलीलामालोक्य मोहसहितो भगवान् रसज्ञः ।
श्रीमान् हरिर्जयतु तुङ्गफणीन्द्रशायी सा नाटिका च जयताद्वररङ्गलक्ष्मीः ॥
लास्यतन्त्रमवलोक्य विशालं शास्त्रमारचितमात्मसुखाय ।
बालरामभरतं बुधवर्याः पश्यताद्भुतरसाधिकचित्रम् ॥
सकलनृपतिरम्यं सज्जनैरावृतं यत् सकलविबुधगम्यं पुण्यपूर्णं पुराणम् ।
त्रिदशनगरतुल्यं देवताभिश्च पूर्णं विजयनृपतिलक्ष्म्यासेवितं विश्वसारम् ॥
रिपुजनदुरवापं राजनीतिप्रशस्तं विविधमनुजसङ्घैराश्रितं धर्मरूपम् ।
अगतिकमनुजानामात्मरक्षाकरं तत् जयति हि सततं श्रीवञ्चिराजस्य राज्यम् ॥
श्रीपद्मनाभकरुणारसपात्रभूतो भूपालमौलिमणिरञ्जितपादपद्मः ।
दिक्सुन्दरीनवनवाम्बरकीर्तिशाली श्रीबालरामनृपतिः परिरक्षति क्ष्माम् ॥
श्रीबालरामकुलशेखरवञ्चिभूपः सङ्गीततालभरताम्बुधिपूर्णचन्द्रः ।
आदक्षिणाब्धिहिमभूधरमात्तकीर्तिः विद्याकलाविनयभूः परिरक्षति क्ष्माम् ॥
चेरक्षितीशकुलभूषणदिव्यरत्नं श्रीकेरलक्षितिभृदद्भुतमौलिरत्नम् ।
विद्वद्गणस्य मुखपङ्कजमित्ररत्नं श्रीबालरामकुलशेखरराजरत्नम् ॥
यद्वंशचेरनृपतिर्मधुरापुरीशपत्रार्पणेन कनकं प्रददावसङ्ख्यम् ।
तत्तुन्नवायकुलभक्तजनाय भूयात् स श्रेयसे निखिलराजकुलप्रदीपः ॥
कैलासशैलगमने पथि संस्मृतेन भक्तेन सुन्दरवरेण च चेरभूपः ।
आरुह्य वाहमधिगम्य च शैलमीशे श्रीसुन्दरेण कथितं चरितं चकार ॥
तद्वंशभूषणमणिः स तु वञ्चिभूपः श्रीबालरामकुलशेखरभूमिपालः ।
श्रीपद्मनाभकरुणामवलम्ब्य भूमिमाचन्द्रतारमवतादगदोऽनवद्यः ॥

श्रीरामभक्तिरसपूर्णमनस्स्मृतश्रीरामात्मभावसहितः स गृहीतखड्गः ।
रामायणश्रवणरावणखण्डनेच्छुः सिन्धुं विवेश कुलशेखरभूमिपो यः ॥
तं राघवोऽपि करुणानिधिरेत्य तूर्णं दत्वा करं जलधितीरममुं निनाय ।
दत्वा वरं प्रतिदिनं भुवि रङ्गनाथसंसेवको मम तु भक्तजनेषु मुख्यः ॥
इत्थं हि रामवचनस्तुतदिव्यमूर्तिः यां भूमिमेव परिपालयति स्म पूर्वम् ।
तद्वंशकीर्तिममलां परिपातुकामः श्रीराम एव स कलौ हि कृतावतारः ॥
श्रीरामः स्वयमेव कार्मुकधरो रुद्रोऽस्त्रविद्यापटुः
शूरः शक्तिमतां गदापरिचये साक्षात्कृतो भार्गवः ।
बाहुभ्यां मतिमल्लवैरिकलहे श्रीकृष्ण एव स्वयं
श्रीमद्वञ्चिकुलाधिपो विजयते श्रीबालरामप्रभुः ॥
शृङ्गारः स्वपरिग्रहे रिपुजने कोपो दया याचके
कृत्याकृत्यविवेचनेऽद्भुतगुणो हास्यं नटेऽघे भयम् ।
बीभत्सः परसुन्दरीषु परसन्तापे च दैन्यं निजे
शान्तिर्वञ्चिकुलाधिपस्य सततं संशोभते भूतले ॥
यन्मातुलो रिपुजयं प्रसमेत्य बालमार्ताण्डवर्मकुलशेखरवञ्चिभूपः ।
चक्रे भुवं स्वकरसंस्थमिवातपत्रं तद्भागिनेयकुलशेखरबालरामः ॥
तदनुजरविवर्मा भागिनेयस्वनामा स्वयमपि स तु वञ्चिक्ष्मापतिश्रीकभावाः ।
सकलभुवनभारं पद्मनाभाय दत्वा मनुपतिकुलभूपे स्वामिभृत्यस्वभावाः ॥
श्रीरामवर्मकुलशेखरवञ्चिभूपो विद्वत्प्रियो निखिलसूरिगणेभ्य आर्यः ।
स्वर्णान्नदानमधिकं प्रददाति भूमौ श्रीपद्मनाभपदभक्तिरसैकपूर्णः ॥
श्रीपद्मनाभपुरतस्स हिरण्यगर्भदानं तुलापुरुषकोटिमजस्रदीक्षः ।
विध्युक्तशास्त्रकृतषोडशदानमार्यविद्वद्गणाय भुवि वेदविदे प्रदत्वा (दाय) ।
आचार्यमद्भुतसुवर्णपदार्थदानैस्सम्पूज्य भूरि कनकं भुवि याचकेभ्यः ।
दत्वा किरीटमणिशोभिवरोत्तमाङ्गः पायान्महीमनिशमार्जितपुण्यराशिः ॥

* * * *

नृपकुलतिलकश्रीतालमालाविभूषापरिकलितनिजश्रीकान्तिसम्पूर्णगात्रः ।
रसिकजनसहस्रैः शोभितायां सभायां भरतमिह विधातुं प्रार्थितो वञ्चिराजः ।
अखिलगुणनिधीनामाश्रयो देवराजप्रमुखसकलदिक्पालोपगीतस्वकीर्तिः ।
बहुकविजनसंमानाभिनन्द्यात्ममूर्तिः स जयति चिरजीवो वञ्चिभूदेवराजः ॥

भावो रागश्च तालश्च भारत्या अंशसंभवाः ।
तदानन्दरसोपेता भारती जयतान्मुदा ॥

भारत्या अंशसंभूता भावरागतालाः तेषामानन्दरसैरुपेता संपूर्णा भारती मुदा सन्तोषेण जयतात्। मङ्गलाय भूयादित्यर्थः। अस्मिन् श्लोके भारत्याः प्राधान्यं प्रतिपादितम् । अंशभूतेषु भावरागतालेषु किं प्रधानमित्याकाङ्क्षायाम्,

अत्र नर्तकाः—भाव एव प्रधानम्, भावं विना रागतालयोः मनोवृत्ति-विशेषरसासम्भवात्। ननु मनोवृत्तिविशेषरसासंभवेऽपि नादस्य नित्यत्वात् नादात्मकः श्रुतिरसोऽस्त्येवेति चेत् तत्रापि चैतन्यसम्बन्धोऽस्त्येव ।

* * * *

तदुक्तं शब्दरत्नावल्याम्—

भसंज्ञया चतुर्भावा रागो रेफद्विसङ्ख्यया ।
उभयान्वयकृत्तालः तेति षट्सङ्ख्यान्त्यगः ॥ इति ।

किञ्च—ऊर्ध्वताण्डवे परमेश्वरनटनकाले भगवत्पदताडनोत्थितनूपुरः वेगेनाकाशपर्यन्तं गत्वाऽधोदेशे पतनकाले भगवतः शिरसा भुजमूलजानुभ्यां सन्धार्य तद्वित्तोन्नमिति पतितः ।

* * * *

गौरीशः कमलेश्वरोऽखिलगुरुर्वागीश्वरः षण्मुखः
नन्दी विघ्नविनायकश्च हनुमान् वाचस्पतिः कोहलः ।
देवर्षिः कलशोद्भवश्च भरतः शक्तिर्मतङ्गो भृगुः
ये चान्ये मुनयो वसन्ति भुवने तेभ्यो महद्भ्यो नमः ॥
बाणो रावणकार्तवीर्यनृपतिः कृष्णो बलश्चार्जुनः
भूपालाः सुरनायकाश्च वनिताः कृष्णाप्युषा कन्यका ।
राजा चित्ररथश्च किन्नरपतिर्विद्याधराधीश्वराः
ये चान्ये भरतप्रधानपुरुषास्तेभ्यो महद्भ्यो नमः ॥

इदानीमारप्स्यमानभरतशास्त्रस्य सङ्गतिं दर्शयन्नेव परमेश्वरं प्रस्तौति—

जगद्भरतनाट्यं हि नटयन् परमेश्वरः ।
तद्भावलीलामादाय भरतं कृतवान् पुरा ॥
अनादिभरताचार्यस्स एव गुरुरुत्तमः ।
तत्परम्परया लोके मुनयोऽपि कुतूहलात् ॥
प्रत्येकमेव भरतं चक्रिरे स्वात्मलाभतः ।

मुनीनां मतमालोच्य पुरा राजर्षयो नृपाः ॥
भरतं कृतवन्तो हि स्वात्मानन्दविवृद्धये ।
राजर्षिप्रवरैः प्रोक्तं प्रथितं भरतं भुवि ॥
तत्सारसङ्ग्रहं कृत्वा बालराममहीपतिः ।
लोकानामुपकाराय कृतवान् भरतं मुदा ॥
तदीया भारती विद्या भारतीहृदयं गता ।
सर्वलोकप्रसिद्धा च विद्वज्जनसुसम्मता ॥
नर्तकानां विशेषेण रसानन्दविवर्धिनी ।
सङ्गीततालरासिकभावज्ञप्रियकारिणी ॥
आत्मानन्दकरोल्लासहावभावसमन्विता ।
अष्टादशाङ्गसहिता प्रत्यङ्गरसवर्धिनी ॥
करणस्थानगमनपदकर्मप्रसाधिनी ।
शिरोनेत्रकराङ्घ्रिस्थरसभावक्रियोज्ज्वला ॥
एतादृशगुणैर्युक्ता शोभते जनरञ्जनी ।
बालराममहीपालभारती जयतां मुदा ॥

* * * *

भरतं नाम भावरागतालात्मकम् । इदन्तु वाक्यं स्वरूपकथनपरं नतु लक्षणपरमिति लक्षणमाह—रागसम्बद्धतालाक्रियापरिच्छेद्यभावनानुभवत्वं भरतत्वम् । रागसम्बद्धा या तालक्रिया तत्परिच्छेद्या या भावना तदनुभवत् भरतत्वमिति लक्षणार्थः ।

* * * *

Colophon :

अङ्गभावमवलोक्य सुन्दरं रङ्गमध्यवरवञ्चिभूपतिः ।
अङ्गहाररसिकात्तमाङ्गतस्त्वङ्गनाट्यमधुनान्वचिन्तयत् ॥

End :

आकृष्टसूचीलक्षणमाह—

पुरतः पृष्ठतः पादावाकृष्टौ चेत् पृथक् पृथक् ।
प्रसार्य पुरतः पृष्ठे चाकृष्य च पृथक् पृथक् ॥
आकृष्टसूचिका जानुः कीर्तिता भरतागमे ।

विनियोगः—

वेगेन गमनोद्योगे पृष्ठतश्च प्रसारणे ।
प्रसारितपदाकर्षे पुरतः पृष्ठतोऽपि वा ॥

एवमादिविशे—

बालराममही.

एतेष्वेव हि कार्येषु चाकृष्टं विनियुज्यते।

R. No. **2269.**

Paper. 12 × 9½ inches. Foll. 22. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Pulya Vēṅkaṭa-subbarāyuḍugāru of Ālamūru, Ramachandrapuram taluk, Gōdāvari district.

(*a*) माधवराजीयम्.

MĀDHAVARĀJĪYAM.

Foll. 1*a*—18*b*. Foll. 7*b*, 8 and 12 contain the explanation of some astronomical and astrological technical terms in Telugu.

A treatise dealing with the influence of the nine planets on the fortune of a person as made out from the relative position they occupy in his horoscope.

Contains द्वादशभावफल and नवग्रहदशाफल only.

Beginning:

देहस्थानाधिपा गुरुबुधशुक्रसम्पूर्णचन्द्राः केन्द्रत्रिकोणस्वोच्चशुभांशवर्गोत्तमांशपारिजातकुसुमकुङ्कुमांशयुक्ताश्चेत् तद्दशायां सकलसौभाग्यभोगवाहनादिसत्कीर्तिप्रतिष्ठासिद्धिः। देहस्थानाधिपस्सपापः षष्ठाष्टमव्ययेषु स्थितश्चेत् (न) देहसौख्यं सत्। तत्र नीचयू(मू)ढपराजितपापाक्रान्तपापमध्यमवक्रानुवक्राबिलदंष्ट्राकरालकालदण्डक्रूरकर्मविषयुक्तश्चेत् तद्दशायां राजचोरपीडितदरिद्रदुःखादिमहारोगवस्त्रादिनान(ा)शत्रुपीडितपरिभ्रमणादिसिद्धिः।

* * * *

एतेषां ग्रहाणामुच्चस्वक्षेत्रशुभांशकयुक्तश्चेत् देवगन्धर्वयुक्तश्चेत् सकलदरिद्रनाशनम्॥

Colophon:

व्ययस्थानफलं समाप्तम्॥

End :

शनिः—पाण्डुरोगं जनैश्वर्यं स्थाननाशं श्रियस्तथा ।
कार्यहानिं च कण्डूतिं कुर्याच्छुक्रान्तरे शनिः ॥
बुधः—सुबुद्धिं पुत्रलाभं च रत्नविद्यार्थसम्पदम् ।
पित्तरोगं च मित्रत्वं शुक्रस्यान्तर्गते बुधे ॥
केतुः—कलहो बन्धुभिः ख्यातः शत्रुबाधा बलक्षयः ।
स्त्रीद्वेषी परचिन्ता च केतौ शुक्रान्तरे गते ॥

Colophon :

इति शुक्रदशा समाप्ता ॥

(*b*) रहस्योपनिषद्.

RAHASYŌPANIṢAD.

Foll. 19*a*—22*a*.

Same work as that described under No. 749 of the D.O.S. MSS., Vol. I, Part 3.

Complete.

(*c*) अम्बिकास्तवः.

AMBIKĀSTAVAḤ.

Fol. 22.

Probably by Śaṅkarācārya. A eulogy on the goddess Ambikā or Pārvatī.

Complete.

Beginning :

श्रीगिरीशप्रियां चिन्तितार्थप्रदां रत्नताटङ्किनीं राजबिम्बाननाम् ।
सैरभेन्द्रादिमत्तेभपञ्चाननामापदुत्तारिणीमम्बिकामाश्रये ॥

End :

ब्रह्मशौरीन्द्रमुख्यामरप्राप्तनानायुधाच्छाननां स्रग्विभूषान्विताम् ।
भर्गपत्नीं सुदुर्गामभीष्टप्रदामापदुत्तारिणीमम्बिकामाश्रये ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यविरचितमम्बिकास्तोत्रं सम्पूर्णम् ॥

R. No. **2270.**

Paper. 13¼ × 8⅝ inches. Foll. 14. Lines, 24 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R Ry. Bommakanṭi Śītārāma Śāstrulugāru of Rāli, Razole taluk, Gōdāvari district.

Fol. 14*b* is left blank.

विशिष्टवैशिष्ट्यवादः.

VIŚIṢṬAVAIŚIṢṬYAVĀDAḤ.

Similar to the work described under No. 4282 of the D.C.S. MSS., Vol. VIII, under R. No. 1749(*b*)-ante.

Wants the beginning and a small portion in the end.

Beginning:

धर्मावच्छिन्नविशेष्यतानिरूपितत्वादिति। तत्र शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगसम्बन्धावच्छिन्नवह्निव्याप्यधूमप्रकारत्वाभिन्नकालीनत्वसम्बन्धावच्छिन्नवह्निव्याप्यधूमप्रकारत्वाभावेन निरुक्तधूमपरामर्शकार्यतावच्छेदकत्वाद्व्यभिचारानवकाशादितिवदन्ति। तदतिमन्दम्—तथासति धूमः कालीनत्वसम्बन्धेना वृत्तिरिति अवृत्तित्वग्रहदशायामाचार्यमतेऽनुमित्यपलापापत्तेः सत्त्वात्।

End:

वह्निव्याप्यधूमवत्पर्वतत्वं धर्मितावच्छेदकीकृत्य वह्निव्याप्यधूमप्रकारकपरामर्शस्यावश्यकतया तद्बलात्तदानीं वह्निव्याप्यधूमवत्पर्वतत्वं धर्मितावच्छेदकीकृत्य वह्निविधेयकानुमित्यापत्तिनिर्वाहात्। चिन्तामणिकारमते तु वह्निव्याप्यधूमत्व.

Colophon:

विशिष्टवैशिष्ट्यवादः॥

R. No. **2271.**

Paper. 13⅛ × 8⅝ inches. Foll. 38. Lines, 24 in a page. Dēvanāgari Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Ayyagāri Sītārāmayyagāru of Sākuṟṟu, Amalapuram taluk, Gōdāvari district.

तत्त्वदर्पणम्.

TATTVADARPAṆAM.

Foll. 1*a*—37*a*. Fol. 37*b* contains the name of the owner of the MS. from which this was copied. Fol. 38 is left blank.

A discussion as to the nature of Paramātman in accordance with the Advaita Vēdānta: by Appakavi, son of Sōmanātha Dvivēdin and disciple of Narasiṁhācārya. The author salutes Śiṅgayārya and Narasiṁhārya.

Breaks off in the fourth Paricchēda.

Beginning:

गोपीनाथं कृणद्वेणुं वन्दे भुवनमोहनम् ।
लक्ष्मीविनोदसंभूतपरमानन्दनिर्भरम् ॥
सूक्ष्मार्थवीक्षणे दक्षा यत्कटाक्षसमीक्षिताः ।
ब्रह्माद्या विबुधास्सर्वे तां नमामि सरस्वतीम् ॥
विद्याविभूतिलाभाय तं भजे गणनायकम् ।
ब्रह्माद्या यत्प्रसादेन लभन्तेऽभीष्टसंपदम् ॥
शारदा शारदा यत्र चित्रन्यस्तपदा सदा ।
मुदा नृत्यति तं वन्दे शिङ्गयार्यं परं गुरुम् ॥
तं वन्दे नरसिंहार्यं सर्वविद्याधरं गुरुम् ।
मनो मे ग्रन्थनिर्माणे यतते यत्प्रसादतः ॥
पदवाक्यप्रमाणानां मार्गे मे न प्रवीणता ।
ग्रन्थनिर्माणयत्ने तु साहसं मूलकारणम् ॥

* * * *

अद्वितीयं चिदाकारं वेदान्तार्थं सुखाकृतिम् ।
प्रणम्य श्रीहरिं कुर्वे प्रत्यक्तत्त्वार्थदर्पणम् ॥

ननु किमिदमद्वितीयत्वं श्रीहरेः परमात्मनः । किं सजातीयभेदरहितत्वमुत विजातीयभेदरहितत्वम् । किं वा सजातीयविजातीयभेदरहितत्वम् । आद्येऽपि किं परमात्मान्तरभेदरहितत्वं विवक्षितम् । किं वा आत्मान्तरभेदरहितत्वम् । नाद्यः—परमात्मप्रतीत्यप्रतीतिभ्यां तद्भेदरहितत्वस्य वक्तुमशक्यत्वात् । नेतरः—द्वे ब्रह्मणि वेदितव्ये परं चापरं चेत्यादिश्रुतिव्याकोपात् ।

* * * *

Colophon:

इति श्रीमन्नरसिंहाचार्यपादकमलसंस्मरणविमलीकृतान्तःकरणेन श्रीसोमनाथद्विवेदिसूनुना श्रीमदप्पलि(कवि)सूरिणा विरचिते तत्त्वदर्पणे प्रथमः परिच्छेदः ।

End :

Colophon :

इति श्रीमन्नरसिंहाचार्यपादकमलसंस्मरणाविमलीकृतान्तःकरणेन श्रीसोमनाथद्विवेदिसूनुना श्रीमदप्पकविसूरिणा विरचिते तत्त्वदर्पणे तृतीयः परिच्छेदः ।

ननु ब्रह्मणः कथं सुखरूपत्वम्, तत्र प्रमाणाभावात्, न चानन्दो ब्रह्मेति श्रुतिशतं तत्र प्रमाणम्, आनन्दपदस्य दुःखाभावपरत्वेनाप्युपपत्तेः ।

* * * *

नाद्यः, ज्वालादिव्यवधाने काष्ठादीनां पाकादिकरणत्वोपलम्भात्, न द्वितीयः, अपूर्वव्यवधानेऽपि यागस्य स्वर्गकरणत्वोपलम्भात्, तेन कर्मानुष्ठानाद्धर्मोत्पत्तौ सत्याम्.

R No. **2272.**

Paper. $10\frac{5}{8}\times9\frac{3}{4}$ inches. Foll. 64. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. N. S. Rāmānujācāriyar of Nāvalpakkam, North Arcot district.

(*a*) श्रिय उपायत्वसमर्थनम्.

ŚRIYA UPĀYATVASAMARTHANAM.

Foll. 1*a*—45*b* Fol. 46 is left blank.

Same work as that described under No. 5378 of the D.C.S. MSS., Vol. XI, wherein see for the beginning.

Complete.

End :

राजामात्ययोः शेषशेषिणोरेव सतोः कार्यविशेषे राज्ञः अमात्यप्रेरकत्वं कार्यविशेषे चामात्यस्य राजप्रेरकत्वं क्वचिच्च लीलादौ तुल्यमिति लोकसिद्धत्वेन शेषस्य शेषिणा सह तुल्यतया व्यापारान्वयः शेषित्वाननुगुण इत्ययुक्तमेव । स्रष्टा विष्णुरियं सृष्टिरिति च अर्थो विष्णुरियं वाणीत्यादितुल्यतया अन्यपरवाक्यपरमात्रेणान्यथानयनमनुपपन्नमेव ॥

इति—

वत्सान्वयकुलोद्भूतवरदाचार्यसूनुना ।
बालसारस्वती युक्तिः बालयुक्तिसमीकृता ॥
लिखितं रघुनाथेन तत्पितुः पादसेविना ।
क्षन्तव्यं सर्वदा सद्भिः लेख्यदोषं दयालुभिः ॥ इति ।

नलवर्षे कृष्णपक्षे नवम्यां भृगुवासरे ।
रामावरजदासेन लिख्यते विदुषां मुदे ॥

(b) श्रियश्शरण्यत्वविचारः.

ŚRIYASŚARAṆYATVAVICĀRAḤ.

Foll. 47a—63a. Foll. 63b and 64 are left blank.

An enquiry into the supreme Lordship of Lakṣmī. The author concludes that She is as much the over-lord of the universe as Nārāyaṇa is.

Incomplete.

Beginning:

श्रीमद्द्रयभाष्ये आचार्यैः त्रिविधचेतनेष्वसंभाविनं पतिवत् देव्या अपि स्वाभाविकानवधिकातिशयेशितृत्वरूपं मुख्येश्वरत्वमस्ति, तद्विषये पूर्वपक्षसिद्धान्तविधया ग्रन्थप्रणयनसंरम्भेण स्वाभिमतसिद्धान्तोद्धाटनपूर्वकमनन्यथासिद्धश्रुतिबलेन बहूनां परमाचार्याणामैककण्ठ्यतः अतिप्रबलैः सम्प्रदायैः बह्वीभिरुपपत्तिभिस्सम्यक् साधितम् ।

End:

प्रथमोदाहृतप्रमाणशतेन च तेषां तद्धर्माणां भगवद्धर्मतुल्यत्वप्रतीतेः । अन्यथाऽप्रमेयं हि तत्तेज इत्यादिना भगवद्धर्माणामपि लक्ष्म्यधीनत्वप्रसङ्ग इति ।

R. No. 2273.

Paper. $10\frac{3}{8} \times 8\frac{3}{8}$ inches. Foll. 30. Lines, 20 in a page. Grantha. Good.

(a) शुक्रकेरलम्.

ŚUKRAKĒRALAM.

Foll. 1a—17a. Foll. 17b—18 are left blank.

Transcribed in 1916-17 from a MS. of M.R.Ry. Sāmavēdam Śrīnivāsa Appalācāryulugāru of Gutāla, Polavaram division.

Similar to the work described under R. No. 1981(d) ante.

There is no authority for the name given to this work except what is found as the heading at the beginning of the manuscript.

Contains the Dvādaśabhāvas complete.

Beginning:

देहाधिपस्सपापः षष्ठाष्टमव्ययेषु स्थितश्चेन्न देहसौख्यं भवति । एवमेव सर्वत्र भाववशात् भावेषु योजनीयम् । विलग्ने चन्द्रलग्ने वा पापस्तदधिपः . . . . नश्चेत्तदा व्याधिमान् भवति ।

* * * *

Colophon:

इति केरलसूत्रद्वादशभावफलानि संपूर्णम्(र्णानि) ॥

दशानुरोधेन क्रमाद्वदन्ति मुनीश्वरा जातशुभाशुभानि ।
सारं समुद्धृत्य तमेव वक्ष्ये भेदं यथा दुस्तरता दशानाम् ॥

End:

नक्षत्रैर्भाजितं शेषं ग्रहाणां समयो भवेत् ।
तच्छेषमङ्गहृच्छेषं स्वदशाब्देन वर्धयेत् ॥
अङ्गेन हरितं शेषं चेष्टास्स्युस्सामुदायिकाः ।
एकैकसमयः षट्कमवस्थाः स्युः क्रमाद्विदुः ॥
रव्यादिखेचराणां तु समयः सामुदायिकाः ।
सप्तविंशदवस्थास्स्युर्नेत्राङ्गशशिभृत्ततः ॥

(*b*) तटाकव्रतकल्पः.

TAṬĀKAVRATAKALPAḤ.

Foll. 19*a*—28*b*. Fol. 29*a* contains a table of the work. Foll. 29*b*—30 are left blank.

Deals with the ceremonial details relating to the consecration of wells, tanks, etc.

Complete.

Name of the scribe of the original MS.: Śilai Vēṅkaṭa Śāstri. Date of transcription: Wednesday, the 14th of the Āṣāḍha month in the year Virōdhi.

Beginning:

कदाचिन्नैमिशारण्ये कृष्णं दृष्ट्वा युधिष्ठिरः ।
पप्रच्छ देवं (सर्वज्ञं) सर्वदेवेष्वनुत्तमम् ॥

युधिष्ठिर उवाच—

यस्यानुष्ठानमात्रेण सर्वधर्माः कृता बलाः ।
तद्धर्मं वद कृष्ण त्वं सर्वपापहरं शुभम् ॥
सर्वसिद्धिकरं नृणां भोगमोक्षप्रदायकम् ।

श्रीकृष्ण उवाच—

साधु साधु महाभाग शृणु वक्ष्यामि पार्थिव ॥
इह चामुत्र सुखदं याथातथ्येन सुव्रत ।
वापीकूपतटाकानां स्थापनं परमं शुभम् ॥
देवर्षिगणगन्धर्वपितॄणां च विशेषतः ।
स . . . चैव भूतानां जीवनं तृप्तिदं परम् ॥

उदकस्यालयं नित्यं प्राणिनां प्राणदं परम ।
यः करोति नरो नित्यमुदकस्थानमीदृशम् ॥

* * * *

Colophon:

इति भविष्योत्तरपुराणे तटाकप्रतिष्ठाकल्पं संपूर्णम् ॥

End:

पद्मयोनिश्चतुर्वक्त्रः वेदराशिः पितामहः ।
यः स्रष्टा सर्वलोकानां तस्मै नित्यं नमो नमः ॥

ब्रह्मा सुप्रीतो वरदो भवतु । एवं प्रकारेण बलिदानं कुर्यात् ।

त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ।
ब्रह्मविष्णुशिवैस्साधं रक्षां कुर्वन्तु तानि मे ॥
देवदानवगन्धर्वाः . . . . एव च ।
एते महाध्वरे रक्षां प्रकुर्वन्तु मुदान्विताः ॥

एतेभ्यस्सर्वभूतेभ्यः माषभक्तबलिं ददामीत्युपस्थाय.

R. No. 2274.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 202 Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Kappagantulu Rāmā Śāstri of Cocanada, Gōdāvari district.

कात्यायनप्रयोगसरणिः.

KĀTYĀYANAPRAYŌGASARAṆIḤ.

Foll. 1*a*—201*b*. Fol. 202 is left blank.

A manual of ritualistic procedure to be observed by the followers of Kātyāyana: by Kañcam Yallayasūri. For details regarding the author, vide the work described under R. No. 1263 ante. A stanza at the end gives the date but it is not clear (vide page xxv, Introduction to Vol. II, Part I, of the Triennial Catalogue of Sanskrit Manuscripts).

Contains the Aparaprayōga dealing with the following subjects:—

१. सर्वप्रायाश्चित्तविधिः.
२. दुर्मरणप्रायश्चित्तविधिः.
३. प्रेतसंस्कारोदककर्मनग्नश्राद्धादिविधिः.
४. सञ्चयनविधिः.
५. प्रेतश्राद्धविधिः.
६. सपिण्डीकरणविधिः.
७. एकोद्दिष्टविधिः.
८. पिण्डपितृयज्ञादिविधिः.
९. आपरपक्षिकश्राद्धविधिः.
१०. अभ्युदयग्रहणश्राद्धादिविधिः

Beginning:

कात्यायनमुनिं नत्वा गर्भाधानादिकर्मणाम् ।
प्रयोगसरणिं कृत्वा . . . . ॥
पैतृकं कर्मणा . . . . संस्कुर्यात् ।
औपासनाग्निना तस्य संस्कारं पैतृमेधिकम् ॥
इति स्मरणात् मातापित्रोः क्षयं प्राप्ते के तमरस्व के(?)
असन्निहित . . . पि सन्दधीतानलं द्विजः ॥ इति ।
नित्यौपासनं समाप्य यथोक्तं प्रायश्चित्तं कुर्यात् ।

तत्राह याज्ञवल्क्यः—

प्रायश्चित्तम . . . पापेषु निरता नराः ।
अपश्चात्तापिनः कष्टान्नरकान् यान्ति दारुणान् ॥
तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये ॥ इति ।

* * * *

Colophon:

इति कर्व्वं यल्लयसूरिविरचितायामुत्तरसरण्यां सर्वप्रायश्चित्तविधिः ।

End:

बृहस्पतिः—

गृहे त्रयोदशीश्राद्धं न कुर्वीत(तेह) पुत्रवान् ।
उपवासं च सङ्क्रान्तौ चन्द्रसूर्यग्रहे तथा ॥
पश्चत्वं तस्य जानीयात् ज्येष्ठपुत्रस्य निश्चयः ॥

षट्त्रिंशन्मते—

त्रयोदश्यां तु वै श्राद्धं न कुर्यात् पुत्रवान् गृही ।
नैष्यवे(?) चोपवासश्च
न कैश्चित् क्षन्तुमर्हथ समीक्ष्य सज्जनाः ॥
कर्व्वं यल्लप्रपञ्चे कमलसुतहितारातिसिद्धान्तवेत्ता
वैरं वै . . रिकानरगिरि . . . . . . ।
. . वत्सगोत्रस्सकलनिगमविन्नारनार्यस्य सूनुः
शान्तः सिद्धान्तवेत्ता नरगिरिपतिसद्ध्यानशुद्धान्तरङ्गः ॥
कर्व्वं यल्लार्यविद्वान् रचयति विमलं कण्वशाखाविशिष्टं
पञ्चाङ्गं कोण्डपल्ल्यां खचरचरलसद्वत्सरे वत्सरेऽपि ॥

श्रीवत्सान्वयकश्यपलघरणीदेवोत्तमो धीनिधिः
श्रीकात्यायनगृह्यसूत्रसरणीमादौ मुदा निर्ममे ।
शास्त्रं ज्यौतिषदर्पणाख्यममलं बालप्रबोधाह्वयं
तद्दैवज्ञविलासमित्यभिनवग्रन्थत्रयं चाकरोत् ॥

R. No. **2275.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 175. Lines, 20 in a page. **Grantha.** Good.

Transcribed in 1916–17 from a MS. procured by M.R.Ry. S. Rājagōpāla Tātācārya of Conjeeveram.

सात्वततन्त्रभाष्यम्.

SĀTVATATANTRABHĀṢYAM.

Foll. 1*b*—175*b*. Fol. 1*a* contains a portion of the work.

A commentary on the Sātvatasaṁhitā of the Pāñcarātrāgama which is said to have been revealed at first by Vāsudēva to Saṅkarṣaṇa from whom the sage Nārada is said to have heard it: by Alaśiṅgabhaṭṭa, son of Yōgānandabhaṭṭa of Mauñjyāyaṇa family and the worshipper of God in the temple at Mēlkōṭa.

Complete.

Beginning:

श्रीमद्यादवशैलाग्रशेखरं सद्गुणाकरम् ।
योगानन्दनृसिंहाख्यदैवतं पर्युपास्महे ॥
श्रीमान् नारायणोऽव्याद्यदुगिरिनिलयो यः परं दिव्यरूपं
सौषुप्तस्वप्नजाग्रत्पदाभिदुरमिदं चातुरात्म्यं च रूपम् ।
रूपं वैशाखयूपं विविधमपि तथा वैभवं चापि विभ्र-
द्देवीभूषायुधाढ्यो विहगपतिरथः पाति लोकान् समस्तान् ॥
विश्वस्य भजतां नित्यं नश्वरेतरभोगदः ।
शश्वत्सर्वार्थदो भूयात विश्वत्राता नृकेसरी ॥
प्रणम्य शिरसाचार्यान् प्रतिष्ठापितसात्वतान् ।
तदादिष्टेन मार्गेण सात्वतार्थः प्रकाश्यते ॥

अत्र तावद्भगवान् भगवच्छास्त्रविशारदो नारदो महामुनिः साक्षाद्वासुदेवेन सङ्कर्षणायोपदिष्टं स्वेन सङ्कर्षणाल्लब्धरहस्याम्नायसंज्ञितैकायनश्रुतेस्सूत्ररूपं भगवत्प्राप्त्येकोपायभूताभिगमनोपादानेज्यास्वाध्याययोगरूपकर्मविचारैः परव्यूहवि-

भवरूपब्रह्मविचारैश्च गर्भितं पञ्चविंशतिलक्षणं सात्वतं तन्त्रमुपदेक्ष्यन्नादौ तदवतारक्रमं दर्शयति--विष्णोरिति। अत्रादौ विष्णुशब्दप्रयोगेण चिकीर्षितग्रन्थनिर्विघ्नपरिसमाप्तिसाधकं निरवधिकमङ्गलं कृतं भवति। सिद्धगन्धर्वविद्याधरनिषेविते। देवतानामपि सेव्यत्वादतिपरिशुद्ध इत्यर्थः।

End:

पुरस्कृत्येति। इदं शास्त्रं सर्वानुग्रहार्थं भगवता वासुदेवेन सङ्कर्षणायोपदिष्टं मया भगवत्प्रसादाल्लब्धं भवताप्यग्र यथावत्प्रकाशितं तदिदमास्तिकेभ्यः प्रकाशनीयं नास्तिकेभ्यो गोपनीयम्। तथा प्रकाशगोपने यः करोति स तु ममापि मान्यो भवति। भवतामैहिकामुष्मिकरूपं निरवधिकं स्वस्त्यस्तु। अहं व्रजामीति भगवान् नारदो मुनीन् प्रत्युपदिष्टवान्॥

Colophon:

इति श्रीमौङ्ग्यायनकुलतिलकस्य यदुगिरीशचरणकमलार्चकस्य योगानन्दभट्टाचार्यस्य तनयेन अलशिङ्गभट्टेन विरचिते सात्वततन्त्रभाष्ये पञ्चविंश[ति]ः परिच्छेदः॥

श्रीसात्वततन्त्रभाष्यं संपूर्णम्॥

R. No. 2276.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 176. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Kappagantulu Rāmā Śāstri of Cocanada, Gōdāvari district.

स्मृतिसारः.

SMṚTISĀRAḤ.

A treatise in Dharmaśāstra containing extracts from different authoritative Smṛtis.

Name of the scribe of the original MS.: Balamrāvu Visvappurāja. Date of copying: Friday, the 15th day of the bright fortnight of the Bhādrapada month in the year Bhava.

Wants the beginning and the end.

Beginning:

रात्रिं त्रिभागं कुर्वीत द्वौ भागौ पूर्ववासरे।
शेषं परदिनं प्राहुः स्थालीपाक क्रतौ मृते॥

मनुः—

दन्तजातेऽनुजाते च कृतचूडे च संस्थिते ।
अशुद्धा बान्धवास्सर्वे सूतके च तथा मृते ॥

* * * *

संवर्तः—

चतुर्थेऽहनि कर्तव्यमस्थिसञ्चयनं बुधैः ।
ततस्सञ्चयनादूर्ध्वमङ्गस्पर्शो न दुष्यति ।'

मार्कण्डेयपुराणे—

प्रथमेऽह्नि चतुर्थेऽह्नि सप्तमे दशमे तथा ।
अस्थिसञ्चयनं कार्यं चतुर्थेऽहनि पुत्रकैः ॥
ऊर्ध्वं सञ्चयनात्तेषामङ्गस्पर्शो विधीयते ।

* * * *

यस्मिन् मासि मृताहः स्यात्तन्मासं पक्षमेव वा ।
क्षौरकर्म न कुर्वीत परान्नं च रतिं चरेत् ॥

इति माध्यन्दिनकृतपशाखिनामयं धर्मः न तु शाखान्तराणाम् ।

इत्याब्दिकात् पूर्वदिनकृतक्षौराभ्यञ्जनविधिः ।

End:

शङ्खः—

श्राद्धे नियुक्तान् भुञ्जानान् न पृच्छेल्लवणादिषु ।
उच्छिष्टं पितरो यान्ति पृच्छतो नात्र संशयः ॥
दातुः पतितबाहुश्च जिह्वा भोक्तुस्तु भिद्यते ।

वृद्धयाज्ञवल्क्यः—

विकिरं तु विधातव्यमुच्छिष्टेभ्यः षडङ्गुलम् ।
उच्छिष्टस्योत्तरे भागे पिण्डान् दद्यात् षडङ्गुलम् ॥

R. No. **2277.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 146. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of Śrīmanavālen Cakravarti Śiṅgarācāryulu Ayyāvayyaṅgārlu of Mōtūru, Gudivada taluk, Kistna district.

भागवतव्याख्यानम्.

BHĀGAVATAVYĀKHYĀNAM.

A commentary probably under the name 'Anvaya' on the Bhāgavata.

Contains the fourth Skandha only complete.

Beginning:

मैत्रेयः—मनोरिति । मनोस्तु स्वायम्भुवात् शतरूपायामेतन्नामकभार्याया-माकूतिः देवहूतिश्च प्रसूतिरिति विश्रुताः विख्यातास्तिस्रः कन्याः प्रजज्ञिरे उत्पन्नाः । आकूतिमिति । नृपः मनुः भ्रातृमतीमप्याकूतिं शतरूपानुमोदितस्सन् पुत्रिकाधर्म-माश्रित्य रुचये प्रादात् । पुत्रवानपि पुत्रिकापुत्रं गृह्णामीति नियमं कृत्वा ददौ । अस्मिन्नर्थे पुत्रवतीं भार्यां समाधत्त इति भावः ।

End:

य इति । हे राजन् परिक्षित् हर्यर्पितात्मनां भगवति निक्षिप्तचित्तानां राज्ञामिदं चरित्रं यः शृणुयात् स आयुर्धनं यशः स्वस्ति ऐश्वर्यं भगवत्संब-न्धिनीं गतिं सायुज्यमित्यर्थः । आप्नुयात ॥

Colophon:

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धान्वये एक-त्रिंशोऽध्यायः ॥

भागवतचतुर्थस्कन्धव्याख्या सम्पूर्णा ॥

R. No. 2278.

Paper. 10⅜ × 9¾ inches. Foll. 16. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Chandranārāyaṇa Bhaṭṭācārya of Mandapēṭa, Gōdāvari district.

Fol. 16 is left blank.

पौषवादः, टिप्पणीसहितः.

PAUṢAVĀDAH WITH NOTES.

A discussion by Dēvabhadraśarman as to the significance of the term पौष (name of a month) based upon the opinion expressed by Gadādhara in the Taddhitaprakaraṇa of the Vyutpattivāda The author salutes Advaitānanda who was probably his teacher.

Complete.

Beginning:

ब्रह्मविदद्वैतानन्दसरस्वत्याख्ययतिमहेशा(ना)न् ।

सूरिसमर्चितपादान् नौति गुरून् देवभद्रशर्मासौ ॥

व्युत्पत्तिवादे तद्धितप्रकरणे पौषादिमासविचारे शूलपाणिमते पौषादिमासानां लक्षणद्वयं प्रदर्शितम्। तत्र लाघवगुणशालिप्रथमलक्षणेनैव व्यवहारादिसिद्धिसंभवे गौरवादिदोषाविष्टद्वितीयलक्षणकरणस्य किं प्रयोजनं कोऽसौ तत्र वाक्यार्थ इति जिज्ञासायां तदाशयप्रकटनपूर्वकं द्वितीयलक्षणं व्याख्यायते। तथाहि— अमान्तपौषादयो मासाः प्रायो धनुरादिस्थरव्यारब्धा एव भवन्ति।

अथ टिप्पणी—

मेषादिस्थे सवितरि यो मासः प्रपूर्यते चन्द्रः।
चैत्रादिस्स ज्ञेयः पूर्तिद्वित्वेऽधिमासोऽन्त्यः॥

इति माधवोदाहृतज्योतिश्शास्त्रात्पौषादीनां धनुरादिस्थरव्यारब्धत्वं द्रष्टव्यम्। प्रपूर्यत इत्यस्य हि प्रपूर्यत एव समाप्यत एव न त्वारभ्यत इति व्याख्यानात्।

End:

यदि पुनर्दृष्टान्ते सत्यप्यौपचारिकत्वे दार्ष्टान्तिके तन्न युज्यते, मुख्यताया एव तत्रेष्यमाणत्वात् इति दुरागृह्यते, तदा तु राश्यन्तरस्थरव्यधिकरणसमयाव्यवहितधनुरादिस्थरव्यधिकरणपरस्परविजातीयपक्षद्वयात्मकपूर्णिमान्तसमुदायत्वमित्येवं लक्षणं द्रष्टव्यमिति कृतमतिविस्तरेणेति दिक्॥

पौषादेर्लक्षणमिदं यथामति विवेचितम्।
प्रीयन्तां तेन विद्वांसः सन्तुष्यात्स महेश्वरः॥

Colophon:

इति पौषवादः समाप्तः॥

R. No. **2279.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 783. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Pīri Veṅkaṭaratnam Dīkṣitulugāru of Pālagumi, Amalapuram taluk, Gōdāvari district.

Bound in four volumes.

Fol. 383*a* gives the contents of the second volume. Fol. 383*b* is left blank

सिद्धान्तसिद्धाञ्जनव्याख्या— रत्नतूलिका.

SIDDHĀNTASIDDHĀÑJANAVYĀYHYĀ—RATNATŪLIKĀ.

A commentary on Kṛṣṇānandayati's Siddhāntasiddhāñjana, which work has been described under No. 4771 of the D.C.S. MSS., Vol. IX:

by Bhāskaradīkṣita, disciple of Vijayarāghava Śāstrin and son of Veṅkaṭapati of Hārītagōtra and an inhabitant of Pallakacērī (South Arcot district).

Contains the first two Paricchēdas, the last being incomplete.

Beginning:

यत्सद्बोधसुखैकरूपमखिलं विश्वात्मना भासते
सृष्टिस्थेमलयैर्विरिञ्चिमुरभिद्रुद्रादिसंज्ञान्वितम् ।
प्रत्यग्रूपतया च यद्व्यवसितं वेदान्तवाक्यैर्महः-
ज्ज्योतिस्तत्समुपास्महे गणपतिं देव्या समालिङ्गितम् ॥
यस्याः कटाक्षलेशेन मूकस्यापि प्रगल्भता ।
जायते सर्वशास्त्रेषु भारतीं तां नमाम्यहम् ॥
कर्पूरगौरवपुषं कलितेन्दुमौलिं कान्ताजनेन कबलीकृतवामभागम् ।
कन्दर्पदर्पमथने कृतलीलमाद्यं कारुण्यवारिधिमहं कलयामि चित्ते ॥
यद्दीक्षाविषयं विनैव(नेय)निवहं प्रीत्या भजन्ते स्वयं
लक्ष्मीकीर्तिसरस्वतीधृतिदयाह्रीशान्तिदान्त्यादयः ।
कृष्णानन्दसरस्वतीशगु श्रिं(रुराट् चि)त्ते मदीये शुभे
नित्यं सन्निहितोऽस्त्वसौ मम गुरुर्ध्वान्तापनुत्त्यै विभुः ॥
यदुपदेशवशान्मम शेमुषी गहनमर्थमपि स्फुटयत्यसौ ।
विजयराघवशास्त्रिणमाश्रये गुरुमहं तमशेषगुणाकरम् ॥
ग्रामे पल्लकचेरिनाम्नि महिते विद्वज्जनालङ्कृते
यज्वा याजयिता च वेङ्कटपतिर्नाम्ना शिवे भक्तिमान् ।
अस्ति श्रीहरितान्वये समुदितः श्रुत्यर्थनिर्णायकः
सूत्रेषु त्रिषु कल्पसंज्ञिषु पटुः स्मृत्यर्थविज्ञाग्रणीः ॥
तत्सूनुर्विवृणोत्येष सिद्धाञ्जनकृतिं गुरोः ।
सर्वतोमुखयागस्य कर्ता भास्करदीक्षितः ॥

इह खलु तावत् पथित्रयगतागतपरिखिन्नां भवाब्धिनिमग्नां जगतीमुद्दिधीर्षुर्भगवान् परमेश्वरः ।

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥

इति स्वप्रतिज्ञातार्थपरिपालनाय श्रीकृष्णानन्दसरस्वतीगुरुरूपेणोर्व्यामवतीर्णो कथूपायेन चित्तकल्मषानवृत्तिद्वारेणाविद्यापिहितं प्रत्यगेकरसं परमात्मानं निर्वि

दर्शयानीति सिद्धान्तसिद्धाञ्जनं निबन्धं चिकीर्षुस्तस्याविघ्नपरिसमाप्तये प्रचयगमनाय च शिष्टाचारप्रवर्तनाय च तत्परिशीलिनामप्रत्यूहनिःश्रेयसलम्भनाय च दधिदूर्वादिदर्शनेतरदेवतार्चनमस्यादिमध्यममङ्गलेषु सत्स्वपि 'पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्' इति सर्वमङ्गलानामपि मङ्गलत्वापादकपरमात्मानुसन्धानरूपं मङ्गलं मनसाचरितं, यस्माद्धर्मानाचिनोति स आचार्यः ।

आचिनोति हि शास्त्रार्थमाचारे स्थापयत्यपि ।
स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते ॥

इति स्मृतेराचार्यस्य सर्वाचारशिक्षकतया शिष्यशिक्षायै ग्रन्थतो निबध्नाति— जगज्जन्मेति । प्रथमं जन्मादिसूत्रेण यत्कारणरूपमुक्तं तदुपलक्षितं स्मरति । जगतो ये जन्मस्थेमाप्ययाः । स्थिरशब्दस्य पृथ्वादिपाठाद्भावार्थेमनिचि प्रियस्थिरेत्यादिना तस्य स्थादेशे स्थेमशब्दः स्थितिपरः । अप्ययशब्दो लयार्थः । तथा च जगज्जन्मस्थितिलयानां ये नियमाः सन्मूलत्वसदायतनत्वसत्प्रतिष्ठत्वादि तेषां सीमा मर्यादा । एतदुक्तं भवति—नैयायिकादेरिव प्रागसतो नोत्पत्तिः ।

* * * *

Colophon:

इति भास्करदीक्षितकृतायां रत्नतूलिकाख्यायामद्वैतसिद्धान्तसिद्धाञ्जनव्याख्यायां प्रथमः परिच्छेदः ॥

End:

एतेन रज्जुमात्रतादात्म्यज्ञानमूलकभूविदलनादिभ्रमेण तत्समानविषयकाज्ञानमूलकसर्पादिभ्रमबाधो व्याख्यात इति भावः । . . . . .
रजतभ्रमादावुक्तं बाध्य . . . .
तादात्म्यभ्रमोऽपि योजयति ।

R. No. 2280.

Paper. 10⅞ × 9¼ inches. Foll. 14. Lines. 20 in a page. Dēvanāgarī. Good.

(*a*) **एकाक्षररत्नमाला.**
ĒKĀKṢARARATNAMĀLĀ.

Foll. 1*a*—8*a*.

Transcribed in 1916-17 from a MS. of M.R.Ry. Cebrōl Rāmasiddhāntigāru of Vallūru, Cocanada taluk, Gōdāvari district.

A dictionary giving the various meanings of each of the letters of the alphabet (including conjunct consonants): by Mādhava, son of Māyaṇa of Bhāradvājagōtra and minister of king Harihara.

Contains the Svara, Vyañjana, and Saṁyukta Kāṇḍas complete.

Beginning :

सुधाभूताभिधानाब्धिं साकं सुमनसां गणैः ।
मतिमन्दरमन्थेन निर्मथ्यातीव कौशलात् ॥
भारद्वाजकुलोत्तंसो माधवो मायणात्मजः ।
एकाक्षरपदश्रेणिरत्नमालां करोम्यहम् ॥
यत्रैकवारं द्विस्त्रिर्वाप्येकमावृत्तमक्षरम् ।
तत्पदं लिङ्गभेदेन वदामि सुजनादृतम् ॥
वेदे विष्णुमहेशानकमठेष्वम्बिकेज्ययोः ।
अन्तःपुरे भूषणे च चरणे कारणे रणे ॥
अकारः कथितो देवैराजिरे गौरवे तथा ।
आकारस्सर्वगे भावे परितापे विधौ घटे ॥

End :

क्ष्माशब्दः कथ्यते प्राज्ञैः स्त्रीलिङ्गे भाविवाचकः ।
अनुसम्बोधने धीरैर्जिह्वामूलीय उच्यते ॥
वाशान्तावपि शक्तौ च उपध्मानीय उच्यते ।
एतेन पवमानं च वैभवेन पुरन्दरम् ॥
यस्त्यागेन सुरद्रुमं रघुपतिं सत्येन धर्मात्मजं
धर्मेणानुकरोत्यसौ हरिहरो नाम क्ष्मावल्लभः ।
तत्साम्राज्यधुरन्धरो गुणनिधिः श्रीमायणार्यात्मजो
मन्त्री माधवको निघण्टुमकरोन्नानार्थमेकाक्षरम् ॥

Colophon :

इति श्रीहरिहरराजामात्यमाधवस्य कृतौ एकाक्षररत्नमालायां संयुक्तकाण्डस्समाप्तः ॥

(*b*) लिङ्गानुशासनवृत्तिः—लिङ्गनिर्णयभूषणम्.

LIṄGĀNUŚĀSANAVṚTTIḤ : LIṄGANIRṆAYABHŪṢAṆAM.

Foll. 8*a*—13*b*. Fol. 14*a* contains the name of the owner of the MS. from which this was copied. Fol. 14*b* is left blank.

Same work as that described under No. 1500 of the D.C.S. MSS., Vol. III.

Complete.

R. No. **2281.**

Paper. $10\frac{3}{8} \times 9\frac{1}{4}$ inches. Foll. 42. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. P. Nārāyaṇācāri of Sākurru, Gōdāvari district.

पाञ्चालीपरिणयनम्.

PĀÑCĀLĪPARIṆAYANAM.

A drama in five Acts having for its plot the marriage of Draupadī with the Pāṇḍavas and the events that led up to it: by Balasūrin, son of Sītāmbā and a resident of the Cōla country. The drama is said to have been staged on the occasion of the vernal festival of God Raṅganātha of Srirangam at the instance of King Rājaśēkhara. The author is said to have belonged to the Addaṅki family.

Complete.

Beginning:

सौल्लासं परिपन्थिनः पटुशरासारैस्समुत्सारयन्
सम्प्राप्तानभितस्स्वयंवरकृते चेदीशमुख्यान् बहून् ।
प्रोन्मीलत्पुलकच्छलेन दधतीं निर्मग्नकामाशुगान्
श्रीमद्भीमसुतां सकौतुकमना गृह्णन् हरिः पातु नः ॥

किञ्च—

कल्याणं विदधातु गोपरमणीवक्षोजकुम्भद्वयी-
शुम्भत्कुङ्कुमपङ्कमुद्रितलसद्वक्षास्सपक्षावनः ।
दृप्तक्षत्रियवंशपांसनपरिक्षुण्णक्षमामण्डली-
भारोत्तारकृतावतारगरिमा श्रीमान् पुराणः पुमान् ॥

अपि च—

योजयति शुभैः परमैर्निजाश्रितान्यो दयामयस्सततम् ।
स जगति पुरातनपुमानघटितघटनापटुर्जयति ॥

नान्द्यन्ते सूत्रधारः—

आदिष्टोऽस्मि सकलदिग्विसरदुरुतरविक्रमविजितविविधरिपुनिकराञ्जलिपद्म-
मुकुलीकरणकुमुदबान्धवेन

श्रीमता महीवलयाखण्डलेन राजशेखरेण —यथास्मिन् वसन्तोत्सवे नानादिगन्ताच्छ्रीरङ्गभूमिमागता परिषत् केनचिदपूर्वरूपकेणोपस्थातव्येति ।

* * * *

सूत्रधारः—आर्ये विदितमेव भवत्या । यथा—

अस्ति स्फारप्रतापज्वलदनलशिखोल्लीढशत्रुक्ष्माभृ-
त्सैन्यारण्यो दिगालीतटकषणपटुः स्फीतकीर्तिप्रतापः ।
श्रीमान् राजाधिराजः कुटिलनृपशतानल्पकल्पाम्बुराशौ
निर्मग्नायां पृथिव्यामचरमकिटिना भाति वीरेण . . ॥ इति ।

तेन च सन्दिष्टं राजशेखरेण—

श्रीकान्ताकुचवासिनो भगवतः श्रीरङ्गधामेशितुः
देवस्याखिललोकनन्दनकरे प्राप्ते वसन्तोत्सवे ।
आयाता परिषन्मनोहरपदस्फूर्जद्रसप्रौढिम-
स्फीतं नूतनरूपकं सकुतुकं द्रष्टुं समुत्कण्ठते ॥

तत्सरसतरपदबन्धबन्धुरं प्रयुज्यतां रूपकमिति ।

नटी—कदमं उण तारिसं रूवअं । (छा) कतमं पुनस्तादृशं रूपकम् ।

सू—यच्चोलदेशवास्तव्येन वाग्देवताविलासैकसदनेन श्रीमता बालसूरिणा विरचितमतिमधुरपदरचनमभिनवरूपकं पाञ्चालीपरिणयनं नाम नाटकम् ।

* * * *

अये त्वद्गीतगीतिमिमामुपश्रुतिं मन्यमानो धृष्टद्युम्नस्सचित्रकेतुरित एवाभिवर्तते । तदावामप्यनन्तरकरणीयाय सज्जीभवाव इति निष्क्रान्तौ ।

End:

तथापीदमस्तु भरतवाक्यम्—

काले वृष्टिं विधत्ताममरपरिबृढः पालयन्तां नृपाला
धर्मैकायत्तचित्ताः क्षितिममितसुखं प्राप्नुवन्तु द्विजाश्च ।
विख्याता बालसूरेः कृतिरियममला श्रीमदङ्क्विवंश-
क्षीरोदन्वत्सुधांशोर्जगति विजयतामाकलानाथतारम् ॥

इति निष्क्रान्तास्सर्वे । इति पञ्चमोऽङ्कः ॥

Colophon:

श्रीसीताम्बागर्भरत्नायमानस्य श्रीमद्बालसूरेः कृतिः पाञ्चालीपरिणयनं नाम नाटकं संपूर्णम् ॥

R. No. **2282.**

Paper. $10\frac{1}{4} \times 9\frac{5}{8}$ inches. Foll. 44. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Mallampalli Mallikārjuna Śāstrigāru of Englishpet, Masulipatam.

Foll. 43*b*—44*a* give the contents of this work. Fol. 44*b* is left blank.

शिवलिङ्गसूर्योदयः.

ŚIVALIṄGASŪRYŌDAYAḤ.

A highly metaphorical drama of the nature of Prabōdhacandrōdaya and Saṅkalpasūryōdaya: by Mallanārādhya, son of Śarabhanārādhya of Cāgaṇṭa family. The drama is intended to establish the superiority of Śaivism (known as Vīraśaiva religion) and was composed for the delectation of Basalēśvara, son of Gurvāmbā and Mallikārjuna of Kandukūri family.

Complete.

Beginning:

श्रीमत्पर्वतपट्टसाग्रविलसत्सौवर्णसौधस्थली-
नानारत्नविचित्रकान्तिरचितप्रोत्तुङ्गवेद्यन्तरे ।
ब्रह्मोपेन्द्रहराख्यपर्वतातियुक्सिंहासने सुस्थितं
वीरेशं विपदन्धकारमिहिरं पश्येयमन्तर्दृशा ॥

अपिच—

यत्पाणिः शिष्यमन्तः स्थितपरमकलां शाम्भवीं भावगम्यां
कृत्वा तद्भावलिङ्गं तदपि च मनसायोज्य वन्दे सुमाक्षि ।
लिङ्गं तत् सूक्ष्मरूपं तदपि च नयनद्वारतश्रेष्टलिङ्गं
चक्रे तं देवदेवं गुरुवरमनिशं नौमि सर्वार्थसिद्ध्यै ॥

नान्द्यन्ते सूत्रधारः— आदिष्टोऽस्मि श्रीमच्चतुरर्णवमेखलाचलाचलेशकूटकोटीरकोटिनूत्नानूनपद्मरागरञ्जितचरणारविन्देन, प्रतिपक्षदक्षशिक्षणवीरभद्रेण, गुरुजङ्गमतरुणारुणकिरणावरणदरदलदरविन्दसुन्दरचरणद्वन्द्वास्वादनन्दितेन्दिरायमाणीनजान्तरान्तरङ्गेण, कन्दुकूरिकुलदुग्धपयोधिराकासुधाकरेण, मल्लिकार्जुनसूनुबसलेश्वरप्रभुणा, मदीयविद्यामण्टपावस्थिताशेषविद्वत्कण्ठीरवनिर्मितलिङ्गाङ्गस्थलस्वरूपनिरूपणप्रधानवेदान्तागमवाक्यार्थश्रवणसञ्जनितब्रह्मानन्दैररमाभिरतिवाहिता एव दिवसाः ।

* * * *

तदद्य नानाविधवेदशास्त्रविचारणकोविदश्रीचागण्टशरभनाराध्यसूनुभिर्मल्लनाराध्यैः शिवलिङ्गसूर्योदयं नाम नाटकं निर्माय भवतरसमर्पितमासीत् ।

* * * *

सू—आर्ये तवैतद्विदितमेव—

नित्यं यस्मिनयावलम्बनपटुः कार्ये निवेश्यासने
यः षोढा व्यवह्रियते परपदप्राप्ते समुत्साहवान् ।
यश्शुक्त्युद्भवरौप्यसुन्दरतरं विश्वं सदा प्रेक्ष्यते
स श्रीमान् बसलेश्वरो विजयते श्रीकन्दुकूर्यन्वयः ॥

अपिच—

अनेकमन्त्रीश्वरमौलिरत्ननीराजितश्रीचरणारविन्दः ।
उद्युञ्जमानो बसलेश्वरोऽसौ भूपाननेकान् स्ववशं निनाय ॥

तेनात्यन्तशान्तेनात्मनो विनोदार्थं शिवलिङ्गसूर्योदयं नाम नाटकमभिनेतुमादिष्टोऽस्मि ।

* * * *

दधीचिगौतमादिमुनिनिकरशापोपविद्धशैवाचारपद्धतिमलीमसान्तःकरणजनप्रमथनाय नन्दिमुखविविधप्रमथांशसम्भूता मानुषपौरुषभूषणाः पुरुषाः क्षितिमवतीर्य निष्पादितकृत्याः पुनः शान्तिमेव प्रपद्यन्ते । बसलेश्वरमेव तावदवलोकयतु भवती । तथा हि—

कल्याणाख्यपुरे च बौद्धनिकरैरध्युष्टरथ्यान्तरे
श्रीमद्विज्ज(ड)लसन्निधौ स्वविमतान् न्यायेन संशिक्षयन् ।
शान्तः षट्स्थलनिर्णयं सुरुचिरं सूक्ष्मातिसूक्ष्मं परं
भेजे श्रीबसलेश्वरः प्रभुमुखान्निर्वाणदं शाम्भवम् ॥
ज्ञानेन बसलेशोऽयं निर्जित्याज्ञानमुत्तमम् ।
गुरोरनुग्रहाल्लेभे ज्ञानलिङ्गोदयं परम् ॥

End :

उदीयमानं शिवलिङ्गमेतद्दद्याच्छुभं श्रीबसलेश्वराय ।
श्रीकन्दुकूर्यन्वयदुग्धसिन्धुसुधाकरायाखिलसद्गुणाय ॥
सुज्ञानप्रमुखास्सदा कुशलिनः श्रीकन्दुकूर्यन्वये
गुर्वाम्बायुतमल्लिकार्जुनसुतं भक्तौघचिन्तामणिम् ।
रत्नौघैर्बसवेश्वरप्रभुवरं मत्तेभसङ्घैर्हयै-
र्नानारत्नविचित्रभूषणचयैस्संयोजयन्त्वादरात् ॥
चागण्ड्यन्वयसिन्धुशीतकरणश्रीशारभाराध्यस-
त्पुत्रायामलसद्गुणाय कलये मल्लेश्वराख्याय च ।

द्रष्टृणां शिवलिङ्गदर्शनसमुद्भूतप्रमोदात्मनां
भूयाल्लिङ्गकटाक्षवीक्षणवशाद् गोब्राह्मणेभ्यः शुभम् ॥

निष्क्रान्तास्सर्वे ॥

Colophon:

इति श्रीमल्लनाराध्यविरचिते शिवलिङ्गसूर्योदयनाटके पञ्चमोऽङ्कस्समाप्तः ॥

The name of the scribe and the date of the MS. are given thus:

विकृत्यब्दे कृष्णपक्षे सप्तम्यां भौमवासरे ।
शिवलिङ्गादित्यभवमीश्वरो व्यलिखन्मुदा ॥

R. No. 2283.

Paper. 10¾ × 9½ inches. Foll. 44. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Uppalūri Gaṅgādhara Śāstri of Sūryaraopēṭa, Cocanada, Gōdāvari district.

Fol. 13*b* is left blank.

आपस्तम्बश्रौतसूत्रभाष्यम्.

ĀPASTAMBAŚRAUTASŪTRABHĀṢYAM.

A commentary on the Śrautasūtras of Āpastamba. Similar to the work described under No. 1060 of the D.C.S. MSS., Vol. II.

Contains Paṭalas 1 to 8 of Vājapēya and Rājasūya portion in the 18th Praśna and the first Paṭala complete and the second Paṭala incomplete of Dvādaśāha portion in the 21st Praśna.

Name of the scribe of the original MS.: Śrīpāda Rāmānujan. Date of transcription as given at the end of Vājapēya: Saturday, the dark fortnight of the Mārgaśiras month in the year Kīlaka.

Beginning:

शरदि वाजपेयेन यजेत । वाजपेय इति कर्मनाम । तेन यो यजेत, स शरदि यजेत । वसन्ते प्राप्ते शरद्विधिः प्रत्यक्षविधानाद्वा कालस्य अर्थिभावाच्चोदकप्राप्तेर्नियमार्थं आरम्भः । कः पुनस्तेन यजेत? ब्राह्मणो राजन्यो वृद्धिकामः । ब्राह्मणो राजन्यो वा ऋद्धिकामः । स वा एष ब्राह्मणस्य चैव राजन्यस्य च यज्ञ इति श्रुतेः । ऋद्धिर्वृद्धिर्धनधान्यादिभिः । नित्यवदेके समामनन्ति ।

* * * *

प्रथमः पटलः ॥

* * * *

राजा स्वर्गकामो राजसूयेन यजेत । वाजपेयेनेष्ट्वा राजसूयेन यजेतेत्यभिसम्बन्धः; वाजपेयानन्तरं राजसूयस्य श्रुतेः, मन्त्रक्रमाच्च । राजा क्षत्रियोऽभिषिक्तश्च ।

* * * *

अन्तवचनाच्च नानावभृथत्वं प्रश्नसमाप्त्यर्थं धृतार्थो वा ॥

Colophon:

इत्यष्टमः पटलः ॥

समाप्तो राजसूयक्रतुश्च ॥

द्वादशाहेन प्रतितिष्ठति । द्वादशानि समाहृतानि द्वादशाहः अहन्शब्दस्सुत्याकर्मवाची द्वादशसुत्याकर्माण्येकतन्त्राणि द्वादशाहः ।

End:

राज्ञो रक्षणान्तं काठकेऽप्यौपवसथ्येन विकारः संचिलोकृथान्तं पशुमेवोपसदि ।

इति प्रथमः पटलः ॥

श्वो भूते प्रतायतेप्रसार्यते । महारात्रे बुद्ध्वेत्येवमादि । ज्योतींषि स्तोमानि यस्य सोऽयं ज्योतिष्टोमः ।

* * * *

अथ सुत्यामिति । ततः यागतः तत ऊर्ध्वमद्व्यस्सुत्यामित्येव ब्रूयात् । पत्नीसंयाजान्तमहस्सन्तिष्ठते । आज्येडाभक्षणान्तसवनीयस्य संस्थिते तु पत्नीसंयाजान्ते वा ।

R. No. **2284.**

Paper. 10¾ × 9½ inches. Foll. 44. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Pullala Sūrayyagāru, Indupalli, Gōdāvari district.

Foll. 43*b* and 44 are left blank.

स्वरमेलनम्.

SVARAMĒLANAM.

By Kṛṣṇa. A treatise on Vedic accentuation dealing with the following subjects:—

१. उभयोदात्तदीर्घह्रस्वप्रकरणम्.
२. पूर्वोदात्तपूर्वदीर्घप्रकरणम्.
३. उभयह्रस्वपूर्वोदात्तप्रकरणम्.
४. उभयह्रस्वोत्तरोदात्तप्रकरणम्.
५. उभयोदात्तोभयदीर्घप्रकरणम्.
६. उदात्तव्यतिरिक्तोभयह्रस्ववर्णदीर्घप्रकरणम्.
७. उदात्तव्यतिरिक्तपूर्वदीर्घप्रकरणम्.
८. उदात्तव्यतिरिक्तोत्तरदीर्घप्रकरणम्.

Complete.

Beginning:

नमस्कृत्वा गणेशं च वासुदेवं सदाशिवम् ।
नृसिंहीं त्रिपुरघ्नीं च क्रियते स्वरमेलनम् ॥

एकादेशस्य दीर्घस्य चादिरन्तोभयं यथा ।
उच्चस्वरेण सङ्गृह्य याजुषे तैत्तिरीयके ॥

अत्रादौ स्वरमेलनं नाम स्वरसंहिताद्वयमेलनम् । उदात्तादिस्वरसंहिता केवलाच्स्वरसंहितोभयमेलनग्रन्थमिति । ननु चतसृषु संहितासु मध्ये स्वरसंहिताद्वयं यत्र कुत्रापि नास्ति । तस्मान्न स्वीकार्यम् । व्यासशिक्षामतेन प्रातिशाख्येऽपि षट्संहितारूपमूहनीयम् ।

तथा चोक्तम्—

पदस्वरवर्णाङ्गानां द्विद्वियुक्ते च संहिता ।
द्विधादिसंहिता ह्यत्र षडेवं संहिताः स्मृताः ॥

इति व्यासशिक्षावचनेन स्वरसंहिता द्विधा ।

* * * *

Colophon:

इति श्रीकृष्णनाम्ना विरचिते (स्वरमेलनलक्षणे) सवर्णदीर्घोदात्तलक्षणे उभयोदात्तदीर्घह्रस्वप्रकरणम् ॥

End:

एवैषां हन्तावोचथा एतस्यादित्य एव हि ।
हयाये वाचैतेनायतनेन समुदीरितम् ॥

एवैषां वृक्के ताजक् । हन्तावोचथा वराहः । एतस्यादित्यो रुचम् । हव्यायै वासन्नाय । एतेनायतनेन क्राम्यतीति ॥

Colophon:

इति श्रीकृष्णनाम्ना विरचिते स्वरमेलनलक्षणे उदात्तव्यतिरिक्तोत्तरदीर्घप्रकरणं समाप्तिमगमत् ॥

R. No. **2285.**

Paper. 10¾ × 9½ inches. Foll. 32. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Sikka Pullayagāru of Viśvēśvara Agrahāram, Pērur Shivas, Amalapuram taluk, Gōdāvari district.

Foll. 31*b* and 32 are left blank.

अलङ्कारमकरन्दः.

ALAṄKĀRAMAKARANDAḤ.

A treatise on rhetoric and figures of speech. The name of the author is Kollūri Rājaśēkhara. The illustrations however are in praise of Rāmēśvara, ruler of Manna (Manva) and son of Kāmākṣī and Viśvēśa of Anapiṇḍi family. The author quotes, among others, Camatkāracandrikā.

Complete.

Beginning:

कुम्भौ मे मूर्ध्नि कस्मादयि जननि कथं वक्षसि स्तस्तवेमौ
तातः किं तावकीनौ स्पृशति न तु कथं मामकीनौ वद त्वम् ।
इत्येवं बाललम्बोदरमधुरगिरा स्मेरवक्त्रारविन्दौ
कल्याणं वः क्रियास्तां निरवधिकरुणावारिधी पार्वतीशौ ॥
मुग्धे पङ्कजकुड्मलौ तव कुचौ पाकाद्विकासोन्मुखौ
प्रातश्चेत्प्रसरेद्दिवाकरकरः फुल्लौ भवेतामिमौ ।
अर्धेन्दून् कलये तदत्र नखरैर्न स्याद्यतः फुल्लते-
त्येवं वञ्चनया हरिः परिमृशन् राधास्तनौ पातु नः ॥

कुम्भी त्वां परिणन्तुमिच्छति कुचौ दृष्ट्वा प्रतीभभ्रमात्
कस्तूर्या मकरीः करोम्ययि तयोः शोभाझरालम्बिनीः।
भीतिस्ते न भवेत्तदा मकरतो भीतो गजः प्रागभूत्
इत्थं शैलसुतास्तनौ कपटतः शम्भुः स्पृशन् पातु नः॥
प्रालेयाचलकन्यकासमरसालोकप्रसारोल्लस-
त्कासारान्तरसन्तताविकसच्छ्वेताम्बुजातोपमः।
गोदातीरविहारहंससुभगः श्रीमान् स मुक्तेश्वरः
श्रीविश्वेशतनूजरत्न भवते भूयादभीष्टार्थदः॥
शृङ्गारी विबुधेषु यस्य तनयः पुत्री सदा शम्भुना
संभाव्या शिरसा सरोजनिलया कान्ता गृहं क्षीरधिः।
एषोऽनन्तवरेश्वरो वितनुतां लक्ष्मीं चिरस्थायिनीं
पुत्रान् पौत्रसुखोज्ज्वलांश्च भवते रामेश सत्केशवः॥
सर्वोर्वीपतिवर्गदुर्गममहासाम्राज्यलक्ष्मीयुतः
संरक्षन् सकलान् निजाश्रितजनान् कारुण्यवीक्षाङ्कुरैः।
नित्यं भृत्यसुपुत्रपौत्रसहितो भार्याद्वयालङ्कृतो
दीर्घायुर्भवलब्धवर्णनिचयाद्रामेश पूज्यो भव॥
पयः पायंपायं द्रुतमपसरन् दूरमुरुभिः
सुधाक्तैश्चाट्टक्तैर्निकटमुप[न]यन् वक्षसि लुठन्।
सहासं सञ्जल्पन् मधुरमधुराः काश्चन गिरः
चलन् खेलन् बालस्त्वमिव पितरं त्वां मदयतु॥
त्वदीये ये जाये प्रथमगलितं वाङ्मधुरसं
पिबन्ती कौसल्या निजतनुभुवः शैशवजुषः।
सकम्पा स्विन्नाङ्गी पुलकिततनुर्विस्मितमुखी
परानन्दाम्भोधौ विगलदवधौ मज्जतमम्।

* * * *

अथेदानीं रुचकवाचिकभूषणार्थिविवेकिप्रमुखसप्तमहाकवीनां कवितासु भूषणार्थितताया एव कवितायाः प्राशस्त्यं मन्वानेन सर्वज्ञेन कालिदासेन चन्द्रालोकाख्यं लक्ष्यलक्षणोपेतमेकसर्गं काव्यमरचि। तद्वदहमपि तत्पादच्छायामनुसृत्य सुरभूरुहस्येव सुकृतालवालस्य, अपिच चन्द्रस्येव भासमानाह्निस्य।

* * * *

ललनालिमेयस्य, अनिपिण्डिकुलशस्यकलशाब्धिसारस्य रामामनोरस्य रामेश्वराख्यस्य . . सकलजनताहार्दसंहूतिवरिवस्य(।)परिलालिताम्मन्नकामान्तरालस्य . . . .

धर्मस्कन्धं सुकृतैकालवालं शक्तित्रयाख्यविटपैरुपशोभमानम् ।
सद्यस्सुफुल्लसुयशस्सुमनोऽभिरामं काव्यं व्यरच्यत इदं कवितामृताख्यम्॥
यं सुषुवे कामाक्षी विश्वेशातुलितरामवामाक्षी ।
सोऽयं जयति कुमारो विबुधसमाजेषु कथितनिजसारः ॥
जयति महितकीर्तिः मन्मथाकारमूर्तिः परमपुमवतारः पालितानेकवीरः ।
वरसुगुणनिकायो नित्यलक्ष्मीसहायः सरसकुमुदचन्द्रो रामभूमीसुरेन्द्रः॥

नन्वयं परमपुमवतारश्चेत् व्यासादयो भाविकथाप्रसङ्गेषु पुराणेषु किमित्येनं न वर्णयाश्चक्रुरिति चेदत्र ब्रूमः—

वाल्मीकिः प्रणयी द्विजिह्वभवने व्यासोऽपि दाशात्मजा-
सूनुः पद्मभवो जडः श्रुतिगणैर्वाचस्पतिश्च ग्रहः ।
काव्यस्तादृश एव पन्नगपतिः ख्यातो द्विजिह्वस्ततो
कोवाम्मन्नमहीमहेन्द्रसुगुणस्तोता न तं वेद्म्यहम् ॥

अथार्थालङ्कारा निरूप्यन्ते—

यदि वाच्यं साधर्म्यं संमतमन्येन लोकसिद्धेन ।
प्रकृतस्य चैकवाक्ये स्यादुपमा पूर्णलुप्तभेदवती ॥

उपमा नाम वर्णनीयस्य वदनादेर्लोकसिद्धेनान्येन चन्द्रादिना संमतत्ववाच्यत्व विशिष्टं साधर्म्यम् ।

End:

अनिपिण्डवंशकलशोदधिपूर्णचन्द्र रामेश वीर विजयीभव सर्वकालम् ।
पुत्रं लभस्व निजसद्गुणपद्मभानुं स्तुत्यं भवन्तमनघं भवतः पितेव ॥
श्रीविश्वेशकुमार ते यदुपतिः पुत्रं ददातु द्रुतं
किश्चात्यन्तमहर्निशं वितनुतां नृत्यं विलासास्पदम् ।
जिह्वाग्रे भुजमण्डले करतले स्वान्ते च ते सन्ततं
सद्विद्याविजयोन्नतिर्वितरणस्फूर्तिश्च मूर्तिर्हरेः ॥

अत्र काव्यान्ते अनेकाव्ययपदघटितश्लोकस्य रचितत्वेन कर्तृनायकयोः शुभं भवति । तदुक्तं चमत्कारचन्द्रिकायाम्—

काव्यादावव्ययपदं चरमे बहुधाव्ययम् ।
यदि प्रयुज्यते तत्र नेतृवक्त्रोः परं शुभम् ॥ इति ॥
गर्वोन्माक्षिकमाक्षिपत्यनुपदं . . . . शिक्षते
साक्षादिक्षुमुपेक्षते क्षणमपि क्षीरं तु नोद्वीक्षते ।
सेवामप्युररीकरोति न सुधासारस्य सारस्यतो
वाचां मे कवितावतारसमये साधारणीयं . . ।
कोल्ला(कू)रिवंशसंभूतराजशेखरधीमता ।
रचितेयं कृतिस्तोषं तनुतां विदुषां सताम् ॥

Colophon:

इति श्रीमदखिलगुणगणालङ्कृतस्य सकलविद्वज्जनपोषकस्य रामेशप्रभुसार्वभौमस्य यशोधनसारसुरभीकृतालङ्कारमकरन्दाख्यं काव्यं संपूर्णम् ॥

R. No. **2286.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 52. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Celukūri Śēṣagiri Raogāru of Kōṭipalli, Ramachandrapuram taluk, Gōdāvari district.

विष्णुसहस्रनामव्याख्यानम्.

VIṢṆUSAHASRANĀMAVYĀKHYĀNAM.

A commentary on the Viṣṇusahasranāmastōtra.

Incomplete and wants the introduction in the beginning.

Beginning:

. . . . . . हस्रकम् । नाम्नां सहस्रं तैरेव रूपाणां वा सहस्रते त्यायैतरेयोपनिषद्भाष्ये . . . . . . माणेषु बृहती सहस्रऋकूप्रतिपाद्यभगवद्रूपसहस्रप्रतिपादकत्वेनोक्तानि श्रीमद्वि(ष्णोस्सहस्र)नामानि पूर्वतनैर्व्याख्यातान्यपि बुद्धिशुद्धये यथामति व्याख्यास्यन्ते—विश्वं जगत्प्रविष्टं . . . (विश प्र)वेशन इत्यस्मात् अशूप्रुषिलटिकणिखटिविशिभ्यः कन्निति कन्प्रत्यये तस्य कित्त्वाद्गुणाभावे च रूपम् । तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः सर्वत्र प्रविष्टत्वात् ज्ञानरूपत्वाद्वा विश्वम् । विश प्रवेशन इति धातोः क्विप्रत्ययः ।

वा गतिगन्धनयोरित्यस्मात् डप्रत्ययः विश् च तत् वं चेति विग्रहः। विवेश भूतानि चराचराणि विज्ञानमानन्दं ब्रह्मेति च श्रुतेः। विः पक्षी गरुडः तेन श्वयति गच्छतीति वा विशेषेण श्वयति व्याप्नोतीति वा।

End:

अग्रे सृष्टेः प्राक् जायते व्यज्यत इत्यग्रजः।

Some unconnected passages are added at the end: एकशब्दः . . . . पूर्वनिपाताभावात् तस्य केवलार्थत्वाश्रयणं व्यर्थमिति वाच्यम्। अर्थाधिक्यलाभायैव तदाश्रयणात्। अत एव केवलार्थत्वविवक्षाव्यावृत्त्यप्रदर्शनं न पुनरित्यादीति ज्ञेयम्।

R. No. **2287.**

Paper. 10⅞ × 9⅝ inches. Foll. 60. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Jaganmūrti Venkaṭappa Siddhāntigāru, Tuni, Gōdāvari district.

In fol. 33*b* it is stated that the work is incomplete and that the third and the fourth Adhyāyas are wanting. Foll. 59—60 are left blank.

अष्टाङ्गहृदयम्, आन्ध्रभाषाटीकासहितम्.

ASṬĀṄGAHṚDAYAM WITH TELUGU COMMENTARY.

Same work as that described under No. 13072 of the D.C.S. MSS., Vol. XXIII, and with meaning in Telugu, stanza by stanza, by Rāmānujācārya of Śukavaṭa family.

Contains the first and second Adhyāyas complete and the fifth Adhyāya incomplete in the Śārīrasthāna.

Name of the scribe: Śiṣṭla Vīrayya. Date of transcription: Thursday, the 11th day of the dark fortnight of the Mārgaśiras month in the year Akṣaya.

R. No. **2288.**

Paper. 10⅞ × 9⅝ inches. Foll. 198. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Duvvūri Lakṣmīnārāyaṇa Śāstri of Mukkamala, Amalapuram taluk, Gōdāvari district.

विष्णुसहस्रनामभाष्यविवृतिः.

VIṢṆUSAHASRANĀMABHĀṢYAVIVṚTIḤ.

Foll. 1*a*—197*a*. Foll. 197*b*—198 are left blank.

An explanatory commentary on the Sahasranāmabhāṣya of Śaṅkarācārya: by Gōpālasarasvatīyati who salutes Gōpālānandayati and Advaitānanda in the introductory stanzas.

Complete.

Beginning:

श्रीमाधवोमाधवविघ्नराजान् वाग्देवतां व्यासमुनिं महान्तम् ।
श्रीशङ्करं भाष्यकृतं च भक्त्या नमाम्यहं लोकहितावतारम् ॥
श्रीगोपालानन्दयतीन् गुरून् विद्यागुरूनपि ।
प्रणम्य श्रीमदद्वैतानन्दाञ्छमदमालयान् ॥
भाष्यं तैरुपदिष्टार्थं भगवत्पादनिर्मितम् ।
विष्णोर्नामसहस्रस्थं यथामति विविच्यते ॥
क सर्वविद्भाषितभाष्यमेतद्व्याख्याप्रयत्नः क च मेऽल्पबुद्धेः ।
तथापि वैगुण्यमिह क्षमन्तां सन्तो यतेर्यन्मननं स्वधर्मः ॥

इह खलु युधिष्ठिरो भगवान् परमकारुणिकः शान्तनवात् भीष्मात् धर्मप्रवक्तुः श्रुतिस्मृत्याचारप्रमाणकान् सर्वान् धर्मानायाससाध्यानल्पफलाञ्छ्रुत्वा सकलपुरुषार्थसाधनभूतः सुखसंपादनो धर्मोऽनुक्त इति मत्वा तादृशं धर्मं धर्मप्रवक्तारं सर्वज्ञं भीष्मं पप्रच्छ । स च भीष्मो युधिष्ठिरं प्रष्टारं प्रति विष्णुनामसहस्रस्तवजपरूपमुक्तस्वरूपं धर्ममुवाच । तच्च विष्णुनामसहस्रस्तवं भगवान् बादरायणमुनिर्महाभारते शान्तिपर्वणि दानधर्मैः श्लोकैरुपनिबबन्ध । तत् व्याचिख्यासुः श्रीशङ्करभगवत्पादाचार्यः "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्ति आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्यु" रिति व्याकरणमहाभाष्योक्तप्रयोजनं मङ्गलं हरिहरैक्यानुसन्धानरूपं संपादयितुं विष्णुनाम्नां शिवनामत्वोक्त्या च शिवद्वेषरहितेन क्रियमाणविष्णुसहस्रनामस्तवकीर्तनेन शिवोऽपि तुष्यतीति दर्शयितुं च हरिवंशे कैलासयात्रायां विष्णुं प्रति शिववचनं पठति ।

• • • •

अवयवार्थप्रदर्शनपूर्वकं नाम्नां विवरणं क्रियत इत्यर्थः । अत्र युधिष्ठिरो भीष्ममुखादनेकप्रकारान् धर्मान् श्रुत्वाप्यपरितुष्यन् भीष्मं परमं धर्मं पप्रच्छ ।

नं प्रति भीष्मो यदुवाच तत् सर्वं वैशम्पायनो जनमेजयं प्रत्युवाच। तच्च शौनकादीन् प्रति सौतिरवोचदिति सम्बन्धमभिप्रेत्याह—वैशम्पायन उवाचेति।

End:

श्रुतीति। परस्मात् पुरुषान्न भिन्नमिदं विश्वं परमार्थतस्तेन विश्वमित्यभिधीयते ब्रह्मेति व्याख्या ब्रह्मैवेदं विश्वमित्यादि श्रुतिमूला सकलमहमिदं च वासुदेव इत्यादि स्मृतिमूला तदनन्यत्वमारम्भणशब्दादिभ्य इति न्यायमूला चेत्यर्थः। एवं व्याख्यानान्तरेष्वपि यथासम्भवं श्रुत्यादिमूलत्वं बोध्यम्॥

प्रक्षेपकालुष्यनिरासहेतोः व्याख्या हरेर्नामसहस्रभाष्ये।
या तारकब्रह्मयतिप्रणीता समर्पिता सा हरिपादयुग्मे॥
श्रीगोपालसरस्वतीति यतिना शक्त्यानुरूपा कृता
विष्णोर्नामसहस्रभाष्यविवृतिर्या तत्र विद्वज्जनैः।
क्षन्तव्यं क्षतमुत्तमैर्भगवतो नामैकनिष्ठा यतः
. . . . ॥

Colophon:

इति श्रीगोपालसरस्वतीयतिविरचितं श्रीविष्णुसहस्रनामभाष्यविवरणं समाप्तम्॥

R. No. 2289.

Paper. 10¼ × 9⅝ inches. Foll. 136. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Prativādibhayaṅkara Vēṅkaṭarāghavācāryulugāru of Guṭāla, Polavaram division, Gōdāvari district.

रामानुजमतत्राणम्.

RĀMĀNUJAMATATRĀṆAM.

Foll. 1*a*—135*b*. Fol. 136*a* contains the name of the owner of the MS. from which this was copied. Fol. 136*b* is left blank.

A treatise purporting to support the Śrī-Vaiṣṇavism as propounded by Rāmānuja. The author was the disciple of Tātācārya.

Complete. Deals with the following subjects:—

१. वर्णाश्रमकर्मणां मुमुक्ष्वनुष्ठेयत्वसमर्थनम्.

२. वर्णाश्रमधर्माननुष्ठाने मुमुक्षूणां प्रत्यवायसमर्थनम्.

३. भागवतेषु जातिसमर्थनम्.
४. वैष्णवशूद्रादौ विप्रत्वजात्यनुत्पत्तिसमर्थनम्.
५. निकृष्टवर्णेष्वपि पूजानवज्ञे.
६. प्रपन्नस्याधर्मवर्जनसमर्थनम्.
७. वेदबाह्ययुक्त्यादेराभासत्वसमर्थनम्.

The original MS , of which this is a copy, is said to have been given by Inuganṭi Veṅkayya to Mattēbhakaṇṭhīrava Varadācārya on Monday, the 2nd of the bright fortnight in the month of Puṣya of the year Āṅgirasa.

Beginning:

श्रीमन्नारायणस्याङ्घ्री प्रपद्ये शरणं सताम् ।
यावशेषपुमर्थानां दायकौ द(भ)वसायकौ ॥
तातारव्यमस्मदाचार्यं श्रीरामानुजदेशिकम् ।
पूर्णयामुनमुख्यांश्च गुरूनन्यान् समाश्रये ॥
रामानुजमतत्राणं वितनोमि यथामति ।
दुस्सहं वेदबाह्यानामनुग्राह्यं मनीषिणाम् ॥
यतीश्वरतदीयश्रीसूक्तिभिः प्रतिपाद्यते ।
मुमुक्षूणां विधेयत्वं वर्णाश्रमसुकर्मणः ॥
दोषोऽप्यतदनुष्ठाने जातिर्यावत्तनुस्थितिः ।
विप्रत्वजात्यनुत्पत्तिर्विप्रान्ये वैष्णवे सति ॥
पूजानवज्ञे तत्रापि ततोऽधर्मस्य हेयता ।
अशास्त्रमूलयुक्त्यादेराभासत्वमिह स्फुटम् ॥

इह खलु केचन सच्छास्त्राभ्याससद्गुरूपदेशविमुखा इन्द्रियकिङ्करतया विषयाभिलाषिणः श्रीरामानुजाभिमतशङ्खचक्रोर्ध्वपुण्ड्रादिभूमिकयात्मानं छादयन्तः परमवैदिकसंमतं तदीयं मतमेव श्रुतिस्मृत्याद्यपार्थकल्पनैर्युक्त्या . . . . . वृत्तान्तकथाभिश्च श्रीरामानुजस्याप्ययमेवार्थोऽभिप्रेत इति तदनिष्टाभिप्रायप्रतिपादकैर्निराकुर्वन्तो वर्णाश्रमधर्मस्वरूपत्यागमाच . . . . प्रतिपादयन्तः तमेवानुतिष्ठन्तोऽप्यनुष्ठापयन्तः वित्तादिसम्पन्नजनान् मोहयित्वा तदीयधनदारादीन् हरन्तः ।

* * * *

ओमित्यात्मानं युञ्जीतेत्यन्तेन सार्वेश्यसर्वशक्त्यादिकल्याणगुणविशिष्ट-श्रीमन्नारायणाख्ये परस्मिन् ब्रह्मणि आत्मसमर्पणरूपतां तस्य प्रतिपाद्य एतद्वै महोपनिषदं देवानां गुह्यमिति तस्याधिकारिदौर्बल्याादिभिर्गुह्यत्वमुपसंहृत्य।

* * * *

Colophon:

इति श्रीरामानुजमतत्राणे वर्णाश्रमकर्मणां मुमुक्ष्वनुष्ठेयत्वसमर्थनम् ॥

End:

ये त्विह नष्टशौचाचारानियमास्त्यक्तलज्जाः पशुचर्यां चरन्ति, ते चापि प्रेत्य पूयविण्मूत्रश्लेष्मलालापूर्णार्णवे पतन्ति तथेह बीभत्सितमश्नन्तीति। भगवान् भाष्यकारोप्यमुमेवार्थमभिप्रेत्याह—शास्त्रानादरो नरकस्य प्रधानहेतुरिति। तस्माद्भगवद्रामानुजसमयः सर्वत्राप्यन्तराद्धान्तनय इत्यशेषं कुशलम् ॥

रामानुजमतत्राणकृतिर्विजयतां सदा।
एषा श्रुत्या नियुञ्जाना यतीश्वरमते जनान् ॥

Colophon:

इति श्रीरामानुजमतत्राणे वेदबाह्ययुक्त्यादेराभासत्वसमर्थनम्।

The scribe of the original MS. adds:

रामानुजमतत्राणं धर्माख्यो दासकस्सताम्।
श्रीरामानुजसन्तुष्ट्यै सेनेशतनयोऽलिखत् ॥

R. No. **2290.**

Paper. $10\frac{1}{8} \times 9\frac{5}{8}$ inches. Foll. 312. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Ayyagari Sītarāmayyagāru of Sākurru, Gōdāvari district.

Bound in two volumes.

सङ्क्षेपशारीरकम्, तत्त्वबोधिनीसहितम्.

SAṄKṢĒPAŚĀRĪRAKAM WITH TATTVABŌDHINĪ.

A metrical treatise dealing with the Advaita Vēdānta: by Sarvajñātmamuni. The commentary is by Nṛsiṁhāśrama, pupil and disciple of Jagannāthāśrama.

Contains the Adhyāyas two and three complete.

Beginning :

प्रत्यक्षादिपराक्प्रमाणमखिलं प्राचीनवाचां . .
. . . . ।
. . . . यस्मिन् ययौ मानतां
तं वन्दे परिवर्जितावधिसुखं लक्ष्मीनृसिंहं हरिम् ॥

एवं सर्वेषां वेदान्तानां सच्चिदानन्दे अखण्डैकरसे ब्रह्मणि समन्वय उपदर्शितः । इदानीमुपदर्शितमेव समन्वयं प्रत्यक्षादिविरोधपरिहारेण स्थूणानिखनन्यायेन द्रढीकर्तुमाक्षिपति—

एवं समन्वयनिरूपणयावबोधो जातोऽप्यखण्डविषयो ननु वाक्यजन्यः ।
मानान्तरेण परिपीडित एव जातो भेदप्रकाशनकृताक्षनिबन्धनेन ॥

एवं समन्वयेति । एवं प्रथमाध्यायोक्तप्रकारेण निरूपणा विचारः अखण्डविषयः अखण्डात्मविषयः । नन्विति चोद्ये ।

* * * *

एवं वेदान्तवाक्यैरवगतिपदवीमद्वये नीयमाने
प्रत्यक्तत्त्वे समस्तद्वयकृति तमसि क्षीयमाणे च सद्यः ।
स्वाराज्यं त्वय्यवाप्ते परमसुखभुजि स्वच्छचैतन्यमात्रे
लेशो मानान्तराणामपि दुरधिगमस्तत्र दूरे विरोधः ॥

Colophon :

श्रीसर्वज्ञात्ममुनिविरचिते सङ्क्षेपशारीरके अविरोधलक्षणं नाम द्वितीयोऽध्यायः ॥

* * * *

सति धर्मिणि धर्माः चिन्त्यन्त इति न्यायात् । तस्माद्व्यावहारिकप्रमाणभूतप्रत्यक्षादिभिः तत्त्वावेदने वेदान्तविरोधाभावादद्वितीयासङ्गात्मप्रमितिः निरुपद्रवं भवतीति सिद्धम् ॥

Colophon :

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमज्जगन्नाथाश्रमश्रीचरणचरणपरिचरणप्राप्तविद्यानिखिलविद्वज्जनमनोहरश्रीमन्नृसिंहाश्रमश्रीचरणविरचितायां सङ्क्षेपशारीरिकव्याख्यायां तत्त्वबोधिनीसमाख्यायामविरोधाख्यो द्वितीयोऽध्यायः समाप्तः ॥

End :

संन्यास एव परमपुरुषार्थसाधनमित्यत्र स्मृतिमाह—

अर्थस्य मूलं निकृतिः क्षमा च कामस्य रूपं च वयो वपुश्च ।
धर्मस्य यागादि दया दमश्च मोक्षस्य सर्वोपरमः क्रियाभ्यः ॥

अर्थस्य मूलमिति । तस्मात्संन्यासस्य बुद्धिपाकहेतुत्वेन तं विना फलव- द्विद्योदयासम्भवात् सर्वं बहिरङ्गसाधनं संन्यस्य संसारदोषदर्शनेन विवेकवैराग्य- दार्ढ्यं सम्पाद्य यावद्ब्रह्मात्मैकत्वबुद्धिपरिपाकं शान्त्यादिभिः सह तत्त्वंपदार्थपरि- शोधनरूपश्रवणादिकं कर्तृत्वाद्यभिमानराहित्येनानुतिष्ठेदिति सिद्धम् ॥

Colophon :

श्रीमत्परमहंसपरिव्राजकाचार्यजगन्नाथाश्रमश्रीचरणचरणपरिचरणप्राप्तविद्या- निखिलविद्वज्जनमनोहरश्रीमन्नृसिंहाश्रमश्रीचरणविरचितायां सङ्क्षेपशारीरकव्या- ख्यायां तत्त्वबोधिनीसमाख्यायां साधनाख्यस्तृतीयोऽध्यायः समाप्तः ॥

R. No. **2291.**

Paper. 10⅞ × 9⅝ inches. Foll. 186. Lines, 20 in a page. **Dēvanāgarī. Good.**

Transcribed in 1916-17 from a MS. of M.R.Ry. Mantravādi Vēṅkaṭa Śāstri of Muñjavarapukōṭa, Gōdāvari district.

अद्वैतसिद्धाञ्जनम्.

ADVAITASIDDHĀÑJANAM.

A treatise criticising the Śrībhāṣya of Rāmānuja from the stand-point of the Advaita Vēdānta. The author states that Rāmānuja borrowed his views from the Brahmasūtrabhāṣya of Nīlakaṇṭha.

Contains the first Pāda of the first Adhyāya.

Name of the scribe of the original MS: Appa Subbarāju.

Beginning :

श्रीमन्तं मत्तनागेन्द्रमुखं पुष्करपुष्करम् ।
श्रीविद्यायूंषि यच्छन्तं भजे विघ्नतमोऽर्चिषम् ॥
वन्दारुवृन्दारकवृन्दमीशभूयं च मत्स्थासन चेतिशुद्धम्(?) ।
भूतानि पार्थाय समादिशन्तं गोविन्दमानन्दमचिन्त्यमीडे ॥
पाराशर्यवचोऽद्रिणा श्रुतिशिरःक्षीराम्बुधिं भूसुराः
श्रीमच्छाङ्करभाष्यभोग्यृजुमहारज्वा मथित्वाव्ययम् ।
ब्रह्मानन्दरसामृतं निरुपमं सात्मानमेवाद्वयं
स्वाज्ञानासुरदुर्लभं सुमनसां लभ्यं पिबन्त्वन्वहम् ॥

श्रीनीलकण्ठविबुधोदितभाष्यभार(व)मादाय सर्वमलिखत्परिभाव्यवेदान् ।
भाषाप्रबन्धरचनेन तदुक्तकृत्योऽरामानुजोऽज्ञजनतापरिमोहनाय ॥
रामानुजेन गदितेऽम्बरनैल्यतुल्ये वाच्यं न चोत्तरमथापि परप्रसिद्धेः ।
छेदेन वच्मि परमेशकृपानिदानविद्वन्मुदे श्रुतिशिरःप्रमितार्थबोधात् ॥
दूष्यं वचस्स हि यथोदितमेव विद्वान् संगृह्य यो वदति दोषमतस्तदीयम् ।
भाष्यं च न प्रतिनयं तदपेक्षयुक्तं सन्तो वदन्तु तुहिनो मणिना निरम्भिः ॥

तथाहि—

अखिलभुवनजन्मस्थेमभङ्गादिलीले विनतविविधभूतव्रातरक्षैकदीक्षे ।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे भवतु मम परस्मिन् शेमुषी भक्तिरूपा ॥

इति । यदादौ पद्यं निगदितम्—तत्राखिलोपपदभुवनविशेषणं लब्धार्थम् । विनतविविधभूतव्रातेति विशेषणमनर्थकम् । स्थेमा स्थितिः । सा चान्तर्यामिविष्ण्ववतारलोकपालमन्वादिनृपमातापित्रादिरूपेण क्रियमाणा बहुविधा (विवक्षिता) श्रुतप्रकाशेन । स्थितिरक्षित्योरभेदादनिष्टवारणं वा रक्षणं स्वनाशकासान्निध्यं स्थितिं भेदेत्यादिनैव गतार्थत्वादखिलविशेषणान्नेह गोबलीवर्दन्यायः (?) ।

• • • •

तदेतन्म . . . . न्विह विशेषः कर्मावबोधानन्तर्ये न धर्म(ब्रह्म) जिज्ञासायाः गम्यते, अधीतवेदान्त(ङ्ग)स्य ब्रह्मजिज्ञासोपपत्तेः. यथा च हृदयाद्यवदानानामानन्तर्यनियमः क्रमस्य विवक्षितत्वान्न तथेह क्रमो विवक्षितः ।

End:

यमो दधार पृथिवीं यमो विश्वमिदं जगदित्यादेर्यमावस्थानविनियुक्तस्य ब्रह्मपरत्वासम्भवात् । अन्यच्च ब्रह्मदाशा ब्रह्मदासा इत्यादेरभेदपरत्वस्यान्यथा चापि दाशकितवादित्वमधीयत एक इति सूत्रानुमतत्वाच्च ; अन्यथा नानाव्यपदेशादिति गतार्थत्वेनान्यथेत्याद्यानर्थक्यात् । एवमचेतनपराण्यसम्भवद्ब्रह्मपराण्यनुसन्धेयानीत्यलं दिष्टहतगदाघातेन ॥

Colophon:

इति महोपाध्याय—प्रथमाध्यायस्य प्रथमः पादः ॥

R. No. **2292.**

Paper. 10¾ × 9½ inches. Foll. 16. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Jayanti Jōgayyagāru of Haṁsavaram, Tuni, Gōdāvari district.

शुक्रकेरलम्.

ŚUKRAKĒRALAM.

Foll. 1 to 15*a*. On fol. 15*b* it is stated that the work has been compared with the original. Fol. 16*a* is left blank. Fol. 16*b* gives the contents of the work.

A treatise on horoscopy dealing with the fortunes of a person as ascertainable from the relative position of the planets in his horoscope.

Contains the Dvādaśabhāvaphala and the Rājayōga.

Date of the original MS : Friday, the first of the bright fortnight of of Māgha month in Rudhirōdgāri.

Beginning:

देहस्थानाधिपस्सपापः षष्ठाष्टमव्ययेषु संस्थितश्चेत् न देहसौख्यम् । बलहीनोऽपि केन्द्रत्रिकोणे स्थितश्चेत् प्रबलः । लग्नाधिपतिर्नीचमूढपराजितपापक्रान्तपापसंयुक्तपापमध्यमवक्रानुवक्रविकलविपद्द्योगे रोगवान् भवति ।

* * * *

पुनर्जन्म भवति । पूर्वोक्तषष्ठी भावादिसमांशकस्वरूपमटप्राप्तिः ॥

Colophon:

द्वादशभावानि सम्पूर्णानि ॥

अथ राजयोगा लिख्यन्ते—

बन्धुस्थानाधिपे तुङ्गे तदीशे कर्मराशिगे ।
लग्नेशे कर्मराशिस्थे योगश्चामरसंज्ञकः ॥

End:

जनयो युगान्तकीर्तिः न्याये वित्तं च लग्नाद्वा ।
अमित्रांशके चन्द्रे दृष्टदानममन्त्राणाम् ।
करोत्यवश्यं नृपतिः मत्तेभपरिपालितम् ॥

Colophon:

इति योगास्समाप्ताः ॥

R. No. **2293.**

Paper. 10¾ × 9½ inches. Foll. 28. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Tanjrāla Veṅkaṭēśvarulugāru, B.A., B.L., Vakil, Gulugupēṭa, Masulipatam, Kistna district.

सर्वतोमुखसामानि.

SARVATŌMUKHASĀMĀNI.

Foll. 1*a*—27*b*. Fol. 28*a* gives the contents of this work. Fol. 28*b* is left blank.

Contains certain details regarding the Sāmans to be chanted by the Udgātṛ priests in the course of the performance of the Sarvatōmukha sacrifice.

Incomplete.

Beginning:

अथ सर्वतोमुखस्य सामप्रयोग उच्यते । मध्ये गार्हपत्यः । प्रतिदिशं सौमिका विहाराः—त्रिवृत्प्राच्यां दिशि, पञ्चदशोक्थी दक्षिणायां, सप्तदशोक्थी पश्चिमायाम्, एकविंशतिषोडशी उत्तरस्याम् । तानि च त्रिवृदादीनि चत्वारि मुखानि । प्रथमं त्रिवृदग्निष्टोमः । तस्य प्रयोगः—वरणमधुपर्कादिमहारात्रिपर्यन्तमग्निष्टोमवत् ।

End:

सर्वे अच्छावाकैषेत्यादि । जगतीछन्दसा भक्षणमित्यादि । यज्ञप्रच्छप्रयोगः स्तोमविमोचनादि । उद्वंशीयान्तं सर्वमग्निष्टोमवत् । अस्मिन्नहनि सर्वाणि स्तोमानि सन्तिष्ठते सप्तदश उक्थ्यो रथन्तरपृष्ठः ॥

R. No. **2294.**

Paper. 10¾ × 9½ inches. Foll. 68. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. C. Jōgayyā Śāstri of Pithāpuram, Gōdāvari district.

भगवद्गीता, व्यासभावप्रकाशिकासहिता.

BHAGAVADGĪTĀ WITH THE COMMENTARY VYĀSABHĀVAPRAKĀŚIKĀ.

Foll. 1*a*—65*a*. Fol. 65*b* gives the contents of this work. Foll. 66—68 are left blank.

A commentary on the Bhagavadgītā: by Liṅgōjipaṇḍita of Kārugāma family. He belonged to the Kaṇvaśākhā of the Śuklayajurvēda and was a pupil of Viṭṭhalaguru. The commentary is called Vyāsabhāvaprakāśikā.

Contains the Adhyāyas 7 to 12 only, but the 12th is incomplete.

Beginning :

अवतारिका—

एवमध्यायषट्केन साङ्गो योगो निरूपितः। अथ योगालम्बनभूतं ज्ञेयं ब्रह्म निरूप्यते। अत्र योगो द्विविधः—सविषयो निर्विषयश्च । स च द्विविधोऽप्यधिकारिभेदेनानुष्ठेय इति तत्र तत्र पूर्वाध्यायेषूक्तम् । अधुना विषयनिरूपणद्वारा सविषययोगमेव प्रपञ्चयितुं सप्तमाध्याय आरभ्यते—

मू—मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥

भा.—हे पार्थ मयि ब्रह्मणि आसक्तमभिनिविष्टं मनो यस्य सः। मदाश्रयः मदेकाधारस्सन् योगं युञ्जन् योगाभ्यासं कुर्वन् तद्योगविषयभूतं माम् असंशयं निस्संशयं समग्रं सकलं यथा ज्ञास्यसि तज्ज्ञानमवहितमनाः शृणु वक्ष्या मीत्यर्थः ।

* * * *

सालम्बयोगनिरतैर्ब्रह्मज्ञानपुरस्सरम् ।
अवाप्यते हि सायुज्यमित्यवं सप्तमे स्थितम् ॥

Colophon :

इति श्रीविट्ठलगुरुकटाक्षसमाहितमतिवैभवेन काण्वशाखाग्रगण्येन कारुगामान्वयसिन्धुसुधाकरेण लिङ्गाजिपण्डितेन विरचिते व्यासभावप्रकाशिकानामनि गीताभाष्ये सप्तमोऽध्यायः ॥

End :

अत्र मामिति मदेकानुभवो भवतीत्यर्थकल्पन भेदवादिनां निर्मूलमुपेक्षणीयमिति दिक् ॥

एकादशेऽत्यद्भुतानि रौद्रसौम्यात्मकानि तु ।
रूपाणि स्वेच्छयैवेशो भजतीति विनिश्चितम् ॥

Colophon :

इति श्रीविट्ठलगुरुकरुणाकटाक्षसमाहितमतिवैभवेन कण्वशाखाग्रगण्येन कारुगामान्वयसिन्धुसुधाकरेण लिङ्गोजिपण्डितेन विराचिते व्यासभावप्रकाशिकानामवि गीताभाष्ये एकादशोऽध्यायः ॥

सगुणं चाक्षरं ब्रह्म योगालम्बतयोदितम् ।
तस्माच्च विविधाद्य(द्य)द्यत्फलं तन्निरूप्यते ॥

अव—मय्यासक्तमनाः पार्थ इत्यारभ्य योगालम्बनभूतं सगुणनिर्गुणरूपं

ब्रह्म प्रतिपादितम् । तत्र सगुणब्रह्मालम्बनेन निर्गुणब्रह्मालम्बनेन च योगमभ्यस्यतां योगिनां फलविशेषं जिज्ञासुः अर्जुन उवाच —

मू—एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥

भा—एवं मत्कर्मकृन्मत्परम इत्यादिना ।

* * * *

सर्वारम्भपरित्यागी योगसिद्धिविरोधिनस्सर्वारम्भान् परित्यक्तुं शीलमस्यास्तीति स तथोक्तः । एवंभूतो यो मद्भक्तस्स च मे मम प्रियः ।

R. No. 2295.

Paper. 10¾ × 9½ inches. Foll. 68. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Sikha Pullayagāru of Viśvēśvara Agrahāram, Amalapuram taluk, Gōdāvari district.

भागवतचम्पूः.

BHĀGAVATACAMPŪḤ.

Foll. 1*a*—67*b*. Fol. 68 is left blank.

A Campu work (in prose and poetry) on the story of Kṛṣṇa as given in the tenth Skandha of the Bhāgavatapurāṇa: by Kollūri Sōmaśēkhara, also called Rājaśēkhara, whose genealogy is given under R. No. 2126(*a*). He salutes Rāmakṛṣṇa (a descendant of Sōmanāthamakhin and Śaṅkara Śāstrin) and Bōdhānandaghana as his teachers.

The story is taken up to Aghāsuravadha. There are two colophons of which the first gives the completion of the first Skandha and the second that of the first Taraṅga of the tenth Kallōla.

Beginning:

प्रियोपविष्टवामोरुं दशबाहुं किरीटिनम् ।
महागणपतिं वन्दे सर्वकार्यार्थसिद्धये ॥

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥

अरुणकिरणजालैरञ्चिताशावकाशा
विधृतजपपटीका पुस्तकाभीतिहस्ता ।

इतरकरवराढ्या फुल्लकल्हारसंस्था
निवसतु हृदि बाला नित्यकल्याणशीला ॥
कादम्बकुसुमधाम्ने कायच्छायाकणायितार्यम्णे ।
सीम्ने चिरन्तनगिरां भूम्ने कस्मैचिदाद्रिये प्रणतिम् ॥

* * * *

निन्दन्तु नन्दन्तु हसन्तु सन्तः श्रुत्वापि तद्भागवताख्यचम्पूम् ।
मन्येरकस्यैव हरेर्हि सर्वं येनेदृशी मे मतिराविरासीत् ॥
श्रीमत्प्रशस्तविभवैकनिवाससीमा भूमीसुरार्यनिकराग्रिमभाग्यसीमा ।
वाणीविलासगृहकृद्धिधिशिल्पसीमा काचिद्विभाति नितरां भुवि कोनसीमा ॥
नामग्रामाग्रहारस्त्रिभुवनविदितग्रामणीग्रामवास-
ग्रामग्रैवेयहारस्सकलरसकलादीप्रविप्राभिरामः ।
कल्याणानां निवासः सुरपतिनगरीगर्वनिर्वाणदक्षः
श्रीमानस्ति त्रिलोकप्रकटितमहिमा कोऽपि तस्यां प्रभूतः ॥

* * * *

देवालयानि रुचिरे कुशिकात्मजायास्तीरे निखातमखखादिरयूपवारे ।
पेरूरुरित्यभिधयापि विराजमानं श्रीसोमनाथपुरमस्ति भुवि प्रसिद्धम् ॥
सोमनाथपुरी काचित्सोमनाथपुरीसमा ।
राजधानी द्विजेन्द्राणां राजधानीव राजते ॥
केचिच्छाङ्करयुक्तिमौक्तिकजुषो व्याख्यातपातञ्जलाः
केचित्कापिलयोगसिद्धविषयः केचित्त्रयीपाठकाः ।
भामत्युल्लसिताः परे विवरणव्याख्यानसत्कौशलाः
सर्वे तत्र वसन्ति भूसुरवराः षड्दर्शनीवल्लभाः ॥
स्वाधीनकल्पतरवस्सचिन्तामणयः परे ।
कौस्तुभालङ्कृताः केचिन्निवसन्त्यत्र भूसुराः ॥
गुरुं गुरुनये नये कणभुजः कणादं मुनिं
नये च पदचक्षुषः पददृशश्च शारीरके ।
यतीन्द्रमपि शङ्करं यमधिकं बुधा मेनिरे
तमेव शरणं भजे मनसि रामकृष्णाभिधम्
मातामहाः कविबुधाश्च पितामहास्तु
श्रीसोमनाथमखिशङ्करशास्त्रिमुख्याः ।

सर्वेऽपि लोकगुरवो जनकोऽपि यस्य
श्रीरामकृष्णकपटाह्वयपद्मजोऽभूत् ॥

विद्वद्वारचकोरकप्रमदकृत्सानन्दमन्दस्मित-
ज्योत्स्नं कृत्स्नकलाभिराममसकृद्भक्तार्तितापापहम् ।
अद्वैतामृतसिन्धुबन्धुमधिकं संवर्धयन्तं मुहुः
बोधानन्दघनेन्द्रचन्द्रममलं वन्दे हृदाकाशगम् ॥

गोतमाभूत् कामगवी पीत्वा दीर्घतमस्तमः ।
तस्यामाविरभूद्देवः पिनाकी गौतमाभिधः ॥

तद्गोत्रजा मम परे प्रपितामहाद्यास्सर्वे सुपर्वनगरी न गरीयसीति ।
मत्वेव भासुरमहीसुरमुख्यधाम्नि पेरूरुनाम्नि वसतिं सुदृढां प्रचक्रुः ॥

तथाहि—

एको गुरुस्तत्र मखी कविश्च तथा सुधर्मापि च केवलैव ।
सर्वेऽत्र विप्रा मखिनः कवीन्द्राः सर्वे सुधर्मा गुरवोऽप्यनन्ताः ॥

तत्तादृशोपपदसङ्घटिताभिजातवंशस्स गौतमसगोत्रवरे बभूव ।
स्मिन् महामखसमर्चितरङ्गनाथः श्रीरङ्गनाथमखवानुदभूद्द्विजेन्द्रः ॥

अस्मत्पितामहपितुः प्र(च)पितामहः श्रीनारायणाख्यविबुधस्तु ततो बभूव
यो जैमिनेरपरमूर्तितया प्रसिद्धः चक्रे निबन्धनमसौ विधिदर्पणाख्यम् ॥

तस्यात्मजस्सर्वगुणोपपन्नः श्रीविश्वनाथाभिधया प्रसिद्धः ।
काश्यां समाराध्य च विश्वनाथं लेभे सुतं सोऽपि च विश्वनाथः ॥

परेतषड्गर्भशुचा नितान्तक्रान्तान्तरङ्गे सति विश्वनाथे ।
तस्यात्मजौ द्वौ प्रबभूवतुः श्रीबलाच्युतावानकदुन्दुभेर्वा ॥

सौभ्रात्रमैत्रसुभगत्वभिषक्त्व(क्त)मत्वैस्तौल्यं स्वयोर्मम पितामहयोस्समीक्ष्य ।
तावश्विनावसहमानधियावमी(ती)व दस्रौ पुराप्यभवतां पुनरेव दस्रौ ॥

दस्रौ स्वात्मदूषकौ, "दस्रो घनोपले वर्षे चाश्विके स्वात्मदूषके" इति विश्वः ।

चन्द्रशेखरसोमशेखरनामधेययुतावुभा-
वागमागमवाग्झरीहरिभक्तिमुक्तिपुरस्सरैः ।
दत्तवित्तपसर्परा‍ट्शुकवामदेवमुखानघान्
जेतुमेव विचेरतुर्भुवि शेखरांशुमगाविव (?) ॥

कृते धन्वन्तरिर्वैद्यस्त्रेतायां तु पतञ्जलिः ।
द्वापरे शन्तनुरभूत् तिष्येऽस्मिन् मत्पितामहः ॥

पतञ्जलेर्वैद्यप्रशंसा शताननविजये ब्रह्माण्डपुराणे—

परासुं पतिमुद्वीक्ष्य शताननगदाहतम् ।
सीता तमानयाञ्चक्रे महावैद्यं पतञ्जलिम् ॥ इति ।

शन्तनोर्वैद्यत्वं महाभारते—अम्भो(म्बो)पाख्याने वर्णितम् । शन्तनुर्भिषजां वर इत्यारभ्य ।

श्रीचन्द्रशेखरबुधस्तु निजे कलत्रे पुत्रप्रदव्रतसमर्चितलोकमित्रे ।
प्रेमास्पदं बहुमुखोद्गतवाग्विभूतिं भव्यं कुमारमनघं जनयाम्बभूव ॥

काणादं कलयन् श्रुतीर्मुखरयन् पातञ्जलं संपिबन्
शारीरं परिशोधयन् कपिलवाग्योगान् समुज्जृम्भयन् ।
काव्यान्याकलयन् रसान् कबलयन् मन्त्राब्धिमुद्वेलय-
न्नाक्रीडत्यनुवासरं मम पिता श्रीवेङ्कटेशाभिधः ॥

* * * *

कोल्लूरिवंशकलशोदधिपूर्णचन्द्रश्रीवेङ्कटेश्वरबुधादथ सोमदेवी ।
पातिव्रताभिधसुभूषणमावहन्ती सा सोमशेखरसमाख्यमजीजनन्माम् ॥

साङ्गालङ्कारजालं सरसबुधजनाह्लादसम्पादमूलं
विद्योतद्रीतिसालं समुचिततरमाधुर्यवल्यालवालम् ।
भक्त्या श्रीनन्दबालं प्रति रचितमिदं प्रोल्लसच्छ्लोकजालं
भूयस्या एव भूयाद्भुवि भृतयशसस्सत्कवीन्द्रा मुदे वः ॥

* * * *

श्रुतिकल्पतरुस्रस्तं शुकवक्त्रात् स्रवन्मधु ।
पिबन्तु रसिकास्सम्यक् श्रीमद्भागवतं फलम् ॥

* * * *

अथ तत्रभवान् सत्यवत्यात्मजः स्वात्मारामोऽपि लोकानुग्रहवशात् भारतव्यपदेशेन निखिलनिगमार्थं प्रदर्श्य, कलिसमयसमुषितशेमुषीविशेषमानुषोपकाराय निखिलनिगमशाखिशाखाप्रपञ्चं प्रपञ्चयन् विभज्य पैलादिभ्योऽन्तेवासिभ्यः ।

* * * *

रक्षितमानुषजातमपि जाङ्गलिकजालाभिरक्षितं परीक्षितमुपसङ्गम्य तेनेत्थं संप्रार्थितो बभूव ।

* * * *

इत्युर्वरावरगिरस्सदयावलोकमाकर्ण्य तद्गतमना मुनिवर्यसूनुः ।
स्मृत्वेन्दिरापतिमनन्तमजं पुराणमाचष्ट सात्वतमिदं निखिलागमार्थम् ॥
अवधारय सौभद्र सुभद्रश्रवसः कथाम् ।
वक्तारं पृच्छकं श्रोतन् या पुनात्यवनीपते ॥

* * * *

Colophon :

इति श्रीकोल्लूरिवंशकलशोदधिसुधाकरश्रीवेङ्कटेश्वरसूनुना विरचिते चम्पुभागवते निगमकल्पपादपाभिधाने प्रथमः स्कन्धस्समाप्तः ॥

अस्ति त्रिविष्टपनिविष्टविशिष्टसम्पदावासभूरनुगुणा मधुरेति नाम्ना ।
श्रीभोजवंशभवभूपतिराजधानी मोक्षप्रदा च हरिभक्तिरिवेष्टदात्री ॥
एनां पुराणनगरीमरिवीरवारकारामरातिदरदाद्रिसमानसाराम् ।
कान्तां मधो कथमहीधवमाधवोऽपि दोष्णा ररक्ष सुचिरं पुरुवंशकेतुः ॥
श्रीमाधवादथ यदुर्यदुवंशकेतोः दौहित्रगोत्रभिदरातिपरार्तिहेतुः ।
आसीच्चिरात् कुरपि यद्भुजहिण्डमाना तापं जहौ विषखराहिनिवासजातम् ॥

* * * *

अतिपरुषविषविनिर्दूषितभुजङ्गमाङ्गनाकरालकरवालवित्रासितवाहितशूरसेनः शूरसेनो नाम राजा समाविर्बभूव ॥

* * * *

Colophon :

इति श्रीदेवब्राह्मणपदकमलरजःकणशेखरेण राजशेखरेण विरचिते भागवतचम्पूप्रबन्धे श्रीकृष्णसुधार्णवसमाख्ये दशमकल्लोले प्रथमस्तरङ्गः ॥

हेमातरैन्दवविरिञ्चनगेहिनि त्वं मद्भक्तगेहमपि संविश हेलयाद्य ।
गोष्ठे करीषतृणदुर्गमपङ्क्तिले वा वामे समानवसतिः किल ते सपत्नी ॥

End :

खुराघातत्रोटत्कुलशिखरिकूटप्रतिभटैः
लुलायैरुच्छृङ्गाहतकुटचयैर्भग्नविगति. ।
तदा केशी राशीकृतपशुकुलः कालजलद-
प्रभं राधानाथं हरिमिव चखादाशु भषकम् ॥
केशिना दश्यमानोऽपि भगवान्न च विव्यथे ।
यथा गजपतिर्दष्टो मायारासभरक्षसा ॥

तदनु पाश्यनवमः केश्यपि स्वक्रोडनिहितेन महितेन समुपेक्षितगदेनेव समेधमानेन चतुर्भुजभुजदण्डेन.

R. No. **2296.**

Paper. $10\frac{3}{8} \times 9\frac{1}{2}$ inches. **Foll.** 48. **Lines,** 20 in a page. **Telugu.** Good

Transcribed in 1916–17 from a MS. of M.R.Ry. Pulavarti Pāpayyagāru of Velampālam, Ramachandrapuram taluk, Gōdāvari district.

दक्षिणामूर्तिनिघण्टुः.

DAKSIṆĀMŪRTINIGHAṆṬUḤ.

Similar to the work described under No. 13270 of the D.C.S. MSS., Vol. XXIII. By Vēṅkaṭēśvara of Yallāpantulu family.

Contains the Ullāsas one to six complete.

Beginning :

यन्मौलावमरापगा विजयते कल्लोलजालाकुला
यद्बोधावनलस्सदा विजयते ज्वालावलीभासुरः ।
यन्मूर्तावचलात्मजा विजयते पुष्पाङ्गचहीनप्रभा
सोऽव्यान्नो जगदद्भुतात्मचरितः शम्भुर्दयासागरः ॥

हित्वा भिषक्त्वपरिपूर्तिकरं निघण्टुं वैद्यो भवेयमिति यो यतते सुलोके ।
दीपं विनान्धतमसापहृतिं चिकीर्ष्यान्मर्त्यस्य यास्यति तुलामपहासबीजम् ॥

यल्लापन्तुलुवंशाब्धिसुधांशुर्वेङ्कटेश्वरः ।
निघण्टुं कुरुते पूज्यं दक्षिणामूर्तिनामकम् ॥

यल्लापन्तुलवेङ्कटेश्वरकृतं वैद्यच्छटाशेवधिं
नामज्ञत्वतमोदिवाकरममुं पूज्यं निघण्टुं पटुम् ।
सन्त्यज्यान्यनिघण्टुजालमपि योऽधीते स भागीरथीं
त्यक्त्वाहो मृगतृष्णिकां मृगयते तृष्णां यया नोत्तरेत् ॥

दोषज्ञा एव दोषज्ञा मत्प्रयासान्महाद्भुतान् ।
विदुर्नान्ये दृशो नारीविलासान्मोहकानिव ॥

अश्वत्थश्च सदाफलश्च स वटः प्लक्षश्च चूतद्वये
लोध्रद्वन्द्वकपित्थबिल्ववरुणश्वेतप्रसर्जार्जुनाः ।
गायत्रीखदिरः कपीतनजपापाठाश्वगन्धामृता
वाशायुग्मफलाभयाकलितरुधात्रीङ्गुदीन्द्राणिका

* * *

एषां क्रमेणाख्या वक्ष्यते—

अश्वत्थश्चलपत्रश्च पिप्पलश्चैत्यपादपः ।
बोधिद्रुमः पवित्रश्च श्यामलश्च गजाशनः ॥

* * *

Colophon:

इति श्रीयल्लापन्तुलवेङ्कटेश्वरविरचिते दक्षिणामूर्तिनिघण्टौ प्रथमोल्लासः ।

End:

वस्त्रमाच्छादनं चेलं नेत्रमम्बरमंशुकम् ।
वासश्च वसनं सत्रं . . . . ॥

नर्तकः कापटस्स्मृतः ॥ उल्लंखण्डमिति प्रोक्तम् । गुडमिक्षुविकारकः ।

गोमूत्रं गोजलं गोम्बु ब्रह्माम्भश्च विरेचनम् ।
गोमयं च पवित्रं च छगणं गोविडित्यपि ॥

Colophon:

इति श्रीयल्लापन्तुलवेङ्कटेश्वरविरचिते दक्षिणामूर्तिनिघण्टौ षष्ठोल्लासः ॥

R. No. **2297.**

Paper. $10\frac{7}{8} \times 9\frac{1}{8}$ inches. Foll. 72. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Puruṣōttama Śāstrigāru of Kalavapūḍi, Gudivada taluk, Kistna district.

निर्णयकौमुदी.

NIRṆAYAKAUMUDĪ.

Foll. 1*a*—71*a*. Foll. 71*b*—72 are left blank.

This treatise on the determination of the proper time for the performance of various feasts and fasts observed in Hindu households is based on authoritative passages quoted from many Śrutis and Purāṇas. It is apparently intended to be of help in the preparation of Hindu calendars. The author is Vēṅkaṭayajvan of Cintalapāṭi family and a resident of Kuṇḍinīpaṭṭaṇa. He has also written a commentary called the Ujjvalā on the Kālāmṛta.

Incomplete.

Beginning:

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्यास्स्युस्तं नमामि गजाननम् ॥

श्रीमच्चिन्तलपाटिवंशशशिना दैवज्ञनेत्रोत्सवा-
नन्दं नाटयता गणेशमनिशं नत्वा मृडानीपतिम् ।

श्रीमद्वेङ्कटयज्वना स्मित(स्मृति)वचःपुञ्जं समाकृष्य त-
त्सारं निर्णयकौमुदी बुधजनानन्दाय सा तन्यते ॥
येनाकारि पुरा मुदे कृतधियां कालामृतस्योज्ज्वला
टीका ज्यौतिषशास्त्रतत्त्वमखिलं सङ्गृह्य निस्संशयम् ।
सोऽयं निर्णयकौमुदीं दशदिशां चास्येषु विस्फूर्जयन्
विद्वत्पुञ्जशिरोमणिर्विजयते श्रीकुण्डिनीपट्टणे ॥

अथेदानीमत्र भगवान् कविरनेकस्मृतिवचननिकरपर्यालोचनासमर्थानां तदर्थमनायासेन जिज्ञासूनां कृतचैत्रादिद्वादशमासेषु ये कालादिनिर्णयास्तान् तत्तन्मुनिवचनपर्यालोचनया(विवरीतुं)तावत्संवत्सराधिपतिनिर्णयमारभते—

तथाहि—

यस्मिन्नब्दे यदा चैत्रे अधिमासो भवेद्यदि ।
अधिमासं परित्यज्य निजचैत्रादिवारपम् ॥
अब्दनाथं प्रशंसन्ति गर्गकश्यपदेवलाः ।
अब्दादिर्यस्मिन्नब्दे तु अधिमासो भवेत्तदा ॥

* * * *

राजादिनिर्णयमाह—

चैत्रादिमेषहरिकर्कटचापयुग्मरौद्रर्क्षतौलिमकरेषु च वासरेशाः ।
राजा च मन्त्रिभटनायकसस्यनाथधान्यार्धमेघरसनीरसपाः क्रमात्(स्युः) ॥

End:

माघशुक्लपञ्चमी मदनपञ्चमीत्युच्यते । तस्यां पूर्वविद्धायां काममाराध्य वसन्तोत्सवारम्भः कार्यः । तदुक्तं पुराणसमुच्चये—

मधुमासे नृपश्रेष्ठ शुक्लायां पञ्चमीतिथौ ।
पुत्रं संपूज्य मदनं वसन्तोत्सवमारभेत् ॥

R. No. 2298.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 60. Lines, 20 in a page. Grantha and Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Jayanti Jōgannagāru of Haṁsavaram, Gōdāvari district

पञ्चाङ्गसरलिः.

PAÑCĀṄGASARALIḤ.

Foll. 1*a*—56*b*. Foll. 57—60 give the contents of the work.

Similar to the work described under R. No. 2106 ante. By Ramēśvara of Bhāradvājāgōtra and son of Brahma whose father was the younger brother of Bāpirāja, equal in every way to his grandfather Bāpirāja of Aliśiṅgarāja family. This last-mentioned Bāpirāja is said to have lived in Kākaraparti village, near Ēlūr (Ellore) fortress on the banks of the river Vāsiṣṭha (a branch of the Gōdāvari), and to have written a commentary on the Hōrāgama and to have been honoured by a chieftain of the name of Mādanna.

Incomplete. In the middle, the meaning of some portions is given in Telugu.

Beginning:

वाणीं विश्वेश्वरं चाहं नत्वा विघ्नोपशान्तये ।
पञ्चाङ्गसरलिं वक्ष्ये दैवज्ञानन्दकारिणीम् ॥
वागीशाद्यास्सुमनसः (. .) तं नमामि गजाननम् ॥
कुञ्जराननमत्यन्ततुन्दिलं सुन्दरस्मितम् ।
कोटीरकोटिविलसच्चन्द्रशेखरं(चूडं) नमाम्यहम् ।
अचिन्त्याव्यक्तरूपाय (. . .) मूर्तये ब्रह्मणे नमः ॥

* * * *

रव्यादिखेचरान् देवान् विरिञ्चिप्रमुखान् गुरून् ।
तत्पत्नीस्तत्सुतान् पौत्रान् भक्त्या नित्यं नमाम्यहम् ॥
श्रीवासिष्ठनदीतटे बुधगणैरेल्लूरिदुर्गे समे
ग्रामे काकरपर्तिनाम्नि रुचिरात्सन्दाख्यसीम्न्युज्ज्वले ।
मादन्नप्रभुसत्कृतोऽस्ति कुशलश्शास्त्रेषु होरागमे
व्याख्याता ह्यलिशिङ्गराजकुलजः श्रीबापिराजाह्वयः ॥
तत्पौत्रः सकलेषु तेन सदृशः श्रीबापिराजाह्वयः
तत्कानिष्ठिकसोदरस्य तनयो ब्रह्माभिधोऽभूद्बुधः ।
भारद्वाजमुनीन्द्रगोत्रतिलको रामेश्वरस्तत्सुतः
पञ्चाङ्गं कुरुते समं प्रतिसमं विद्वत्प्रसादादरः ॥

ज्योतिश्शास्त्रप्रशंसा—

ज्योतिश्शास्त्रं महापुण्यं प्रत्यक्षमपि गोपितम् ।
चन्द्रार्कौ साक्षिणौ तत्र श्रौतस्मार्तादिसाधनम् ॥
वेदस्याङ्गं ज्यौतिषं शास्त्रमेतद्वेदस्यार्थे ब्रह्मवक्त्रोद्गतं तत् ।
अध्येतव्याः सर्ववेदा यथैवं चाध्येतव्यं शास्त्रमेतत्समस्तम् ॥

ज्योतिर्ज्ञानाज्ज्ञायते चायुरादौ आयुर्ज्ञानाज्जायते धर्मबुद्धिः ।
धर्मप्राप्तेः प्राप्यते ब्रह्मविद्या ब्रह्मज्ञानान्मुक्तिरस्तीति जन्तोः ॥

* * * *

अब्दादिकृत्यम्—

अब्दादौ मित्रसंयुक्तो मङ्गलस्नानमाचरेत् ।
वस्त्रैराभरणैर्देहमलङ्कृत्य ततश्शुचिः ॥
प्राङ्मुखोदङ्मुखो भूत्वा दैवज्ञस्सुप्रसिद्धधीः ।
सरस्वतीगणाधीशं संपूज्य श्रावयेत्ततः ॥

अस्मिन् देशे लोकव्यवहारार्थं चान्द्रमानाब्दो ग्राह्यः ।

End:

अभ्यञ्जनस्नानम्—

निषिद्धवारे शुभदं च कर्म अभ्यङ्गमाशौचिविनिर्गमाय ।
दीपावली पूर्वदिने च कुर्यादब्दप्रवेशे मृगपूर्वतिथ्याम् ॥

* * * *

नवोपवीतधारणम्, अशून्यशयनव्रतम्, कुशग्रहणम्, भाद्रपदशु ३ षोडशोमाव्रतम् ॥

R. No. **2299.**

Paper. 10¼ × 9¼ inches. Foll. 46. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. V. S. Narasiṁhācariyar of Villiyambākkam, Chingleput district.

(*a*) **पुरुषसूक्तभाष्यम्.**

PURUṢASŪKTABHĀṢYAM.

Foll. 1*a*—23*b*. Fol. 24 is left blank.

A commentary on the Puruṣasūkta hymn described under No. 200 of the D.O.S. MSS., Vol. I, Part 2: by Raṅgarāmānuja.

Complete.

Beginning:

नारायणं ततो ध्यायेदेकाग्रः श्रद्धयान्वितः ।
. . . . वारं नारायणमनामयम् ॥
भक्त्या षोडशभिस्सम्य . . . . रैर्यथोचितम् ।

श्रीपराशरः—

दद्यात् पुरुषसूक्तेन यः पुष्पाण्यप एव वा ।
अर्चितं स्याज्जगदिदं तेन सर्वं चराचरम् ॥

प्रसङ्गात् पुरुषसूक्तभाष्यमपि लिख्यते—

यतः प्रपञ्चसंभूतिविभूतिपरिभूतयः ।
पुरुषाय नमस्तस्मै परस्मै विस्मयात्मने ॥

तं प्रणम्यादिपुरुषं जगतामादिकारणम् ।
दुर्ज्ञानं पौरुषं सूक्तं व्याकरोमि यथामति ॥

श्रीपाद्मपुराणे—

इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते ।
अतः श्रुतिभ्यस्सर्वे(र्वा)भ्यो बलवत्समुदीरितम् ॥

इदं पुरुषसूक्तं हि यजुष्यष्टादशर्चकम् ।
ऋग्वेदे षोडशर्चं स्यात् पञ्च वाजसनेयके ॥

सामवेदे तु सप्तर्चं तथैवाथर्वणेऽपि च ।
वेदेषु याजुषं वेदमवलम्ब्य वदाम्यहम् ॥

* * * *

सहस्रशीर्षा पुरुषः । सहस्रशब्दोऽनन्तवचनः । सहस्राणि शिरांसि सहस्राण्यक्षीणि सहस्रं पादा यस्य सहस्रशीर्षा सहस्राक्षस्सहस्रपादुक्तः । शीर्षञ्छन्दसीति शिरश्शब्दस्य शीर्षन्नादेशः ।

गीयते हि—अनन्तबाहूदरवक्त्रनेत्रमिति । पादशब्द उपलक्षणार्थः ।

End:

अस्मिन् प्रसङ्गे सकलवेदान्तेषु कारणत्वेन ब्रह्माक्षरशिवशम्भुपुरुषहरिदेवतादिसामान्यशब्देन प्रतिपादितस्य विशेषाकाङ्क्षया तत्तच्छब्दसमभिव्याहारेण नारायणं सविशेष इति प . . . . . र्यन्तापेक्षितार्थनिर्णयाय नारायणानुवाके क्रियते । लिङ्गं बलीयस्तदपीत्यस्मिन्नधिकरणे भगवान् भाष्यकारो रामानुजमिश्रो बहुभिर्न्यायकलापैरेवमुदीरितवान् ।

Colophon:

इति श्रीरङ्गरामानुजस्वामिविरचितं पुरुषसूक्तभाष्यं सपूर्णम् ।

(*b*) पुरुषसूक्तभाष्यम्.

PURUṢASŪKTABHĀṢYAM.

Foll. 25*a*—36*a*. Fol. 36*b* is left blank.

By Raṅganāthabhaṭṭa. Similar to the above.

Complete.

Beginning:

ऋषिच्छन्दोदेवतादीनुक्त्वा सूक्तमवतार्यते— सहस्रशीर्षा पुरुष इति । सहस्रं शिरांसि यस्य सहस्रशीर्षा (शीर्षन्) छन्दसीति शिरश्शब्दस्य शीर्षन्नादेशः । सहस्रशब्दोऽनन्तवचनः । तथा गीयते—अनन्तबाहूदरवक्त्रनेत्रमिति सर्वान्तर्यामिताश्रुतेः । यद्वा(पुरि)शरीरे शयनात् पुरुषः । शकारस्य सवर्णव्यत्ययेन षकारः । यद्वा पुरु[ष]शब्देनब्दो बहुपरः । षण दाने, वनषण संभक्तौ । बहुदानात् पुरुषाणां भजनाच्च पुरुषः ।

* * * *

सहस्राक्षः सहस्रनेत्रः सहस्रपाच्च एवंभूतः पुरुषो भूमिं भूम्यादिलोकजातं वृत्वा आवृत्यापि दशाङ्गुलमत्यतिष्ठत् ।

End:

सङ्कर्षणसंहितायाम्—

यथा पुरुषसूक्तं तु सर्ववेदाद्विशिष्यते ॥ इति ।
तस्माद्भज त्वं शरणं हरिं मोक्षप्रदायिनम् ।
मोक्षं दातुमशक्तांस्तान् त्यज त्वमितरान् सुरान् ॥ इति ।

Colophon:

. . . . गलसंभूतस्य . . . .
रङ्गनाथभट्टस्य कृतिषु पुरुषसूक्तभाष्यं समाप्तम् ॥

. . . . शतो व्याप्तिरीरिता ।
द्वितीयया चास्य विष्णोः कालः . . . च्यते ॥
विष्णोर्मोक्षप्रदत्वं च कथितं च तृतीयया ॥

* * * *

तं यज्ञमिति मन्त्रेण सृष्टियज्ञस्समीरितः ॥
अनेनैव तु मन्त्रेण मोक्षश्च समुदाहृतः ।
तस्मादितीत्थं जानाति स हि मुक्तो भवेदिति ॥

Colophon:

पुरुषसूक्तभाष्यं संपूर्णम् ॥

(c) श्रीसूक्तभाष्यम्.
ŚRĪSŪKTABHĀṢYAM.

Foll. 37a—44b.

A commentary on the Śrīsūkta described under No. 17 of the D.C.S MSS., Vol. I, Part 1: by Gōvindarāja of Kauśikagōtra and disciple of Śaṭhakōpadēśika.

Complete.

Beginning:

शठरिपुदेशिककरुणापूरपरिप्राप्तसर्वशास्त्रार्थः ।
कौशिकगोविन्दार्यः कलयति विवृतिं श्रियस्तु सूक्तस्य ॥

अस्य श्रीसूक्तस्य हिरण्यगर्भ ऋषिः, चतुर्थीपञ्चम्योस्त्रिष्टुप् छन्दः, श्रीर्देवता, श्रीसमाराधने विनियोगः ।

तत्र तावत् बोधायनः—

अथातः श्रीसूक्तकल्पं व्याख्यास्यामः, चान्द्रायणं चरित्वा सहस्रं जपेत् । सिद्धो भवति । अथ पुष्टिकामः उत्तरफल्गुन्यां पञ्चमीयोगे केवलायां वोपोषितो महाव्रीहितण्डुलैश्चरुं पयसि श्रपयित्वा ।

* * * *

तत्र प्रथमं तावत् श्रियः पतिं सर्वेश्वरं प्रति श्रीसमागममर्थयते ।

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥

जातं स्वतस्सिद्धं वेदो धनं यस्य स जातवेदाः इति विष्णोस्सम्बन्धि-(म्बुद्धिः)जातवेदसे सुनवाम सोममिति परमात्मसूक्ते प्रयोगात् । हिरण्यवर्णां हितरमणीयवर्णाम् । हितत्वमपेक्षितार्थसाधकत्वम् । रमणीयत्वं प्रीत्यनुरूपत्वम् । सर्वलक्षणसम्पन्नामित्यर्थः ।

End:

विष्णुमनोऽनुकूले । विशिष्य विष्णुमनसः[मत्]प्रिये हे श्रीः त्वत्पादपद्मं मयि मम शिरसि, सन्निधत्स्व सन्निधापय मामाविश्य मम सर्वसंपदो देहीत्यर्थः ।

अथ लक्ष्मीगायत्री—

महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥

शठारिगुरुवर्यस्य चरणाम्बुजरेणुना ।
भक्त्या गोविन्दराजेन श्रीसूक्तविवृतिः कृता ॥

Colophon:

श्रीसूक्तभाष्यं संपूर्णम् ॥

(*d*) **सङ्कर्षणोपनिषत्.**

SAṄKARṢAṆŌPANIṢAD.

Foll. 45*a*—46*a*. Fol. 46*b* is left blank.

An Upaniṣad intended to glorify Rāmānuja. It is stated that Saṅkarṣaṇa, from whom the universe emanated and in whom it dissolves, was no other than Śēṣa (Serpent God) bearing the universe and the author of grammar and astrology and that he was born as Lakṣmaṇa, Balarāma and Rāmānuja.

Complete.

Beginning:

अथ तद्विष्णोमि(रि)ति शान्तिः । अथ सङ्कर्षणोपनिषदुच्यते—

शेषो ह वै वासुदेवात् सङ्कर्षणो नाम जरव आसीत् । सोऽकामयत प्रजाः सृजेयेति । ततः प्रद्युम्नसंज्ञं मन आसीत् । तस्मादहङ्कारनामानिरुद्धः । ततो हिरण्यगर्भोऽजायत । तस्माद्दश प्रजापतयो मरीच्यादयः स्थाणुदक्षकर्दमप्रियव्रतोत्तानपादवायवोऽप्यजायन्त ।

End:

तदेतद्वेदानां रहस्यं तदेतदुपनिषदां रहस्यमेतदधीयानस्सर्वक्रतुफलं लभते, शान्तिमेति । मनःशुद्धिमेति, सर्वतीर्थफलं लभते, य एवं वेद, देहबन्धाद्विमुच्यते देहबन्धाद्विमुच्यते । इत्येवोपनिषत् ।

Colophon:

इति सङ्कर्षणोपनिषत् समाप्ता ॥

R. No. **2300.**

Paper. 10¾ × 9¼ inches. Foll. 94. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. V. Bhāṣyācāriyār of Kaḍalmaṅgalam, Chingleput district.

(*a*) **द्राह्यायणसूत्रापरप्रयोगः.**

DRĀHYĀYAṆASŪTRĀPARAPRAYŌGAḤ.

Foll. 1*a*—10*b*.

Deals with the procedure relating to the ritualistic ceremonies to be performed after death in connection with a Sāmavēdin.

Complete.

Deals with the following topics :—

१. दशदानमन्त्राः.	४. श्राद्धोपयुक्तोपचारवाक्यसङ्ग्रहः.
२. पितृमेधमन्त्राः.	५. अभिश्रवणमन्त्रप्रकारः.
३. प्रत्याब्दिकश्राद्धमन्त्राः.	६. महाब्राह्मणवाक्यानि.

Beginning :

द्राह्यायणसूत्रापरप्रयोगः.

दशदानमन्त्राः—

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मे स्यादतश्शान्तिं प्रयच्छ मे ॥
सर्वसस्याश्रया भूमिर्वराहेण समुद्धृता ।
अनन्तसस्यफलदा मत्पापं सा व्यपोहतु ॥

* * * *

अथ पितृमेधमन्त्राः—

योऽस्याग्निरजुहुतो मांसकामस्सङ्कल्पयते यजमानमांसं जानातु हविषे सादिताय स्वर्गं लोकं प्रेतमिमं नयतु । वातास्ते वान्तु पथि पुण्यगन्धा मनश्शुभागात्रशुभानुलोमाः ।

* * * *

Colophon :

इति प्रत्याब्दिकश्राद्धमन्त्राः । प्रयोगतिलके श्राद्धमन्त्रः समाप्तः ॥

End :

एनस एनसोऽवयजनमसि मधुश्चुन्निधनं भवति परमस्यान्नाद्यस्यावरुद्ध्यै परमं वा एतदन्नाद्यं यन्मधु प्रजापतेर्वा एतौ स्तनौ यद्घृतश्चुन्निधनं च मधुश्चुन्निधनं च यज्ञो वै प्रजापतिस्तमेताभ्यां दुग्धे यं कामं कामयते तं दुग्धे । ततस्सेतुसाम ॥

Colophon :

आहत्याभिश्रवणं सम्पूर्णम् ॥

(*b*) **प्रयोगतिलकः.**

PRAYŌGATILAKAḤ.

Foll. 10*b*—91*a*.

Similar to the above. The work is based upon Vāmanakārikā, Gautama Dharmasūtra and its commentary the Mitākṣarā, and other authoritative works. By Vīrarāghavācārya, a Sāmavēdin, of Vaṅgipura family and a disciple of Raṅganātha. The author was the grandson of Vīrarāghavadēśika whose grandfathar's name is given as Śrībhāṣya Rāghavācārya. They lived at Raṅgasamudram (Kaḍalmaṅgalam, Chingleput district).

Complete in Khaṇḍas one to seven.

Beginning :

श्रीमद्वेदशिरोगुरूक्तिनियतैस्तैश्च सूत्रादिभिः
कृत्याकृत्यविवेकपूर्वसुमनोनिष्ठाप्रतिष्ठापकम् ।
वन्देयाश्रितपारिजातमनिशं श्रीवेणुगोपालकं
श्रीमद्रङ्गसमुद्रनाथमपि तं श्रीरङ्गनाथं गुरुम् ॥
श्रीभाष्यराघवाचार्यं पितामहपितामहम् ।
पितामहं च तं वन्दे वीरराघवदेशिकम् ॥
श्रीमान् स देशिकवरो मम रङ्गनाथः श्रीवीरराघवगुरुश्च पितामहो मे ।
कारुण्यनीरविसरैरमलैः कटाक्षैः पायात्सदा तदुपदर्शितसत्पथं माम् ॥
प्रणम्य सामगाचार्यानपि सामप्रवर्तकान् ।
द्राह्यायणं सूत्रकृतं गौतमादीन्मुनीनपि ॥
छन्दोगानां विशेषेण तद्द्राह्यायणसूत्रिणाम् ।
पितृमेधाद्यनुष्ठानक्रमबोधाय सङ्ग्रहात् ॥
साधुभिस्सन्नियुक्तेन तत्कारुण्यावलम्बिना ।
वीरराघवदासेन प्रयोग इह लिख्यते ॥
अत्र प्रमाणं सूत्रं तद्भाष्ये वामनकारिका ।
तथा गौतमधर्मश्च तद्व्याख्या च मिताक्षरा ॥
द्वैपायनप्रयोगश्च धर्मशास्त्राणि कानिचित् ।
पर्यायसामगाचार्यैः परमैकान्तिशेखरैः ॥
तस्मात्सर्वेऽपि विद्वांसः कृपया वीतमत्सराः ।
अनुगृह्णन्त्विमं ग्रन्थं प्रयोगतिलकाह्वयम् ॥

अत्र तावत्प्रतिनियतसूत्रोपजीविवामनकारिकापक्षदूषणपूर्वं तत्कारिकानन्तर-
भाविप्रतिनियतसूत्रभाष्यकारः सङ्कल्पोदकुम्भधारणाज्याहुतिगोत्रनिर्देशमन्त्रोहसा-

पिण्डचश्राद्धाग्नौकरणतन्त्रविषयादिष्वन्यथाभिप्रायं सूत्रस्य प्रकल्प्य व्याचख्यौ ।

* * * *

तत्तद्द्रव्याभावात् आब्दिकान्तकरणविषये एकोद्दिष्टमेव कार्यम् । तेषां पार्वणाविधानं नास्त्येव ॥

Colophon:

इति श्रीरङ्गसमुद्रच्छन्दोगवङ्गिवंश्यश्रीभाष्यराघवाचार्यवंशजवीरराघवकृते प्रयोगतिलके प्रथमः खण्डः ॥

End:

अङ्क्ष्वाभ्यङ्क्ष्वानुलिम्पेति मन्त्रविकारः—

अञ्जनतैलगन्धपात्राण्यपि दक्षिणतः अवाङ्मुखं निदध्यात् ॥ इति ।

एवमेव सूत्रभाष्यवामनकारिकाशीय्याग्रन्थपुरुषोत्तमभट्टीयग्रन्थपङ्क्तिः । अतः प्रयोगतिलकोक्तप्रकारेण अञ्जनाभ्यञ्जनगन्धपात्रेषु तिस्रस्तिस्रो दर्भपिञ्जूलीः निधृष्याहृत्य पिञ्जूलीनवकमेव निदध्यादिति स्वरसतः प्रतीयते । पिञ्जूलिर्नाम अन्यदर्भबद्धसाग्रसप्तदर्भपुञ्जः प्रादेशमात्रः ॥

Colophon:

इति श्रीमद्रङ्गसमुद्राग्रहाराभिजनशिरोमणिना छन्दोगवङ्गिवंश्यश्रीभाष्यराघवाचार्यवंशजेन श्रीवीरराघवाचार्येण विरचिते प्रयोगतिलके सप्तमः खण्डः ॥ समाप्तश्चायं ग्रन्थः ॥

(*c*) रङ्गसमुद्रेशस्तोत्रम्.

RAṄGASAMUDRĒŚASTŌTRAM.

Fol. 91. Foll. 92—94*a* give the contents of the Prayōgatilaka. In fol. 94*b* it is stated that the MS. has been compared with its original.

A eulogy on God Vēṇugōpāla, a form of Viṣṇu worshipped at Raṅgasamudra (Kadalmaṅgalam).

Complete.

Beginning:

अथ श्रीमद्रङ्गसमुद्रनाथवेणुगोपालस्तोत्रम्—

श्रीमान् (. . .) सदा हृदि ॥

पर्य्यायसाम (. .) वन्दे वङ्गिकुलाधिपम् ॥
श्रीमद्रङ्गसमुद्रेशं श्रीशं कारुण्यभूषणम् ।
वन्दे श्रीवेणुगोपालकृष्णं गीतामृतप्रदम् ॥
श्रीभूम्यादिसमस्तदिव्यमहिषीभूषायुधाद्युज्वल-
श्रीमत्याप्तसमस्तकामपरिषत्संसेवितस्तत्पदे ।
तादृक् श्रीः कृपयास्मदादिपरिषत्संरक्षणायागतः
श्रीमद्रङ्गसमुद्रनित्यवसतिः श्रीमान् स जीयाच्चिरम् ॥

End:

यो गोगोपकुलं जुगोप गणशो गोवर्धनागं धरन्
लीलामानुषवेषधारणचणः सप्ताब्दबालो बली ।
चिक्रीडात्मजवत्सरूपधरणात् संमोहयन्नप्यजं
तच्छ्रीरङ्ग(समुद्रनाथचरणाम्भोजं प्रपद्येऽ)निशम् ॥
कुर्वन् स्वप्नमुखेन दिव्यपुरुषे मत्पूर्विकेऽनुग्रहं
नित्यं वस्तुमिहागतोऽसि करुणावाराशिरस्मत्कृते ।
तं त्वां रङ्गसमुद्रवङ्गिकुलराट्च्छ्रीभाष्यरघ्वीट्स्तुतं
श्रीमद्रङ्गसमुद्रनाथ हृदये भक्त्या सदा भावये ।
एतद्भक्तपराधीनभगवद्गुणभूषणम् ।
श्रीमद्रङ्गसमुद्रेशस्तोत्रं हृद्यं भवेत्सताम् ॥

Colophon:

समाप्तम् ॥

R. No. **2301.**

Paper. $10\frac{4}{8} \times 9\frac{1}{8}$ inches. Foll. 56. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. obtained through the Sub-Magistrate of Kovvūr, Kistna district.

On fol. 56*b* it is stated that this has been compared with the original MS.

आत्मपुराणम्.

ĀTMAPURĀṆAM.

A summary in verse from the Advaitic standpoint of the Upaniṣads: by Śaṅkarānanda, disciple of Ānandātmapūjyapāda.

Herein the Bṛhadāraṇya, the Śvētāśvatara and the Kāṭhaka Upaniṣads are summarized. The work is also called Upaniṣatsārārthaprakāśa and deals with the following :—

६. जनकयाज्ञवल्क्यसंवादः.	८. श्वेतसन्न्यासिसंवादः.
७. याज्ञवल्क्यमैत्रेयीसंवादः.	९. यमनाचिकेतसंवादः.

Contains the Adhyāyas six to nine, of which the sixth wants the beginning.

Beginning :

एवमात्मा महाराज सर्वसाधनवर्जितः ।
देशकालादिकं विश्वमेक एव भवत्ययम् ॥
शयनादुत्थितो यद्वत्स्वाप्नं विश्वं न पश्यति ।
एवमात्मात्मविज्ञानादिदं विश्वं न पश्यति ॥
एवमुक्तस्तदा राजा याज्ञवल्क्येन धीमता ।
मनसा चिन्तयित्वेत्थं नापश्यद्गुरुदक्षिणाम् ॥
दारपुत्रसमेतं मां राज्यसेनादिसंवृतम् ।
याज्ञवल्क्याय चेदेवं दास्यामि गुरुदक्षिणाम् ॥

* * * *

Colophon :

इति श्रीमत्परमहंसपरिव्राजाचार्यानन्दात्मपूज्यपादशिष्येण शङ्करानन्दभगवता विरचितोपनिषद्रत्ने आत्मपुराणे बृहदारण्यकयाज्ञवल्कचकाण्डसारार्थप्रकाशे याज्ञवल्क्यजनकसंवादो नाम षष्ठोऽध्यायः ॥

इति याज्ञवल्क्यजनकसंवादो नाम षष्ठोऽध्यायः ॥

End :

आख्यानमुक्तवानेतत् कठस्त्रैवर्णिकान् प्रति ॥
अपौरुषेयवचसां यदिदं ते मयेरितम् ।
गुरुसेवाकृते ज्ञानं देवसेवाकृते फलम् ॥
द्वयोस्सेवैकतन्त्रेण ततो विघ्नैर्विवर्जितः ।
गुरोर्विद्यामवाप्नोति शिष्यः कुशलभावदाम् ॥
कठ एवमुवाचादौ शिष्यान् विद्यार्थिनः पति ।
तित्तिरिश्च महात्मा यो ब्रह्मविद्यामनेकधा ॥
उवाच शिष्यसंघेभ्यो नानाख्यानसमन्विताम् ॥

Colophon:

इति श्रीमदुपनिषद्रत्न आत्मपुराणे शङ्करानन्दस्वामिविरचिते काठकोप-निषत्सारार्थप्रकाशे यमनाचिकेतसंवादो नाम नवमोऽध्यायः ॥

तद्व्याख्यानपङ्क्तिः—

द्वयोः गुरुदेवयोः सेवारूपेण(ए)केन प्रधानेन तन्त्रेण साधनेन । कुशल भावप्रयोजिकां विद्यां निर्विघ्नः शिष्यो लभते इत्यर्थः । तन्त्रं शास्त्रे करणे चेति हैमः ॥

आत्मपुराणं संपूर्णम् ॥

R. No. **2302.**

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 38. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Garimalla Sōmayājulugāru of Kōṭipalli, Gōdāvari district.

निदानप्रदीपः.

NIDĀNAPRADĪPAḤ.

Foll. 1*a*—36*b*. In foll. 37—38*a* the contents and pages of this work are given. Fol. 38*b* is left blank.

On the diagnosis of various ailments found scattered in Bāhaṭa's work. The author is Śaṅkara.

Complete.

Beginning:

रूक्षोष्णतीक्ष्णकटुतिक्तकषायमन्नं चिन्ताविरेकमधुजागरलङ्घनानि ।
यूषाश्च मद्यमनवं वमनव्यवायव्यायामयानकबलानि कफक्रियास्स्युः ॥
नत्वा भवानीभवयोश्शरीरं सन्ध्याशरन्मेघसमानवर्णम् ।
वक्ष्ये निदानं गदितामयानामित्थं क्रमादल्पधियां हिताय ॥

आनाहनिदानम्—

आध्मानमत्युग्ररुजं सशब्दं क्रुद्धानिलेनोभयमार्गरोधात् ।
आटोपयुक्तं जठरे यदि स्यादानाहमार्याः परिचक्षते तम् ॥

गण्डमालानिदानम्—

मेदस्था गलकक्षवङ्क्षणतले मान्या दशोः कुर्वते
वार्ताकामलकोपमांश्च कठिनान् गण्डान् स कण्डून्मलाः ।

पच्यन्तेऽल्परुजः स्रवन्ति नितरामुद्यन्ति नश्यन्त्यलं
दूर्वेव क्षयवृद्धिभागिति नृणां सा गण्डमालोपचि ?(रि) ॥

End :

दोषोऽस्ति चित्तमत एव नर(स्य) लोके . . . दृशः परिशुद्धभावाः ।
स्वीकुर्वतेऽत्र गुणमेव जलं विहाय दुग्धं यथा भजति दुग्धजले च हंसः ॥
चेतोहारि सुभाषितं खलु मुखप्राप्तं तथैवोद्यतं
याति क्षीरमपि . . . . तं प्रायो विषं वा भवेत् ।
येऽन्येषां प्रथयन्त्यणुं गुणमपि प्रध्वस्तदोषात्मनां
साधूनां समदर्शनाय सरसः प्रोक्तः प्रबन्धो मया ॥
बहुलतमम[व]बोधध्वान्तम . . . (प्र)तिफलितपदार्थः स्यान्निदानप्रदीपः।
अयमधिक(वि)शीर्णान् वाहटप्रोक्तरोगान् द्रुततरमवगन्तुं शङ्करेणाभ्यधायि ॥

Colophon :

इति निदानप्रदीपिकायां सर्वरोगीनदानं संपूर्णम् ॥

R. No. 2303.

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Bhagavati Kāśinātha Śāstri of Kōṭipalli, Gōdāvari district.

विधिविवेकः.

VIDHIVIVĒKAḤ.

Foll. 1*a*—18*a*. Fol. 18*b* gives the contents of the work. Foll. 19 and 20 are left blank

An explanatory treatise giving the characteristics of the three kinds of commandments : by Rāmēśvara, son of Subrahmaṇyasūri. The author follows Kumārila's Tantravārtika. The date, Śaka 1780 (1857 A.D.) given at the end, apparently indicates that of the composition of the work.

Complete.

Beginning :

सिन्दूरशोणवसनं शीतांशुस्तबकचुम्बितकिरीटम् ।
कान्तासमानवेषं कामेशं मनसि भावये सततम् ॥

आसितकचमायताक्षं कुसुमशरं कूलमुद्वहत्कृपार्द्रम् ।
आदिमरसाधिदैवतमन्तः कलये हराङ्कवासि महः ॥
पतितः कृपणो मूकः पूज्यो दाता च वावदूकतरः ।
यत्कृपया तं वन्दे गुरुचरणद्वन्द्वमर्थसिद्धिकरम् ॥
विधिस्वरूपमज्ञात्वा न स्याद्धर्मस्य निर्णयः ।
अतस्सुखेन तात्सिद्ध्यै यत्नं कुर्वे यथामति ॥

विधिस्त्रिविधः—अपूर्वविधिः, नियमविधिः, परिसङ्ख्याविधिरिति। एतेषां लक्षणानि वार्तिके—

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्ते परिसङ्ख्येति गीयते ॥ इति ।

अथ विधिरत्यन्तमप्राप्ते इत्यत्र सप्तमी यदि वैषयिकी तर्ह्यधिकरणसप्तम्यवान्तरभेद एव । तथाहि—सप्तम्यधिकरणे चेति सूत्रेणाधिकरणत्वे वाच्ये सप्तमीत्यर्थो निष्पन्नः । तच्चाधिकरणत्वं त्रिविधमौपश्लेषिकं वैषयिकमभिव्यापकं चेति । तत्रौपश्लेषिकमवच्छिन्नाधेयताकम् । यथा वृक्षे कपिसंयोग इति ।

End:

एवं सति वार्तिककारोपरि विधिरसायने यानि दूषणानि तेषां निरवकाशत्वेऽपि दीक्षितचरणैर्यल्लिखितं तत् शिष्यपरीक्षार्थमेवेति शिवम् ॥

यत्कृपालेशमात्रेण रचितेयं सुधीमुदे ।
सा प्रीणात्वनया कृत्या न्यस्तेयं तत्पदाम्बुजे ॥
शिशवो निजशक्त्यदर्शनात्प्रग्रहीतुं निपतन्ति वारिजम् ।
अहमप्यगृहीतशक्तिको विधिसंशोधनजातसंभ्रमः ॥
खवारणाद्रिरसाशाके मार्गशीर्षे गुरौ ।
चतुर्थ्यां काशिकापुर्यां विश्वभर्तुः कृपावशात् ॥
विधिर्विवेकसंज्ञोऽयं समाप्तो नाव(बाल)बोधकः ।

Colophon:

इति श्रीजैमिनीयपारावारतरणधुरीणसुब्रह्मण्यचरणसूरिसुतरामेश्वररचितो विधिविवेकस्समाप्तः ॥

R. No. 2304.

Paper. 10¾ × 9⅝ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Bhagavati Kāśinātha-śāstri of Kōtipalli, Rāmachandrapuram taluk, Gōdāvari district.

शब्दकौस्तुभव्याख्या—प्रभा.

ŚABDAKAUSTUBHAVYĀKHYĀ : PRABHĀ.

Foll. 1a–19a. Fol. 19b contains information regarding the owner of the original MS. Fol. 20 is left blank.

A commentary on the Śabdakaustubha of Bhaṭṭōjidīkṣita; by Pāyuguṇḍa Vaidyanātha, pupil of Nāgēśa.

Contains the first Āhnika of the first Pāda in the first Adhyāya. Incomplete.

Beginning:

आनन्दकन्दं मुनिहृन्मिलिन्दं स्वच्छन्दगोविन्दपदारविन्दम् ।
वन्दे सुरेन्द्रादिदातद् (मरालबृन्दं) दीनादिशाहं (?) रविनन्दनन्दम् ॥
वैद्यनाथः पायुगुण्डो नत्वा नागेश्वरं गुरुम् ।
व्याख्यां प्रभाख्यां तनुते कौस्तुभस्य स्वबुद्धये ॥

प्रारिप्सितग्रन्थनिर्विघ्नपरिसमाप्त्यर्थं कृतं भगवदादिनत्यात्मकं मङ्गलं शिष्याशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति—विश्वेश्वर(श)मित्यादिना। तत्रादौ व्यापकत्वेन स्वेष्टदेवतात्वेन च भगवतस्तदाह— विश्वेशमिति । सर्वनियन्तृत्वात् विश्वेशत्वम् । सच्चिच्छब्दौ । तदाश्रयपरौ। आनन्दोऽस्यास्ति इति व्युत्पत्त्या अर्श आद्यजन्तेन नपुंसकेन आनन्दमित्यनेन ब्रह्मोच्यते । तस्य चिता सह कर्मधारयं कृत्वा पुनस्समासः ।

* * * *

शब्दकौस्तुभमिति ; तदाख्यमित्यर्थः । अत्रापि भाष्याब्धिवत् समासो बोध्यः। शब्दशब्दः योगेन तत्प्रतिपादकग्रन्थपरः । ननु कैयटादिप्राचीनग्रन्थाध्ययनेनैवार्थप्रतिपत्तौ किमनेनेत्यत आह – परिभाव्येति ।

End:

वैदिकैकदेशमात्रमिति षष्ठीतत्पुरुषः कर्मधारयो वा। कर्णेभिरित्यादीत्यर्थः । अतएवैकदेशेत्युक्तिरग्रे छन्दसीत्युक्तिश्च। व्याकरणान्तरेष्विवेति ; कलापादिप्रोक्तष्वित्यर्थः । पारित्याग इति । इहेत्यस्यानुषङ्गः ॥

Colophon:

इति श्रीमत्पायुगुण्डोपनामकवैद्यनाथभट्टकृतायां कौस्तुभव्याख्यायां प्रभाख्यायां विषयनिरूपणं समाप्तम् ॥

अथ व्याकरणस्य साक्षात्परम्परया च प्रयोजनं वक्तुमुक्तं विषय(निरूपण) मित्यत्रार्थान्तरतादि निरासितुं ततश्शङ्कते— स्यादेतदित्यादिना चेदित्यन्तेन । तत्र लौकिके आह—गौरित्यादिरीति ।

* * * *

ततच्छब्दविषयकत्वामिति। अनुव्यवसाये व्यवसायविषयशब्दविषयकत्वेऽपि उक्त-रूपतत्त्वस्याभावादाह—इदमिति इति शिवम् ॥

R. No. **2305.**

Paper. $10\frac{7}{8} \times 9\frac{1}{2}$ inches. Foll. 122. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. acquired through the Sub-Magistrate of Kovvūr, Kistna district.

कात्यायनश्रौतप्रयोगः.

KĀTYĀYANAŚRAUTAPRAYŌGAḤ.

Foll. 1*a*—121*b*. Fol. 122*a* gives the table of contents with the number of pages of the work. Fol. 122*b* is left blank.

On the details of ritualistic procedure to be observed by the followers of Kātyāyana school in connection with the performance of sacrifice. The author salutes Laksmīpati, Gōpāla, Digambara, Bhāskararāja, Śrī Krṣṇa, Pāpēśvara, Mannār and others in the genealogy of teachers.

Complete. Contains the following subjects :—

१. दीक्षणीयेष्टिः.
२. कृष्णाजिनदीक्षा.
३. प्रायणीयेष्टिः.
४ सोमक्रयणप्रयोगः.
५. आतिथ्येष्टिः.
६. प्रवर्ग्योपसदौ.
७. अग्निप्रणयनम्.
८. सुत्याहः.
९. सवनीयपशुतन्त्रम्.
१०. द्विदेवत्यप्रचारः.
११. माध्यन्दिनसवनम्.
१२. तृतीयसवनम्.
१३. यज्ञपुच्छम्.
१४. अवभृथेष्टिः.
१५. उदयनीयेष्टिः.
१६. पयस्येष्टिः.
१७ उदवसानीयेष्टिः.
१८. अत्यग्निष्टोमः.
१९. उक्थ्यसंस्था.
२०. षोडशीसंस्थाप्रयोगः.
२१. अतिरात्रप्रयोगः.
२२. असोर्यामप्रयोगः.
२३. प्रवर्ग्यविशेषः.

२४. यूपैकादशिनीपश्वेकादशिनीपद्धतिः.
२५. शुल्बसूत्रम्.
२६. शुल्बाध्यायभाष्यम्.
२७ वाजसनेयामावास्यानिर्णयः.
२८. जीर्णारणिप्रायश्चित्तम्.
२९. आतुरसंन्यासविधिः.
३०. आहिताग्नीनां ग्रहणनिर्णयः.
३१. तन्तुमतीष्टिहोत्रम्
३२. पृष्ठोपविधानम्.
३३. वैश्वदेवपर्व.
३४. वरुणप्रघासः.
३५. अवभृथेष्टिः.
३६. अनीकपतेष्टिः.
३७. सान्तपनीयेष्टिः.
३८. गृहमेधीयेष्टिः.
३९. दर्वीहोमः.
४०. क्रीडिनीयेष्टिः.
४१. महाहविः.
४२. पित्र्येष्टिः.
४३. क्षमापणम्.
४४. शुनासीरीयतन्त्रम्.

Beginning :

नमस्सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायणशङ्करात्मने ॥
ध्येयस्सदा सवितृमण्डलमध्यवर्ती नारायणस्सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥
वन्देऽहं मङ्गलात्मानं भास्वन्तं वेदविग्रहम् ।
याज्ञवल्क्यं मुनिश्रेष्ठं जिष्णुं हरिहरप्रभुम् ॥
जितेन्द्रियं जितक्रोधं सदा ध्यानपरायणम् ।
आनन्दनिलयं वन्दे योगानन्दं मुनीश्वरम् ॥
त्रयीसुसंवित्तिविवेकनिर्मलास्समग्रसंश्रेयसि सिद्धिहेतवः ।
समस्तशास्त्रार्थसुतत्त्वबोधका जयन्ति कात्यायनपादपांसवः ॥
शिक्षाकरं दीक्षितसङ्घयुक्तं दीक्षागुरुं रक्षितयागसारम् ।
शिक्षासमेपेतसमानशिष्यं लक्ष्मीपतिं श्रौतनिधिं नमामि ॥
नमस्ते शारदादेवि काश्मीरपुरवासिनि ।
त्वामहं प्रार्थयिष्यामि विद्यादानं तु देहि मे ॥
सदा स्वाचारसम्पन्नं श्रीगोपालात्मजं परम् ।
दिगम्बरं तद्भ्रातृंश्च वन्दे सद्गुरुमादरात् ॥
सर्वज्ञज्ञाय देवाय गोपालगुरवे नमः ।
कायेन मनसा वाचा वन्दे गोपालसद्गुरुम् ॥

श्रीमत्समस्तगुप्तबदरीकेदारसूर्यनारायणयाज्ञवल्क्यकात्यायनगौतमदत्तात्रेयगो-पालदिगम्बरभास्कवरराजेश्वरप्रभुवरश्रीकृष्णलक्ष्मीपतिपापेश्वरश्रीमन्नारुकृष्णपरम्परा-गुरुभ्यो नमः ॥

तत्र वसन्ते शुक्लपक्ष एकादश्यां यजमानः शुचिर्भूत्वा, सिद्धिविनायकपूजां कृत्वा, स्वेष्टदेवतां संपूज्य, दर्भेष्वासीनः—शुभतिथौ ममो . . र्थं सोमेन यक्ष्ये । ज्योतिष्टोमेनाग्निष्टोमसंस्थेन रथन्तरपृष्ठेन रथन्तरसाम्ना गोशतदक्षिणेनाहं यक्ष्ये । प्रतिपत्ति सङ्कल्पावृत्तिः ।

End:

इदं सूर्याय स्विष्टकृद्यागादिकर्मापवर्गान्ते विशेषः । पक्षे सह शाखया प्रस्तरानुप्रहरणम् । परिधिभिस्सहोपवेषं जुहोति । व्यूहने सोमस्य सवितुः सरस्वत्याः पूष्णः शुनासीर्योः सूर्यस्योज्जितिं अग्निस्सोमस्सविता सरस्वती पूषा शुनासीरौ वायुः सूर्यस्तमपनुदन्तु । शेषं पौर्णमासवत् ।

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

अनेन शुनासीरीयपर्वणा हुताशन—भवतु । चातुर्मास्येनेष्ट्वा सोमेन पशुनेष्ट्वा वा ॥

Colophon:

इति कात्यायनश्रौतप्रयोगस्समाप्तः ॥

R. No. **2306.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 36. Lines, 20 in a page. Telugu. Good. Transcribed in 1916–17 from a MS. acquired through the Sub-Magistrate of Kovvūr, Kistna district.

कात्यायनश्रौतप्रयोगः.

KĀTYĀYANAŚRAUTAPRAYOGAH.

Foll. 1*a*—35*a*. Fol. 35*b* gives the contents of the work. Fol. 36 is left blank.

Similar to the above.

Incomplete.

Deals with the following topics :—

१. प्रातरग्निहोत्रीयम्.

२. आगामिसमस्य सायंपक्षहोमविधिः.

३. प्रवासोपस्थानम्.
४. अन्वारम्भणेष्टिः.
५. पौर्णमासेष्टिपूर्णाहुतिः.
६. दर्शेष्टिपूर्णाहुतिः.
७. पथिकृदिष्टिः.
८. आग्रयणेष्टिः.
९. सूर्यग्रहणप्रायश्चित्तम्.
१०. चन्द्रग्रहणप्रायश्चित्तम्.
११. सोमपूर्वकाधानसङ्कल्पः.
१२. गतसायंप्रातरग्निहोत्रपूर्णाहुतिः.
१३. आग्रयणेष्टिपूर्णाहुतिः.
१४. दर्शेष्टिप्रयोगः.
१५. सान्नाय्यम्.

Beginning:

आधानप्रयोगः—

तत्र वसन्ते कामनया वर्षासु ग्रीष्मे वा । अमावास्यायां कृत्तिकादिनक्षत्रेषु वा यजमानश्शुचिर्भूत्वा सिद्धिविनायकपूजां कृत्वा दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य एवं गुण—शुभतिथौ श्रीमान् गोत्रः रामय्यशर्माहं धर्मपत्नीसमेतः श्रीमतः गोत्रस्य रामय्यशर्मणः धर्मपत्नीसमेतस्य ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं वैतानिकाग्नीनाधास्ये, पत्न्यर्थं पुनस्सङ्कल्प्य मातृपूर्वकमाभ्युदयिकं कृत्वा पुनस्सङ्कल्प्य केशश्मश्रून्वापयित्वा ।

* * * *

इत्याधानप्रयोगः समाप्तः ॥

End:

अग्निर्विष्णुरिन्द्रस्तमपनुदन्तु यमयं न प्रोहामि । सह शा . . प्रस(स्त)रानुप्रहरणम् । परिधिभिस्सहोपवेषं जुहोति । जुहोमि त्वेति । जुहोमि त्वा सुभग . . . श्रवश्यन् इदं सुभगाय न मम । अन्यत्समानम् । इत्यादि शेषं पौर्णमास.

R. No. **2307.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 50. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Garimalla Sōmayājulugāru of Kōṭipalli, Gōdāvari district.

रसतरङ्गिणी.

RASATARAṄGIṆĪ.

Foll. 1*a*—49*b*. Fol. 50*a* contains the name of the owner of the MS. from which this was copied. Fol. 50*b* is left blank.

A treatise on Rasa or poetic sentiments: by Rāmānanda, son of Sāvitri and Dēvanātha.

Complete in eight Taraṅgas. Contains the following subjects :—

१. स्वकीयानिरूपणम्.
२. परकीयाप्रतिपादनम्.
३. सामान्यभेदाख्यषोडशनायिकानिरूपणम्.
४. अष्टविधनायिकानिरूपणम्.
५. त्रिविधनायिकादूतीसखीनिरूपणम्.
६. नायकादिनिरूपणम्.
७. उद्दीपनविभावनिरूपणम्.
८. रसादिनिरूपणम्.

Beginning :

नमः श्रीदक्षिणामूर्तिरूपाय परमात्मने ।
यस्स्वेच्छयैव निगिरत्युद्गिरन् लीलया जगत् ॥

स्वैरं नो स्मितचारुचुम्बनमनायासेन नो भा(व्यते)
नैवान्योन्यविलोकनं न च परीरम्भोऽपि संभाव्यते ।
इत्थं क्लेशवशेन सङ्गमकृते खिन्नं वपुर्भव्ययो-
र्भूयास्तज्जगतां शिवाय शिवयोर्व्यग्रं चिरं चेतसि ॥

मातरपितरौ वन्दे सावित्रीदे . . . . ।
विलसति मत्कृतिरेषा यत्पदकमलप्रकृष्टसद्भक्त्या ॥

अलङ्काराध्वसञ्चारे श्रान्ताभिज्ञश्रमच्छिदे ।
रामानन्दः करोत्येनां कृतिं रसतरङ्गिणीम् ॥

रसेषु मुख्यः शृङ्गारस्तत्र प्राधान्यमागता ।
आलम्बनविभावत्वान्नायिकातो निरूप्यते ॥

स्वकीया परकीया च सामान्या चेति सा त्रिधा ।
स्वकीया भर्तृशुश्रूषारता संरक्षिता स्वयम् ॥

* * * *

Colophon :

इति श्रीरामानन्दकृतौ रसतराङ्गिण्यां स्वकीयानिरूपणबद्धः प्रथमस्तरङ्गः ॥

* * * *

Colophon :

इति श्रीमहोपाध्यायसकलविद्यास्वतन्त्रश्रीदेवनाथात्मजरामानन्दविरचितायां रसतरङ्गिण्यामुद्दीपनविभावनिरूपणं नाम तरङ्गः समाप्तः सप्तमः ॥

End :

विनयो दक्षता त्यागो माधुर्यं प्रियवादिता ।
जनानुरागो वाग्मित्वं शौचं बुद्धिः कुलीनता ॥
स्थैर्यं स्मृतिस्तथोत्साहो यौवनं मान एव च ।
शौर्यं दृढत्वं तेजश्च धर्मशास्त्रार्थकारिता ॥

प्रज्ञा कलाविदिता च नेतृसाधारणा गुणाः ॥

कैशिकीवृत्तिलक्षणम्—

वागङ्गाभरणानां या सौकुमार्येण निर्मिता ।
उल्लसद्गीतनृत्ताढ्या शृङ्गाररसनिर्भरा ॥
निःशङ्कं कैशिकीं ब्रूते तां सौन्दर्यैकजीविताम् ॥

Colophon :

रसतरङ्गिणी समाप्ता ॥

R. No. **2308.**

Paper. 10⅝ × 9⅜ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Garimalla Sōmayājulugāru of Kōṭipalli, Ramachandrapuram taluk, Gōdāvari district.

अनङ्गतिलकभाणः.

ANAṄGATILAKABHĀṆAḤ.

Foll. 1*a*—25*b*. Fol. 26*a* gives particulars of the comparison of the MS. with the original. Fol. 26*b* is left blank.

A Bhāṇa by Raṅganātha, disciple of Viṣṇucittamuni and son of Śrīnivāsārya of Śrīvatsagōtra, disciple of Vāsudēva of the same family. The drama was intended to be staged on the occasion of the festival of god Raṅganātha celebrated in the Caitra month.

Complete.

Beginning :

रुक्मिण्याः प्रणयापराधजनुषा मौनाश्रितायाः दु(रु)षा
कृष्णे कामिनि हारमौक्तिकरुचा कर्पूरचूर्णभ्रमात् ।
चन्द्रालिप्तकुचेन तन्वि वपुषा तप्तं समालिङ्ग मा-
मित्येवं वदति श्रियै भवतु नस्साकूतमन्दस्मितम् ॥

अपि च—

धाता यद्भुजविक्रमेण विजितो धत्ते मुखे भारतीं
वैकुण्ठो वहति स्ववक्षसि रमां यश्चिन्त्यते योगिभिः ।
भिक्षाशी गिरिशोऽपि शैलतनयां पुष्णाति वामाङ्के
तस्याज्ञा सुकुमारसायकभृतो विश्वाधिका वर्धताम् ॥

(नान्द्यन्ते) सूत्रधारः—

सहर्षाश्चर्यम् । सकलसुरवरसमाराधितापरिमितमहिममुनिनिवहमोहनमहनी-

यभिरूप्यमदभरितामरनगरयुवतीसर्वगर्वखर्वीकरणलब्धवर्णलावण्यललितयुवतिजनसञ्चाराञ्चित

*   *   *   *

साङ्गसङ्गीततरङ्गितान्तरङ्गविटविदूषकाद्यङ्गीकृतानङ्गशासना रङ्गनगरी । (समन्तादवलोक्य सपरितोषम्) अहो फलितमस्मन्मनोरथम् । यदिदानीं चतुर्मुखपञ्चमुखषण्मुखशतमखमुखनिखिलसुरमकुटतटमणिकिरणपुञ्जरञ्जितचरणकञ्जस्य, तुङ्गमरुद्वृधातरङ्गशीकरप्रकरशीतवदनपवनापनीयमानोत्सवसञ्चारपरिश्रमस्य मदनागमगन्धिवक्षस्स्थलस्य भुजगपरिवृढभोगपर्यङ्कशयनस्य श्रीरङ्गनाथस्य चैत्रोत्सवयात्राप्रसङ्गेन

*   *   *   *

अस्ति खलु वत्सकुलजलधिकौस्तुभो वत्सकुलवासुदेवचरणारविन्दशेखरश्रीश्रीनिवासार्यतनयो रङ्गनाथो नाम कविः ।

यस्यामनन्ति विधिमच्युतपादपद्मं यद्दैवतं च निगमाचलदेशिकेन्द्रम् ।
यद्देशिकं मुनिवरोत्तमविष्णुचित्तं यद्वाचमद्भुततमां कवयो रसज्ञाः ॥

तस्य कवेः कृतिरनङ्गतिलको नाम भाणो रञ्जयति रसिकानां हृदयम्
यत्रच—

षोडशसहस्रदयितासुरतरसानुभवसार्थजन्मा यः ।
रङ्गपतिरेव जगतां नेता पात्रं भवत्यसौ भगवान् ॥

*   *   *   *

अद्य खलु त्रिभुवनविजिगीषोस्सुकुमारसायकस्य विषमायुधस्य जयोपकरणभूता कामलतायास्तनया मदनमञ्जरी प्रथमार्तवमहोत्सवेन सफलयति सुकृतीनां चक्षुः ।

*   *   *   *

यदसावनङ्गशेखरस्तदुत्सवदिदृक्षया तत्र तत्र तास्ता विलासिनीस्तांस्तान् वयस्यान् सल्लपिष्यंस्तदभिगमनं कर्तुं सत्वरस्तिष्ठति ।

सूत्रधारः—(श्रुत्वा सानन्दम्) त्वर्यताम् २. अहमप्यनङ्गशेखरेणानेन सहितस्तस्या महोत्सवमनुभवामीति निष्क्रान्तः ।

प्रस्तावना ।

End :

तथाप्येतदस्तु (भरतवाक्यम्)—

दम्पत्योर्निरवद्यरागमधुरो नित्यं भवत्वाशयो
मान्यं मन्मथशासनं विजयतां वाणीशमुख्याञ्चितम् ।

भूयादद्य यया च(कृत्स्न)वसुधा निष्कण्टका भूषिता
भूयो नः कृपया श्रियं वितरतु श्रेयः श्रियो वल्लभः ॥
सृष्ट्यादिनात्म्यरसभावननित्यहृष्टो लक्ष्म्या समं त्रिजगतामिह रङ्गधुर्यः ।
सन्तोषयन्नपि सतो निजभूमिरुच्चैः सौलभ्यतो जयतु सर्वजनैकबन्धुः ।

इति निष्क्रान्तास्सर्वे ॥

Colophon :

इति श्रीवत्सकुलतिलकश्रीनिवासार्यसूनोः श्रीरङ्गनाथस्य कृतिष्वनङ्गतिलको नाम भाणस्समाप्तः ॥

R. No. 2309.

Paper. 10¼ × 9⅝ inches. Foll. 42. Lines, 20 in a page. **Dēvanāgarī.** Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Garimalla Sōmayāji Śarma of Kōṭipall., Ramachandrapuram taluk. Gōdāvari district.

श्रृङ्गाररसभृङ्गारः.

ŚṚṄGĀRARASABHṚṄGĀRAḤ.

Foll 1*a*—41*a*. Foll. 41*b* and 42 are left blank.

A kind of drama called Bhāṇa dealing with love topics. It is said to have been enacted at Śrīśaila during the festival of God Mallikārjuna, a form of Śiva The author is Indragaṇṭhi Koṇḍa, son of Nārāyaṇa and grandson of Liṅgaya.

Complete.

Beginning :

पुङ्खानुपुङ्खैरिह शाङ्खिकानां मुखानिलापूरितशङ्खपुङ्खात् ।
निर्यद्भिरम्भोधरघोषधीरैर्ध्वानैर्दिगन्ता बधिरीक्रियन्ते ॥

(पुरोऽवलोक्य)

इह खल्वहो महारजतनिर्मितो महानयं महीवलयमहनीयमहिम्नो महादेवस्य देवस्य प्रासादः सुप्रसादः

* * * *

(नेपथ्ये) अये रसिकरञ्जक, यतः

कैलासं परिहृत्य शैलसुतया साकं गणैश्च स्वयं
श्रीशैलेऽत्र हि मल्लिकार्जुन इति ख्यातोऽस्ति सर्वेश्वरः ।
तत्रैवार्घ(त्सेवार्थ)मिहासते च विबुधा ह्रक्षाश्मवल्ल्यात्मना
भूपालास्सकला द्विजाश्च सकला विद्वज्जनाश्चापि ते ॥

रूपकेणाभिनीतेन केनाप्येषां मनोगतम् ।
एषानन्दाब्धिनिष्यन्दं वेलोद्वेलयितुं तव ॥

(सू)—(उद्यतैककर्णमाकर्ण्य) हन्तैतर्ह्यस्माकं भूयतेस्म मनोरथेन चरितार्थेन । अत एव स्वत एवैषां मनीषिणां परिषत्सत्वरमपास्तसमस्तशब्दान्तरा[त्]परित्यक्तकृत्यान्तरा च मामेव समुद्वीक्षते । तद्यत्किंचिदतिहृद्यमेव रूपकमभिनयामि । किंनामकमेतादृशं रूपकम (ससम्भ्रममुद्यतैकाक्षिभ्रूविभ्रममभ्यन्तरमाभिमृश्य स्मारं स्मारं स्मितं वितत्य सशिरःकम्पं प्रकाशम्) अस्ति खलु

लिङ्गाह्वयो यो जगति प्रसिद्धो द्विजेन्द्रमौलिर्विबुधो महात्मा ।
नारायणं सोऽजनयन्निजार्धाद्वीर्यास्स्वहस्तस्थसुदर्शनं प्राक् ॥

नन्वहो ! ततो नु

अम्बया सहितस्सोऽयं युक्तं नारायणः स्वयम् ।
तं प्रासवानात्मभुवं यस्सरस्वत्यधीश्वरः ॥

नेपथ्ये (सचापलम्)

स्वगुणध्वनिमात्रेण वशीकृतजनो भवन् ।
नारायणात्मजो योऽस्ति तस्य किं नाम कथ्यताम् ॥

सू—(विहस्य) कैर्वा न ज्ञायते तत् । यतः स्वकृतप्रबन्धान्तरान्तिमश्लोक एव सान्वयं स्वनाम निगदितम् । तथाहि

माहेशमानसमहोत्सवनामकोऽयं ग्रन्थोऽन्वबन्धि विबुधेश्वरसेवकेन ।
नारायणार्यतनयेन मयेन्द्रगण्ठिकोण्डाह्वयेन विबुधश्रुतिकुण्डलेन ॥

पुनर्नेपथ्ये (सहर्षोत्कर्षम्)

एवं चोत्फलितमास्माकीनेन भागधेयकल्पभूरुहेण ।

सूत्रधारः—

अभाणि तेन भाणो यस्स्वामोदिरसजृम्भणः ।
पञ्चबाणस्य बाणोऽभूत्सोऽयं रसिकमोहनः ॥

तस्मादहमेतदेव—

शृङ्गाररसभृङ्गारनामकं रूपकं सताम् ।
एषामभिनिनीषामि रिरञ्जयिषया हृदः ॥

End:

(सस्मितं सस्नेहं च) हे युवानौ युवाभ्यां मयि इतः परं यद्विधेयमस्ति तदभिधीयताम् । किं ब्रुवाथ? हे सखे यतस्त(स्त्व)मनङ्गब्रह्मवादी खलु . . . . . इति त्वं न जानीषे किम्?

उपदिश्यावयोर्बुद्धिं छित्वा विश्लेषजं तमः ।
कृतं प्रियतमैकत्वं त्वयानन्दामृतात्मकम् ॥

अत इतः . . . .

तथापि सकललोकानुग्रहार्थमिदमस्तु (भरतवाक्यम्)—

स्त्रीपुंसोभयरूपतैव भुवने भूयात्तयोस्स्थायुकं
चायुर्यौ . . यौवनं च विरहाभावश्च रागो मिथः ।
सेव्यो मन्मथ एक . . . . ग . . .
शृङ्गारश्च रसेषु किं च पुरुषार्थानां तृतीयोऽपि च ॥

तथैवास्त्विति निष्क्रान्तास्सर्वे ॥

Colophon:

इति शृङ्गाररसभृङ्गारं सम्पूर्णम् ॥

The scribe of the original MS adds—

विकारिवत्सरे चैत्रमासे कृष्णचतुर्थिके ।
शृङ्गाररसभृङ्गारं विश्वनाथोऽलिखत्सुधीः ॥

R. No. 2310.

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 24. Lines, 10 on a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS of M.R.Ry. Garimalla Sōmayājulugāru of Kōṭipalli Ramachandrapuram taluk, Gōdāvari district.

लीलादर्पणभाणः.

LĪLĀDARPAṆABHĀṆAḤ.

A Bhāṇa dealing with love topics: by Padmanābha, second son of Lakṣmaṇa and Veṅkamāmbā and grandson of Padmanābha whose father's name was Gaṇapati The author's elder brother was called Subrahmaṇya. The drama was intended to be staged on the occasion of the Caitra festival of God Śaṅkara worshipped at Benares.

Incomplete.

Beginning:

लीलालालसमानसाभिरभितो गोपीभिरन्तःपुरे
व्यालिप्तो मृदुचन्दनेन दिशतु श्रेयस्स मे श्रीपतिः ।
यत्सौन्दर्यमवेक्ष्य कुन्दरदनाः कन्दर्परूपश्रियं
निन्दन्त्यः कुपितेन तेन दलिता मुह्यन्त्यमन्दं शरैः ॥
श्रीमच्छैलसुताननाम्बुजरविः श्रीमान् करीन्द्राननो
वामोत्सङ्गवतंसिता . . विलसद्रामासमालिङ्गितः ।
बालाम्भोरुहबन्धुसुन्दरवपुर्बालेन्दुचूडामणिः
नीलाम्भोरुहदाम्वि(द्द)धातु नितरां लीलां मदीये हृदि ॥
वन्देऽरविन्दनयनादिसुरार्चिताङ्घ्रिं तं देवमद्य तरुणेन्दुकलाकलापम् ।
वन्दारुकामितमहाफलकल्पनायां मन्दारभूज इति यं प्रवदन्ति सन्तः ॥

(नान्द्यन्ते सूत्रधारः)—

चलत्तिमिरचुम्बिताम्बुरुहवैरिबिम्बोल्लस-
च्चकोरमदकालिकोच्चलितचक्रनृत्तक्रमैः ।
दरोदितकपोतकूजितविनिर्भरैस्सुभ्रुवो
जयन्तु पुरुषायितैस्स्मरपदप्रणामायितैः ॥

* * * *

श्रीमदुद्यानवनमालिकानवद्यालङ्करणभिन्नवमल्लिकाभिनवमल्लिकाप्रमुखवल्ली-
निर्मितमञ्जुलवञ्जुलनिकुञ्जपुञ्जरञ्जितमञ्जुमञ्जरी

* * *

भवानीवल्लभनिरन्तरक्रीडाक्रीडितया सर्वेषामपि सर्वपुरुषार्थप्रकाशिका काशिकापुरी।

भगवतो भक्तवत्सलस्य भूतलकमलकर्णिकायमानकाशिकापुराविहारविनोदिनो दिनमणिसहस्रकोटिदीधितिमतः श्रीमतश्शङ्करस्य चैत्रयात्रोत्सवे सुधारसमाधुरी-करणप्रवीणवाणीविलासशालिनां निजमनःशाणकषणनवनवोन्मिषन्निखिलविद्याक्षर-मणिगणघटितकण्ठमालिनां सङ्गीतसाहित्यजुषां विदुषामित एव सभा सुशोभाय नयनयोः प्रभवति ।

* * * *

अस्ति खलु—

हरिकुलजलधीन्दुर्नित्यसाक्षात्कृतश्रीगणपतिकरुणादृक्प्राप्तलोकोत्तरश्रीः।
कविकुलतिलकस्त्रैकालिकार्थप्रवक्ता गणपतिराखिलाशाभूषणीभूतकीर्तिः ॥

पुत्रस्तस्य बभूव निर्मलमतिः श्रीपद्मनाभाभिधा-
चक्षुश्शास्त्रसरित्पतिप्रमथनप्राप्तार्थसारामृतः ।
नित्यं यं निजनामकीर्तनपरं श्रीमान् रमावल्लभो
वात्सल्यात्सनयं पितेव तनयं प्रत्याह सत्याश्रयः ॥

सुतस्तस्य श्रीमान् यजनमुखषट्कर्मनिरत-
स्सुधीर्मर्त्यामर्त्यप्रकटितयशा लक्ष्मण इति ।
सदा यस्संपूर्णार्चितजलधिकन्यासहचर-
प्रसादप्राप्तश्रीसहचरवचःश्रीर्विजयते ॥

तस्य श्रीलक्ष्मणस्य श्रुतिशिखरसुधास्वादनानन्यवृत्तेः
श्रीमत्पुत्रत्रयं तत्तुलितपरशिवस्यात्ततेजस्त्रयाभम् ।
यन्माता श्रीशिवेव त्रिभुवनजनतास्तूयमानापदाना
पातिव्रत्येन नित्यं जगति विजयते वेङ्कमाम्बाभिधाना ॥

सुब्रह्मण्यस्सुगुणजलधिः पूर्वजस्तत्र साक्षात्
सुब्रह्मण्यस्सुनिशितमतिस्सर्वलोकैकविद्वान् ।
सौशब्द्यश्रीसहचरमहायुक्तिवर्षप्रपञ्चे
चञ्चायन्ते परि(भट)बुधा यत्र झञ्झासमीरे ।
नृत्तारम्भविजृम्भमाणपुरभिन्मूर्धस्थितस्वर्धुनी-
तत्तादृग्बहुलोर्मिडम्बरभव(र)श्रीभारतीवैभवः ।
मत्तानेकविपक्षशिक्षणमहायत्तामराचार्यधी-
कृत्तारेश(य)शःप्रकाशितदिशाचक्र(स्सदा) शोभते ॥

श्रीमाञ्छ्रीमदुमार्धदेहकरुणापूर्णाञ्चलप्रेक्षण-
प्राप्तश्रीकवितामृताब्धिलहरीसन्नोपितश्रीकविः ।
शेषाशेषवचोविशेषविलसत्सौरभ्यसौभाग्यभृ-
द्वाक्यश्रीरथ पद्मनाभसुकृती श्रीपद्मनाभोपमः ॥
स प्रत्यग्रकुशाग्रधीवरतरीनिस्तीर्णविस्तीर्णस-
द्विद्याम्भोनिधिरिन्दुसुन्दरयशःश्रीशोभिताशाततिः ।
छन्दःशाखिशिखाभिधेयघनचिद्बोधाभिधाञ्चत्सुधा-
स्वादामोदमहाब्धिमग्नहृदयस्संमोदते सर्वदा ॥

तेनान्तेवसदन्तरात्मकुमुदश्रीसोदरेणादरा-
दानम्रेण हि पद्मनाभविदुषा पद्मेशव(प)त्पद्मयाः ।
मोदाय प्रमदातिलालसहृदां लीलावशान्निर्मितो
लीलादर्पणनामको विजयते कन्दर्पदर्पावहः ॥

स एष सामाजिकहृदयारविन्दानन्दसन्धायकतामधिवसतीति ।

अहो! सदृशी ननु सामग्री समवहिता। यतः—

क्षितिसुरपतिसम्पच्चेयमुच्चैस्सविद्वत्ततिरधिपतिरेष श्रीमतां नर्तकानाम् ।
कविरपि कविराजः श्रोत्रपीयूषदु(सू)क्तिर्जयति मदनलीलादर्पणः सोऽपि भाणः॥

* * * *

संपति लीलाशेखरः श्रीमत्या लीलावत्याः प्रथमनृत्तावलोकनकुतूहलेन तास्तास्सहचरीर्विविधविलासैरुल्लासयन् सत्वरं प्रचरति। मन्दमारुतवर्णनेन प्रस्तुताङ्कुरविधया स एव प्रस्तूयते ।

सूत्र—श्रुत्वा (सोत्साहम्) तथा चेदहमपि सह तेनैव लीलाशेखरेण तामालोकयामीति निष्क्रान्तः ।

इति प्रस्तावना ।

End:

त्रोटीमनोज्ञशुकघोटीगताब्जशरदा(धा) टीमुहुस्समुदय-
त्पाटीरवायुपरिपाटीविधूतवनवाटीप्रसूनरजसा ।
व्याटीकृतं द्विविधशाटीकनत्कनककोटीप्रदं धृतपदं
खेटीव मां मदय चेटीशयोपहितवीटीधरे सदधरे ॥
शृङ्गीक्षुचापधररङ्गीकृतोपवनलिङ्गीभवत्सुमचर-
द्भृङ्गीचयप्रमदभङ्गीमृदुस्वनितसङ्गीतपद्धतिरसौ ।
अङ्गीकृता परमसङ्गीश्वरैरपि कुरङ्गीदृगाप्रणयिनी
किं गीर्भिराभिरिह सङ्गीतमञ्जरि निरङ्गीकरोतु माम् ॥

किं ब्रवीषि । अयि सखे मज्जीवनौषधमधुमथनप्रसाद

R. No. **2311.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 66. Lines, 20 in a page. Grantha. Good

Transcribed in 1916-17 from a MS. acquired through the Sub-Magistrate of Kovvūr, Kistna district.

सन्ध्यादर्पणविवरणम्—सन्ध्याविलोचनम्.

SANDHYĀDARPAṆAVIVARAṆAM : SANDYĀVILŌCANAM

Foll. 1a—65a. Foll. 65b and 66 give the contents of this work.

A commentary on the Sandhyādarpaṇa of Mallēśvarapaṇḍita which work is divided into two Prakaraṇas, the first of which deals in five chapters with the greatness and the means of attaining the Supreme Brahman, and the second of which, called Śōsaprakaraṇa, deals in seven chapters with the conduct and characteristics of the individual worshipper wishing to attain the Brahman.

The commentator is Malla Śāstri of Penninṭi family who is stated to have been a disciple of Kēśavānandasarasvatī, Raghunāthāśrama and Acyutakṛṣṇatīrtha.

Complete in the following Śēṣiśēṣa Prakaraṇas:—

१. शेषिप्रकरणे विषयसाधनम्.
२. शेषिप्रकरणे उपासनाप्रकरणम्.
३. शेषिप्रकरणे उपासनावृत्त्यधिकारप्रकरणम्.
४. शेषिप्रकरणे अहंग्रहप्रकरणम्.
५. शेषिप्रकरणे निर्गुणप्रकरणम्.

१. शेषप्रकरणे आचमनप्रकरणम्.
२. शेषप्रकरणे स्नानप्रकरणम्.
३. शेषप्रकरणे अर्घ्यप्रकरणम्.
४. शेषप्रकरणे उपासनाधिकारप्रकरणम्.
५. शेषप्रकरणे जपप्रकरणम्.
६. शेषप्रकरणे उपासनाप्रकरणम्.
७. शेषप्रकरणे कालप्रकरणम्.

Beginning:

पञ्चवक्त्रगणाधीशं लक्ष्म्यालिङ्गितविग्रहम् ।
अहर्निशमहं वन्दे . . . . ॥
. . . . वन्दे तव पदाम्बुजम् ॥
मदीयायां बुद्धिवृत्तौ सान्निध्यं कुरु सर्वदा ।
पेन्निण्टिवंश . . . . ॥
. . . . . पितामहान् तेषां पितॄन् वन्दे सदारकान् ।
मल्लशास्त्र्यभिधस्सोऽहं सन्ध्योपास्ते . . . गुर्वनुग्रहात् ॥
शेषशेषिपरिज्ञानविच्छेदाद्बहुकालतः ।
विहाय शेषिणः . . . . ॥

. . . . . सुविवेचनपूर्वं बोधयामि जनतां तदुपास्तिम्।
तेन मामुपहसन्ति जना ये . . . . ॥
गुरुर्देवो गुरुर्मन्त्रो गुरुर्भवभयङ्करः ।
गुरुरेव जगत्सर्वं तस्मात् (स्मै श्री)गु(रवे नमः) ॥
मल्लेश्वरपण्डितेन्द्रकृतेन सन्ध्याविधिदर्पणेन ।
सन्ध्यादिदृक्षोः स्पृ . . . . ॥

* * * *

ननु सन्ध्याकर्मण्यर्घ्यप्रक्षेपणं गायत्रीजपः सूर्योपस्थानं चेति त्रितयं समप्रधानम्। तत्राप्यर्घ्यप्रक्षेपणं बलवत्प्रधानं गायत्र्याभिमन्त्रिता आप ऊर्ध्वं विक्षिपन्ति इति तावन्मात्रस्यैव प्राधान्येन विधानादिति कृष्णपण्डितैरर्घ्यप्रक्षेपणस्य प्राधान्यप्रतिपादनात् । तत्रितयस्य पण्डितपामरसाधारण्येन सर्वदेशीयब्राह्मणैरनुष्ठीयमानत्वाच्छेष्यनुष्ठानं नष्टसम्प्रदायमित्युक्तिरयुक्तेति चेन्न।

* * * *

सिद्धमुपासनाया विषयत्वं, तात्पर्यं तु सन्ध्यास्वरूपे ग्रन्थकर्तुः प्रतीयते। अत एवाग्रे वक्ष्यति—अवश्यज्ञेयत्वादिति ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्याच्युतकृष्णतीर्थरघुनाथश्रीमत्के(थाश्रमके) शवानन्दसरस्वतीपूज्यपादशिष्यपेन्निण्टिवंश्यमल्लशास्त्रिविरचितसन्ध्यादर्पणविवरणे सन्ध्याविलोचने शेषिप्रकरणे विषयसाधनं नाम प्रथमावान्तरप्रकरणम् ॥

* * * *

बालैरसावादित्यो ब्रह्मेति, ओमित्येकाक्षरं ब्रह्मेति च वाक्यं पठितव्यमिति ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाच्युतकृष्णतीर्थरघुनाथाश्रमकेशवानन्दसरस्वतीपूज्यपादशिष्यपेन्निण्टिवंश्यमल्लशास्त्रिविरचितसन्ध्यादर्पणविवरणे सन्ध्याविलोचने शेषिप्रकरणे पञ्चमं निर्गुणप्रकरणम् ॥

* * * *

आचमनस्य द्विरावृत्तिविधायकानि सन्ति वचनानि। ग्रन्थकृदनुक्तिस्तु कर्तृविशेषणत्वाभिप्रायेति बोध्यम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्याच्युतकृष्णतीर्थरघुनाथाश्रमकेशवानन्दसरस्वतीपूज्यपादशिष्यपिन्निण्टिवंश्यमल्लशास्त्रिविरचितसन्ध्यादर्पणविवरणे सन्ध्याविलोचने शेषप्रकरणे प्रथममाचमनप्रकरणम् ॥

End:

वस्तुतस्तु नोपस्थानलोपः विगुणं भवेत्तर्हि प्रधानं नापि मन्त्रान्तरेण वैगुण्यपरिहारात् तत्तद्दिगभिमुखस्तत्त . . . . अस्तु वा मन्त्रान्तरं सर्वथा साङ्गं प्रधानमनुष्ठेयमित्यलं विस्तरेण ॥

गूढार्थस्सूचितो(ऽप्य)स्ति शेषो बुद्ध्या विचार्यताम् ।
यत्कृपातः कृतार्थोऽहं गुरवेऽस्मै नमो नमः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्याच्युतकृष्णतीर्थरघुनाथाश्रमकेशवानन्दसरस्वतीपूज्यपाद(शिष्य)पिन्निण्टिवंश्यमल्लशास्त्रिविरचितसन्ध्यादर्पणविवरणे सन्ध्याविलोचने शेषप्रकरणे सप्तमं कालप्रकरणम् ॥

सम्पूर्णश्च सदर्पणस्सन्ध्याविलोचनाख्यग्रन्थः ॥

R. No. **2312**.

Paper. $12\frac{7}{8} \times 4\frac{5}{8}$ inches. Foll. 154. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Ayācitam Gōpāla Śāstri of Pedavāḍapalli in the Gōdāvari district.

श्राद्धकल्पलतिका.

ŚRĀDDHAKALPALATIKĀ.

Foll. 1*a*—148*a*. Fol. 148*b* is left blank. Foll. 149—153 give the contents of the work. Foll. 153*b*—154 are left blank.

A treatise determining the proper time, etc., for the performance of the different kinds of Śrāddha ceremonies, viz., Āmāśrāddha, Hiraṇyaśrāddha, Saṅkalpaśrāddha and Pārvaṇaśrāddha: by Vināyakapaṇḍita, son of Rāmapaṇḍita. The work is said to have been written at the command of King Rūpacandra, son of King Bisāvana of Sahagila family ruling in Sādhāraṇa. The author says that he has followed Gōvindapaṇḍita's work.

Incomplete.

Beginning:

समालम्बे लम्बोदरचरणपङ्केरुहयुगं
यदालम्ब्य स्वैरं विजहति च विघ्नान्धतमसम् ।
स्मरन्तस्सन्तो यन्निरवधिपरानन्दलहरी-
समाक्रान्तस्वान्ता हरिहरविरिञ्चिप्रभृतयः ॥
अपूर्वं तद्वन्दे किमपि रमणीयाकृतिमहो
महिम्ना सर्वस्वं तरणितनयातीरनिलयम् ।
सकेलिप्रोत्तुङ्गस्तनभरविनम्राभिरभितः
परीतं गोपीभिः स्तुतमनिशमिन्द्रादिभिरपि ॥
प्रणयकलहकोपावेशगुप्तप्रसादा
सविनयमनुनीय प्रीतिपूर्वं पुरारिः ।
वदति सकलबीजं किञ्चिदुन्मीलपद्म-
प्रतिमपदसहास्रं पातु गौरीविलासः ॥ (?)
अस्ति प्रशस्तैर्विभवैस्समस्तैस्समस्तभूमण्डलमण्डनं यत् ।
साधारणं नाम पुरं पुरारेर्मुदे मुरारेरपि यद्दिवोऽपि ॥
समजनि जनतायाः प्राणसाधारणेऽस्मिन्
सहुगिल इति नाम्ना कोऽपि वंशः प्रसिद्धः ।
यमधि जनिमिवैकां देवदेवोऽपि विष्णु-
र्भुवनकलनसर्वोऽद्यापि वाञ्छत्यवासः ॥
प्रतापपरितापितप्रबलभूमिपालावली-
शिरोमणिमरीचिभिः प्रविलसत्पदाम्भोरुहः ।
समस्तसुरसुन्दरीसततगीतकीर्तिस्तवा
बिसावनमहीपतिस्समजनि क्षमामण्डले ॥
यत्तेजःपुञ्जतप्ता दिनकररुचयश्शेरते शर्वरीषु
प्रायः पाथोधिमध्ये रजनिकरकला लाञ्छनं बिभ्रतीमाः ।
कीर्त्या यस्याभिभूतास्त्रिजगति गतया भूतलं भासयन्त्योऽ-
भूत्तस्मादस्तशत्रुस्सहगिलतिलको रूपचन्द्राक्षितीन्द्रः ॥
निजकुलजनताचकोरचन्द्रो बुधजनकैरवहृत्प्रबोधचन्द्रः ।
कविकुलकवितासुधाब्धिचन्द्रो जगति जयति नृपस्स रूपचन्द्रः ॥

लक्ष्मीर्यत्करुणाकटाक्षनिवहे पाणौ सुपर्वद्रुमो
वक्त्रे शीतकरः स्मिते नवसुधा क्रोधे च हालाहलम् ।
दृष्टान्तः प्रथमः स विक्रमनिधिर्गाम्भीर्यमर्यादयो-
स्तद्विघ्नः करुणामयेन विहितः पूर्णो हि रत्नाकरः ॥
श्रीरामपण्डितसुतः पण्डितश्रीविनायकः ।
आदिष्टस्तेन तनुते श्राद्धकल्पलतामिमाम् ॥
गोविन्दपण्डितकृतामवलम्ब्यातियत्नतः ।
श्राद्धकल्पलतामेतां कुर्वे तां श्राद्धदीपिकाम् ॥
श्राद्धकल्पलता सेयं परमानन्दकारिता ।
विदुषामर्थसन्देहे विदधातु चमत्क्रियाम् ॥
नो मूलस्मृतयो न चान्यकृतयस्सन्तन्यमाने मया
ग्रन्थेऽस्मिन्नवधीरिताः किमपि (वा) वाक्यं च पौराणिकम् ।
तस्मादत्र बुध (बुधाः)सुधांशुधवले नापाततो दूषणं
देयं बुद्धिबलाद्विचार्य सकलं तत्त्वं ततस्तुष्यताम् ॥

इह खलु धर्मार्थकाममोक्षाणामुपायान्तरसाध्यत्वेऽप्यलसप्रा . . . कलङ्क-पङ्कर्तव्यश्राद्धमात्रस्यैव तत्साधनत्वेन तन्निर्णीयते । तत्रादौ श्राद्धलक्षणम्—

पित्रुद्देशेन श्रद्धया त्यक्तस्य द्रव्यस्य भग्नदेहैः पुरुषैरनायासेन साधयितु-मशक्यत्वादवश्यं ब्राह्मणे . . करणं तच्छ्राद्धम् । अत एव ब्रह्माण्डपुराणेऽपि—

पितॄनुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतम् ।

अत्र दानस्य सत्ता(स्वस्वत्व)निवृत्तिपूर्वकंपरसत्ता(स्वत्वा)पादनरूपत्वेन ब्राह्म-णस्वीकारपर्यन्तो व्यापारो गृह्यते ।

End :

अत्र व्यवस्थामाह—

यदि पञ्चषण्मुहूर्ततिथिस्स्यात्तदा तत्रैवामश्राद्धं शूद्रः कुर्यात् ।
कालात प्रातस्तनादूर्ध्वं त्रिमुहूर्ता भवेद्यदि ।
आमश्राद्धं ततः कुर्याद् द्विमुहूर्तापि वा भवेत् ॥

सङ्कल्पश्राद्धवर्ज्यमाह—

आवाहनाग्नौकरणं स्वधानिनयनं तथा ।
विकिरं पिण्डदानं च सङ्कल्पे परिवर्जयेत् ॥ इति ॥

R. No. 2313.

Paper. 10⅛ × 9⅝ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. acquired through the Sub-Registrar of Kovvūr.

In fol. 28*a* it is stated that the MS. has been compared with the original. Fol. 28*b* is left blank.

कात्यायनश्रौतपद्धतिः.

KĀTYĀYANAŚRAUTAPADDHATIḤ.

On certain details connected with the performance of the Vedic sacrifices by the followers of the Kātyāyana school: by Yājñikadēva, son of Prajāpati.

Contains the Satradvādaśāha complete and the Ahīnadvādaśāha incomplete.

Beginning:

कात्यायनसूत्रपद्धतौ सत्रात्मकद्वादशाहः—

द्वादशाहे ज्योतिष्टोमधर्मा भवन्ति । द्वादशाहो द्विविधः । सत्रव(म)हीनश्च । यत्र विधिवाक्ये आसते उपयन्तीत्येवंविध आख्यातशब्दः श्रूयते तत् सत्रम् । यत्र यजत इति शब्दः श्रूयते सोऽहीनः । तथा सत्रे यावन्ति सौत्यानि अहानि भवन्ति तेषां मध्ये आदिममहरन्त्यं चातिरात्रसंस्थं भवति । इतराणि यथोपदेशमहानि भवन्ति । अहीनेषु चोपरिष्टादेवातिरात्रो भवति नादौ . . . तत्र सत्ररूपो द्वादशाहो ब्राह्मणानां समानकल्पानां सर्वेषामेकं फलं कामयमानानां पृथक् पृथक् नानाफलं कामयमानानां वा सप्तदशप्रभृति चतुर्विंशतिसङ्ख्यानामाहिताग्नीनामिष्टप्रथमयज्ञानां यजमानानां भवति ।

* * * *

अथ सर्वपक्षसाधारणः सत्ररूपे द्वादशाहे कर्तुर्विशेषो लिख्यते—द्वादश दीक्षाः द्वादशोपसदश्चात्र भवन्ति द्वादशसुत्याश्च । तस्यारम्भकालः । काठके—

चैत्रिकस्य सप्तमीं सत्राय द्वादशाहाय(अ)हीनाय वा दीक्षते फाल्गुनिकस्येति लौगाक्षिरिति ।

* * * *

Colophon :

इति श्रीत्रिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतेन या(ज्ञिक)देवेन कृतायां कात्यायनसूत्रपद्धतौ सत्रात्मको द्वादशाहः समाप्तः ॥

अथाहीनात्मकद्वादशाहः—

अथाहीनात्मकद्वादशाहो विधीयते । तत्रैको यजमानो भवति । द्वौ बहवो वा त्रिप्रभृत्यनियतसङ्ख्या बहवोऽपि परार्धपर्यन्ता यजमाना भवन्ति । ऋत्विजस्तु यजमानव्यतिरिक्ता एव । एको द्वौ बहवो या अहीने यजेरन् ।

End :

बहुयजमानके सर्वं सत्रवत् चतुर्धाकरणं भवतीति विशेषः । कर्कमते ब्रह्मपिन्वाहोत्रोहो भवति, नास्माकं मते । बर्हिषिकरणस्याध्वर्युकर्तृकत्वात् । एकयजमानपक्षे सर्वे मन्त्रा अग्निष्टोमवदेव पठनीयाः । अत्र द्वादशाहेऽहान्युच्यन्ते । प्रथमं प्रायणीयाति . . . .

R. No. 2314.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 24. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Śēṣagiri Rao-gāru of Kōṭipalli, Ramachandrapuram taluk.

Foll. 23*b* and 24 are left blank.

प्रमाणपद्धतिव्याख्या.

PRAMĀṆAPADDHATIVYĀKHYĀ.

A commentary on the Pramāṇapaddhati of Jayatīrtha which is described under No. 4803 of the D.C.S. MSS., Vol. X : by Vēdēśatīrtha, a pupil of Raghūttamayati.

Incomplete.

Beginning :

प्रमाणजातैरवबुध्य यस्य सारं पदं त्यक्तभवा भजन्ते ।
जना निजानन्दपदेच्छवोऽलं तं वासवीसूनुमहं प्रपद्ये ॥
श्रीमध्वं यज्ञ(जय)तीर्थराजमपि च श्रीराघवाङ्घ्र्यम्बुजा-
सक्तान्तःकरणान् रघूत्तमयतीनानम्य विद्यागुरून् ।
वेदव्यासयतींश्च पद्धतिय(ग)ताभिप्रायसंवर्णनं
वेदेशस्तनुते यतिगुरुकृपामालम्ब्य धीशुद्धये ॥

इह खलु सुखमेव मे स्याद्दुःखं मनागपि मा भूदिति निखिलापेक्षितमोक्ष-

स्येश्वरसाक्षात्कारमन्तरेणानुदयात्तस्य च वैराग्यादिद्वारा नित्यानित्यवस्तुनिश्चयसाध्यत्वान्नित्यानित्यवस्तुनिश्चयस्य प्रमाणानि विनानुदयात्तेषां च यथावद्विदितानामेव तद्धेतुत्वोपपत्तेस्तत्स्वरूपं यथावज्ज्ञापयितुकामो जयतीर्थचरणः प्रारिप्सितग्रन्थाविघ्नपरिसमाप्त्यादिप्रयोजनाविगीतशिष्टाचारपरम्पराप्राप्तेष्टदेवतानतिपूर्वकं श्रोतृशेमुषीमनुकूलयिष्यन् चिकीर्षितं प्रतिजानीते--प्रणम्येति ।

अत्र भक्तिश्रद्धाद्यतिशयकथनाय प्रशब्दः । तादृश एव हि नमस्कारो भवत्यभिमतसिद्धेरङ्गम् क्त्वाप्रत्यययोगेन च प्रणामरूपमङ्गलस्य ग्रन्थकरणाङ्गत्वं सूचयति ।

End:

अवान्तरवाक्येऽपीति । कर्मकाण्डावान्तरवाक्येऽप्युपक्रमाद्यानुगुण्यसम्भवात् कर्मकाण्डेऽपि वाक्यभेदप्रसङ्ग इत्यर्थः । ननु कर्मकाण्डे स्वर्गकामोऽधिकारी, वेदान्तेषु मुमुक्षुः । स्वर्गकाममुमुक्ष्वोश्च नैकस्मिन् सम्भवो विरोधात् । अतो विरुद्धाधिकारिकमिदं काण्डद्वयं नैकवाक्यतामापद्यत इत्याशङ्क्ते---अधिकारादिविरोधादिति । आदिपदेन फलविरोधो ग्राह्यः स्वर्गमोक्षयोर्न.

R. No. **2315.**

Paper. 10⅝ × 9¾ inches. **Foll.** 28. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Pallapalli Veṅkaṭanārāyaṇagāru of Indupalli, Amalapuram taluk.

विद्वन्मुखभूषणम्, सव्याख्यानम्.

VIDVANMUKHABHŪṢAṆAM WITH COMMENTARY.

A treatise in Advaita-Vēdānta explaining the principles thereof as detailed in the Brahmasūtras: by Vēṅkaṭādri, son of Nṛsiṁhārya of Prayāga family.

Contains the first Adhyāya complete, but without beginning. Contains the following Adhikaraṇas :—

प्राणाधिकरण.
ज्योतिश्चरणाधिकरण.
मनोमयाधिकरण.
अत्रधिकरण.
गुहाधिकरण.
अन्तर्याम्यधिकरण.
भूतयोन्यधिकरण.
वैश्वानराधिकरण.
द्युभ्वाद्यायतनाधिकरण.

भूमाधिकरण.
अक्षराधिकरण.
ईक्षतिकर्माधिकरण.
दहराधिकरण.
प्रजापतिविद्याधिकरण.
अनुकृत्यधिकरण.
अङ्गुष्ठमात्राधिकरण.
देवताधिकरण.
अपशूद्राधिकरण.
कम्पनाधिकरण.
ज्योतिरधिकरण.
आकाशाधिकरण.
सुषुप्त्युत्क्रान्त्यधिकरण.
अनुमानाधिकरण.
पञ्चजनाधिकरण.
सृष्टिवाक्यविरोधपरिहाराधिकरण.
पुरुषकर्त्रधिकरण.
वाक्यान्वयाधिकरण.
प्रकृत्यधिकरण.
अण्वादिवादनिराकरणाधिकरण.

Beginning:

अस्य लोकस्य का गतिरित्युपक्रम्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते ; तथा कतमा सा देवतेत्युपक्रम्य इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहत इति श्रूयते। तत्र किमनयोः श्रुत्योराकाशप्राणपदाभ्यां भूताकाशवायुविकारा(वुपा)स्यत्वेन विवक्षितौ, उतोभयत्रापि ब्रह्मैवोपास्यत्वेन विवक्षितमिति संशये, आकाशप्राणशब्दयोः लोके भूताकाशवायुविकारयोः सिद्धत्वात्तावेवोपास्यत्वेन विवक्षिताविति पूर्वः पक्षः ।

सिद्धान्तस्तु आकाशवाक्यशेषे सर्वाणि वा इमानि भूतान्याकाशादेव समुत्पद्यन्त इति सर्वभूतोत्पत्तिराकाशाच्छ्रूयमाणा ब्रह्मण एवोपपद्यते । तस्य सर्वजगत्कारणत्वात् ।

* * * *

आकाशाधिकरणं प्राणाधिकरणं च पृथगेव निबध्नाति । अथवा

(मू) यस्याश्रयणे वृत्तिरसंकुचिता सर्वशब्दवद्भवति ।
विदुषामाकाशपदं ब्रह्मैवैनं समाश्रयेद्विद्वान् ॥

(व्या) विदुषां वृत्तिरित्यन्वयः । शेषं पूर्वमेव व्याख्यातम् ।

* * * *

Colophon:

प्रथमस्याध्यायस्य प्रथमः पादः ॥

End:

श्लोकेनाध्यायसमाप्तिमाह—

(मू) वेङ्कटाद्रिबुधस्तेने यद्विद्वन्मुखभूषणम् ।
वेदान्तेऽत्रायमध्यायस्समाप्तिं प्रापदादिमः ॥

(व्या) वेङ्कटाद्रिबुधो वेदान्ते विषये यत् विद्वन्मुखभूषणं नाम निबन्धं तेने अत्र विद्वन्मुखभषणे अयमादिमोऽध्यायस्समाप्तिं प्रापत् प्राप्तवान् । अत्र संपूर्णं निबन्धं कृत्वा पश्चाद्विरच्यायं श्लोकः प्रत्यध्यायमन्ते लिख्यत इति तेने(इ)ति भूतनिर्देशः । अत एव तस्य चिरनिर्वृत्तत्वेन परोक्षत्वाल्लिडुपपत्तिः । वेङ्कटाद्रिबुधोऽकार्षीदिति पाठः ।

Colophon:

इति श्रीमहामहोपाध्यायश्रीमदद्वैतविद्याचार्यश्रीमत्प्रयागकुलावतंसश्री मन्नृसिंहार्यवर्यस्य सूनोः वेङ्कटाद्रिभट्टस्य कृतौ वेदान्तविद्वन्मुखभूषणपरिष्कारे प्रथमोऽध्यायस्समाप्तः ॥

R. No. **2316.**

Paper. 10¾ × 9⅝ inches. Foll. 18. Lines, 20 in a page. Grantha Good.

Transcribed in 1916-17 from a MS. of M R.Ry. V S. Narasiṁhācariyār of Villiyambākkam, Chingleput district.

रघुवीरचरितम्.

RAGHUVĪRACARITAM.

Foll. 1*a*—17*a*. Foll. 17*b* and 18 are left blank.

Same work as that described under R. No. 1620 ante, wherein see for the beginning. By Cakravarti Vēdāntasūri of Śrīvatsagōtra.

Wants the beginning in the fourth Act and breaks off in the fifth Act. The present MS. is transcribed in continuation of the portion contained in the MS. described under R. No. 1620.

End:

पर—(सरोषवीरवादम्)

हा हन्त क्षत्रशिक्षाकरणविधिवशादेकविंशत्य . . . .
रध्यक्षत्रव्ययं मामलघु चिरमिहाह्लादयि(ष्य)त्ययं सः ।

कल्पान्तक्रूरसूरारुणकिरणसहस्रानुषङ्गचक्रकान्त-
ज्वालामालानिकायप्रसरणसदृशां . . जटालः कुठारः ॥

तदेहि सर्वतो निरुत्खातिनं भुवमवतराव इति निष्क्रान्तावुभौ रामजामदग्न्यौ ॥

R. No. **2317.**

Paper. 10⅞ × 9⅝ inches. Foll. 62. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. acquired through the Sub-Magistrate of Kovvūr, Kistna district.

कण्वशाखामाहात्म्यम्, सव्याख्यानम्.

KAṆVAŚĀKHĀMĀHĀTMYAM WITH COMMENTARY.

A treatise explaining the importance of the Kaṇvaśākhā or the Vājasanēyasaṁhitā of the Yajurvēda by quoting extensively from the Purāṇas, Itihāsas, Upaniṣads, Smṛtis, etc., and according to Mādhva-siddhānta. The author does not give his name, but in the introductory stanzas salutes Mādhavārya.

Incomplete.

Beginning:

वन्दे विट्ठलमानन्दचित्स्वरूपं रमापतिम् ।
कण्वस्तुतं वाजिरूपं भक्ताभीष्टप्रदायकम् ॥
पूर्वाचार्यगुरून्नत्वा माधवार्यगुरून् तथा ।
धर्मशास्त्रानुसारेण मध्वसिद्धान्तवर्त्मना ॥
उच्यते कण्वशाखाया माहात्म्यं विष्णुतुष्टये ।
निर्मात्सर्ययुता ये तु सज्जनाः शोधयन्त्विदम् ॥

एतेषां स्वरूपमाह—

व्यासः—

धर्मज्ञाः पुत्रिणो मौलाः कुलीनास्सत्यवादिनः ।
श्रौतस्मार्तक्रियायुक्ताः विगतद्वेषमत्सराः ॥

याज्ञवल्क्यः—

श्रुताध्ययनसम्पन्ना धर्मज्ञास्सत्यवादिनः ।
राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः ॥

एतादृशा इदं शोधयन्त्वित्यर्थः । आदौ व्यासावतारे प्रयोजनमाह—व्यासास्त्वष्टाविंशतिसङ्ख्याका इति विष्णुपुराणोक्तेः । किञ्च—धर्मसंस्थापनार्थाय संभवामि युगे युगे इति भगवद्गीतोक्तेः । प्रकृतव्यासावतारे प्रयोजनं किमित्युक्ते तत्र श्रीमद्ब्रह्मसूत्रभाष्यकारैः प्रयोजनमुक्तम् । किमिति ।

गौतमस्य ऋषेः शापात् ज्ञाने त्वज्ञानतां गते ।
सङ्कीर्णबुद्धयो देवा ब्रह्मरुद्रपुरस्सराः ॥
शरण्यं शरणं जग्मुर्नारायणमनामयम् ।
तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ॥
अवतीर्णो महायोगी सत्यवत्यां पराशरात् ।
उत्सन्नान् भगवान् वेदानुज्जहार हरिस्स्वयम् ॥
चतुर्धा व्यभजत्तांश्च चतुर्विंशतिधा पुनः ।
शतधा चैकधा चैव तथैव च सहस्रधा ।
कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये ॥
चकार ब्रह्मसूत्राणि एषां सूत्रत्वमञ्जसा ।

इति आचार्यैरुक्तम्—तथा च कोऽर्थः । चतुर्विंशतिशाखात्मक ऋग्वेदः । एकशतशाखात्मको यजुर्वेदः । सहस्रशाखात्मकस्सामवेदः । द्वादशशाखात्मकोऽथर्वणवेदः । तत्तच्छाखाभेदः तत्तच्छाखाप्रवर्तक ऋषिभेदः, सूत्रभेदस्तु तैरेव वक्तव्यः । एवमेकोत्तरशतशाखात्मकयजुर्वेदविभागकाले ;

भाविवृत्तान्तमाज्ञाय व्यासस्सत्यवतीसुतः ।
दश पञ्चाथ याश्शाखाः सूर्यायोपदिदेश ह ॥

* * * *

यथा शुक्लो यजुर्वेदो वेदानां प्रथमोऽभवत् ।
तथा कात्यायनं सूत्रं सूत्राणामभवन्मुखम् ॥

* * * *

इत्यादित्यपुराणे उत्तरखण्डे तृतीयोऽध्यायः ॥

* * * *

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते बृहदारण्यकभाष्ये पञ्चमोऽध्याया ॥

* * * *

इत्यादित्यपुराणे उत्तरखण्डे याज्ञवल्क्यमहिमानुवर्णनं नाम चतुर्थोऽध्यायः ॥

End:

अयं भावः । पूर्वस्वीकृतेन गुरुणा समे गुरौ समग्रानुग्रहकर्तरि स्वयमेव प्राप्ते सति अवश्यं स्वीकार्यः । न तु तदर्थं प्रयतितव्यम् । तर्हि दोषस्मृतेः का गतिरिति चेत् समगुर्वन्तरस्वीकारे पूर्वस्यानुज्ञा सर्वथा भाव्या । विनानुज्ञया समानपूर्वगुरुपरित्यागविषयं दोषस्मरणम् । सत्यामनुज्ञायामन्यगुरुस्वीकृतिरन्यथा तु नेति विकल्प एवेति यथोक्तं समो.

R. No. **2318.**

Paper. 10¾ × 9½ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Śeṣagiri Raogāru of Koṭipalli, Ramachandrapuram taluk.

मायावादखण्डनपत्रिकाटिप्पणी— भावप्रकाशिका.

MĀYĀVĀDAKHAṆḌANAPATRIKĀṬIPPAṆĪ : BHĀVAPRAKĀŚIKĀ.

Foll. 1*a*—18*b*. Fol. 19*a* gives information regarding the comparison af the MS. with the original. Foll. 19*b*—20 are left blank.

A commentary on the Māyāvādakhaṇḍanapatrikā of Jayatīrtha, which work is described under No. 4836 of the D.C.S. MSS., Vol. X : by Vyāsayati, a pupil of Brahmaṇyapūjyapāda.

Complete.

Beginning:

कमलारमणं नत्वा पूर्णबोधेष्टदैवतम् ।
व्याकुर्वे गहनां मायावादखण्डनपत्रिकाम् ॥

स्पष्टार्थो य इह ग्रन्थः स न व्याक्रियते मया ।
ग्रन्थगौरवभीरुत्वान्न चोद्ग्रन्थो बहूच्यते ॥

मङ्गलाचरणपूर्वकं चिकीर्षितं निर्दिशति— नरसिंहमिति । नरसिंहस्यैव प्रणम्यत्वे को हेतुः— असह्योरुप्रत्यूहतिमिरापहमिति । प्रत्यूहानामसह्यत्वं नाम

प्रारिप्सितपरिसमाप्तिरूपेष्टविरोधित्वाद् द्वेष्यत्वम् । उरुत्वं च तेषां बहुसङ्ख्या-कत्वम् ।

End:

तथा च सर्वोत्तमत्वरूपस्य पूर्णत्वाख्यपूर्णगुणस्य सर्ववेदप्रतिपाद्यत्वे कथ-मिदं सूत्रं प्रमाणीक्रियत इत्याशङ्क्य प्रकारान्तरेण सूत्रव्याख्यानं विवक्षित्वा भाष्यकारेण स्वोक्तार्थसूत्रं प्रमाणीकृतमित्याह—सर्वगुणेष्विति । . . . प्रकर-णार्थमुपसंहरन् तदनुगुणमित्यत्रापि सर्वार्थान् साधयामीत्यन्तेन नारायणोत्त-मत्वस्यैव शास्त्रार्थत्वोक्तिरिति भावः ॥

सान्द्रभक्तिम[क]रन्दार्द्रमधुमानसपङ्कज ।
वसन्तं सततं कंसध्वंसिनं(त्वां भ)जे निजम् ॥

Colophon:

इति श्रीमद्ब्रह्मण्यपूज्यचरणानां शिष्येण व्यासयतिना विरचिता[यां] माया-वादखण्डनपत्रिकाभावप्रकाशिका समाप्ता ॥

R. No. **2319.**

Paper. 10¾ × 9½ inches. Foll. 56. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Sikha Pullayagāru, Viśvēśvara Agrahāram, Pērūr Shivas, Amalapuram taluk, Gōdāvari district.

कुवलयविलासः.

KUVALAYAVILĀSAḤ.

Foll. 1*a*—55*b*. Fol. 56*a* contains the name of the owner of the work from which this was copied. Fol. 56*b* is left blank.

A drama in five Acts composed by Rāyasa Ahōbilamantrin, son of Rāyasa Nṛsiṁhāmātya, and grandson of Cannayāmātya. The plot of the drama is the story of the marriage of Kuvalayāśva and Madālasā. It was intended to be staged on the occasion of the vernal festival of God Nṛsiṁha worshipped on the Vainatēya hill (Ahōbila). The author's father was greatly honored by Śrī-Raṅgarāya, son of Vīra Tirumalarāya, and was his minister; and the work was done at the instance of Śrī-Raṅgarāya.

Complete.

Beginning:

श्रीलक्ष्मीकुचकोकनिर्भरपरीरम्भेण यस्योरसि
श्रीवत्सच्छलतो विभाति सततं कस्तूरिका सञ्चिता ।

शिक्षोदारपराक्रमोऽसुरपतेः प्रह्लादरक्षापटुः
कल्याणानि करोतु वस्स भगवान् लक्ष्मीनृसिंहो हरिः ॥

अपि च—

भोगीन्द्र . . . . भूधृतिचलन्नाभीसरोजोत्पत-
द्धूलीधूसरितं वपुर्मुररिपोरालोक्य मुग्धाशया ।
क्वापूर्वः पटवासकोऽयमधुनेत्यापृच्छमाना मुहुः
लक्ष्मीः सा मम मन्दिरे विहरतात्सर्वप्रदा सर्वदा ॥

* * * *

(नान्द्यन्ते) सूत्रधारः—

(प्राचीमवलोक्य) उदयमयतेतरामखिलमहीभृदुन्नतमौलिलालनीयपादसञ्च-रणशाली भगवानंशुमाली ।

* * * *

(नेपथ्याभिमुखमवलोक्य) मारिष इतस्तावत्, सुविहितानि रङ्गमङ्गलानि । आदिष्टोऽस्मि शिष्टैरष्टादशद्वीपविदितप्रतिष्ठैः

* * * *

वैनतेयाचलोत्तुङ्गशृङ्गशृङ्गाटकशृङ्गारकमहानायकरत्नस्य भगवतो नृसिं-हस्य वसन्तयात्रोत्सवप्रसङ्गेन समागतैः सरससाहित्यसाजात्यसीमाधिकैः सामा-जिकैः । अद्य तावदनवद्यसरसपदबृन्दप्रबन्धप्रयोगेण वयं विनोदनीया इति । तत् किमिति विलम्बनमवलम्बन्ते भरताः ।

(प्रविश्य) नटः—

भाव कीदृशं तादृशसदसोपन्यस्यमानगुणगणानुबन्धव . . . . रसो-द्घाटकं नाटकम् ।

सू—

द्राक्षापाकगुणोत्तरङ्गितपदं प्रख्यातपाञ्चालिका-
वैदर्भीमुखरीतिकं नवकथावैचित्र्यवृत्त्याश्रितम् ।
प्राश्चद्भावरसानुभावललितालङ्कारशृङ्गारितं
काव्यं श्राव्यमनीदृशं यदि वचः कन्था कथं . . . ॥

नटः—कस्य वा तादृशनव्यकाव्यकर्मनिर्माणधुरीणस्य कवेः वाग्विलासो विदुषामुल्लासयति मानसानि ।

सू—(विचिन्त्य) हा परिज्ञातम्; विद्यते खलु निरवद्यमहोदयप्रह्लाद-वरदचरणारुणारविन्दनिष्यन्दमानमानसेन्दीवर . . . . . जान्ववायमूर्धन्यः चन्नयामात्यः—

जयति जगति धीमानेष सौजन्यसीमा
सुजनभरणहेमा सूक्तिसाम्राज्यभूमा ।
दलितरिपुललामा देविराजाब्धिसामा
कृतिरनुपमधामा चन्नयामात्यनामा ॥

तस्य च हृदयनन्दनो रघुनन्दन इव दशरथस्य निजविमलकीर्तिविभाविभासितनिखिललोको निरन्तरमहादानदीक्षाधुरन्धरः सन्ततसन्तन्यमानाग्रहारप्रतिष्ठापदानो वीरतिरुमलरायहृदयारविन्दानन्दसन्दायिगुणबृन्द . . . . मारवीरश्रीरङ्गरायराजचूडामणिसादरवितीर्णसकलाधिपत्यो विभवविजितराजराजो विबुधजनजीवञ्जीवसञ्जीवनराजप्रसादविशदमधुरस्मितानुरञ्जितकरुणावलोकनाविराजिवदनाजीवो रायसनृसिंहामात्य . . . . नायककण्ठीरवः ।

. . . . यन्नयाम्भोधिचन्द्रस्सरसनरमृगेन्द्रः . . . . ।
. . . . सज्जनानन्दसान्द्रः . . . . ॥

अपिच—

केचिन्नव्याग्रहारान् कतिचन कनकान्दोलिकाव्यूहमन्ये
प्राज्यं दुर्गाधिपत्यं कतिचिदुरुमदस्यन्दिनो गन्धनागान् ।
. . . . क्षितिरमणसभां मन्त्रिसिंहे नृसिंहे
सोत्साहं गाहमाने श्रियमखिलजना हर्षवन्तो लभन्ते ॥

तस्य च सहधर्मचारिणी रोहिणीव चन्द्रस्य लोपामुद्रेव मैत्रावरुणेः

* * * *

अतिथिपरिषदम्बा निर्विशेषावलम्बा
नतिनुतिनिकुरुम्बा नन्दितश्रीकुटुम्बा ।
स्वपतिपदवलम्बा सूचितार्याविडम्बा
विदितगुणकदम्बा विश्रुतो . . . . ॥

तयोर्नरयोरतनीयसा तपसा समाहितयोः गौरीगिरिशयोः कुमार इवानवरतमाद्योपलालनचरितो लीलावगतपातञ्जलजलधिपारः, कर्कशतर्कभणितिपारीणः, सरसकाव्यनाटकालङ्कारसङ्गीतप्रमुखानेककलावि . . . . चतुर्विधकवितावतार-

सरणिः, श्रीमद्राजाधिराजराजपरमेश्वरश्रीरङ्गरायमहारायसबहुमानविश्राणितशाश्वतिकमहावैभवतोषिताशेषमनीषिलोको लीलावतीविलासविकासनभावसञ्चारो रायसाहो(बिलामा)त्यभिधानोदारः कुमारः।

नियतमनवगीतानेककाव्यप्रणेता शुभगुणपरिचेता सूक्ष्मशास्त्रप्रमाता।
निजगुरुनतिचेता नीतिलक्ष्मीवरीता खलसाचिवविजेताऽहोबलामात्यनेता॥
रचय रुचिरबन्धैरञ्चितं नाटकं य(त्सरस)मभिनयेयुस्सन्निधौ मे प्रवीणाः।
तव च भुवि लभेतां सूक्तिकीर्ति(ती)प्रतिष्ठामवदादिति नृसिंहोऽहोबिलं स्वप्नदृष्टः॥

* * * *

वीरतिरुमलरायहृदयारविन्दविकासनपतङ्गश्रीरङ्गरायराजचूडामणिर्मुहुर्मुहुरात्मनि स्वप्नचरिताभिनन्दितं रायसाहोबिलमन्त्रिणं सबहुमानमाहूय . . . . हरिनिर्दिष्टां नाटकरचनामादिष्टवान्।

* * * *

सरस्वतीपरिगृहीतनाम्ना तेन रायसाहोबलामात्येन नर्मणा निर्माय कृतिरस्मासु समर्पिता।

दुश्शब्दग्रहनिग्रहैरनिपुणो दुर्वारगर्वोल्लस-
. . . . सामगोचरगुणारम्भप्रियंभावुकः।
सर्वत्र प्रणयी सरोजवसतिप्रौढाङ्गनाकर्षणो-
त्कर्षाहोबलमन्त्रिराजकवितामन्त्रो जरीजृम्भते॥

* * * *

सामायनः—अहमिदानीं सकलनिगमकमलासनेन समुपक्रान्तसप्ततन्तुना गुरुणा कुवलयेशमाकारयितुमाज्ञप्तोऽस्मि।

* * * *

सामायनः—अस्ति खलु समस्तगन्धर्व . . . . . वंजामस्याश्वतरमित्रस्य विश्वावसोः सकलसुरीजनविस्मयपरिदृश्यमानशोभातिशयसौभाग्यजन्मभूमिरभिनवावतीर्णतारुण्यमदालसा मदालसा नाम दुहिता। न(सा)खलु कदाचिदागतेन कलहाभिनन्दिना कर्मन्दिना तत्र . . . . प्रसङ्गेषु वर्णितानन्यसामान्यगुणोदया तदीयश्रवणपदमुपनीता तदाप्रभृति तदध्यासितान्तःकरणतयैव सकलव्यापारपराङ्मुखस्तिष्ठति।

* * * *

अपि नाम सा गन्धर्वराजकुमारी अभिरूपमेनं वरमासाद्यात्मनो महनीयजननफलभाजा भवतु।

* * * *

तदावामेतदीयागमनवार्तां गुरवे निवेदयावः ।

इति निष्क्रान्तौ ॥ शुद्धविष्कम्भः ॥

End:

गालवः—

पश्यन् वाञ्छाफलपरिणतिं साम्प्रतं निर्वृणोमि
प्रज्ञावत्याः फलितमधुना कुण्डलायाः प्रयत्नैः ।
कल्याणश्रीस्त्वयि विजयते कन्यकारत्नलाभात्
भूयः किं वा भवदभिमतं ब्रूहि राजन्यमौले ॥

राजन् किमन्यदस्मात्प्रियम् ॥

गालवः—तथापीदमस्तु भरतवाक्यम् ।

इति निष्क्रान्तास्सर्वे.

Colophon:

इति कुवलयविलासे पञ्चमोऽङ्कस्समाप्तः ॥

R. No. 2320.

Paper. 10¾ × 9½ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. C. Śēṣagiri Raogāru of Kōṭipalli, Gōdāvari district.

षट्प्रश्नमन्त्रखण्डार्थप्रकाशिका.

ṢAṬPRAŚNMANTRAKHAṆḌĀRTHAPRAKĀŚIKĀ.

Foll. *1a*—*14b*. Foll. 15 and 16 are left blank.

A commentary on the Praśnōpaniṣad by Narasiṁha, disciple of Vidyādhikārya, written in accordance with the teachings of Jayārya, the author being apparently a follower of the Dvaita-Vēdānta.

Complete.

Beginning:

वासुदेवं प्रणम्यैनं जयार्योक्तावलम्बनात् ।
षट्प्रश्नोपनिषत्खण्डसत्तत्त्वार्थः प्रकाश्यते ॥

इह हि विविधसांसारिकदुःखदर्शनेन विरक्तस्य शमदमादिमतो मुमुक्षोरधि-

कारिविशेषदुःखनिवृत्तये परमानन्दावाप्तये च वासुदेवं समाज्ञापयितुं षट्प्रश्नोपनिषत्प्रवृत्ता । अत्रादौ विद्याप्रशंसया श्रोतृणां श्रद्धाजननायाख्यायिकामाह—सुकेशा इति । सुकेशा नामतः । भरद्वाजस्यापत्यं पुमान् भारद्वाजः । शिबेरपत्यं शैब्यः । सत्यकामो नामतः । सूर्यस्यापत्यं सौर्यः तदपत्यं सौर्यायणिः । गर्गस्य गोत्रापत्यं गार्ग्यः । कौसल्यो नामतः ।

* * * *

अनृतमसत्यवचनम् । माया वृत्ति स्वेतरादिदोषा न सन्ति तेषामसौ प्रसिद्धः । नीरजः प्रकृतिसम्बन्धरहितः ब्रह्मलोकः परब्रह्मलोकः प्राप्यो भवति ॥

इति प्रथमप्रश्नप्रतिवचनम् ॥

End :

भगवन् त्वं हि नः पिता निरुपाधिकोपकारकः कथं यस्त्वमस्माकमस्मात् अविद्यायाः पारमुत्तरं तीरं तारयस्व तारको हि नामेव कुर्यादिति । एवमाख्यायिकां समाप्य वेदपुरुषः शिष्यशिक्षार्थं प्रवर्तयन् ऋषीन प्रणमति -- नम इति । परमऋषिभ्यः पिप्पलादिभ्यो नमः । आदरात् द्विरुक्तिः ॥

विद्याधिकार्यशिष्येण नरसिंहेन भिक्षुणा ।
चरिता श्रीरामतुष्ट्यै षट्प्रश्नार्थप्रकाशिका ॥

R. No. **2321.**

Paper. 10⅞ × 9⅝ inches. Foll. 24. Lines, 20 in a page. Dēvanagarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Susarla Subrahmaṇyacayani of Mandapēṭa, Gōdāvari district.

साहित्यकण्टकोद्धारः.

SĀHITYAKAṆṬAKŌDDHĀRAḤ.

Foll. 1*a*—22*b*. Foll. 23 and 24 are left blank.

A criticism on the important works of well-known authors in regard to certain grammatical peculiarities connected with nouns, verbs and euphony.

Contains the Pūrvaparicchēda complete and the Uttaraparicchēda incomplete.

Beginning :

संसारमरुसञ्चारतृष्णितानां शरीरिणाम् ।
सु[1]धाकादम्बिनीं वाणीं वीणापाणिमुपास्महे ॥

[1] सुदा कादम्बिनीभूतं तन्महस्समुपास्महे इति पाठान्तरम्.

तत्रादौ सन्ध्यसन्ध्यनुसारेणोदाहरणान्युच्यन्ते —

तद्दर्शनाय विविधा द्विजराजनार्यो नानाविधाश्च विबुधा अपि बाहुजाश्च ।
वैश्यास्तथेतरजना नृपसेवकाश्च अन्ये ययुर्द्रुततरं विधिना विमुक्तम् ॥
सौदामिनी लसति किं जलदे प्रपा(या)ते अस्तं गते शशिनि तिष्ठति चन्द्रि-
का किम् ।

इति चोरपञ्चशतीये बिल्हणः ।

राजन् विभान्ति भवतश्चरितानि तानि इन्दोर्द्युतिं दधति यानि रसातलेऽन्तः ।
धीदोर्बले अतितते उचितार्थवृत्ती आतन्वती विजयसम्पदमेत्य भातः ॥

इति काव्यप्रकाशे ।

* * * *

अत एव कवयः—मन्दमन्दमितरेतरमूचुरिति श्रीहर्षः ; मन्दमन्दमुदितः प्रययौ खम् इति भारविश्चेति दिक् ॥

Colophon :

इति श्रीसाहित्यकण्टकोद्धारे पूर्वपरिच्छेदे सुबन्तप्रक्रिया ॥

अथ उत्तरपरिच्छेदः—

तिङ्प्रत्ययानुसारेण दूषणं भूषणं मया ।
साहित्यकण्टकोद्धारे लिख्यते विदुषां मुदे ॥

कदा भविष्यते वासः कटकेषु महीभृताम्—इति प्रतापरुद्रीये ।

End :

नभं तु नभसा सार्धं तपं तु तपसा सह ।
सहं तु सहसा सार्धं रजेनापि समं रजः ॥ इति ॥

अथ कथम् ?

पिण्डं दद्याद्गया शिर इति वायव्यपुराणे ;
कुण्डलोत्कृष्टगण्डानां कुमाराणां तरस्विनाम् ।
निचकर्त शिरान् द्रौणिर्नालेभ्य इव पङ्कजान् ॥

इति महाभारते । अत्रासुन्प्रकरणे श्रयतेः स्वाङ्गे (शि)रः किच्चेति सूत्रेण सान्तशब्दस्यैवोक्तत्वात् कथं प्रकृते अदन्त इति चेत्, अत्र केचित्—छन्दोवत् पुराणानि भवन्तीति न्याया.

R. No. 2322.

Paper. $10\frac{3}{4} \times 9\frac{5}{8}$ inches. Foll. 50. Lines, 20 in a page. Grantha Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Rēpalli Veṅkaṭanārāyaṇamgāru of Indupalli, Gōdāvari district.

उत्तरकाण्डचम्पूः.

UTTARAKĀṆḌACAMPŪḤ.

Foll. 1*a*—50*a*. Fol. 50*b* is left blank.

A work in prose and verse dealing with the incidents in the life of Rāma which happened after his coronation and which are found narrated in the Uttarakāṇḍa of Vālmīki's Rāmāyaṇa: by Brahmasūri, younger brother of Sūryasudhī and son of Narasamāmbā and Sarvēśvarabhaṭṭa of Carukūri family.

Complete.

Beginning:

आनन्दकन्दलितयच्चरणारविन्दनिष्यन्दमानमकरन्दनिपातपूता ।
दिव्याङ्गनाजनि शिलाप्यभिवन्दनीया वन्दामि तं रघुपतिं पतिमिन्दिरायाः ॥

अथ मुनिजनगमनसमनन्तरं विरचितरचनाविशेषविशेषिताभ्यन्तरं प्रविलस . . . . सभामन्दिरं प्रपद्य मुनिवरगालितानवद्यहृद्यचरितश्रवणजनितानन्दहृदः सभासदः सदयहृदयः कौसलेयः सविनयमनुज्ञाप्यान्तःपुरावासमाससाद ।

* * * *

भो भो भ्रातरः श्रृणुत मद्वचनं मा ब्रूत प्रतिवचनम् । यातुधिरायारिकुलोषितसीतानयनापवादः किल ममान्तर्हृदयं प्रदहति कोटरगतस्तरुमिव दहनः तदयं तदपवादापनोदायोपायः अनुमन्यताम् ।

सीतापि तापसनिवासविलोकनाय मामद्य याचितवती गमनं चिराय ।
तां त्यक्तुमुद्यतमना अहमप्यभूवं कर्मानुकूलरचनस्समयोऽयमासीत् ॥

तद्गङ्गातमसान्तरालगहनं प्रापय्य तां लक्ष्मण
प्रत्यागच्छ समीप एव तमसातीरेऽस्ति वल्मीकभूः ।
चिन्तां मा कुरु दैवमेव बलवन्मन्ये यतो भूसुता-
मग्नौ मग्नतनुं सुरोपनिहितामादाय निन्द्योऽस्म्यहम् ॥

End:

सोऽयं हरिस्तदनु पद्मभवामरर्षिजेगीयमानमहिमा महिमासहायः ।
आनन्दकन्दमनुभूतिविशेषगम्यं वैकुण्ठमन्दिरमवाप्य समुल्ललास ॥

आत्मैक एव परतः पुरतः परो यः त्रैविध्यमाप गुणजाजहरीशभेदात् ।

तत्रापि रावणवधाय कृतावतारः सङ्कीर्तनीयचरितः स हरिर्वि(र्हि)जीयात् ॥

श्रीरामचन्द्ररमणीयगुणानुबन्धं चम्पूप्रबन्धमथ चित्रकथोपबन्धम् ।
शृण्वन्ति येऽनुकथयन्ति विधूतपापास्ते यान्ति दिव्यपदमत्र च भुक्तभोगाः ॥-
अव्यक्तवर्णघटनाप्यपशब्दगर्भा व्यत्यासभागपि पुनः पुनरीरितापि ।
चम्पूरियं . . . . रामचन्द्र मोदाय ते पितुरिवास्त्विह . . . ण ॥

चरुकूरन्वयदुग्धसागरविधुस्सर्वेश्वराख्यः पिता
जननी यस्य नृसिंहनामकलिता सूर्यस्सुधीरग्रजः ।
परमध्युत्तरकाण्डमग्र्यचरितं श्रीरामचन्द्राखिल-
व्यवहारप्रथन समग्रमभवत्तद्ब्रह्मसूरेः कृतौ ॥

Colophon :

इति श्रीचरुकूरिकुलसुधासिन्धुसुधाकरश्रीसर्वेश्वरभट्टसूनुना श्रीनर्समाम्बा गर्भशुक्तिमुक्तामणिश्रीसूर्यसुधीवरानुजन्मना ब्रह्मसूरिणा विरचिते श्रीमदुत्तरकाण्डीयचम्पूप्रबन्धे समग्रमुत्तरचरितम् ॥

R. No. 2323.

Paper. 10¾ × 9⅜ inches. Foll. 24. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. acquired through the Magistrate of Kovvūru, Kistna district.

हौत्रप्रयोगः.

HAUTRAPRAYŌGAḤ.

On the procedure relating to the ceremonies performed by Hōtṛ priests in the different sacrifices, as prescribed for the followers of the Kāṇva Śākhā of the Śuklayajurvēda

Contains the following portions :—

१. पौर्णमासेष्टिहौत्रम्.
२. दर्शेष्टिहौत्रम्.
३. आग्रयणेष्टिहौत्रम्.
४. पथिकृद्धौत्रम्.
५. निरूढपशुमैत्रावरुणम्.
६. पशुहौत्रम्.
७. अग्न्याधानहौत्रम्.
८. अन्वारम्भणीयहौत्रम्.
९. वैश्वानरेष्टिहौत्रम्.

Beginning:

होतरेहीत्युक्ते हौत्रं करिष्यन् सञ्चरेण प्रविश्य अपरेणाहवनीयं प्राङ् तिष्ठन् सन् अध्वर्यो देवता आचक्ष्व तासामानुपूर्वमुच्चैरुपांशुतां च यजमानस्य प्रवरनक्षत्रनामधेयानि च वेदान्ताचार्यदीक्षितहविर्याजी । अध्वर्युः— अग्नये समिध्यमानायानुब्रूहि ।

* * * *

पौर्णमासेष्टिहौत्रं लिख्यते—होतरेहीत्युक्ते हौत्रं करिष्यन् सञ्चरेण प्रविश्यापरेणाहवनीयं प्राङ्तिष्ठन्नध्वर्युप्रेषितो ब्रह्मन्त्सामिधेनीरनुवक्ष्यामि ।

* * * *

Colophon:

भवप्रकृतिपौर्णमासेष्टिहौत्रं समाप्तम् ।

* * * *

Colophon:

इति वाजसनेयान्तर्गतकाण्वीये शुक्लयजुर्वेदाम्नाये निरूढपशुबन्धहौत्रं समाप्तम् ॥

* * * *

Colophon:

वैश्वानरेष्टिहौत्रं समाप्तम् ॥

End:

तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व ।

* * *

य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा । तमद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान् । उपा . . . . हवींषि । वनस्पतिश्शमिता देवो अग्निः स्वदन्तु हव्यं म ।

R. No 2324.

Paper. 10¾ × 9⅝ inches. Foll. 46. Lines, 20 in a page Dēvanāgarī Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Vāḍrēvu Vīrannagāru, Pātakōṭa, Gōdāvari district.

मन्मथाभ्युदयम्.

MANMATHĀBHYUDAYAM.

A drama setting forth the endeavours of Manmatha, the God of Love, to overcome God Śiva by inciting in Him feelings of overpowering love: by Vēṅkaṭēśa. Gaṅgārāmajaṭin, pupil of Nīlakaṇṭha of Bhāradvājagōtra, is mentioned as a contemporary.

Breaks off in the fourth Act.

Beginning :

श्रीहस्ताश्रितयावकाङ्कितपदं श्रीनाथमीडे मणि-
स्पृष्टं विद्युदुदग्रकान्तिचरितं पूर्णेन्दुभापूरितम् ।
स्त्रीपुंसात्मपरस्परेक्षणपरीवादास्पदान्योन्यकं
कान्तं मन्मथजीवनं विजयते मन्दस्मितास्यं महः ॥

अपि च ।

सौवर्णाम्बुजवामदक्षिणतलालङ्कारवाणीरमा-
शिञ्जत्कङ्कणपाणिचामरमरुल्लोलोत्तरीयाञ्चलाम् ।
उत्कण्ठास्मृतपूर्वजन्मसुकृतव्यूहेन्द्रशान्ताकर-
द्वन्द्वाकल्पितवीटिकारसलसद्दन्तच्छदां चिन्तये ॥

अपिच तथा—

सानन्दादितिनन्दनाधिपशिरस्सन्दोहमन्दच्च्यव-
न्मन्दाराप्तमरन्दबिन्दुबिलसत्पादारविन्दद्वयम् ।
गाढालिङ्गनलोलशैलतनयाबिम्बाधरप्रोल्लस-
न्माधुर्यामृतसारसागरसमास्वादोत्कटं भावये ॥

(नान्द्यन्ते) सूत्रधारः—(नेपथ्याभिमुखमवलोक्य) आर्ये यदि नेपथ्यविधानमवसितम्, इतस्तावदागम्यताम् ।

* * * *

सूत्रधारः—आर्ये अद्य खलु सुरतरङ्गिणीतरुशृङ्गारोद्यानमध्यालङ्कारसौवर्णसौधशिखराभरणचिन्तामणिभवनान्तरविराजमाननवरत्नसिंहासनाधिष्ठितपरमशिववामोत्सङ्गोपविष्टश्रीमत्रिपुरसुन्दरीचरणरामणीयकावलोकनाय रत्नमण्टपमध्यासीना सकलकलाधुरीणा पण्डितमण्डली ।

* * * *

उभे—ता णं साणुकंपमवलोएमो (छा) तदेनं सानुकम्पमवलोकयामः। (इति यथोक्तं रूपयतः).

सू—आर्ये तदत्र वेङ्कटेशग्रथितवस्तुना नवेन नाटकेनोपस्थातव्यमस्माभिः। तत्प्रतिपात्रमाधीयतां यत्नः।

* * * *

नटी—जं अज्जस्स रोचइ(छा)यदार्याय रोचते ।

सू —(सभामधिकृत्य)

अहमपि बालो वक्तुं विदुषां प्रायेण शास्त्रचिन्ता स्यात् ।
क्षणमपि भवतु गिरो मे तटित इवाभिज्ञसंसदि स्फुरणम् ॥

(परावृत्य) आर्ये अवधेहि । यतः—

भारद्वाजगनीलकण्ठमधुरोदारस्वनालङ्कृते
धीरा(रो)दुर्गमशास्त्रकाननचये स्वैरं परिक्रीडते ।
नानासंसदुदग्रवादिविबुधस्तम्बेरमत्रासकृ-
द्गङ्गारामजाडिप्रथाचितबुधप्रोच्चण्डकण्ठीरवः ॥

* * * *

नटी—सुमरेदि अज्जो । पुव्वं जेव्व अण्णावइस्सदि मम्महब्भुदयं णाम अपुव्वं णाडयं पयोएण अधिकरीअदुत्ति । (छा) स्मरत्वार्यः । पूर्वमेवाज्ञापितास्मि मन्मथाभ्युदयो नामापूर्वं नाटकं प्रयोगेणाधिक्रियतामिति ।

* * * *

सू—(कर्णं दत्वा, अवलोक्य च ससंभ्रमम्) आर्ये अयं किल मानिशेखरस्यास्मदालापसम्पादितनिजापदानस्मृतिद्विगुणिताभिनिवेशस्य

* * * *

भूतपूर्वोद्वेलमहासेनया सह समागतस्य महादेवविजयोद्यतस्य रतिसहचरस्य शृङ्गारसार्वभौमस्य मदनमहाराजस्य भूमिकामादायेत एवाभिवर्तते शैलूषः । तदावामप्यनन्तरकरणीयाय सज्जीभवावः इति निष्क्रान्तौ ।

प्रस्तावना ।

(ततः प्रविशति यथानिर्दिष्टव्यापारस्सवसन्तो मदनः)

मदनः—(यथोचितमुपविश्य) सखे वसन्त मम पुनरेषा प्रतिज्ञा ।

यावन्नूपुरजालशिञ्जितकलध्वानागराजात्मजा-
लीलावि(भ्र)मधामवामचरणाघातातिभीताक्त(त्म)कम् ।
कामारिं कलयामि दैन्यवचनप्रासङ्गिकप्रक्रिया-
लोलं तावदनन्यजः स्मर इति स्यान्मे विशङ्कं यशः ॥

* * * *

मदनः—तदविलम्बेन सुरासुरनरवरगीयमानः परब्रह्मपदाभिषिक्तो निटिललोचनः सन्नद्धैरस्माभिरभियातव्यः । तदनन्तरकरणीयमनुष्ठीयतामिति ।

End:

अयमयं निर्गतरसशिष्यो गुणाकरः उचितमिदमाश्रितानां तावद्द्वयमपि युक्तमुत्पश्यामः। इति निष्क्रान्तास्सर्वे।

Colophon:

इति मन्मथाभ्युदये तृतीयोऽङ्कः ॥

ततः प्रविशत्यारामगोप्ता मन्दानिलः।

मन्दानिलः—शङ्कामभिनीय, अज्जखु मअणस्स महाराअस्स सैण्णाइ दुग्गाहिगमणट्ठं पड्डिदाइम्।

End:

मदनदासः—मेघाभिनिवेशः, प्रत्युतोपहासहेतुः। यदीयं कनकाङ्गी प्राप्ताया विजयं मुहुः (?)।

ईर्ष्याविशेकषायितापि दधती प्राणप्रियाया दृशौ
यत्सव्यामुवदात्महस्तकमलद्वन्द्वेन केलिक्रमे।
भूयो लोचनयुग्मगोपनविधौ पर्याप्तिहीनौ करौ
जानाना सहचारिणीभिरधुनाहार्यस्मिता दृश्यते ॥

R. No. **2325.**

Paper. 10¾ × 9⅞ inches. Foll. 18. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS of M.R.Ry. Vāḍapalli Sāmbaśiva Dīkṣitagāru, Vēlampālem, Gōdāvari district.

गौतमधर्मसूत्रम्.

GAUTAMADHARMASŪTRAM.

Foll. 1*a*—17*b*. Fol. 18 is left blank.

Same work as that described under No. 1213 of the D.C.S. MSS., Vol. II.

Contains the second Praśna complete and the first incomplete.

R. No. **2326.**

Paper. 10¾ × 9½ inches. Foll. 50. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

वाजसनेयपदकारिकारत्नमाला.

VĀJASANĒYAPADAKĀRIKĀRATNAMĀLĀ.

Foll. 1*a*—49*a*. Foll. 49*b*—50 are left blank.

Same work as that described under No. 3 in the Report on a Search for Sanskrit and Tamil MSS. for 1896-97 by M. Seshagiri Sastri (vide pp. 2, 66 and 67).

By Śaṅkarācārya. But the introduction found there is omitted in this MS.

Complete in 24 Adhyāyas.

Beginning:

इषे त्वेति तु मन्त्रे तु त्रयोदश पदानि वै ।
वेष्टनं त्वेकते च स्याद्विसर्गाणां त्रयो विसृक् ॥
आप्यायध्वं चतुर्थे स्यात् द्विच सप्तविसर्जनाः ।
ध्रुवा अस्मिन्नेकादशमेकवृत्रिसृक्द्विनान् (?) ॥
द्वारस्येकवृतं विसर्गाश्चतुरोऽभवन् (?) ।
पञ्चदशद्वक् द्दरवमावृत्रयं चतुरो विसृक् (?) ॥

* * *

Colophon:

इति शङ्कराचार्यकृतौ वाजसनेयपदकारिकारत्नमालायां प्रथमोऽध्यायः ।

End:

अन्धं तमः पञ्चदश पञ्चवृत्पञ्च विसृताः ॥
सं भूतिं च पञ्चदश्यां चतुरोवृत्तथैककम् ।
त्रयोदश्यां हिरण्मयेन द्वौ वृतौ चैकनान्तकम् ॥
पञ्चविंशतिः पूषन्नेकर्षे वृत्रयं चतुरोद्वयम् ।
वायुरनिलं षोडश्यां वृत्रयं चैकविसृतम् ॥

Colophon:

इति श्रीमच्छङ्कराचार्यविरचितवाजसनेयपदकारिकारत्नमालायां चतुर्विंशोऽध्यायः ॥

R. No. 2327.

Paper. $10\frac{5}{8} \times 9\frac{3}{4}$ inches. Foll. 171. Lines, 20 in a page. Grantha and Dēvanāgarī Good.

Transcribed in 1916-17 from a MS. of Rāja's palace in Cochin.

न्यायकौस्तुभः.

NYĀYAKAUSTUBHAḤ.

Same work as that described under No. 4200 of the D.C.S. MSS., Vol. VIII, wherein see for the beginning. By Mukundapaṇḍita.

Contains the Śabda incomplete.

End:

न च चित्रापदगोपदयोरुभयोरपि चित्राभिन्नगोस्वामी लक्ष्यः, परस्परं तादा त्म्येनान्वयात् व्यपेक्षाप्यक्षतैव । अत एव तत्पुरुषापेक्षयापि बहुव्रीहिर्जघन्य इति प्रवादः । बहुव्रीहावुभयपदस्यैव लाक्षणिकत्वादिति वाच्यम् । बहुव्रीहावेकशेष-द्वन्द्वान्यतरप्रसङ्गात् । समानरूपावच्छिन्नयोरभेदान्वयबोधस्याव्युत्पन्नत्वाच्च । पदे क्वचिदेकदेशान्वयस्यापीष्टतया गोसम्बन्धिलाक्षणिकगोपदार्थैकदेश ।

R. No. **2328.**

Paper. $10\frac{3}{4} \times 9\frac{4}{8}$ inches. Foll. 364. Lines, 20 in a page. Devanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Karra Simhādri Śāstri, Enugulamahāl, Razole taluk, Gōdāvari district.

Bound in two volumes.

तंत्रवार्तिकटीका.

TANTRAVĀRTIKAṬĪKĀ.

Foll. 1*a*—363*a*. Foll. 363*b*—364 are left blank.

A commentary called the Subōdhinī on the Tantravārttika of Kumārilabhaṭṭa described under No. 1554 ante: by Annambhaṭṭa, son of Tirumalārya of Rāghava Sōmayāji family.

Contains from the fourth Pāda of the third Adhyāya to the end of same Adhyāya.

Beginning:

(सू) निवीतमिति मनुष्यधर्मश्शब्दस्य तत्प्रधानत्वात् ॥

निवीतस्य मनुष्यधर्मत्वादिचिन्तायां प्रकरणस्य केन सह विरोधाविरोध-चिन्ता । येन पे (वै)दिक . . . . धर्मत्वस्य लिङ्गात् सर्व-कर्मार्थत्वस्य वाक्यान्मनुष्यप्रधानकर्मधर्मत्वस्यावगतेस्त्रयेण सहेत्यर्थः । प्रासङ्गि-कानन्तराधिकरणद्वयेन . . ग . . . .

प्रकृतस्स एवेत्युक्तम् । शुद्धमनुष्यातिथ्याङ्गत्वपक्षयोः प्रकरणादुत्कर्षात् पक्षान्तरे त्वनुत्कर्षादुत्कर्षानुत्कर्षफलकत्वं वा स एवेत्यनेनोक्तम् ।

End:

सिद्धान्तमुपसंहरति तस्मादिति । . . . . गृह्णाति इतीति । इह तृतीयाध्याये प्रमाणैः श्रुत्यादिभिः षड्भिः कर्मसु शेष(शेषि)भावः सिद्ध इत्य-न्वयः । कथितो बलाबलप्रवेको विवेको येषान्तैः प्रमाणैः । अव गताः सर्वेषां

विरोधरूपा बाधरूपाश्च धर्मा येषां तैः भावधर्मैरिति पाठे सर्वेषां विरोधाभावस्थले भावः सत्तारूपो धर्मो येषान्तैः । श्रुत्या प्रत्यक्षया लिङ्गादिष्वनुमितया कृतः सम्पादितो दृढनिश्चयो मूलान्तरानपेक्षो यैस्तैः श्रुतिलिङ्गादिषु साक्षात्परम्परया प्रमासाधनत्वमात्रविवक्षया प्रमाणैरित्युक्तमिति ज्ञेयम् ।

Colophon :

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलार्यवर्यस्य सूनोरन्नंभट्टस्य कृतौ तन्त्रवार्तिकटीकायां तृतीयस्याध्यायस्याष्टमः पादः । समाप्तोऽध्यायश्च ।

सुधानुसारात्स्वमनीषयापि तृतीयतन्त्रस्य मया कृतेषा ।
सुबोधिनी पण्डितरञ्जनी च टीका तया विश्वपतिः प्रसद्यात् ॥

R. No. **2329.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 242. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Śikha Pullayyagāru of Viśvēśvarapuram, Amalapuram taluk, Gōdāvari district.

Bound in two volumes.

काशिखण्डटीका.

KĀŚĪKHAṆḌAṬĪKĀ.

A commentary on the Kāśikhaṇḍa, forming part of the Skāndapurāṇa and dealing in 100 chapters with the greatness and religious efficacy of Kāśī, and described under No. 2291 of the D.C.S. MSS., Vol. IV, Part 1 : by Rāmānanda. He mentions Rāmēndravana and his teacher Dēvēndraguru. Vāsudēva is mentioned in the introduction.

Breaks off in the 29th Adhyāya.

Beginning :

सच्चिदानन्दसन्दोहं भक्तैकामोदमन्दिरम् ।
सादरं नौमि तं भक्त्या श्रीगोपीजनवल्लभम् ॥
संहारभेदादिव यः स्वयंप्रभुः श्रितो विमुक्तं भगवान् सहोमया ।
दिशत्यभीक्ष्णं परमात्मतारकं भजे तमानन्दवने तनुत्यजाम् ॥
माधवं गिरिजां डुण्ढुं भैरवं दण्डनायकम् ।
मणिकर्णीं गुहं काशीमुदक्स्रोतोवहां नुमः ॥
अद्वैताब्जविकासनैकतरणिं हार्दान्धकारच्छिदं
शान्त्यादेर्निलयं दयैकशरणं . . . . स्फूर्तिकम् ।

हृत्कान्तारमहाटवीषु विलसत्कामेभपञ्चाननं
श्रीरामेन्द्रवनाभिधं गुरुमहो भक्त्या नमामस्तराम् ॥
यत्पादाम्बुरुहध्यानाद्धार्दं मे गलितं तमः ।
परमं तं गुरुं भक्त्या श्रीदेवेन्द्रगुरुं नुमः ॥
व्यासोक्तस्कन्दसंज्ञेये पुराणे काशिकाह्वयः ।
स्कन्धो यस्तस्य टीकेयं रामानन्देन रच्यते ॥
श्रीवासुदेवाभिधभूसुरेन्द्रगुणैकरत्नामलसत्पदार्थः ।
वाक्यो ग्रहणा (?) मिह प्रवृत्त क्षन्तव्यम स्मत्प्रकृतिः कृतीन्द्रैः ।
अध्यायानां शतं प्रोक्तं व्यासेनात्र पदार्थतः ।
विन्ध्यनारदसंवादो वर्ण्यतेऽतिमनोहरः ॥

तत्रादौ तावच्चिकीर्षितस्य पुराणस्य निष्प्रत्यूहप्रचयाभ्यां नानेतिहासपुराण शास्त्रप्रबन्धसम्बन्धाविष्कृतलीलाप्रभावो भगवान् बादरायणः विघ्नाधिराजं पूजयति—तं मन्महे इति । तत्र सर्वनाम्नस्त्वौत्सर्गिकं प्रसिद्धार्थत्वम् । यदाहुः—" सर्वनाम प्रसिद्धार्थं प्रसिद्धे त्वविघातकृत्" इति ।

* * * *

एवं विघ्नाधिराजं प्रपूज्य जगन्निःश्रेयसमाशासानः पुराणार्थाश्रयभूतमविमुक्तं प्रस्तौति भूमिष्ठेति । सा काशी अपायात् जगत् पायादित्यन्वयः । सा प्रसिद्धेत्यर्थः । प्रसिद्धत्वं चाचार्यान्यो विमुक्तो उपान्यो यवसोऽनन्तोप्यमुक्त आत्मानो विमुक्ते प्रतिष्ठित इत्याद्यन्तया श्रुत्या बोद्धव्यम् ।

* * * *

यदर्थमुपोद्घात आचरितस्तां कथामाह—कदाचिदिति । एकदा नारदोऽपि विष्णोर्नरांशाज्जातं यं नारं जलं मणिकर्णिकोत्थं तत्पितृभ्यो दत्तवानिति नारदः । तदुक्तं सनत्कुमारसंहितायाम्—

याभ्यः पराभ्यः पितृणां न तृप्तिस्ता दत्तवांस्त्वत्पितृणां पुरैव ।
नाम्ना ततस्त्वं पितृभक्तवर्य नारं ददासीति ह नारदोऽसि ॥ इति ॥

विन्ध्यं विन्ध्यनामानं पुरोऽग्रे विलोकयाञ्चक्रे ददर्शेत्यग्रेणान्वयः ।

* * * *

Colophon:

इति श्रीरामानन्दकृतायां काशीखण्डटीकायां प्रथमोऽध्यायः ॥

* * * *

Colophon:

इति श्रीरामानन्दकृतायां काशीखण्डटीकायामष्टाविंशोऽध्यायः ॥

नमो भगवते तस्मै ब्रह्मविष्णुशिवात्मने ।
परब्रह्मस्वरूपिण्यै गङ्गायै च नमो नमः ॥
एकोनत्रिंशदध्याये गङ्गानामसहस्रकम् ।
वर्ण्यते भूरिमाहात्म्यं सर्वाघौघविदारणम् ॥

End:

कुतो वीचिर्वीचिस्तव यदि गता लोचनपथं
त्वमापीता पीताम्बरपुरनिवासं वितरसे ।
त्वदुत्सङ्गे गङ्गे पतति यदि कायस्तनुभृतां
तदा मातश्शातक्रतवपदलाभोऽप्यतिलघुः ॥ इत्याद्युक्तेः.

R. No. 2330.

Paper. 10¾ × 9½ inches. Foll. 32. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS of M.R Ry Jagannātha Śāstrigāru of Indupalli, Gōdāvari district.

एवकारार्थनिर्णयः.

ĒVAKĀRĀRTHANIRṆAYAḤ.

Foll. 1*a*—31*b*. Fol. 32 is left blank.

A discussion on the meaning of the word एव which ordinarily means 'only.'

Incomplete; wants the beginning.

Beginning:

अवच्छेदस्तदर्थ इति वाच्यम् । विशेष्यसङ्गतैवकारस्यान्ययोगव्यवच्छेद एव मुख्यत्वात् । अथ ज्योतिषि विशेषरूपाभेदस्य किं ज्योतिरित्यनेनेदन्त्वादात्मैव विशेषणम् । तथा च ज्योतिषि परमात्मतादात्म्यायोगव्यवच्छेदोऽर्थ इति चेन्न । विशेष्यतावच्छेदकावच्छेदेनायोगव्यवच्छेदस्य शङ्खः पाण्डर एवेत्यादौ विशेषण-सङ्गतैवकारार्थत्वात् ।

End:

न चात्मा ज्योतिरेवेत्ययोगो व्यवच्छेदस्तदर्थ इति वाच्यम् । विशेष्यसङ्गतैवकारस्यान्ययोगव्यवच्छेद एव मुख्यत्वादर्थः ज्योतिषि विशेषरूपाभेदस्य ज्योतिरित्यनेन स्पष्टत्वादात्मैव विशेषणम् ।

R. No. **2331.**

Paper. 10⅞ × 9½ inches. Foll. 76. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Bhagavati Kāśinātha Śāstri of Kōṭipalli, Ramachandrapuram taluk.

परिभाषेन्दुशेखरव्याख्या—हैमवती.

PARIBHĀṢĒNDUŚEKHARAVYĀKHYĀ : HAIMAVATĪ.

Foll 1*a*—73*a*. Foll 73*b*—75*a* give the contents of Paribhāṣās; 75*b* and 76 are left blank.

By Yāgēśvara. Same work as that described under R. No. 661 ante. Contains from the Apavādaparibhāṣā to the end of the work.

End:

प्रायेणेत्यस्य व्यावर्त्यमाह—अचि श्निवति । समुद्रग्रहणादिति । गुरुनिर्देशादित्यर्थः । तत्र अचि श्निवति सूत्र इत्यर्थः । अयमपि पदलाघवविशेषोऽपि । अर्थः प्रयोजनम् । यावदिति योजना । प्रायेति । उक्त इति शेषः ॥

Colophon:

इति परिभाषेन्दुशेखरव्याख्या हैमवती संपूर्णा ॥

R. No. **2332.**

Paper. 10⅞ × 9½ inches. Foll. 82. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Śikha Pullayagāru of Viśvēśvara Agrahāram, Pērūr, Amalapuram taluk.

उदारराघवव्याख्या—सञ्जीविनी.

UDĀRARĀGHAVAVYĀKHYĀ : SAÑJĪVINĪ.

Foll. 1*a*—81*b*. Fol. 82*a* contains the name of the owner of the MS. from which this was copied. Fol. 82*b* is left blank.

A commentary on the Udārarāghava (a Mahākāvya) described under No. 12 in M. Seshagiri Sastri's Report No. 1. The commentator is Rāmpalli Gōpīnātha.

Contains the Sargas three which wants 11 stanzas in the beginning and seven complete; and the eighth incomplete.

Beginning:

लुब्धकैः(जी)वतीत्यनेन ठक्प्रत्ययः । कृतानि रचितानि कुटीराणि पर्णच्छादितगृहाणि यस्यां सा तथोक्ता ताम् । पुनः किम्भूताम् करिपोताः कलभाः

तेषां दन्ताः किटयः सूकराः तेषां प्रोतानि मुखाग्राणि तान्येव खनित्राणि कुद्दालाः अर्तिलूधूसूखनिसहचर इत्र इत्यनेन इत्रप्रत्ययः । तैः क्षतवामलूरुभ्यः विदारितवल्मीकेभ्यः धुतास्समुद्भूता धूसरा कृष्णलोहितधूलिर्यस्यां सा तथोक्ता तामगाहतेति सम्बन्धः ।

* * * *

Colophon:

इति श्रीरांपाल्लि गोपीनाथसूरिविरचितायामुदारराघवव्याख्यायां तृतीयस्सर्गः ॥

* * * *

Colophon:

इति श्रीगोपीनाथसूरिविरचितायां सञ्जीविनीसमाख्यायामुदारराघवव्याख्यायां सप्तमस्सर्गः ।

प्रस्थितेति । अथानन्तरं शुभरतः शुभकार्येष्वभिरतः भरतोऽपि चिराय प्रार्थितः अत्यर्थं राज्याय प्रार्थितस्सन् नगराय प्रास्थित । अयोध्यानगराय प्रतस्थे ।

* * * *

End:

जानुनी भूमौ निक्षिप्य धयन्ति पिबन्ति अवलोकयेति सम्बन्धः । . . . . धाम स्थानम् । एषोऽगस्त्यः छन्दसां निधिः वेदानां निधिः एषोऽगस्त्यो गुणानां निलयः गुणानां स्थानम् । हे देवि महनीयमत्यधिकं

R. No. **2333.**

Paper. 10⅜ × 9⅝ inches. Foll. 22. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

(*a*) पुरुषमेधपद्धतिः.

PURUṢAMĒDHAPADDHATIḤ.

Foll. 1*a*—7*b*.

A treatise in the Sūtra style relating to the ritualistic procedure connected with the sacrifice called Puruṣamēdha in which 48 human beings, chiefly persons, who are blind, dumb, thievish, insolent (on account of their birth), etc., are sacrificed. It is stated that a Brāhman or a Kṣattriya attains supreme eminence by the performance of this sacrifice.

Complete.

Beginning:

अथ पुरुषमेधस्य पद्धतिर्लिख्यते ।

ब्राह्मणराजन्ययोरतिष्ठाकामयोः पुरुषसंज्ञो यज्ञो भवति । सर्वाणि भूतानि अतीत्यातिक्रम्य स्थानमतिष्ठा । तत्र चैत्रशुक्लदशम्यां मातृश्राद्धं पुरुषमेधेनाहं यक्ष्ये—इति वरणे । अत्र त्रयोविंशतिदीक्षा भवन्ति । द्वादशोपसदः । पञ्चसुत्या भवन्ति ।

End:

ततः पुनर्येषां यज्ञानां करणे इच्छा भवति तत्कुर्यात् । इमं पुरुषमेधं ज्ञातप्रियानूचानेभ्य एव पाठयेत् ग्रन्थतोऽर्थतश्च न सर्वेभ्यः । गृहे समागत्य निर्मथ्याग्निस्थापनं कुर्यात् ॥

Colophon:

इति पुरुषमेधस्समाप्तः ॥

(*b*) सर्वमेधपद्धतिः.

SARVAMĒDHAPADDHATIḤ.

Foll. 7*b*—18*a*.

Gives the ritualistic procedure relating to the performance of the sacrifice called Sarvamēdha which is performed for attaining all the desired objects.

Complete.

Beginning:

सर्वकामस्य यजमानस्य सर्वमेधसंज्ञको यज्ञो भवति । तत्र च द्वादशाहस्य धर्मा भवन्ति । अहर्गणत्वात् । तेन द्वादश दीक्षाः, द्वादशोपसदः, दश सुत्याः । तत्र प्रथमोऽग्निष्टुदग्निष्टोमः । तत इन्द्रस्तुत् । ततो वैश्वस्तुत् । ततस्सूर्यस्तुत् । ततो वैश्वदेवस्तुत् ।

End:

तत्रापि चतसृभ्यः स्तोमायनदेवताश्चत्वारि चतुर्मुष्टिकानि गृहीत्वा अग्नये स्वाहा, इन्द्राग्निभ्यां स्वाहा, इन्द्राय स्वाहा, सरस्वत्यै स्वाहेत्येवमुक्तकालेहोमः । एतत्तु यथा न घटते तत्सर्वं भाष्ये प्रपञ्चितम् ॥

Colophon:

इति सर्वमेधस्समाप्तः ॥

(c) पितृमेधपद्धतिः.

PITṚMĒDHAPADDHATIḤ.

Foll. 18a—22b.

This forms the 21st Adhyāya of the Kātyāyanapaddhati which is a work on ritualistic procedure compiled by Yājñikadēva, son of Prajāpati. The portion here relates to the funeral ceremonies.

Complete.

Beginning:

अथ पितृमेधप्रारम्भः —

मृतस्य मरणसंवत्सरबहुकालव्यवधानादिना विस्मरणे सति पितृमेधो भवति । अथ वा मृतस्य मरणसंवत्सरादारभ्य तृतीयपञ्चमसप्तमादिष्वयुग्मेषु संवत्सरेषु भवति । यदा बहुकालव्यवधानेनापि कुर्वतो मरणसंवत्सरः स्मर्यत एव तत्तदायं पक्ष इति हरिस्वामिनः ।

End:

ततोऽस्य कर्मणः समृद्ध्यर्थं सोपधाना पुराणा जीर्णा आसन्दी दक्षिणा उपधानमुच्छीर्षकम् । तदपि पुराणमेव । तथा पुराणोऽनड्वान् दक्षिणा पुराणा यवाश्च इच्छया भयसीश्च देयाः ॥

Colophon:

इति पितृमेधस्समाप्तः ॥

इति श्रीसम्राट्स्थपतित्रिरग्निचिन्महायाज्ञिकश्रीप्रजापतिसूनुना याज्ञिकदेवेन कृतायां कात्यायनपद्धतौ एकविंशतितमोऽध्यायः ॥

R. No. 2334.

Paper. $10\frac{7}{8} \times 9\frac{1}{2}$ inches. Foll. 138. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Śikha Pullayagāru of Viśvēśvara Agrahāram, Amalapuram taluk, Gōdāvari district.

सीतारामविहारः, सव्याख्यः.

SĪTĀRĀMAVIHĀRAḤ WITH COMMENTARY.

Fol. 138b gives particulars of transcription.

A poem in 12 Sargas on the early life of Rāma and Sītā and their marriage: by Lakṣmaṇa Sōmayājin, son of Śaṅkara Sōmayājin and grandson of Lakṣmaṇa Sōmayājin of Ōrgaṇṭi family. The author

states that he was taught Dakṣiṇāmūrtimantra in a dream and was asked to read Dakṣiṇāmūrtipañjara by God Dakṣiṇāmūrti by Whose grace he composed the work under reference. The text is followed by a commentary. called Candrikā, by Vaidyanātha, son of Tatsat Rāmacandra. The text and the commentary are described under Nos. 3918 and 3919 of the India Office Library Catalogue, wherein a table of contents of the poem is given and the name of the grandfather of the commentator is stated to be Viṭṭhala.

Contains the Sargas 1 to 3, stanzas 1 to 54 of the fourth Sarga, the sixth Sarga without the first stanza, the seventh and eighth Sargas and 10 to 12 Sargas. The first stanza in the first Sarga and the commentary thereon with its introductory stanzas are wanting herein.

Beginning:

प्रसिद्धेति । वा प्रशस्तेति भिन्नं पदम् । अखिलानां चतुर्दशलोकानां भूषा शोभा । तद्धेतुमतायास्तत्त्वेनाभिधानात् हेत्वलङ्कारः । हेतुमता सह हेतोरभिधानमभेदतो हेतुरिति लक्षणात् ।

* * * *

(मू)—

भवत्ययोध्यारिजनैरयोध्या कल्याणराध्या कलुषैरबाध्या ।
पुरी समानीय पुरन्दरस्य भूमौ विधात्रा विनिवेशितेव ॥

(व्या) एवमयोध्यानुसन्धानरूपमङ्गलाचरणानन्तरं करिष्यमाणतद्वर्णनोपयोगितया तन्माहात्म्यं तस्याः स्वर्गतुल्यत्वं चाह—भवतीत्यादि । अरिजनैरयोध्या योद्धुमशक्या । अतोऽयोध्या भवति । कल्याणैः पुण्यकर्मभिः राध्या प्राप्या । राधृ साधृ संसिद्धाविति धात्वनुसारात् । तथा कलुषैः पापैरबाध्या प्रवेष्टुमशक्या ।

* * * *

ओगण्टिवंशवर्धनलक्ष्मणयज्वप्रणीतकृतिवर्ये ।
सीतारामविहारे प्रथमस्सर्गोऽगमन्महाकाव्ये ॥

* * * *

Colophon:

श्रीमत्तत्सदुपाख्यश्रीरामचन्द्रात्मजवैद्यनाथभट्टकृतायां सीतारामविहारटीकायां चन्द्रिकाख्यायां प्रथमः किरणस्संपूर्णः ॥

End :

ओर्गण्ट्यन्वयसिन्धुवर्धनविधुर्नित्यान्नदानव्रत-
ख्यातो लक्ष्मणसोमयाजिविबुधोऽभूद्विश्रुतो भूतले ।
आसीच्छङ्करसोमयाजिसुकृती तस्यात्मजस्तत्सुत-
श्रीमल्लक्ष्मणसोमयाजिकविना काव्यं त्विदं निर्मितम् ।

* * * *

स्वप्ने साक्षात्कृतो यः प्रथममुपदिशन् दक्षिणामूर्तिमन्त्रं
पश्चादाज्ञापयच्च स्वमहिमकलितं पञ्जरं यः पठेति ।
तस्येशस्य प्रसादाद्विमलमतिरयं लक्ष्मणाध्वर्युदारं
सीतारामस्य हारं व्यरचयदतुलं काव्यमेतद्विहारम् ॥

(व्या) इदानीमिष्टदेवताप्रसादोद्भूतत्वेनापि काव्यस्य श्रेष्ठतां दर्शयति— स्वप्न इति ।

* * * *

ओर्गण्टिवंशवर्धनलक्ष्मणयज्वप्रणीतकृतिवर्ये ।
सीतारामविहारे द्वादशसर्गोऽगमन्महाकाव्ये ॥

Colophon :

इति श्रीओर्गण्टिशङ्करसोमयाजिसूनुलक्ष्मणसोमयाजिकृतौ सीतारामविहारे महाकाव्ये यौवराज्यवर्णनं नाम द्वादशस्सर्गः ॥

(व्या) ओर्गण्टीत्यादि स्पष्टार्थम् ।

श्रीमल्लक्ष्मणसोमयाजिकविना स्वच्छे निजे मानसे
सीतारामविहारकाव्यकुमुदं जातं यदाविष्कृतम् ।
तत्सद्रामबुधात्मजेन कृतिना श्रीवैद्यनाथेन त-
त्रोल्लासाय विनिर्मिता सुखयतु स्वान्तं सदा चन्द्रिका ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणाभिज्ञधर्मशास्त्रधुरीणतत्सद्रामभट्टात्मजवैद्यनाथसूरिविरचितायां श्रीसीतारामविहाराख्यकाव्यटीकायां चन्द्रिकाख्यायां द्वादशसर्गकिरणस्संपूर्णः ॥

R. No. 2335.

Paper. 10¼ × 9⅛ inches. Foll. 114. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Paṭṭābhirāmamūrtigāru of Vizagapatam.

आपस्तम्बाध्वरतन्त्रव्याख्या—प्रयोगरत्नमाला.

ĀPASTAMBĀDHVARATANTRAVYĀKHYĀ : PRAYŌGA-RATNAMĀLĀ.

Foll. 1a—113a. Foll. 113b—114 are left blank.

Same work as that described under R. No 795 ante. By Cauṇḍapācārya.

Contains the following portions:—

(1) From the fifth Paṭala of the second Praśna to the fourth Paṭala (incomplete) of the third Praśna. (2) Paṭalas six to eight in the second Praśna. (3) First Paṭala of the second Praśna.

R. No. **2336.**

Paper. 10⅞ × 9⅝ inches. Foll. 58. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Mantha Cannayya Śāstri of Pantuluvār Agrahāram, Gōdāvari district.

द्रव्यकिरणावलीव्याख्या—प्रकाशः.

DRAVYAKIRAṆĀVALĪVYĀKHYĀ : PRAKĀŚAḤ.

Foll. 1a—57b. Fol. 58 is left blank.

Same work as that described under R. No. 1553 (c) ante. By Vardhamāna, son of Gaṅgēśa.

Incomplete.

R. No. **2337.**

Paper. 10⅞ × 9⅝ inches. Foll. 248. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Nigamānta Kṛṣṇacakravartyācāryar of Kēttāṇḍapaṭṭi, North Arcot district.

Bound in two volumes.

तन्त्रनीतिलहरी.

TANTRANĪTILAHARĪ.

Foll. 1a—247b. Fol. 248a contains the name of the owner of the MS. from which this was copied. Fol. 248b is left blank.

A detailed discussion of the various Adhikaraṇas contained in the second and the third Pādas of the first Adhyāya of the Pūrvamīmāṁsāsūtras of Jaimini in accordance with Kumārila Bhaṭṭa's interpretations. Prabhākara's views also are discussed wherever necessary. The author of the work is Rāmānujadāsa, son of Raghunāthadēśikādhvarin

and younger brother of Vēdāntācārya of Śrīvatsagōtra. The author himself states that his work, being copious and detailed, may be considered to be a commentary on the Śāstradīpikā and the Nayavivēka.

Contains the second and the third Pādas in the first Adhyāya; complete.

Beginning:

अखिलगुणनिकायं मन्त्रसाराभिधेयं निखिलनिगमकायं कृष्णवाचो विधेयम्।
दनुजरिपुसहायं श्रीमतस्स्वं सखायं दलितकुमतिमायं तं भजे वैनतेयम् ॥

भट्टाचार्यगुरुप्रोक्तसिद्धान्तलहरीमिमाम्।
सन्तः पश्यन्तु दयया पक्षिराजविजृम्भिताम् ॥

भट्टानुसारेण नयानशेषान् प्राभाकरीं चापि दुरूहनीतीः।
प्रकाशयन्ती लहरी विभाति मुक्ताप्रवालग्रथितेव माला ॥

कामं नयविवेकस्य शास्त्रदीपिकया सह।
सूक्ष्मबुद्धिजुषामेषा छायाव्याख्या भविष्यति ॥

धर्मोत्पत्तिनिदानग[1]व्युपाचिता रीतिस्सहस्राश्रिता
मार्गायातसरस्वतीपरिचया प्राभाकरीसङ्गता।
सर्वज्ञेन मुदादृता च शिरसा नानाकृतिर्लक्षणैः
गङ्गाया लहरीव तन्त्रलहरी कामं नरीनर्त्यसौ ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानान्तस्मादनित्यमुच्यते।

अस्यार्थः। आम्नायस्य वेदस्य तद्भूतानां क्रियात्वेन समाम्नाय इति क्रियार्थत्वावगमात् अक्रियार्थानामर्थवादादीनामानर्थक्यं प्रयोजनवदर्थशून्यत्वम्। तस्मादक्रियार्थकं सर्वमनित्यमित्युच्यते। अनित्यशब्दोऽयमनित्यलौकिकवाक्यसादृश्यपरस्सन्नप्रामाण्यमाह—तस्मादप्रमाणमुच्यत इति। अनेन सूत्रेण सामान्यतः विध्युद्देशातिरिक्तानामर्थवादमन्त्रनामधेयानामप्रामाण्यं पूर्वपक्षीकृत्य स्वाध्यायाध्ययनविधिवशेन सामान्यतोऽर्थवत्तया भवितव्यमिति विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरित्यादिना प्रामाण्यं स्थापयिष्यते।

End:

नन्वेवं तर्हि तत्रैवेयं चिन्ता किमिति न कृतेति चेन्न। विनियोगमुखाप्रामाण्यनिराकरणार्थेयं त्रिपादी। इह त्वाकृत्यधिकरणे व्यक्ते: क्रियान्वयरूपविनियोगमु-

[1] गोभिरधिका इति पाठान्तरम्.

स्वेनाकृत्यर्थताक्षेपे व्यक्त्यर्थत्वेन यदप्रामाण्यं तन्निरासः क्रियत इति त्रिपाद्यामेवेयं चिन्ता युक्ता ; न प्रथमपाद इति बोध्यम् । संशयाक्षेपसमाधानभाष्यव्याख्यानं तु वस्तुबलमतरीत्या दीपशिखायामेव व्यक्तमिति सर्वं समञ्जसम् ।

Colophon:

इति श्रीवत्सकुलतिलकसर्वतन्त्रस्वतन्त्रविद्वच्चक्रवर्तिचक्रवर्तिरघुनाथदेशिकाध्वरिसूनुना वेदान्ताचार्यगुरुचरणानुजेन तदुभयचरणारविन्दपरिचरणलब्धमीमांसासाम्राज्येन रामानुजदासेन विरचितायां श्रीमत्तन्त्रनीतिलहर्यां प्रथमस्याध्यायस्य तृतीयः पादः ॥

योऽसौ नागमयाञ्छरान् प्रणिहितान् मायाजुषेन्द्रद्विषो
निर्धूय स्वयमागतो युधि मुदा रामाय सौमित्रये ।
स्वं सख्यं प्रकटीचकार सुतरां श्रीचक्रवर्तिप्रियः
सोऽयं मत्कुलदेवता हि गरुडः कामं विधत्ते कृतिम् ॥
गुणं वा दोषं वा वदति यदि कश्चिन्मम मनो
न हर्षं खेदं वा भजति हि तदा किन्तु सुधियः ।
निरूप्यैव ब्रूयुर्निपुणमिह किं वा वदसि रे
स चैतन्निर्माता मधुमथनकेतौ जयति यः ॥

R. No. **2338.**

Paper. 10⅜ × 9⅜ inches. Foll. 172. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Vemparla Sītārāma Śāstri of Toṇḍavaram, Gōdāvari district.

प्रसन्नराघवव्याख्यानम्.
PRASANNARĀGHAVAVYĀKHYĀNAM.

A commentary on the Prasannarāghava of Jayadēva: by Carukūri Lakṣmaṇa, younger brother of Koṇḍubhaṭṭa and the same as the author of Gītagōvindavyākhyā, Śrutirañjanī. The commentary is called Timmabhūpālīya after the author's patron, Timmabhūpāla, who asked the author to write the commentary and to dedicate it in his name to God Gōpinātha worshipped at Koṇḍaviḍu.

The following genealogy of his patron is given :—

Ōrviṭi Bukkarāja
Rāmarāja = Laṅkāmbikā
- Śrīraṅgarāja = Timmāmbā
  - (1) Rāmarāja (Kṛṣṇarāya's son-in-law)
  - (2) Timmarāja (Yaṟṟa)
  - (3) Vēṅkaṭādri
  - (4) Kōnāmbikā = Jōbala
    - Śrīraṅgarāja (Minister to Vēṅkaṭādri, No. 3)
    - Timmabhūpāla (Minister to Tirumala, No. 2, and author's patron).
- (names not given)

Śuddhirāja (Siddhi family)
- Ananta = Khaḍgāmbā
  - Jōbala

Wants 11 stanzas in the end ; otherwise complete.

Beginning:

धवलजलदवर्णं चन्द्रमःखण्डचूडं परशुपरिण(घ)हस्तं ज्ञानमुद्राभिरामम् ।
भुजगधरविराजत्कङ्कणं जानुबाहुं दलितनिजजनार्तिं दक्षिणामूर्तिमीडे ॥
अस्ति चन्द्रान्वयो यस्तु सर्वज्ञामोदकारणम् ।
कुमुदोल्लासकृद्विष्णुपदैकशरणादरः ॥
तस्मादोर्वीटिबुक्कक्षितिपतिरजनि न्यकृताशतिवर्गः
स्वर्धेनुस्तस्य सूनुः प्रथितगुणयशा रामराजाक्षितीन्द्रः ।
तस्माल्लङ्काम्बिकायामतिनलनहुषश्रीहरिश्चन्द्रभूपा
जाता धर्मार्थकामा इव गुणमहितास्सूनवस्सूर्यभासः ॥
तेषु श्रीरङ्गराजस्य तिम्माम्बायां सुतास्त्रयः ।
त्रिमूर्तय इवोत्पन्ना ब्रह्मविष्णुशिवाभिधाः ॥
श्रीकृष्णरायजामाता रामराजो महीपतिः ।
तत्राग्रजो गुणश्लाघ्यो भाति रामाभिधः परः ॥
विद्वद्दुर्गतितामसीदिनमणिः विद्याङ्गनामन्मथः
सङ्गीतामृतसागरस्स कवितावल्लीवसन्तोत्सवः ।

आसारस्सैकलादिशौर्यदहनज्वालावलेस्सूनृति
? धर्मं सं पटुचन्द्रशेखरसखः क्षोणीतले राजते ॥
तस्यानुजो गुणनिधिर्यरेतिम्ममहीपतिः ।
रामस्य लक्ष्मणश्चैव विभाति धरणीतले ॥
आर्यानन्दविवर्धनः परबलप्राणापहारी समि-
द्भास्वान् दण्डधरस्सदा समुचितं काव्यो धरैकाश्रयः ।
राजद्विष्णुपदाश्रितः कृतनटीनाराधनः शोभते
सर्वज्ञाप्ततमो दिगीशबलवानम्भोधिगाम्भीर्यभूः ॥
तस्यानुजो वेङ्कटाद्रिराजश्शौर्यगुणोज्ज्वलः ।
आयोधनेऽर्जुन इव राजते राजमण्डले ॥
दुःशासनरिपुद्रोही हन्ता सिंहबलद्विषम् ।
स धर्मविजयो नित्यं भीमस्सङ्ग्रामभूमिषु ।
तत्सोदरीसूनुरवन् तिम्मराजो गुणोज्ज्वलः ॥
कोण्डवीटिमदोजन्ममेव संभाव्य भूषणैः ।
प्रसन्नराघवस्यार्य टीकां रचय लक्ष्मण[म्] ॥
कोण्डवीड्गोपिनाथाय मत्समर्पणरूपतः ।
प्रसन्नराघवस्याहमिति तेन नियोजितः ।
तद्वंश्यवर्णनापूर्वं व्याख्यां कुर्वे हरेर्मुदे ॥
अगदङ्कारस्सुतिमिरगदापनयने सरोजानिर्नित्रम् ।
जयति(ती)ह कोर(क)युगलीदम्पतिकार्यस्य कार्मणं तेजः ॥
तद्वंशेऽजनि शुद्धिराजनृपतिर्नाभागमान्धातृभू-
पालोत्कृष्टयशोगुणैरुदभवत्तस्मादनन्ताभिधः ।
एषोऽजिह्मगतिर्य(ह्य)पीतगरलोऽनापन्नजिह्वाद्वयः
क्षोणीभृत्यस(न)माचि(च्छि)राः किममुना तौल्यं भजेद्यो(द्गो)गिराट् ।
तस्मादुदभवन् राज्ञः खड्गाम्बायां सुतास्त्रयः ।
धर्मनिर्वाहका नित्यमरण्यामग्नयो यथा ॥
तत्राभवश्चन्द्रसमानतेजा यशःपयोधिं हरिदन्तरेषु ।
उद्वेलयन् दानजलारिकण्ठनालोच्चलद्रक्तनदीप्रवाहैः ॥

श्रीरङ्गराजाक्षितिपालपुत्री कोनाम्बिका तस्य कलत्रमासीत् ।
अरुन्धतीमुख्यसतीयशांसि निरुन्धती या गुणमण्डलेन ॥
जोबलक्षोणिपालस्य तस्यां जातौ तनूभवौ ।
प्रतापकीर्तिसुभगौ सूर्याचन्द्रमसाविव ॥
तत्राग्रजः षोडशदानकर्ता श्रीरङ्गराजो धरणीशवर्यः ।
श्रीवेङ्कटादिक्षितिपालचन्द्रसाम्राज्यभर्तातिययातिकर्णः ॥
दूतीव शस्त्रि(स्त्री)यस्याजौ सुरस्त्रीभिस्सह द्विषाम् ।
प्राणाथ सार्धमादाय विदधाति समागमम्(णांश्च) ॥
तस्यानुजस्तिम्मराजश्शौर्यगाम्भीर्यधैर्यभूः ।
श्रीमत्तिरुमलक्षोणिपालराज्यधुरन्धरः ॥
औदार्यशौर्यसम्पन्ने यस्मिन् शासति मेदिनीम् ।
भयं विहाय जीवौघं मेरुभान्वोः प्रतिष्ठितम् ॥
अतिपालनेत्रजानां कति सृष्टौ श . . . वान् प्रपश्चानाम् ।
अवति द्विषद्विभेदे सिद्धक्षोणीन्द्रतिम्मभूपालम् ॥
सत्ये धर्मतरे क्षमाभृतिविधौ गोत्राद्रयत्यन्वहं
ग्रासस्य द्विजधावने सितगवत्यायोधने रामति ।
कर्तृध्वान्तविभेदने सवितरत्यस्मिन् जगन्मण्डले
सिद्धक्ष्मापतिवंशनीरधिविधुर्यस्तिम्मराजोत्तमः ॥
एतत्स . . . . . कोण्डवीटिगोपालमूर्तये ।
प्रसन्नराघवव्याख्यां कुर्वेऽभीष्टार्थदायिनीम् ॥

अथ तावत्तत्रभवान् जयदेवनामा महाकविः कवितार्किकचक्रवर्ति(र्ती)ना-(ट)कनामधेयकरूपकनिरूपणापदेशेन सकलपुरुषार्थसम्पादनकामधेनूयमानां जानकीमनोहरगुणवर्णनां मनसि निधाय चिकीर्षितस्य नाटकप्रबन्धस्याविघ्नपरिसमाप्तिप्रचयगमनमाशासानः

* * * *

नान्दीमादौ निबध्नाति—चत्वार इति। शार्ङ्गिणः ते चत्वारः पाणयः शत्रूणां द्रष्टृणां च श्रियः प्रथयन्त्विति क्रियाकारकसम्बन्धः ।

* * * *

यद्देवरश्शक्रमुखामराणामाहाहनि(र्विर्नि)श्चयनं यदीयम् (?) ।
वेदाङ्गनिर्णेतृससिद्धिराजतिम्मप्रभुं रक्षतु गोपिनाथः ॥

एतन्निबन्धनिर्मित्या तुष्ट इष्टान् प्रयच्छतु ।
श्रीकोण्डुवीटिगोपालास्सिद्धिराट्तिम्मभूभुजे ॥

Colophon:

इति श्रीमदखिलविद्यापरिवारदक्षिणामूर्तिमहादेवप्रसादलब्धविद्यापूर्वोत्तर-मीमांसातर्कशब्दसाहित्यसार्वभौमचरकूरिकोण्डुभट्टोपाध्यायानुजेन लक्ष्मणसूरिणा विरचिते प्रसन्नराघवव्याख्याने तिम्मभूपालीये प्रथमोऽङ्कस्समाप्तः ॥

* * * *

Colophon:

इति श्रीमदखिलविद्यापरिवारदक्षिणामूर्तिमहादेवप्रसादलब्धविद्यापूर्वोत्तर-मीमांसातर्कशब्दसाहित्यसार्वभौमचरकूरिकोण्डुभट्टोपाध्यायानुजेन लक्ष्मणसूरिणा विरचिते प्रसन्नराघवव्याख्याने तिम्मभूपालीये षष्ठोऽङ्कस्संपूर्णः ॥

भत्तालिचिन्तिअद्धाविस्साणनशीलमापवशकारम् ।
वेअन्तवक्खिचउरं वन्दे रहुणाहदक्षिणामुत्तिम् ॥

End:

उन्मीलन्तीति । निशैव रात्रिरेव । वागुरिमतेन हलन्तादप्याप् । निशाचरवधू राक्षसकान्ता तस्या निर्घटना उच्चाटना तत्र मान्त्रिकाः निशापिशाचीनिवर्तका इत्यर्थः, सुप्तुप्ता मुकुलिता, सप्तुप्तेति पाठे सुप्तं सुप्तिः । नपुंसके भावे क्तः ।

R. No. 2339.


Paper. 10¼ × 9⅜ inches. Foll. 136. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Nigamānta Kṛṣṇacakravarti of Kēttāṇḍapaṭṭi, North Arcot district.

सिद्धान्तचन्द्रिका.
SIDDHĀNTACANDRIKĀ.

Same work as that described under R. No. 2194 ante and with the addition of the following stanzas at the beginning of the second Paric-

chēda or Adhikāra and with a detailed colophon quoted below. The following genealogy of the author is given :—



Contains the Adhikāras 2 to 4 complete and the fifth incomplete.

Beginning:

प्रणामा मम गाहन्तां श्रीरङ्गगृहमेधिनम् ।
यन्मुदे स्युर्महात्मानश्चक्राङ्कनधरा भुवि ॥
पितामहमहं वन्दे परवस्त्वाख्यदेशिकम् ।
यत्सूक्तिकल्पलतिका पुमर्थान् प्रददात्यसौ ॥
आम्नायशिखराचार्यः कुदृष्टीन्मे जिहीर्षतः ।
जिह्वाभद्रासनमिदमारोहतु दयानिधिः ॥
न्यायरूपैः प्रहरणैः भेत्स्यामि कुमतीन् परान् ।
अनुसृत्यागमान्तार्यसूक्तिं काममपि साधवः ॥

अत्र तावत् वक्ष्यमाणार्थौपयिकतया प्रथमं भगवच्छास्त्रस्य प्रमाणमूर्धन्यता प्रतिपाद्यते--

End:

अज्ञः काहं क्व च मम बलं स्थापने सत्पथस्य
कासौ धर्मः श्रुतिषु विहितो मोक्षमार्गैकहेतुः ।
सासूयानामपि न भविता श्रोतृभावो जनानां
वक्ता श्रोता निगमशिरसां देशिकः प्रीयतां मे ।

Colophon:

इति श्रीवत्सकुलजलधिकौस्तुभवैदिकसार्वभौमवेदान्तदेशिकसम्प्रदायप्र-वर्तकपरवस्तुवेङ्कटेशदेशिकसुकृतपरिपाकसर्वतन्त्रस्वतन्त्रमहावेदान्ताचार्यानुजश्री-मदादिवराहाचार्यतनयस्य तच्चरणारविन्दचञ्चरीकस्य कोनेट्यम्बागर्भसंभवस्य

श्रीकुम्भघोणकृतनिवासस्य निजहृदयकमलविहरमाणवेदान्तदेशिकप्रेरितस्य तदेकदैवतस्य वेदान्ताचार्यस्य कृतिषु सिद्धान्तचन्द्रिकायां सुदर्शनधारणस्मृतिनिरूपणाख्यस्तुरीयाधिकारस्सम्पूर्णः ॥

प्राप्तसामानाधिकरण्यभङ्गास्वारस्यात् पुण्डरीकसदृशे हृदये पुण्डरीकशब्दस्य गौणत्वप्रसङ्गात् ।

* * * *

यदि पूर्वपक्षे आदित्यमण्डलाक्षिपुरुषयोर्भेदो विवक्षितः । तदाक्षिपुरुषस्य कारणत्वं न सिध्येत् । यद्यभेदो विवक्षितः तदा न मर्यादा । ऋक्सामाद्यात्मकत्वयुक्तिरयुक्ता । तत्र प्रकरणे वस्त्वन्तरेऽपि ऋक्सामाद्यात्मकत्वेन ।

R. No. **2340.**

Paper. 11 × 9⅝ inches. Foll. 14. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. V. S. Gōpālācāryar of Villiambākkam, Chingleput district.

अर्हत्स्तोत्रम्, द्राविडटीकासहितम्.

ARHATSTŌTRAM WITH TAMIL MEANING.

Foll. 1*a*—14*a*. Fol. 14*b* is left blank.

A eulogy on Arhat; similar to the work described under No. 9430 of the D.C.S. MSS., Vol. XVIII.

Complete.

Beginning:

यस्यानुग्रहतो दुराग्रहपरित्यक्तात्मरूपात्मनः
सद्द्रव्यं चिदचित्त्रिकालविषयं स्वैः स्वैरभीक्ष्णं गुणैः ।
सार्थव्यञ्जनपर्ययैः समवयज्जानाति बोधस्समं
तत्सम्यक्त्वमशेषकर्मभिदुरं सिद्धाः परं नौमि वः ॥

* * * *

यत्सामान्यविशेषयोरसहपृथक्त्वान्स्वस्थयोर्दीपवत्
चित्तद्योतकमुद्गरन्नुदमरन्नो रज्यति द्विष्टिना ।
धारावाह्यपि तत्प्रतिक्षणनवोद्धारार्थवत्तार्पितं
प्रामाण्यं प्रणमामि वः फलितदृग्वित्त्युक्तिमुक्तिश्रिये ॥

End:

श्रेयोमार्गानभिज्ञानिह भवगहने जाज्वलद्दुःखदावस्कन्धे चङ्क्रम्यमाणानपि चकितमिमानुद्धरेयं वराकान् ॥

इत्यारोहत्परानुग्रहरसविलसद्भावनोपात्तपुण्य-
प्राकारैरेव वात्यै शिवपदमुचितान् शास्ति योऽर्हन्स नोऽव्यात् ॥

Colophon:

इत्यर्हत्स्तोत्रं संपूर्णम् । इति सव्याख्यानमर्हत्स्तोत्रं संपूर्णम् ॥

The scribe of the original MS. is stated to be Ponnusāmi Nāyanār of Vīraṇāmūr.

R. No. **2341.**

Paper. 10⅞ × 9⅛ inches. Foll. 128. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Uppalūri Veṅkatakṛṣṇamma, Kōṭipalli, Gōdāvari district.

दैवज्ञविलासः.

DAIVAJÑAVILĀSAḤ.

By Lolla Lakṣmaṇasūri. Same work as that described under No. 13434 of the D.C.S. MSS., Vol. XXIV.

Contains 1 to 36 Ullāsas in Utpātakhaṇḍa.

R. No. **2342.**

Paper. 10⅛ × 9⅛ inches. Foll. 358. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Rāmāji Bhāno Pantulugāru of Pērūru, Gōdāvari district.

अश्वलक्षणशास्त्रम्.

AŚVALAKṢAṆAŚĀSTRAM.

Foll. 1*a*—358*a*. Fol. 358*b* is left blank.

Similar to the work described under No. 13318 of the D.C.S. MSS., Vol. XXIII. The subject is said to have been taught by Śālihōtra to Suśruta.

Contains 1 to 18 Adhyāyas in the Aṣṭamasthāna and 1 to 92 Adhyāyas in the Unnēyasthāna.

Beginning:

वेदवेदाङ्गविदुषं सत्त्ववन्तं जितेन्द्रियम् ।
तितिक्षायुक्तिकुशलं हयेषु परमं च यत् ॥

शालिहोत्रमृषिश्रेष्ठं सुश्रुतः परिपृच्छति ।
मुमूर्षूणां तुरङ्गाणां निर्वाणं व्याधिनाशनम् ॥
ज्ञातुमिच्छामि भगवन् यावत् द्वात्रिंशतस्समाः ।
यदा भविष्यन्ति पुरा विकारेण तुरङ्गमाः ॥
अस्मिन् वयसि वै तावत्प्राणानां स्थापयिष्यति ।
अथाब्रवीच्छालिहोत्रस्सुश्रुतं जातसंशयम् ॥
निर्वाणं परमाश्वानां दुर्ज्ञेयं चर्मचक्षुषा ।
ज्ञानं क्रमागतं चैव शृणु सुश्रुत धारय ॥
चतुरङ्गुलप्रोथं च तत्र रेखासु लक्षयेत् ।
नानाकारविशेषास्तु तासु निर्वाणलक्षणम् ॥
पाणौ यथा मनुष्याणां प्रोथे ह्येव तु वाजिनाम् ।
वक्ष्याम्यनुत्तमायुष्यं तदेवं ब्रुवतः शृणु ॥
ऊर्ध्वगा यस्य रेखा स्यात्प्रोथमध्येऽङ्गुलायता ।
स जीवेद्वर्षमेकं तु मुखरोगात्पराभवेत् ॥

* * * *

Colophon:

इति श्री . . . अष्टमे स्थाने रेखानिर्णयो नाम प्रथमोऽध्यायः ॥

End:

एष पानागदो नाम त(वि)दीर्णविषनाशनम् ।
रसं च क्षारपत्राणां शुद्धतैलपरिश्रुतम् ॥
दधिमण्डेन संसृज्य पानमस्मै प्रदापयेत् ।
ध्वाङ्क्षपारावतं गोधा नकुलं मूषकं तथा ।
तन्मांसं खण्डशः कृत्वा कुम्भे प्रक्षिप्य साधयेत् ॥

Colophon:

इति श्रीशालिहोत्रीये उत्तरे द्वितीये स्थाने द्विनवतितमोऽध्यायः ॥

R. No. **2343.**

Paper. 10¾ × 9½ inches. Foll 18. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Kavi-Dakṣiṇāmūrtigāru of Masulipatam.

Fol. 18b is left blank.

भावफलदर्शनप्रदीपिका.

BHĀVAPHALADARŚANAPRADĪPIKĀ.

An astrological treatise explaining the nature of predictions that can be made in regard to certain specific conditions or circumstances of a man or woman; by Narasiṁhācārya, son of Lakṣmaṇācārya of Kāśyapagōtra.

Complete in the following Prakaraṇas :—

१. संज्ञाप्रकरणम्.	७. आयुर्विवरणम्.
२. भाग्ययोगविवरणम्.	८. गङ्गास्नानविवरणम्.
३. वाहनयोगविवरणम्.	९. कष्टविवरणम्.
४. कलत्रयोगविवरणम्.	१०. निर्धनयोगविवरणम्.
५. मारकनिर्णयविवरणम्.	११. मनुजशीलविवरणम्.
६. राजयोगादिविवरणम्.	१२. विद्याविवरणम्.

Beginning:

श्रियः पतिं नमस्कृत्य गुरुमज्ञानहारिणम् ।
ध्यात्वा विरच्यते भावफलदर्शनदीपिका ॥
लग्नं चतुर्थं दशमं सप्तमं केन्द्रसंज्ञिकम् ।
पञ्चमं नवमं चैव कोणमित्यभिधीयते ॥
प्रथमं(च वपु)र्लग्नं द्वितीयं धनसंज्ञिकम् ।
कुटुम्बनामकं चैव तृतीयं भ्रातृविक्रमौ ॥

* * * *

Colophon:

इति श्रीभावदर्शनदीपिकायां संज्ञाप्रकरणम् ॥

End:

पञ्चमे रविमन्दज्ञैर्युक्ते वेदान्तशास्त्रवान् ।
द्वितीयस्थानगे शुक्रे कविता तस्य विद्यते ॥
रविकेतुबुधाः केन्द्रकोणलाभगता यदि ।
ज्यौतिषज्ञस्सुते राहौ सति गूढार्थबोधकः ॥

Colophon:

इति श्रीमत्सकलशास्त्रप्रवीणसंस्कृतान्ध्रभाषाकविताधुरीणकाश्यपगोत्रलक्ष्मणाचार्यतनयनरसिंहाचार्यविरचितभावफलदर्शनदीपिकायां विद्याविवरणं नाम द्वादशप्रकरणं सम्पूर्णं समाप्तं च ॥

षष्ठाष्टमव्ययगृहाधिपतिस्तृतीये लाभे त्रिकोणधनकेन्द्रगतो यदि स्यात् ।
दोषान्निहन्ति सततं स्वदशां करोति सन्तानसौख्यधनवाहनशोभनाढ्यः ॥

R. No. **2344.**

Paper. 10⅝ × 9⅝ inches. Foll. 58. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

Fol. 58*b* is left blank.

कात्यायनगृह्यसूत्रम्, आन्ध्रभाषाटीकासहितम्.

KĀTYĀYANAGṚHYASŪTRAM WITH TELUGU COMMENTARY.

The words of the Sanskrit text of the Sūtra are given along with their Telugu meaning. The text of the Sūtras has been printed under the name of the Pāraskaragṛhyasūtra which gives the ritualistic details to be observed by the followers of the Śuklayajurvēda in regard to their domestic fire and to the sacraments.

Breaks off in the Śrāddhasūtra.

Beginning:

अथातो गृह्यस्थालीपाकानां कर्म ।

* * * *

परिसमूह्योपलिप्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य प्रणीय परिस्तीर्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीरसंस्कृत्यार्थवत्प्रोक्ष्य निरूप्याज्यमधिश्रित्य पर्यग्नि कुर्यात् ।

End:

न स्वधां प्रयुञ्जीत ।

* * * *

युग्मानाशयेदत्र । अत्र ఈ యభ్యుదయక శ్రాద్ధమందు युग्मान् సరి సంఖ్య గల బ్రాహ్మణోత్తములను अशयेत् భోజనము చేయించెడిది ॥

Colophon:

समाप्तिमगमत् ॥

R. No. **2345.**

Paper. 10⅝ × 9⅝ inches. Foll. 68. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Tējōmūrtulu Veṅkaṭappa Siddhāntigāru of Tuni, Gōdāvari district.

भेषजकल्पः, आन्ध्रटीकासहितः.

BHĒṢAJAKALPAḤ WITH TELUGU MEANING.

Foll. 1*a*—68*a*. Fol. 68*b* is left blank.

Complete.

Same Text as that described under No. 13189 of the D.C.S. MSS., Vol. XXIII.

The original MS. is dated Monday, the fullmoon day of Bhādrapada month in the year Siddhārthi.

R. No. **2346.**

Paper. $10\frac{3}{8}\times 9\frac{4}{8}$ inches. Foll. 16. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916-17 from a MS. of M.R.Ry. Pullaya Veṅkaṭasubbayagāru of Ālamūru, Gōdāvari district.

(*a*) प्राकृतमणिदीपः.

PRĀKṚTAMAṆIDĪPAḤ.

Foll. 1*a*—4*b*.

A grammatical treatise written in the logical order on Prākṛta words: by Appayadīkṣita who composed it at the instance of Cinabommabhūpāla who was the minister of king Cokkanātha.

Wants the beginning; otherwise complete.

Beginning:

हर सु इति स्थिते

(सू) सुससोरि ॥

(वृ) प्रथमाद्वितीययोर्नित्यं लुक् स्यात् ।

(सू) ओ सौ पुंसि तु ॥

(वृ) अदन्तपुंलिङ्गस्य ओ वा स्यात्सौ ।

End:

(सू) शेषं संस्कृतवत् ॥

(वृ) अनुक्तमन्यशब्दानुशासनवदित्यनेन गतार्थमेतत् ।

(सू) झाडगास्तु देश्यास्सिद्धाः ॥

(वृ) झाडादयस्सङ्ग्रहोदाहृताः सिद्धा इति मङ्गलार्थः ॥

Colophon:

इति श्रीमद्दक्षिणसमुद्राधीश्वरचोक्कनाथभूपालप्रियसचिवसज्जनावलम्बब्रह्मण्यबिरुदाङ्कि(त) चिनबोम्मभूपहृदयकमलकुहरविहरमाणश्रीसाम्बसदाशिवप्रेरितेनाप्पयदीक्षितेन कृते मणिदीपे अपभ्रंशप्रकरणम् ॥

समाप्तश्च ग्रन्थः ॥

गुरुणो मज्ज विज्जाणो सइ समाणिअत्थिणो ।
झाआमि पाअपोम्माइ सच्छिआणन्दसत्थिणो ॥

(छा)—

गुरु(रो)र्मम विद्यानां सदा सम्मानितार्थिनः ।
ध्यायामि पादपद्मे सच्चिदानन्दशास्त्रिणः ॥

(b) मन्त्रशास्त्रम्.

MANTRAŚĀSTRAM.

Foll. 5a—16b.

A fragment of a treatise on the Mantras relating to Śiva or Rudra Incomplete.

Beginning:

इतरपक्षेषु सर्वत्रा . . चें विषयीकरोति ।
सामान्यविधे दैवत्ये हविषे श्रुतिशालिभिः ।
निर्माल्यदानदोषेण वह्नेरेष्वशुचिर्भवेत् ॥

रुद्रः पशूनामधिपतिरिति मन्त्रेण हुतहवीरूपं निर्माल्यं यदि भगवानग्निरावहेति अशु(चि)रपि स्यादेव । अशुचिद्रव्यसंपर्कात् स्वयमशुचिर्भवेदित्युक्तत्वात् । किञ्च परमेश्वरशिरोनिर्माल्यभूतकलानिधीशानकलपुरन्दरायो भुञ्जते तेनैवामरलोकपूज्याश्चाष्टौ जाता । अपिच ।

End:

एवं सद्योजातकलाष्टकम् । इति महेश्वरदेहे अष्टत्रिंशत्कला । गौरी षड्विंशतिकला ।

गौरीकलापरस्तु संवक्ष्ये गौरीबीजसमुद्भवा ।
तारा ईशा क्रमाज् ज्ञेया विद्यावक्रूकला स्मृता ॥

ओं ह्रीं मृत्यवे नमः । ओं ह्रीं श्रद्धायै नमः । ओं ह्रीं जरायै नमः । ओं ह्रीं मेधायै नमः ॥

R. No. 2347.

Paper. 10¾ × 9½ inches. Foll. 183. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. V. R. T. Tātācāriyar of Paṭṭukōṭa, Tanjore district.

सेश्वरमीमांसा.

SĒŚVARAMĪMĀṀSĀ.

By Vēdāntadēśika. Same work as that described under No. 4512 of the D.C.S. MSS., Vol. IX.

Contains from the third Pāda of the first Adhyāya to the end of the first Pāda of the second Adhyāya.

Beginning:

यदीयाज्ञानुगामिन्यः स्मृतयो मातृवाक्यवत् ।
विष्वक् प्रमिमते धर्मं विश्वेशं तमधीमहे ॥

धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात् ।

अत्र प्रमाणे प्रथमाध्याये प्रतिपाद्ये चोदनाप्रामाण्यमाद्येन पादेनाभ्यधिष्महि । द्वितीयेन च तदितरभागस्येति विध्यर्थवादमन्त्रात्मकस्य वेदस्य प्रामाण्यं सिद्धम् ।

अथेदानीं धर्मप्रमाणत्वाविशेषात्तदविरुद्धेषु वैदिकपरिगृहीतेषु पौरुषेयेषु निबन्धनेषु आचारेषु च प्रामाण्यं प्रतिपाद्यते ।

* * * *

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतौ सेश्वरमीमांसाख्ये धर्ममीमांसाभाष्ये प्रथमस्याध्यायस्य तृतीयः पादः ॥

प्रथमाध्यायश्च समाप्तः ॥

End:

अत एवेदृशविषये विपरिणतानुषङ्गं व्याचक्षते वृद्धाः । ते प्रत्ययरहितस्यैव यजुष्ट्वं सिद्धमित्याहुः । असम्बन्धिपदाव्यवधानमेव सन्निधिः पूर्वत्र तत्सत्त्वादनुषङ्गः । अत्र त्वसम्बन्धिपदव्यवधानान्नानुषङ्गः इति प्रत्युदाहरणार्थमिदं सूत्रमित्याहुः ॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु सेश्वरमीमांसाख्ये धर्ममीमांसाभाष्ये द्वितीयस्याध्यायस्य प्रथमः पादः ॥

R. No. **2348.**

Paper. 13¼ × 8¾ inches. Foll. 96. Lines, 22 in a page. Grantha. Good.

Restored in 1916–17 from the MS. described under R. No. 1860 ante.

नित्यक्रियारत्नमाला.

NITYAKRIYĀRATNAMĀLĀ.

Foll. 1*a*—95*b*. Fol. 96*b* is left blank.

By Varadarājadēśika alias Kṛṣṇadāsa Same work as that described under R. No. 1860 ante.